अर्हम्

पुव्वायरियविरइयं

चंदपण्णत्तिसुत्तं

आचार्यप्रवरश्रीमलयगिरिसूरिविरचितवृत्तिविभूषितम्

(चन्द्रप्रज्ञप्तिसूत्रम्)

प्रथमो भागः

प्रेरकाः

परमपूज्य-वैराग्यदेशनादक्ष-आचार्यदेव-श्रीमद्विजय-

हेमचन्द्रसूरीश्वराः

प्रकाशकः

श्रीमहावीर जैन विद्यालय

जैनआगमग्रन्थमाला ग्रन्थाङ्कः - ११(१)

पुव्वायरियविरइयं

चंदपण्णत्तिसुत्तं

(चन्द्रप्रज्ञप्तिसूत्रम्)

आचार्यप्रवरश्रीमलयगिरिसूरिविरचितवृत्तिविभूषितम्

प्रथमो भागः

* प्रेरकाः *

परमपूज्य-वैराग्यदेशनादक्ष-आचार्यदेव-श्रीमद्विजय-

हेमचन्द्रसूरीश्वराः

* संशोधकः सम्पादकश्च *

परमपूज्य-श्रीसीमन्धरजिनोपासक-आचार्यदेव-श्रीमद्विजय-हेमचन्द्रसूरीश्वराणां

शिष्याणुः मुनिरत्नबोधिविजयः

* प्रकाशकः *

श्रीमहावीरजैनविद्यालयः, मुम्बई

❋ ... *कृपावर्षा* ... ❋

सिद्धान्तमहोदधि-सच्चारित्रचूडामणि-सुविशालगच्छसर्जक-आचार्यदेवश्रीमद्विजय-**प्रेमसूरीश्वराः**

न्यायविशारद-वर्धमानतपोनिधि-गच्छाधिपति-आचार्यदेवश्रीमद्विजय-**भुवनभानुसूरीश्वराः**

समतासागर-संयमसमर्पणादिगुणगणार्णव-पन्न्यासप्रवरश्री-**पद्मविजयगणिवराः**

❋ ... *आज्ञाप्रसादः* ... ❋

सिद्धान्तदिवाकर-गीतार्थगच्छाधिपति-आचार्यदेवश्रीमद्विजय-**जयघोषसूरीश्वराः**

* **प्रथम संस्करण** : वी.सं.२५३९, वि.सं. २०६९, इ.स.२०१३

* **नकल** : ५००

* **मूल्य** : ५०० रूपये

* **प्रकाशक** : श्री महावीर जैन विद्यालय
मानद मंत्रीओ, अगस्त क्रांति मार्ग, मुंबई - ४०० ०३६.

* **प्राप्तिस्थान** : **(१) प्रकाशक**

(२) श्री महावीर जैन विद्यालय
श्री कच्छी विशा ओसवाल जैन महाजन वाडी,
९९/१०१, केशवजीनायक रोड, दूसरा माला,
चींच बंदर, मुंबई-९.

(३) श्री महावीर जैन विद्यालय
पालडी बस स्टेन्ड के पास, पालडी,
अमदावाद-३८०००७.

(४) सरस्वती पुस्तक भंडार
हाथीखाना, रतनपोल, अमदावाद-१.

(५) आ. ॐकारसूरिज्ञानमंदिर
सुभाष चोक, गोपीपुरा, सूरत.

टाईपसेटींग : **श्रीपार्श्व कोम्प्युटर्स**, ५८, पटेल सोसायटी, जवाहरचोक, मणिनगर, अमदावाद-८.

प्रिन्टर्स : **शिवकृपा ओफसेट प्रिन्टर्स**, जे-के ब्लोक, रवि एस्टेट, दूधेश्वर, अमदावाद-४.

Jaina-Āgama-Series No. 11 (1)

CHANDAPANNATTI SUTTAṀ

(CHANDRAPRAGNAPTI SŪTRAṀ)

With The Commentary By

ĀCHĀRYA ŚRI MALAYGIRISŪRI MAHĀRĀJA

PART I

EDITOR

DISCIPLE OF

ĀCHĀRYADEV ŚRIMAD VIJAY HEMCHANDRASŪRĪSHWAR MAHĀRĀJA

MUNI RATNABODHI VIJAY

Publisher

ŚRĪ MAHĀVĪRA JAINA VIDYĀLAYA

MUMBAI 400 036

First Edition :

Vīra Erā 2539 / Vikram Erā 2069 / A.D. 2013

Copies : 500

Price : Rs. 500

Published by :

The Secretary,

ŚRĪ MAHĀVĪRA JAINA VIDYĀLAYA

August Kranti Marg, Mumbai-400 036.

Available At :

(1) **Publisher**

(2) **ŚRĪ MAHĀVĪRA JAINA VIDYĀLAYA**
Shri Katchi Visha Oswal Jain Mahajan Wadi,
99/101, Keshavji Nayak Road, 2nd Floor, Chinch Bunder, Mumbai-9.

(3) **ŚRĪ MAHĀVĪRA JAINA VIDYĀLAYA**
Near Paldi Bus Stand, Paldi, Ahmedabad-380007.

(4) **Saraswati Pustak Bhandar**
112, Hathikhana, Ratanpole, Ahmedabad, Gujarat.
Pin-380001. Tel. : 079-25356692

(5) **Ach.Omkarsuri Gyanmandir**
Subhash chowk, Gopipura, Surat.

Composed By : **Shree Parshva Computers,** 58, Patel Society, Jawahar Chowk, Maninagar, Ahmedabad-8.

Printed By : **Shivkrupa Offset Printers,** J-K Block, Ravi Estate, Dudheshwar, Ahmedabad-4.



જૈન આગમોના સંશોધિત-સંપાદિત સંસ્કરણ તૈયાર કરવાનો પ્રારંભ વિ.સં. ૨૦૧૭ માં આગમપ્રભાકર મુનિશ્રી **પુણ્યવિજયજી** મ.સા. આદિ દ્વારા થયો. તેઓશ્રીના કાળધર્મ પછી આગમગ્રંથોનું સંપાદનકાર્ય આગમપ્રજ્ઞ મુનિશ્રી **જંબૂવિજયજી** મ.સા.એ આગળ વધાર્યું. તેઓશ્રીના કાળધર્મ પછી આ જવાબદારી શાસ્ત્રસંશોધક આ.વિજય **મુનિચન્દ્રસૂરિ** મ.સા. અને શ્રુતભાસ્કર આ.શ્રી **ધર્મધુરંધરસૂરિ** મ.સા.એ સ્વીકારી.

આ.શ્રી મુનિચન્દ્રસૂરિજી સંપાદિત ઉવવાઇસુત્તં ટીકા સાથે ગયા વર્ષે પ્રગટ થયું છે.

વૈરાગ્યદેશનાદક્ષ પૂ.આ.ભ.શ્રી **હેમચન્દ્રસૂરિ** મ.સા.ના વિદ્વાન શિષ્યરત્ન મુનિશ્રી રત્નબોધિવિજય મ.સા. **શ્રીચન્દ્રપ્રજ્ઞપ્તિઉપાંગઆગમગ્રંથ**નું અદ્યાવધિ અપ્રગટ આ.શ્રી. **મલયગિરિસૂરિ** મ.ની **ટીકા** સાથે સંપાદન કરી રહ્યા છે અને શ્રીજિનશાસનઆરાધનાટ્રસ્ટ દ્વારા તેનું પ્રકાશન થવાનું છે એવા સમાચાર આ.મુનિચન્દ્રસૂરિ મ.સા.ને મળતાં તેઓએ પૂ.આ.ભ. શ્રી હેમચન્દ્રસૂરિ મ.સા.ને વિનંતી કરી કે આ ગ્રંથ શ્રીમહાવીરજૈનવિદ્યાલયની જૈન આગમ ગ્રંથમાલામાં પ્રકાશિત કરવા માટે આપશ્રી સંમતિ આપો. પૂજ્યશ્રીએ સહર્ષ સંમતિ આપતાં અમો હર્ષાન્વિત બન્યા. શ્રીચન્દ્રપ્રજ્ઞપ્તિ આગમગ્રંથનું અદ્યાવધિ અપ્રગટ ટીકા સાથે પ્રકાશન કરતાં અમે ખૂબ આનંદ અનુભવીએ છીએ.

આ ગ્રંથનું સુંદર ટાઈપસેટીંગ કરનાર શ્રીપાર્શ્વ કોમ્પ્યુટર્સવાળા વિમલભાઈને આ પ્રસંગે ધન્યવાદ આપીએ છીએ.

લિ.

પ્રકાશક

આવકાર

શ્રીચન્દ્રપ્રજ્ઞપ્તિઉપાંગ ગ્રંથ આ. **શ્રીમલયગિરિસૂરિ** મ.ની ટીકા સાથે પ્રથમવાર પ્રકટ થાય છે. તે ઘણા હર્ષનો વિષય છે.

આગમપ્રભાકર મુનિશ્રી **પુણ્યવિજયજી** મ.સા.એ પ્રારંભ કરેલી અને આગમપ્રજ્ઞ મુનિશ્રી **જંબૂવિજયજી** મ.સા.એ આગળ વધારેલી આ જૈનાગમગ્રંથમાલામાં બાકી રહેતા આગમ ગ્રંથો સંપાદિત કરવાનું મેં અને આ. **ધર્મધુરંધરસૂરિજી**એ સ્વીકાર્યું. ઉપાંગગ્રંથો સંપાદન કરવાનો મેં પ્રારંભ કર્યો અને બાકી રહેતા અંગગ્રંથોનું કાર્ય આ. ધર્મધુરંધરસૂરિજીએ શરૂ કર્યું.

મુનિશ્રી રત્નબોધિવિજયજી મ. ચંદ્રપ્રજ્ઞપ્તિગ્રંથનું ટીકા સાથે અનેક પ્રાચીન પ્રતોના આધારે સંપાદન કરી રહ્યા છે તે જાણવા મળતાં અમે વૈરાગ્યદેશનાદક્ષ પૂ.આ.ભ. **હેમચન્દ્રસૂરિ** મ.સા.ને આ ગ્રંથના પ્રકાશનનો લાભ શ્રીમહાવીરજૈનવિદ્યાલયની જૈનાગમગ્રંથમાળાને આપવા વિનંતી કરી. પૂજ્યશ્રીએ સંમતિ આપી.

આ ગ્રંથ શ્રીજિનશાસનઆરાધનાટ્રસ્ટ દ્વારા ટકાઉ કાગળ ઉપર પણ પ્રકાશિત થઈ રહ્યો છે. ગ્રંથના સુઘડ મુદ્રણ અને ટકાઉ કાગળ, ઉત્તમ બાઈન્ડીંગ વગેરે માટે પણ પૂજ્યશ્રીનું માર્ગદર્શન મળ્યું છે. આ માટે પૂજ્યશ્રીના ઋણી છીએ.

અપ્રગટગ્રંથનું સંપાદનકાર્ય અતિ અતિ શ્રમસાધ્ય હોય છે. સંપાદકશ્રીને ખૂબ ખૂબ ધન્યવાદ. વિદ્વદ્વર્ય મુનિરાજશ્રી સૂર્યપ્રજ્ઞપ્તિ વગેરે ગ્રંથોનું પણ આવું સુંદર સંપાદન કરે એજ અભિલાષા.

લી. **પૂ.આ.ભ.શ્રી ભદ્રસૂરીશ્વરજી મ.સા.**ના વિનેય
પૂ.મુનિરાજશ્રી જિનચન્દ્ર વિ.મ.સા.ના શિષ્ય
આ.વિજય **મુનિચન્દ્રસૂરિ**

ચૈત્ર સુદ ૧૩ વિ.સં. ૨૦૬૯
પ્રભુવીર જન્મકલ્યાણકદિન
શ્રી ભીલડીયાજી તીર્થ,
વિજયભદ્ર ચે. ટ્રસ્ટ ધર્મશાળા,
પાર્શ્વભક્તિનગર.

આછેરી ઝલક

એક ડોશીમાએ પોતાની ડાભડી ક્યાંક મૂકી દીધી. પછી તે તેની શોધખોળ કરવા લાગ્યા. પણ ઓરડામાં અંધારું હતું. તેથી ડાભડી મળી નહીં. ડોશીમા દુઃખી દુઃખી થઈ ગયા. ત્યાં તેમનો પુત્ર આવ્યો. માંને દુઃખી જોઈ તેણે કારણ પૂછ્યું. માંએ વાત કરી. દીકરાએ તરત ઓરડામાં અજવાળું કર્યું અને ડાભડી મળી ગઈ. ડોશી ખુશખુશાલ થઈ ગયા.

સંસારી જીવોના દુઃખનું કારણ એ છે કે તેઓ અજ્ઞાનના અંધકારમાં અટવાયેલા છે. જો આત્મામાં જ્ઞાનનો પ્રકાશ પથરાય તો બધા દુઃખ દૂર થાય અને બધા સુખ મળે.

અંગ્રેજીમાં પણ કહ્યું છે - *Ignorance is the most important cause of sorrow* - અજ્ઞાન એ દુઃખનું સૌથી મહત્ત્વનું કારણ છે.

સંસ્કૃત સુભાષિતમાં પણ કહ્યું છે -

वयसि गते कः कामविकारः, शुष्के नीरे कः कासारः।
क्षीणे वित्ते कः परिवारः, ज्ञाते तत्त्वे कः संसारः॥

વય વીતી ગયા પછી કામનો વિકાર નથી રહેતો, પાણી સુકાઈ ગયા પછી સરોવરનું અસ્તિત્વ નથી હોતું, ધન ગયા પછી પરિવાર નથી રહેતો અને તત્ત્વજ્ઞાન થયા પછી સંસાર નથી ટકતો.

ગુજરાતીમાં પણ કહ્યું છે-

જ્ઞાન વડુ સંસારમાં, જ્ઞાન પરમ સુખ હેત,
જ્ઞાન વિના જગ જીવડો, ન લહે તત્ત્વ સંકેત.

માત્ર જ્ઞાનથી દુઃખ દૂર નથી થતું, પણ સમ્યગ્જ્ઞાનથી દુઃખ દૂર થાય છે - **सा विद्या या विमुक्तये,** જે મુક્તિ અપાવે તે જ ખરેખર વિદ્યા છે.

અરિહંત પરમાત્માએ પોતાના કેવળજ્ઞાનમાં જગતનું વાસ્તવિક સ્વરૂપ જોયું અને દેશનાઓ દ્વારા જગતને તે બતાવ્યું. આપણા જેવા અજ્ઞાની જીવોને સમ્યગ્જ્ઞાનની પ્રાપ્તિ પ્રભુના વચનો સ્વીકારવાથી થાય છે. કહ્યું છે -

He who knows not, and knows not, that he knows not, is a fool - leave him.

He who knows, and knows not, that he knows, is asleep - awake him.

He who knows not, and knows, that he knows not, is simple - teach him.

He who knows, and knows, that he knows, is wise - follow him.

જે અજ્ઞાની છે અને જાણતો નથી કે પોતે અજ્ઞાની છે, તે મૂરખ છે, તેને છોડી દો. જે જ્ઞાની છે અને જાણતો નથી કે પોતે જ્ઞાની છે, તે સૂતેલો છે, તેને જગાડો. જે અજ્ઞાની છે અને જાણે છે કે પોતે અજ્ઞાની છે, તે સરળ છે, તેને ભણાવો. જે જ્ઞાની છે અને જાણે છે કે પોતે જ્ઞાની છે, તે શાણો છે, તેને અનુસરો.

પ્રભુના વચનોને શબ્દોમાં ગૂંથી મહાપુરુષોએ શાસ્ત્રોની રચના કરી. મુખ્ય શાસ્ત્રોને આગમ કહેવાય છે. પૂર્વે ૮૪ આગમ હતા. હાલ ૪૫ આગમ છે. તેમાં બાર ઉપાંગ છે. તેમાંનુ એક ઉપાંગ એટલે **શ્રીચન્દ્રપ્રજ્ઞપ્તિ ઉપાંગ.**

પૂર્વે શાસ્ત્રો યાદ રખાતા અને મોઢે જ ભણાવાતા. કાળક્રમે મતિ મંદ થવાના કારણે શાસ્ત્રો તાડપત્રો અને કાગળ ઉપર લહિયાઓ દ્વારા લખાવાયા. ધીમે ધીમે કાળ પલટાયો અને મુદ્રણનો યુગ આવ્યો. હાલ શાસ્ત્રો યન્ત્રો દ્વારા મુદ્રિત થાય છે. વિવિધ હસ્તલિખિત પ્રતોનો ઉપયોગ કરી મહાત્માઓ શાસ્ત્રોનુ સંશોધન પણ કરે છે. ૪૫ આગમોમાંથી હાલ ચન્દ્રપ્રજ્ઞપ્તિ સિવાયના ૪૪ આગમો ટીકા સહિત પ્રકાશિત થઈ ગયા છે. તેમાંથી અમુક આગમોનું સંશોધન પણ થયેલ છે.

સટીક શ્રીચન્દ્રપ્રજ્ઞપ્તિ અને સટીક શ્રીસૂર્યપ્રજ્ઞપ્તિ બન્નેમાં ઘણી સમાનતા હોવાના કારણે સટીક શ્રીચન્દ્રપ્રજ્ઞપ્તિ ગ્રન્થનું સંશોધન કરી તેને પ્રકાશિત કરવાનો પુરુષાર્થ આજ સુધી લગભગ થયો નથી. અમુક મહાત્માઓએ તે માટે પુરુષાર્થ કર્યો, પણ તેઓ આ કાર્ય પુરૂ કરી ન શક્યા. એટલે મનમાં આ વાત ખટકતી હતી કે ૪૫ આગમમાંથી હાલ આપણી પાસે પ્રકાશિત થયેલ ૪૪ આગમ જ છે, ૧ આગમ અપ્રગટ છે. એટલે પૂજ્ય ગુરુદેવશ્રીની આજ્ઞા મેળવી આજ સુધી અપ્રગટ રહેલ આ ગ્રન્થને પ્રગટ કરવા માટે આ ગ્રન્થનું સંશોધનકાર્ય શરુ કર્યું. આ ગ્રન્થનું હસ્તલિખિત પ્રતોમાંથી લિપ્યંતર કરી તેનું સંશોધન કર્યું. પૂજ્યોની કૃપાથી આ કાર્ય નિર્વિઘ્ન રીતે પૂર્ણ થયું છે.

પ્રાચીનકાળમાં શ્રીચન્દ્રપ્રજ્ઞપ્તિનું 'શ્રીજ્યોતિષગણરાજપ્રજ્ઞપ્તિ' કે 'શ્રીજ્યોતિષરાજ-પ્રજ્ઞપ્તિ' આવું નામ પ્રચલિત હશે. આ બાબત મૂળગ્રંથની શરૂઆતમાં અને અંતે રચેલા

નીચેના શ્લોકો દ્વારા સ્પષ્ટ રીતે સમજી શકાય તેમ છે -

'फुडपागडविगडत्थं वोच्छं पुव्वसुयसारनीसंदं ।
सुहुमगणिणोवदिट्ठं जोइसगणरायपण्णत्तिं ॥३ ॥' (पृ.४)

'नामेण इंदभूइत्ति गोयमो वंदिऊण तिविहेणं ।
पुच्छति जिणवरवसहं जोइसरायस्स पन्नत्तिं ॥४ ॥' (पृ.५)

'इति एस पागडत्था अभव्वजणहितयदुल्लभा इणमो ।
उक्कित्तिया भगवती जोतिसरायस्स पण्णत्ती ॥१ ॥' (पृ.६१७)

હાલ આ ગ્રંથનું 'શ્રીચન્દ્રપ્રજ્ઞપ્તિ' એવું નામ પ્રચલિત છે. આ નામ મૂળગ્રંથના અંતિમ વાક્ય **'इति चंदपण्णत्ती सम्मत्ता ।'** ઉપરથી પ્રચલિત થયું હોય એમ લાગે છે.

જ્યોતિષચક્રના વિમાનો પાંચ પ્રકારના છે - ચન્દ્ર, સૂર્ય, ગ્રહ, નક્ષત્ર અને તારા. આ પાંચમાં પણ ચન્દ્ર એ જ્યોતિષચક્રનો રાજા છે. એટલે શ્રીસૂર્યપ્રજ્ઞપ્તિ પ્રગટ થઈ હોય અને શ્રીચન્દ્રપ્રજ્ઞપ્તિ પ્રગટ ન થઈ હોય એ કેમ ચાલે ? જો કે શ્રીસૂર્યપ્રજ્ઞપ્તિમાં સૂર્યસંબન્ધી વિગતો જ છે અને શ્રીચન્દ્રપ્રજ્ઞપ્તિમાં ચન્દ્રસંબંધી વિગતો જ છે એવું નથી, બન્નેમાં પાંચેય પ્રકારના જ્યોતિષ દેવો અને વિમાનોની વિગતો છે, છતા પણ ચન્દ્ર જ્યોતિષચક્રનો રાજા હોવાથી નામની અપેક્ષાએ પણ શ્રીચન્દ્રપ્રજ્ઞપ્તિ અપ્રગટ રહે એ યોગ્ય ન ગણાય. માટે આ ગ્રન્થને પ્રગટ કરવાનો પ્રયાસ કરેલ છે.

આ ગ્રન્થ પ્રશ્નોત્તર શૈલીથી રચાયેલ છે. પ્રશ્ન કરનાર અનંતતલબ્ધિનિધાન શ્રીગૌતમસ્વામીજી છે અને જવાબ આપનાર અનંતજ્ઞાનનિધાન શ્રીમહાવીરપ્રભુ છે. આ ગ્રન્થમાં કુલ ૨૦ પ્રાભૃત છે. પહેલા પ્રાભૃતમાં ૮ પ્રાભૃતપ્રાભૃત છે. બીજા પ્રાભૃતમાં ૩ પ્રાભૃતપ્રાભૃત છે. દશમા પ્રાભૃતમાં ૨૨ પ્રાભૃતપ્રાભૃત છે. ગૌતમસ્વામીજીના પ્રશ્નના જવાબમાં વીરપ્રભુ દરેક પ્રાભૃતમાં કે પ્રાભૃતપ્રાભૃતમાં પહેલા પરદર્શનીઓના મતો જણાવે છે. તેને પ્રતિપત્તિઓ કહેવાય છે. ત્યાર પછી વીરપ્રભુ દરેક પ્રાભૃત કે પ્રાભૃતપ્રાભૃતને અંતે પોતાનો મત જણાવે છે.

પહેલા પ્રાભૃતના ચોથા, પાંચમા, છટ્ઠા, સાતમા, આઠમા પ્રાભૃતપ્રાભૃતમાં અનુક્રમે છ, પાંચ, સાત, આઠ અને ત્રણ પ્રતિપત્તિઓ છે. બીજા પ્રાભૃતના ત્રણ પ્રાભૃતપ્રાભૃતમાં અનુક્રમે આઠ, બે અને ચાર પ્રતિપત્તિઓ છે. ત્રીજા પ્રભૃતમાં બાર પ્રતિપત્તિઓ છે. ચોથા પ્રાભૃતમાં ચન્દ્રસૂર્યના વિમાનના આકારસંબન્ધી સોળ

પ્રતિપત્તિઓ છે અને તાપક્ષેત્રના આકારસંબન્ધી પણ સોળ પ્રતિપત્તિઓ છે. પાંચમા પ્રાભૃતમાં વીસ પ્રતિપત્તિઓ છે. છટ્ઠા પ્રાભૃતમાં પચીસ પ્રતિપત્તિઓ છે. સાતમા પ્રાભૃતમાં વીસ પ્રતિપત્તિઓ છે. આઠમા પ્રાભૃતમાં ત્રણ પ્રતિપત્તિઓ છે. નવમા પ્રાભૃતમાં વિવિધ પ્રકારે ત્રણ, પચીસ, બે અને છન્નુ પ્રતિપત્તિઓ છે. દસમા પ્રાભૃતના પહેલા પ્રાભૃતપ્રાભૃતમાં પાંચ પ્રતિપત્તિઓ છે. દસમા પ્રાભૃતના બીજા પ્રાભૃતપ્રાભૃતથી વીસમા પ્રાભૃતપ્રાભૃત સુધીના પ્રાભૃતપ્રાભૃતોમાં અને બાવીસમા પ્રાભૃતપ્રાભૃતમાં પ્રતિપત્તિઓ નથી. દસમા પ્રાભૃતનાં એકવીસમા પ્રાભૃતપ્રાભૃતમાં પાંચ પ્રતિપત્તિઓ છે. અગ્યારમા પ્રાભૃતથી સોળમા પ્રાભૃત સુધીના પ્રાભૃતોમાં પ્રતિપત્તિઓ નથી. સત્તરમા પ્રાભૃતમાં પચીસ પ્રતિપત્તિઓ છે. અઢારમા પ્રાભૃતમાં પચીસ પ્રતિપત્તિઓ છે. ઓગણીસમા પ્રાભૃતમાં બાર પ્રતિપત્તિઓ છે. વીસમા પ્રાભૃતમાં અનુભાવના વિષયમાં બે પ્રતિપત્તિઓ છે અને રાહુકર્મના વિષયમાં બે પ્રતિપત્તિઓ છે.

પ્રાભૃત, પ્રાભૃતપ્રાભૃત અને પ્રતિપત્તિઓનો કોઠો નીચે મુજબ છે -

પ્રાભૃત	પ્રાભૃતપ્રાભૃત	પ્રતિપત્તિ	પ્રાભૃત	પ્રાભૃતપ્રાભૃત	પ્રતિપત્તિ
૧ લુ	૧ લુ	-	૫ મુ	-	૨૦
	૨ જુ	-	૬ ઠ્ઠુ	-	૨૫
	૩ જુ	-	૭ મુ	-	૨૦
	૪ થુ	૬	૮ મુ	-	૩
	૫ મુ	૫	૯ મુ	-	૩,૨૫,૨,૯૬
	૬ ઠ્ઠુ	૭	૧૦ મુ	૧ લુ	૫
	૭ મુ	૮		૨ જુ	-
	૮ મુ	૩		૩ જુ	-
૨ જુ	૧ લુ	૮		૪ થુ	-
	૨ જુ	૨		૫ મુ	-
	૩ જુ	૪		૬ ઠ્ઠુ	-
૩ જુ	-	૧૨		૭ મુ	-
૪ થુ	-	૧૬,૧૬		૮ મુ	-

પ્રાભૃત	પ્રાભૃતપ્રાભૃત	પ્રતિપત્તિ	પ્રાભૃત	પ્રાભૃતપ્રાભૃત	પ્રતિપત્તિ
૧૦ મુ	૯ મુ	-	૧૦ મુ	૨૧ મુ	૫
	૧૦ મુ	-		૨૨ મુ	-
	૧૧ મુ	-	૧૧ મુ	-	-
	૧૨ મુ	-	૧૨ મુ	-	-
	૧૩ મુ	-	૧૩ મુ	-	-
	૧૪ મુ	-	૧૪ મુ	-	-
	૧૫ મુ	-	૧૫ મુ	-	-
	૧૬ મુ	-	૧૬ મુ	-	-
	૧૭ મુ	-	૧૭ મુ	-	૨૫
	૧૮ મુ	-	૧૮ મુ	-	૨૫
	૧૯ મુ	-	૧૯ મુ	-	૧૨
	૨૦ મુ	-	૨૦ મુ	-	૨,૨

પહેલા પ્રાભૃતમાં સૂર્ય કેટલા મંડલોમાં એકવાર જાય છે ? અને કેટલા મંડલોમાં બે વાર જાય છે ? એ બતાવ્યું છે. બીજા પ્રાભૃતમાં સૂર્ય તીચ્છું પરિભ્રમણ કેવી રીતે કરે છે ? એ સ્પષ્ટ કર્યું છે. ચન્દ્ર અને સૂર્ય કેટલા ક્ષેત્રને પ્રકાશિત કરે છે ? એ બાબત ત્રીજા પ્રાભૃતમાં બતાવી છે. ચન્દ્ર-સૂર્યના વિમાનો ક્યા આકારે રહેલા છે ? અને તેમના તાપક્ષેત્રનો આકાર કેવો છે ? એનું સ્પષ્ટીકરણ ચોથા પ્રાભૃતમાં કર્યું છે. પાંચમા પ્રાભૃતમાં સૂર્યનો પ્રકાશ ક્યાં અટકે છે ? એ બતાવ્યું છે. છટ્ઠા પ્રાભૃતમાં સૂર્યનો પ્રકાશ કેટલો સમય અવસ્થિત રહે છે, વધે છે અને ઘટે છે ? એ બતાવ્યું છે. સાતમા પ્રાભૃતમાં સૂર્યના પ્રકાશથી ક્યા પુદ્ગલો સ્પર્શાય છે ? તે જણાવ્યું છે. આઠમા પ્રાભૃતમાં સૂર્યનો ઉદય કેવી રીતે થાય છે ? તે સમજાવ્યું છે. નવમા પ્રાભૃતમાં સૂર્યના ઉદય અને અસ્ત વખતે પુરુષના પડછાયાનું પ્રમાણ કેટલું હોય છે ? તે જણાવ્યું છે. દશમા પ્રાભૃતમાં ચન્દ્ર-સૂર્યનો નક્ષત્રની સાથે યોગ શી રીતે થાય છે ? એ બતાવ્યું છે.

પહેલા પ્રાભૃતમાં આઠ પ્રાભૃતપ્રાભૃત છે. તેમાં પહેલા પ્રાભૃતપ્રાભૃતમાં દિવસ અને રાત્રીના મુહૂર્ત્તોની વૃદ્ધિ-હાનિ બતાવી છે. બીજા પ્રાભૃતપ્રાભૃતમાં બન્ને સૂર્યોની અર્ધમંડલવ્યવસ્થા સમજાવી છે. ત્રીજા પ્રાભૃતપ્રાભૃતમાં એક સૂર્ય બીજા સૂર્યે ચરેલા કેટલા

ક્ષેત્રને ચરે છે ? એ કહ્યું છે. ચોથા પ્રાભૃતપ્રાભૃતમાં બન્ને સૂર્યો પરસ્પર કેટલું અંતર રાખીને ચરે છે ? એ જણાવ્યું છે. પાંચમા પ્રાભૃતપ્રાભૃતમાં જંબૂદ્વીપમાં અને લવણસમુદ્રમાં કેટલું અવગાહીને સૂર્ય ચાર ચરે છે ? એ સ્પષ્ટ કર્યું છે. છટ્ઠા પ્રાભૃતપ્રાભૃતમાં એક-એક અહોરાત્રમાં એક એક સૂર્ય કેટલું ક્ષેત્ર છોડીને ચાર ચરે છે ? એનું વર્ણન કર્યું છે. સાતમા પ્રાભૃતપ્રાભૃતમાં ચન્દ્ર વગેરેના વિમાનોનો આકાર કહ્યો છે. આઠમા પ્રાભૃતપ્રાભૃતમાં મંડલોની પહોળાઈ બતાવી છે.

બીજા પ્રાભૃતમાં ત્રણ પ્રાભૃતપ્રાભૃત છે. તેમાં પહેલા પ્રાભૃતપ્રાભૃતમાં સૂર્યના ઉદય અને અસ્તનું નિરૂપણ કર્યું છે. બીજા પ્રાભૃતપ્રાભૃતમાં એક મંડલમાંથી બીજા મંડલમાં સૂર્યનું સંક્રમણ કેવી રીતે થાય છે ? એ બતાવ્યું છે. ત્રીજા પ્રાભૃતપ્રાભૃતમાં દરેક મંડલમાં સૂર્યની મુહૂર્તગતિ બતાવી છે.

દશમા પ્રાભૃતમાં બાવીશ પ્રાભૃતપ્રાભૃત છે. તેમાં પહેલા પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોનો ક્રમ બતાવ્યો છે. બીજા પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોનો ચન્દ્રની સાથે યોગ કેટલા મુહૂર્ત સુધી થાય છે ? એ સમજાવ્યું છે. ત્રીજા પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોના પૂર્વભાગ વગેરે પ્રકારો બતાવ્યા છે. ચોથા પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોના ચન્દ્રની સાથેના યોગની શરૂઆત ક્યારે થાય છે ? એ જણાવ્યું છે. પાંચમા પ્રાભૃતપ્રાભૃતમાં કુલો, ઉપકુલો અને કુલોપકુલો કહ્યા છે. છટ્ઠા પ્રાભૃતપ્રાભૃતમાં ક્યા નક્ષત્રો પૂર્ણિમાઓ અને અમાવાસ્યાઓને પૂર્ણ કરે છે ? એ બતાવ્યું છે. સાતમા પ્રાભૃતપ્રાભૃતમાં કઈ પૂર્ણિમા કે અમાવાસ્યાની પૂર્વે કઈ અમાવાસ્યા કે પૂર્ણિમા હોય છે ? તે સમજાવ્યું છે. આઠમા પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોના આકારો બતાવ્યા છે. નવમા પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોનો તારાઓનો પરિવાર કહ્યો છે. દશમા પ્રાભૃતપ્રાભૃતમાં ક્યા મહિનામાં ક્યા નક્ષત્રો કેટલા દિવસો પૂરા કરે છે ? એ સમજાવ્યું છે. અગ્યારમાં પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોને આશ્રયીને ચન્દ્રના માર્ગો બતાવ્યા છે. બારમા પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોના અધિપતિ દેવોના નામો બતાવ્યા છે. તેરમા પ્રાભૃતપ્રાભૃતમાં મુહૂર્તોના નામો કહ્યા છે. ચૌદમા પ્રાભૃતપ્રાભૃતમાં દિવસો અને રાત્રીઓના નામો કહ્યા છે. પંદરમા પ્રાભૃતપ્રાભૃતમાં તિથિઓના સ્વરૂપ અને નામો કહ્યા છે. સોળમા પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોના ગોત્ર બતાવ્યા છે. સત્તરમા પ્રાભૃતપ્રાભૃતમાં ક્યા નક્ષત્રમાં શરૂ કરેલું કાર્ય શેનું ભોજન કરવાથી વિઘ્ન વિના સિદ્ધ થાય ? એ સમજાવ્યું છે. અઢારમા પ્રાભૃતપ્રાભૃતમાં ક્યા નક્ષત્રો ચન્દ્ર અને સૂર્યની સાથે કેટલા ચારો ચરે છે ? એ જણાવ્યું છે. ઓગણીસમા પ્રાભૃતપ્રાભૃતમાં માસોના નામો કહ્યા છે. વીશમા પ્રાભૃતપ્રાભૃતમાં પાંચ પ્રકારના વર્ષો

બતાવ્યા છે. એકવીશમાં પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોના દ્વારો કહ્યા છે. બાવીશમાં પ્રાભૃતપ્રાભૃતમાં નક્ષત્રોનું સ્વરૂપ સમજાવ્યું છે.

પ્રભુવીરે પોતાના અનંત કેવળજ્ઞાનમાં જોઈને આજથી ૨૫૦૦ વર્ષ પૂર્વે આ જગતનું સ્વરૂપ બતાવ્યું હતું. પ્રભુ પછી થયેલા મહાપુરુષોએ તેને આ ચન્દ્રપ્રજ્ઞપ્તિ જેવા શાસ્ત્રો રૂપે ગુંથ્યુ. પ્રભુવીરે જગતનું સ્વરૂપ આવું બતાવ્યું છે - 'આ બ્રહ્માંડમાં બે વસ્તુઓ છે - લોક અને અલોક. અલોક અનંત છે. લોક પંચાસ્તિકાયાત્મક છે. તે ૧૪ રાજ લાંબો અને ૭ રાજ પહોળો છે. તે બે હાથ કેડે રાખી અને બે પગ પહોળા રાખીને ઊભેલા મનુષ્યના આકારનો છે. તેમાં મધ્યમાં તિચ્છાલોક છે, ઉપર ઊર્ધ્વલોક છે, નીચે અધોલોક છે. તિચ્છાલોકની મધ્યમાં મેરુપર્વત છે. તિચ્છાલોક સપાટ છે. તિચ્છાલોકમાં અસંખ્ય દ્વીપ-સમુદ્રો છે. તેમાંથી અઢી દ્વીપ અને બે સમુદ્રને મનુષ્યલોક કહેવાય છે. પૃથ્વીના સમભૂતલથી ઉપર ૭૯૦ યોજન ગયા પછી ચન્દ્ર-સૂર્ય વગેરેના જ્યોતિષવિમાનો આવેલા છે. આ જ્યોતિષવિમાનો મેરુ પર્વતની ચારે બાજુ પરિભ્રમણ કરે છે. તેથી રાત-દિવસ થાય છે અને ઋતુઓ બદલાય છે.' **પૂજ્ય મલયગિરિ મહારાજે ચન્દ્રપ્રજ્ઞપ્તિના બીજા પ્રાભૃતના પ્રથમ પ્રાભૃતપ્રાભૃતની ટીકામાં પાના નં.૧૦૦** ઉપર કહ્યું છે કે, 'પૃથ્વીને ગોળ માનવાનો મત હાલ અન્યદર્શનીઓમાં પ્રસિદ્ધ છે.' એટલે કે પૃથ્વીને ગોળ માનવાનો મત પ્રભુવીરનો નથી, અન્ય દર્શનીઓનો છે. તે પાઠ આ પ્રમાણે છે -

'तन्मतेन हि भूरियं गोलाकारा लोकोऽपि च गोलाकारतया व्यवस्थितः। इदं च सम्प्रति तीर्थान्तरीयेषु विजृम्भते। ततस्तद्गतपुराणशास्त्रादेतत्सम्यगवसेयम्।'

શુક્લપક્ષમાં ચન્દ્રની વૃદ્ધિ કેમ થાય છે ? કૃષ્ણપક્ષમાં ચન્દ્રની હાનિ કેમ થાય છે ? રાત-દિવસ નાના-મોટા કેમ થાય છે ? પૃથ્વીના સમભૂતલથી કેટલું ઉપર જતા જ્યોતિષના કયા વિમાનો આવેલા છે ? ચન્દ્ર-સૂર્ય-ગ્રહ-નક્ષત્ર-તારા કેટલા છે ? વરસ કેટલા પ્રકારના છે ? કયા વરસમાં કેટલા દિવસ હોય છે ? ગ્રહણ કેવી રીતે થાય છે ? તિથિની ક્ષય-વૃદ્ધિ શી રીતે થાય છે ? અધિકમાસ શી રીતે થાય છે ? નક્ષત્ર કેટલા છે ? કયા નક્ષત્ર સાથે ચન્દ્ર-સૂર્યનો કેટલો સમય યોગ હોય છે ? પૂનમે અને અમાસે ચન્દ્ર-સૂર્યના યોગ કયા નક્ષત્ર સાથે હોય છે ? કયા નક્ષત્રમાં શરૂ કરેલું કાર્ય શું ખાવાથી વિઘ્ન વિના સિદ્ધ થાય છે ? દિવસની તિથિ અને રાત્રીની તિથિના નામ કયા છે ? દિવસના નામ કયા છે ? રાત્રિના નામ કયા છે ? મુહુર્તના નામ કયા છે ? માસના નામ કયા છે ? વગેરે જાણવા

માટે આ ચન્દ્રપ્રજ્ઞપ્તિનો સાંગોપાંગ અભ્યાસ કરવો જરૂરી છે. આધુનિક ભૂગોળની ખોટી માન્યતાનો જે કચરો મનમાં પેસી ગયો છે તે આ ગ્રન્થના અભ્યાસ બાદ દૂર થશે અને પ્રભુના વચન ઉપર શ્રદ્ધા અને બહુમાન થશે.

જેઓ એમ માને છે કે ચન્દ્ર-સૂર્ય-ગ્રહ-નક્ષત્રોની મનુષ્યના જીવન ઉપર કોઈ અસર નથી, તેમને **મૂળકારે ૧૯મા પ્રાભૃતમાં પાના નં.૫૭૪** ઉપર શિખામણ આપતા કહ્યું છે- **'रयणियरदिणयराणं नक्खत्ताणं महग्गहाणं च । चारविसेसेण भवे सुहदुक्खविही मणुस्साणं ॥२१॥'** અર્થ - ચન્દ્ર-સૂર્ય-નક્ષત્ર-મહાગ્રહોના ચારથી મનુષ્યોના જીવનમાં સુખ-દુઃખ આવે છે. મૂળકારની વાતને સ્પષ્ટ કરતા **ટીકાકારશ્રી પાના નં. ૫૮૧** ઉપર જણાવે છે - **'द्विविधानि सन्ति सदा मनुष्याणां कर्म्माणि - तद्यथा - शुभवेद्यानि अशुभवेद्यानि च। कर्मणां च सामान्यतो विपाकहेतवः पञ्च,तद्यथा- द्रव्यं क्षेत्रं कालो भावो भवश्च। उक्तञ्च - 'उदयक्खयक्खओवसमोवसमा जं च कम्मणो भणिया। दव्वं खेत्तं कालं भावं च भवं च संपप्प॥९४९॥' (धर्मसङ्ग्रहणी) शुभवेद्यानाञ्च कर्म्मणां प्रायः शुभद्रव्य-क्षेत्रादिसामग्री विपाकहेतुरशुभवेद्यानामशुभद्रव्यक्षेत्रादिसामग्री, ततो येषां जन्म-नक्षत्रादिविरोधी चन्द्रसूर्यादीनां चारो भवति तदा तेषां प्रायो यान्यशुभवेद्यानि कर्म्माणि तानि तथाविधां विपाकसामग्रीमवाप्य विपाकमायान्ति, विपाकमागतानि च शरीररोगोत्पादनेन धनहानिकरणतो वा प्रियविप्रयोगजननेन कलहसम्पादनतो वा दुःखमुत्पादयन्ति । यदा च येषां जन्मनक्षत्राद्यनुकूलश्चन्द्रादीनां चारस्तदा तेषां प्रायो यानि शुभवेद्यानि कर्म्माणि तानि तां तथाविधां विपाकसामग्रीमधिगम्य विपाकं प्रपद्यन्ते, प्रपन्नविपाकानि च तानि शरीरनीरोगतासम्पादनतो धनवृद्धिकरणेन वा वैरोपशमतः प्रियसम्प्रयोगसम्पादनतो वा यदि वा प्रारब्धाभीष्टप्रयोजननिष्पत्तिकरणतः सुखमुपजनयन्ति । अत एव महीयांसः परमविवेकिनोऽल्पमपि प्रयोजनं शुभतिथिनक्षत्र-मुहूर्त्तादावारभन्ते न तु यथाकथञ्चन। अत एव च जिनानामप्याज्ञा प्रव्राजनादिकमधि-कृत्येत्थमवर्त्तिष्ट यथा शुभक्षेत्रे शुभां दिशमभिमुखीकृत्य शुभे तिथिनक्षत्रमुहूर्त्तादौ प्रव्राजनव्रतारोपणादिकं कर्त्तव्यं नान्यथा । तथा चोक्तं पञ्चवस्तुके - 'एसा जिणाणमाणा खेत्ताइया य कम्मुणो भणिया। उदयाइकारणं जं तम्हा सव्वत्थ जइयव्वं॥११४॥'**

ભાવાર્થ - 'મનુષ્યોના કર્મો બે પ્રકારના હોય છે - શુભ અને અશુભ. સામાન્યથી કર્મના ઉદયના પાંચ કારણ છે - દ્રવ્ય, ક્ષેત્ર, કાળ,ભાવ અને ભવ. શુભકર્મના ઉદયમાં

કારણભૂત શુભદ્રવ્યક્ષેત્રાદિ સામગ્રી છે અને અશુભકર્મના ઉદયમાં કારણભૂત અશુભદ્રવ્યક્ષેત્રાદિ સામગ્રી છે. તેથી જ્યારે ચન્દ્ર-સૂર્ય વગેરેનો ચાર જેમના જન્મનક્ષત્ર વગેરેને વિરોધી હોય ત્યારે તેવા પ્રકારની સામગ્રીને પામીને તેમના અશુભકર્મો ઉદયમાં આવે છે અને ઉદયમાં આવેલા તેઓ શરીરમાં રોગ પેદા કરીને, ધનની હાનિ કરીને, પ્રિયનો વિયોગ કરાવીને કે ઝઘડો કરાવીને દુઃખ ઉત્પન્ન કરે છે. જ્યારે ચન્દ્ર વગેરેનો ચાર જેમના જન્મનક્ષત્ર વગેરેને અનુકૂળ હોય છે ત્યારે તેવા પ્રકારની સામગ્રી પામીને તેમના પ્રાયઃ શુભકર્મો ઉદયમાં આવે છે અને ઉદયમાં આવેલા તેઓ શરીરને નીરોગી કરીને, ધનની વૃદ્ધિ કરીને, વૈર શમાવીને, પ્રિયનો સંયોગ કરાવીને શરૂ કરેલ શુભ કાર્યને પૂર્ણ કરાવીને સુખ ઉત્પન્ન કરે છે. માટે જ પરમ વિવેકી એવા મહાપુરુષો નાના પણ કાર્યને શુભ તિથિ, નક્ષત્ર, મુહુર્ત્ત વગેરેમાં શરૂ કરે છે, ગમે તેમ નહીં. માટે જ ભગવાનની પણ આ આજ્ઞા છે કે દીક્ષા, વડીદીક્ષા વગેરે શુભ કાર્યો શુભ ક્ષેત્રમાં, શુભ દિશા સન્મુખ, શુભ તિથિ-નક્ષત્ર-મુહૂર્ત્તમાં કરવા, અન્ય રીતે નહીં. **પંચવસ્તુક**માં પણ આ જ વાત કહી છે કે, 'આ ભગવાનની આજ્ઞા છે - જે કારણથી ક્ષેત્ર વગેરે કર્મના ઉદય વગેરેના કારણ છે તે કારણથી બધે યત્ન કરવો.''

ઘણાંને તિથિ એટલે શું ? એની ખબર હોતી નથી. તિથિનું સ્વરૂપ **પૂજ્ય મલયગિરિ મહારાજે દશમા પ્રાભૃતના પંદરમા પ્રાભૃતપ્રાભૃતની ટીકામાં પાના નં.૩૧૯-૩૨૧** ઉપર આ પ્રમાણે બતાવ્યું છે -

'दिवसेभ्यस्तिथीनां कः प्रतिविशेषो येनैता पृथक् पृच्छ्यन्ते ? उच्यते, इह सूर्यनिष्पादिता अहोरात्राश्चन्द्रनिष्पादितास्तिथयः। तत्र चन्द्रमसा तिथयो निष्पाद्यन्ते वृद्धिहानिभ्याम्। तथा चोक्तं- 'तं रययकुमुयसरिसप्पभस्स चंदस्स रातिसुभगस्स। लोए तिहित्ति निययं भन्नइ वुड्ढीए हाणीए॥११०॥' (जो.प.) ते च वृद्धिहानी चन्द्रमण्डलस्य न स्वरूपतः किन्तु राहुविमानावरणानावरणकृते। तथाहि- इह द्विविधो राहुः, तद्यथा - (पर्वराहुः ध्रुवराहुश्च। तत्र यः) पर्व्वराहुस्तद्गता चिन्ता अत्रानुपयोगिनीत्यग्रे वक्ष्यते, क्षेत्रसमासटीकायां वा कृतेति ततोऽवधार्या। यस्तु ध्रुवराहुस्तस्य विमानं कृष्णं, तच्च चन्द्रमण्डलस्याऽधस्ताच्चतुरङ्गुलमसम्प्राप्तं [भवत तं] (सत्) चारं चरति। तत्र चन्द्र-मण्डलं बुद्ध्या द्वाषष्टिसङ्ख्यैर्भागैः परिकल्प्यते, परिकल्प्य च तेषां भागानां पञ्चदशभिर्भागो ह्रियते, लब्धाश्चत्वारो द्वाषष्टिभागाः, शेषौ द्वौ भागौ तिष्ठतः, तौ

च सदाऽनावृत्तौ, एषा किल चन्द्रमसः षोडशी कलेति प्रसिद्धिः। तत्र कृष्णपक्षे प्रतिपदि ध्रुवराहुविमानं कृष्णं चन्द्रमण्डलस्याधोभागेन चतुरङ्गुलमसम्प्राप्तं सत् चारं चर[ति](त्) आत्मीयेन पञ्चदशेन (भागेन) द्वौ द्वाषष्टिभागौ सदाऽनावार्यस्वभावौ मु[क्ता](क्त्वा) शेषद्वाषष्टि(भाग)सत्कषष्टिभागात्मकस्य चन्द्रमण्डलस्य [च] एकं (च)-तु[भा](र्भा)गात्मकं पञ्चदशभागमावृणोति, द्वितीयस्यामात्मीयाभ्यां द्वाभ्यां पञ्चदश-भागाभ्यां द्वौ पञ्चदशभागौ, तृतीयस्या[आ](मा)त्मीयैस्त्रिभिः पञ्चदशभागैस्त्रीन् पञ्च-दशभागान्, एवं यावदमावास(या)यां पञ्चदशभागानावृणोति, ततः शुक्लपक्षे प्रतिपदि एकं पञ्चदशभागं प्रकटीकरोति, द्वितीयस्यां द्वौ पञ्चदशभागौ, तृतीयस्यां त्रीन्पञ्च-दशभागान्, एवं यावत्पञ्चदश्यां पञ्चदशभागा[न्](न)नावृतान् करोति, तदा च सर्वात्मना परिपूर्णं चन्द्रमण्डलं लोके प्रकटं भवति। वक्ष्यति चामुमर्थमग्रेऽपि सूत्रकृत्-'तत्थ णं जे से धुवराहू से णं बहुलपक्खपडिवये पन्नरसयभागेणं' (पृष्ठ ६०७) इत्यादिना ग्रन्थेन। तत्र यावता कालेन कृष्णपक्षे षोडशो भागो द्वाषष्टिभाग-सत्कचतुर्भागात्मको हानिमुपगच्छति स तावान् कालविशेषस्तिथिरित्युच्यते। तथा यावता कालेन शुक्लपक्षे षोडशो भागो द्वाषष्टिभागसत्क(भाग)चतुष्टयप्रमाणः परिवर्द्धते तावत्प्रमाणकालविशेषस्तिथिर्भवति। उक्तञ्च - 'सोलसभागे काऊण उडुव-[यं](इं) हायएत्थ पन्नरसं। तत्तियमित्ते भागे पुणो वि परिवड्ढए जोण्हा॥१११॥ कालेण जेण हायइ सोलसभागो उ सा तिही होइ। तह चेव य वुड्ढीए एवं तिहिणो समुप्पत्ती॥११२॥' (जो.प.) अत्र 'जोण्हा' इति ज्योत्सना शुक्लपक्ष इत्यर्थः। शेषं सुगमम्। अयञ्च पूर्व्वाचार्यपरम्पराऽऽयात उपनिषदुपदेशः- अहोरात्रस्य द्वाषष्टिभाग-प्रविभक्तस्य य एकषष्टिभागस्तावत्प्रमाणा तिथिरिति। अथाहोरात्रः त्रिंशत्मुहूर्त्त-प्रमाणः सु[वर्णि](प्रती)तः, प्रागेव सूत्रकृता तस्य तावत्प्रमाणतयाऽभिधानात्, तिथिस्तु किम्मुहूर्त्तप्रमाणेति ? उच्यते, परिपूर्णा एकोनत्रिंशन्मुहूर्त्ता एकस्य च मुहूर्त्तस्य द्वात्रिंशत् द्वाषष्टिभागाः, उक्तञ्च 'अउणत्तिसं पुन्ना उ मुहुत्ता सोमतो तिही होइ। भागा वि य बत्तीसं बावट्ठिकएणं च्छेएणं॥११६॥' (जो.प.) कथमेतदवसीयते ? इति चेत्, उच्यते, इह अहोरात्रस्य द्वाषष्टिभागीकृतस्य सत्का ये एकषष्टिभागास्तावत्प्रमाणा तिथिरित्युक्तम्। ततः एकषष्टिस्त्रिंशता गुण्यते जातान्यष्टादशशतानि त्रिंशदधिकानि

१,८३० । एते च किल द्वाषष्टिभागीकृतसकलतिथिगतमुहूर्त्तसत्का अंशाः। ततो मुहूर्त्ता-ऽऽनयनार्थं तेषां द्वाषष्ट्या भागो ह्रियते, लब्धा एकोनत्रिंशत् मुहूर्त्ता द्वात्रिंशच्च द्वाषष्टि-भागा मुहूर्त्तस्य । एतावत्प्रमाणा तिथिः। एतावता हि कालेन चन्द्रमण्डलगतः पूर्व्वो-दितप्रमाणः षोडशो भागो हानिं वोपगच्छति वर्द्धते वा। तत एतावानेव तिथेः परि-माणकालः। तदेवमहोरात्रादस्ति तिथेः प्रतिविशेष इत्युपपन्नस्तिथिविषयः पृथक् प्रश्नः।'

ભાવાર્થ :- '**પ્રશ્ન**- અહોરાત્ર કરતા તિથિમાં શું ફરક છે કે જેથી તિથિ સંબંધી પ્રશ્ન અલગથી પૂછાયો છે ?

જવાબ- અહોરાત્ર સૂર્યને લીધે થાય છે અને તિથિઓ ચન્દ્રને લીધે થાય છે. ચન્દ્રની વૃદ્ધિ અને હાનિને લીધે તિથિઓ થાય છે. ચન્દ્રમંડળની વૃદ્ધિ અને હાનિ સ્વરૂપથી નથી થતી પણ રાહુવિમાનથી ઢંકાવા અને પ્રગટ થવાના લીધે થાય છે. રાહુ બે પ્રકારના છે - પર્વરાહુ અને ધ્રુવરાહુ. તેમાં જે પર્વરાહુ છે તેની વિચારણા અહીં અનુપયોગી હોવાથી આગળ કહેવાશે અથવા તે **ક્ષેત્રસમાસની ટીકા**માં કરી હોવાથી ત્યાંથી જાણી લેવી. જે ધ્રુવરાહુ છે તેનું વિમાન કાળું છે. તે ચંદ્રમંડળની નીચે ચાર અંગુલ દૂર રહીને ચાર ચરે છે. ચંદ્રમંડળના બુદ્ધિથી ૬૨ ભાગ કલ્પવા. તેમને ૧૫થી ભાગવા, જવાબ ૪ આવે. શેષ ૨ રહે. તે ૨ ભાગ હંમેશા ખુલ્લા હોય છે. એ ચંદ્રની ૧૬મી કળા કહેવાય છે. કૃષ્ણપક્ષની એકમના દિવસે ચંદ્રમંડળની નીચે ૪ અંગુલ દૂર રહીને ચાર ચરનારું રાહુનું કાળું વિમાન પોતાના ૧૫મા ભાગ વડે ચંદ્રના સદા ખુલ્લા રહેનારા ૨ ભાગોને છોડીને શેષ ૬૦ ભાગમાંથી ૪ ભાગવાળા એક પંદરમા ભાગને ઢાંકે છે, બીજના દિવસે પોતાના બે પંદરમા ભાગો વડે ચંદ્રના બે પંદરમા ભાગોને ઢાંકે છે, ત્રીજના દિવસે પોતાના ત્રણ પંદરમા ભાગો વડે ચંદ્રના ત્રણ પંદરમા ભાગોને ઢાંકે છે, એમ યાવત્ અમાવસના દિવસે ચંદ્રના પંદર પંદરમા ભાગોને ઢાંકે છે. ત્યાર પછી શુક્લપક્ષમાં એકમના દિવસે એક પંદરમા ભાગને પ્રગટ કરે છે, બીજના દિવસે બે પંદરમા ભાગોને પ્રગટ કરે છે, ત્રીજના દિવસે ત્રણ પંદરમા ભાગોને પ્રગટ કરે છે. એમ યાવત્ પૂનમના દિવસે પંદર પંદરમા ભાગોને પ્રગટ કરે છે. કૃષ્ણપક્ષમાં જેટલા કાળમાં બાસઠીયા ૪ ભાગવાળા ૧૬મા ભાગની હાનિ થાય છે અને શુક્લપક્ષમાં જેટલા કાળમાં બાસઠીયા ૪ ભાગવાળા ૧૬મા ભાગની વૃદ્ધિ થાય છે તેટલો કાળ એટલે એક તિથિ.

પૂર્વાચાર્યોની પરંપરાથી આવેલ રહસ્યમય ઉપદેશ આ પ્રમાણે છે - અહોરાત્રના

૬૨ ભાગ કરીએ તેમાંથી ૬૧ ભાગ પ્રમાણવાળી તિથિ હોય છે.

પ્રશ્ન- અહોરાત્રના ૩૦ મુહૂર્ત હોય છે. તિથિના કેટલા મુહૂર્ત હોય છે ?

જવાબ- એક તિથિના ૨૯ $\frac{૩૨}{૬૨}$ મુહૂર્ત હોય છે. તે આ પ્રમાણે-

અહોરાત્રના ૬૨ ભાગ = ૩૦ મુહૂર્ત

∴ અહોરાત્રના ૬૧ ભાગ = $\frac{૩૦ \times ૬૧}{૬૨}$ મુહૂર્ત = $\frac{૧૮૩૦}{૬૨}$ મુહૂર્ત = ૨૯ $\frac{૩૨}{૬૨}$ મુહૂર્ત.

૨૯ $\frac{૩૨}{૬૨}$ મુહૂર્તમાં ચંદ્રમંડળના પૂર્વે કહેલા ૧૬મા ભાગની હાનિ કે વૃદ્ધિ થાય છે. માટે તિથિનો કાળ એટલો જ છે.

આમ અહોરાત્ર કરતા તિથિ ભિન્ન હોવાથી તિથિસંબંધી પ્રશ્ન જુદો પૂછાયો છે.'

તિથિનો ક્ષય કેવી રીતે થાય છે ? એ **પૂજ્ય મલયગિરિ મહારાજે ૧૨મા પ્રાભૃતની ટીકામાં પાના નં.૪૫૯-૪૬૦** ઉપર આ પ્રમાણે બતાવ્યું છે -

'इयमत्र भावना-इह कालस्य सूर्यादिक्रियात उपलक्षितस्याऽनादिप्रवाहपतित-प्रतिनियतस्वभावस्य न स्वरूपतः कापि हानिर्नापि कश्चिदपि स्वरूपोपचयः यत्त्विदम-वमरात्रातिरात्रप्रतिपादनं तत्परस्परं मासचिन्तापेक्षया, तथाहि - कर्ममासमपेक्ष्य चन्द्रमासस्य चिन्तायामवमरात्रसम्भवः सूर्यमासमपेक्ष्य कर्ममासचिन्तायामतिरात्र-कल्पना, तथा चोक्तं - 'कालस्स उ नवि हाणी नवि वड्ढि वा अ[वि](व)ट्ठिओ कालो। जायइ वड्ढोवुड्ढी मासाणं एक्कमेक्काउ॥११९॥' (जो.प.) तत्रावमरात्रभावना[य]करणार्थ-मिदं पूर्वाचार्योपदर्शितं गाथाद्वयं - 'चंदउऊमासाणं अंसा जे दिस्सए विसेसंमि। ते ओमरत्तभागा हवंति मासस्स नायव्वा॥१२०॥ बावट्ठिभागमेकं दिवसे संजाइ ओमरत्तस्स। बावट्ठीए दिवसेहिं ओमरत्तं तओ हवइ॥१२१॥' (जो.प.) अनयोर्व्याख्या-कर्म्ममासः परिपूर्णत्रिंशदहोरात्रप्रमाणः, चन्द्रमास एकोनत्रिंशदहोरात्रा द्वात्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य, ततश्चन्द्रमासस्य चन्द्रमासपरिमाणस्य ऋतुमासस्य च कर्ममासस्य च कर्ममासपरिमाणस्य चेत्यर्थः परस्परविश्लेषः क्रियते, विश्लेषे च कृते सति ये अंशा उद्धरिता दृश्यन्ते त्रिंशत् द्वाषष्टिभागरूपास्तेऽवमरात्रस्य भागाः तद्भवमरात्रं परिपूर्णं भवति मासद्वयपर्यन्ते, ततस्तस्य सत्कास्ते भागा मासस्यावसाने द्रष्टव्याः। यदि त्रिंशति दिवसेषु त्रिंशत् द्वाषष्टिभागा अवमरात्रस्य प्राप्यन्ते तत एकस्मिन्दिवसे कति भागाः प्राप्यन्ते? राशित्रयस्थापना ३०।३०।१। अत्रान्त्येन राशिना एकलक्षणेन

मध्यमस्य राशेस्त्रिंशद्रूपस्य गुणनम्, एकेन गुणितं तदेव भवतीति जाता त्रिंशदेव तस्यादिराशिना त्रिंशता भागे हृते लब्ध एकः। आगतं प्रतिदिवसमेकैको द्वाषष्टिभागो लभ्यते॥१२०॥ तथा चाह - 'बावट्ठी'त्यादि। द्वाषष्टिभाग एकै[के](को) दिवसे (दिवसे) जायते अवमरात्रस्य, गाथायामेकशब्दो दिवसशब्दश्चागृहीतवीप्सोऽपि सामर्थ्याद्वीप्सां गमयति, नपुंसकनिर्देशश्च प्राकृतलक्षणात्, तदेवं यत एकैकस्मिन्दिवसे एकैको द्वाषष्टिभागो अवमरात्रस्य सम्बन्धी प्राप्यते ततो द्वाषष्ट्या दिवसैरेकोऽवमरात्रो भवति। किमुक्तं भवति ? दिवसे२ अवमरात्रसत्कैकैकद्वाषष्टिभागवृद्ध्या द्वाषष्टितम-दिवसे मूलत एव त्रिषष्टितमा तिथिः प्रवर्त्तत इति, एवं च सति य एकषष्टितमो-ऽहोरात्रस्तस्मिन्नेकषष्टितमा द्वाषष्टितमा च तिथिर्निधनमुपगतेति द्वाषष्टितमा तिथिर्लोके पतितेति व्यवह्रियते, उक्तञ्च 'एक्कंमि अहोरत्ते दो वि तिही जत्थ। निहणमे[से](ज्जा)सु सोत्थ तिही परिहायइ॥१२२॥' (जो.प.) इति ॥१२१॥'

भावार्थ :- 'અનાદિકાળથી એક ચોક્કસ સ્વભાવવાળા અને સૂર્ય વગેરેની ક્રિયાથી જણાતા કાળની સ્વરૂપથી કોઈ હાનિ કે વૃદ્ધિ થતી નથી. છતાં જે તિથિનો ક્ષય અને અહોરાત્રની વૃદ્ધિ થાય છે તે માસોની પરસ્પર વિચારણાની અપેક્ષાએ થાય છે. તે આ પ્રમાણે- કર્મમાસની અપેક્ષાએ ચંદ્રમાસની વિચારણા કરીએ તો તિથિનો ક્ષય થાય છે અને સૂર્યમાસની અપેક્ષાએ કર્મમાસની વિચારણા કરીએ તો અહોરાત્રની વૃદ્ધિ થાય છે.

૧ કર્મમાસ = ૩૦ અહોરાત્ર

૧ ચંદ્રમાસ = ૨૯ $\frac{૩૨}{૬૨}$ અહોરાત્ર

૩૦ અહોરાત્ર — ૨૯ $\frac{૩૨}{૬૨}$ અહોરાત્ર = $\frac{૩૦}{૬૨}$ અહોરાત્ર

૩૦ દિવસમાં $\frac{૩૦}{૬૨}$ અહોરાત્ર ઘટે છે.

∴ ૧ દિવસમાં $\frac{૧ \times ૩૦}{૩૦}$ અહોરાત્ર ઘટે. એટલે કે $\frac{૧}{૬૨}$ અહોરાત્ર ઘટે.

૬૨રોજ $\frac{૧}{૬૨}$ અહોરાત્ર ઘટે છે. તેથી ૬૨મા દિવસે ૬૩મી તિથિ પ્રવર્તે છે. ૬૧મા દિવસે ૬૧મી તિથિ અને ૬૨મી તિથિ બન્ને સમાપ્ત થાય છે. એટલે લોકમાં ૬૨મી તિથિનો ક્ષય થયો એમ કહેવાય છે.'

અહોરાત્રની વૃદ્ધિ શી રીતે થાય છે ? એ **પૂજ્ય મલયગિરિ મહારાજે ૧૨મા પ્રાભૃતની ટીકામાં પાના નં.૪૬૩-૪૬૪** ઉપર આ પ્રમાણે બતાવ્યું છે -

'इह कर्ममासमपेक्ष्य सूर्यमासचिन्तायामेकैकसूर्यर्त्तुपरिसमाप्तावेकैकोऽधिकोऽहोरात्रः प्राप्यते, तथाहि- त्रिंशता अहोरात्रैरेकः कर्म्ममासः सार्द्धत्रिंशता अहोरात्रैरेकः सूर्यमासो मासद्वयात्मकश्च ऋतुः। तत एकसूर्यर्त्तुपरिसमाप्तौ कर्म्ममासद्वयमपेक्ष्यैकोऽधिकोऽहोरात्रः प्राप्यते।... ... सम्प्रति यमपेक्ष्यातिरात्रा यञ्चापेक्ष्यावमरात्रा भवन्ति तदेतत्प्रतिपादयति - 'छच्चेव य अइरत्ता आइच्चाउ हवंति [जा](मा)णाहि। छच्चेव ओमरत्ता चंदाहि हवंति माणाहि॥' अतिरात्रा भवन्ति आदित्यात् आदित्यमपेक्ष्य, किमुक्तं भवति ? आदित्यमासानपेक्ष्य कर्ममासचिन्तायां प्रतिवर्षं षट् अतिरात्रा भवन्तीति 'मा-[सा](णा)हि' जा[ना](नी)हि, तथा षट् अवमरात्रा भवन्ति चन्द्रात्-चन्द्रमपेक्ष्य चन्द्रमा-समधिकृत्य कर्ममासचिन्तायां प्रतिसंवत्सरं षट् अवमरात्रा भवन्तीत्यर्थः इति 'माणाहि' - जानीहि।'

भावार्थ :- 'કર્મમાસની અપેક્ષાએ સૂર્યમાસની વિચારણા કરતા દરેક સૂર્યઋતુની સમાપ્તિએ એક અહોરાત્રની વૃદ્ધિ થાય છે.

૧ કર્મમાસ = ૩૦ અહોરાત્ર

૧ સૂર્યમાસ = ૩૦ $\frac{૧}{૨}$ અહોરાત્ર

૧ સૂર્યઋતુ = ૨ માસ

તેથી એક સૂર્યઋતુની સમાપ્તિએ ૨ કર્મમાસની અપેક્ષાએ ૧ અહોરાત્રની વૃદ્ધિ થાય છે.

સૂર્યમાસની અપેક્ષાએ કર્મમાસની વિચારણા કરતા દર વર્ષે ૬ અહોરાત્રની વૃદ્ધિ થાય છે. ચંદ્રમાસની અપેક્ષાએ કર્મમાસની વિચારણા કરતા દર વર્ષે ૬ તિથિનો ક્ષય થાય છે.'

અધિકમાસ કેવી રીતે થાય છે ? એ **પૂજ્ય મલયગિરિ મહારાજે ૧૦મા પ્રાભૃતના ૨૦મા પ્રાભૃતપ્રાભૃતની ટીકામાં પાના નં.૩૩૪-૩૩૫** ઉપર આ પ્રમાણે બતાવ્યું છે -

'(कथमधिकमाससम्भवो येनाभिवर्द्धितसंवत्सर उपजायते ? कियता वा कालेन सम्भवतीति ? उच्यते, इह युगं चन्द्रचन्द्राभिवर्द्धितचन्द्राभिवर्द्धितरूपपञ्चसंवत्सरं सूर्यसंवत्सरापेक्षया परिभाव्यमानमन्यूनातिरिक्तानि पञ्च वर्षाणि भवन्ति, सूर्यमासश्च सार्द्धत्रिंशदहोरात्र)प्रमाणश्चा(न्द्र)मास एकोनत्रिंशद्दिनानि द्वात्रिंशच्च द्वाषष्टिभागा दिनस्य। ततो गणितपरिभावनया सूर्यसंवत्सरसत्कत्रिंशन्मासातिक्रमे एकश्चान्द्रमासोऽधिको लभ्यते। तथा च पूर्वाचार्यप्रदर्शितेयं करणगाथा- 'चंदस्स जो विसेसो आइच्चस्स

य हविज्ज मासस्स। तीसइ गुणीओ संतो हवई हु अहिमासगो एक्को॥१०३॥' (जो.प.) अस्या अक्षरगमनिका - आदित्यस्य - आदित्यसंवत्सरसम्बन्धिनो मासस्य मध्यात् चन्द्रस्य - चन्द्रमासस्य यो भवति विश्लेषः, इह विश्ले[ष](षे) कृते सति यदवशिष्यते तदुपचारात् विश्लेषः, स त्रिंशता गुण्यते, गुणितः सन् भवत्येकोऽधिकमासः। तत्र सूर्यमासपरिमाणात्सार्द्धत्रिंशदहोरात्ररूपात् चन्द्रमासपरिमाणमेकोनत्रिंशद्दिनानि द्वात्रिंशच्च द्वाषष्टिभागा दिनस्येत्येवंरूपं शोध्यते, ततः स्थितं पश्चाद्दिनमेकेन द्वाषष्टिभागेन न्यूनं, तत्र दिनं त्रिंशता गुण्यते, जातानि त्रिंशद्दिनानि, एकश्च द्वाषष्टि-भागस्त्रिंशता गुणितः, जातास्त्रिंशद् द्वाषष्टिभागाः, ते त्रिंशद्दिनेभ्यः शोध्यन्ते, ततः स्थितानि शेषाण्येकोनत्रिंशद्दिनानि द्वात्रिंशच्च द्वाषष्टिभागा दिनस्य, एतावत्परिमाण-श्चन्द्रमास इति भवति सूर्यसंवत्सरसत्कत्रिंशन्मासातिक्रमेण एकोऽधिकमासो, युगे च सूर्यमासाः षष्टिस्ततो [सूर्यो](भूयो)ऽपि सूर्यसंवत्सरसत्कत्रिंशन्मासातिक्रमे द्वितीयो-ऽधिकमासो भवति। उक्तञ्च 'सट्ठीए अइयाए हवइ हु अहिमासगो जुगद्धंमि। बावीसे पव्वसये हवइ य बीओ जुगंतंमि॥१०४॥' (जो.प.) अस्या अपि अक्षरगमनिका - एकस्मिन्युगे अनन्तरोदितस्वरूपे पर्वणां - पक्षाणां षष्टौ अतीतायां षष्टिसङ्ख्येषु पक्षेष्वतिक्रान्तेषु इत्यर्थः, एतस्मिन्नवसरे युगार्द्धे युगार्द्धप्रमाणे एकोऽधिकमासो भवति, द्वितीयस्त्वधिकमासो (द्वाविंशे) द्वा[त्रिं](विं)शत्यधिके पर्वशते अतिक्रान्ते युगस्यान्ते युगपर्यवसाने भवति। युगमध्ये तृतीये संवत्सरे अधिकमासः पञ्चमे चेति द्वौ युगे अभिवर्द्धितसंवत्सरौ।'

ભાવાર્થ :- '**પ્રશ્ન**- જેનાથી અભિવર્ધિત સંવત્સર થાય છે તે અધિક માસ કેવી રીતે સંભવે છે ? તે કેટલા કાળે થાય છે ?

જવાબ- ૧ યુગમાં ચંદ્ર વર્ષ, ચંદ્ર વર્ષ, અભિવર્ધિત વર્ષ, ચંદ્ર વર્ષ અને અભિવર્ધિત વર્ષ એમ પાંચ વર્ષ હોય છે.

૧ યુગમાં પાંચ સંપૂર્ણ સૂર્યવર્ષ હોય છે.

૧ સૂર્યમાસ = ૩૦ $\frac{૧}{૨}$ અહોરાત્ર

૧ ચંદ્રમાસ = ૨૯ $\frac{૩૨}{૬૨}$ અહોરાત્ર

૩૦ $\frac{૧}{૨}$ અહોરાત્ર — ૨૯ $\frac{૩૨}{૬૨}$ અહોરાત્ર = ૩૦ $\frac{૩૧}{૬૨}$ અહોરાત્ર — ૨૯ $\frac{૩૨}{૬૨}$ અહોરાત્ર

= $\frac{૬૧}{૬૨}$ અહોરાત્ર

૧ સૂર્યમાસમાં ચંદ્રમાસની અપેક્ષાએ $\frac{૬૧}{૬૨}$ અહોરાત્રની વૃદ્ધિ થાય.

∴ ૩૦ સૂર્યમાસમાં ચંદ્રમાસની અપેક્ષાએ ૩૦ x $\frac{૬૧}{૬૨}$ =$\frac{૧૮૩૦}{૬૨}$ = ૨૯$\frac{૩૨}{૬૨}$ અહોરાત્રની વૃદ્ધિ થાય એટલે ૩૦ સૂર્યમાસ પૂર્ણ થયા પછી ૧ ચંદ્રમાસની વૃદ્ધિ થાય છે.

૧ યુગમાં ૬૦ સૂર્યમાસ હોય છે. તેથી બીજા ૩૦ સૂર્યમાસ પૂર્ણ થયા પછી બીજા ચંદ્રમાસની વૃદ્ધિ થાય છે.

આમ ૧ યુગમાં ત્રીજા વર્ષે ૧ અધિકમાસ થાય છે અને પાંચમા વર્ષે બીજો અધિકમાસ થાય છે. ૧ યુગમાં બે અધિકમાસ થાય છે.'

જો રાહુના વિમાનથી ઢંકાવા અને પ્રગટ થવાને લીધે ચન્દ્રની હાનિ અને વૃદ્ધિ થતી હોય તો અમુક દિવસોમાં રાહુનું વિમાન ગોળ દેખાય છે પણ અમુક દિવસોમાં તે ગોળ દેખાતું નથી, તેનું શું કારણ છે ? આવી શંકાનું નિવારણ **પૂજ્ય મલયગિરિ મહારાજે ૨૦મા પ્રાભૃતની ટીકામાં પાના નં.૬૦૮-૬૦૯** ઉપર આ પ્રમાણે કર્યું છે -

'आह शुक्लपक्षे कृष्णपक्षे वा कतिपयान् दिवसान् यावत् राहुविमानं वृत्तमुपलभ्यते, यथा ग्रहणकाले पर्वराहोः कतिपयांश्च दिवसान् याव[तं](न्न) तथा, ततः किमत्र कारणमिति ? उच्यते, इह येषु दिवसेष्वतिशयेन तमसाभिभूयते (शशी) तेषु तद्विमानं वृत्तमाभाति, चन्द्रप्रभाया बाहुल्येन प्रसराभावतो राहुविमानस्य यथावस्थिततयोपलम्भात्, येषु पुनश्चन्द्रो भूयान् प्रकटो भवति तेषु न चन्द्रप्रभा राहुविमानेनाभिभूयते, किन्त्वतिबहलतया चन्द्रप्रभयैव स्तोकं २ राहुविमाने प्रभाया अभिभवः ततो न वृत्ततोपलम्भः, [एवं](पर्व)राहुविमानं च ध्रुवराहुविमानादतीवतमो-बहुलमतस्तस्य स्तोकस्यापि न चन्द्रप्रभयाभिभवसम्भव इति त[तः](स्य) स्तोक-रूपस्यापि वृत्तत्वेनोपलब्धिः, तथा चाह विशेषणवत्यां जिनभद्रगणिक्षमाश्रमणः 'वट्टच्छेओ कइवयदिवसे ध्रुवराहुणो विमाणस्स। दीसइ परं न दीसइ जह गहणे पव्वराहुस्स॥१०६॥' आचार्य आह - 'अच्चत्थं नहि तमसाभिभूयते जं ससी विमु[क्खंते](च्चंतो)। तेणं न[ट्ठ] (वट्ट)च्छेओ गहणे उ तमो तमोबहुलो ॥१०७॥'

ભાવાર્થ :- **'પ્રશ્ન**- જેમ ગ્રહણ વખતે પર્વરાહુનું વિમાન ગોળ દેખાય છે તેમ શુક્લપક્ષમાં અને કૃષ્ણપક્ષમાં કેટલાક દિવસો સુધી રાહુનું વિમાન ગોળ દેખાય છે, પણ કેટલાક દિવસ તે ગોળ નથી દેખાતું, તેનું શું કારણ ?

જવાબ- જે દિવસોમાં અતિશય અંધકારથી ચંદ્ર ઢંકાય છે તે દિવસોમાં રાહુનું વિમાન ગોળ દેખાય છે, કેમકે ચંદ્રની પ્રભાનો ઘણો ફેલાવો ન હોવાથી રાહુનું વિમાન જેવું છે તેવું દેખાય છે. જે દિવસોમાં ચંદ્ર ઘણો પ્રગટ હોય છે તે દિવસોમાં રાહુના વિમાનથી ચંદ્રની પ્રભા ઢંકાતી નથી પણ ચંદ્રની પ્રભા ઘણી હોવાથી તેનાથી રાહુના વિમાનની પ્રભા થોડી થોડી ઢંકાય છે. તેથી રાહુનું વિમાન ગોળ દેખાતું નથી. પર્વરાહુનું વિમાન ધ્રુવરાહુના વિમાન કરતા ખૂબ જ કાળું છે. તેથી ચંદ્રપ્રભાથી તે થોડું પણ ઢંકાતું નથી. તેથી તે નાનું હોવા છતાં ગોળ દેખાય છે. **જિનભદ્રગણિક્ષમાશ્રમણજી**એ **વિશેષણવતી**માં આ જ વાત કહી છે.'

આવા અનેક રહસ્યરત્નો સટીક ચન્દ્રપ્રજ્ઞપ્તિ નામના પ્રસ્તુત ગ્રન્થસાગરમાં ભર્યા છે. તે તો તેમાં ડૂબકી લગાવનારને જ હાથમાં આવશે.

श्रीचन्द्रप्रज्ञप्ति मूळ

ચન્દ્રપ્રજ્ઞપ્તિના મૂળ સૂત્રો અર્ધમાગધી ભાષામાં રચાયા છે. આ સૂત્રોની રચના પ્રશ્નોત્તરશૈલીમાં થયેલી છે. થોડા શબ્દોમાં ઘણો ભાવાર્થ સમાઈ જાય એ રીતે આ સૂત્રો રચાયા છે. મૂળ ગ્રન્થનું પ્રમાણ ૧,૮૫૪ અનુષ્ટુપ્ શ્લોકપ્રમાણ છે.

મૂળકાર

ચન્દ્રપ્રજ્ઞપ્તિ મૂળગ્રન્થ કોણે અને ક્યારે રચ્યો એ બાબતનો કોઈ ઉલ્લેખ મૂળગ્રન્થમાં મળતો નથી. મૂળગ્રન્થની રચના અગાધ જ્ઞાન ધરાવતા પૂર્વેના કોઈ **મહાપુરુષે** કરી છે એવું માનવામાં બે મત નથી. આટલું મહાન શાસ્ત્ર રચવા છતાં રચયિતાએ ક્યાંય પોતાના નામનો ઉલ્લેખ કર્યો નથી. એ બતાવે છે કે એ મહાપુરુષ પ્રસિદ્ધિની ઝંખનાથી પર હતા અને અતિનિઃસ્પૃહ હતા. ગ્રન્થની શરૂઆતની ગાથામાં તેમણે કહ્યું છે કે -

'फुडविगडपागडत्थं वोच्छं पुव्वसुयसारनीसंदं।
सुहुमगणिणोवदिट्ठं जोइसगणरायपण्णत्तिं ॥'

આ ગાથામાં તેઓશ્રી જણાવે છે કે પૂર્વોમાંથી ઉદ્ધાર કરીને તેમણે આ શ્રીચન્દ્રપ્રજ્ઞપ્તિ રચી છે. વળી તેઓ એ પણ જણાવે છે કે તેમણે પોતાની બુદ્ધિથી કલ્પીને આ શ્રીચન્દ્રપ્રજ્ઞપ્તિ રચી નથી પણ ગુરુદેવના ઉપદેશને અનુસારે તે રચી છે. આનાથી તેમનો નમ્રતાગુણ પ્રદર્શિત થાય છે. ગ્રન્થને અંતે તેઓ જણાવે છે કે 'આ શ્રીચન્દ્રપ્રજ્ઞપ્તિ અવિનીત

જીવોને ન આપવી. જે સ્વયં ભણીને આ શ્રીચન્દ્રપજ્ઞપ્તિ અપાત્ર જીવોને આપશે તે ભગવાને બતાવેલી મર્યાદાનું ઉલ્લંઘન કરશે.' આનાથી તેમની પ્રભુવચન પ્રત્યેની સમર્પિતતા જણાય છે.

શ્રીચન્દ્રપ્રજ્ઞપ્તિની ટીકા

મૂળસૂત્રો ઉપર રચાયેલી આ ટીકા સંસ્કૃત ભાષામાં છે. તેનું પ્રમાણ ૯,૪૦૦ અનુષ્ટુપ્ શ્લોકપ્રમાણ છે. ખૂબ જ સુંદર અને સરળ શૈલીમાં રચાયેલી આ ટીકા મૂળસૂત્રોના રહસ્યોને ખોલવા માટે માસ્ટરકીની ગરજ સારે છે. ઠેક-ઠેકાણે ટીકાકારે શાસ્ત્રપાઠોનો ઉલ્લેખ કરી ટીકાની ઉપાદેયતા અને રોચકતા વધારી છે. ટીકામાં મૂળસૂત્રની ગૂઢ બાબતો ખૂબ સ્પષ્ટ કરાઈ છે. અનેક ઠેકાણે ગણિત બતાવીને પદાર્થો ખૂબ જ વિશદ કરાયા છે.

ટીકાકાર

શ્રીચન્દ્રપ્રજ્ઞપ્તિની ટીકાના રચયિતા **પૂજ્ય મલયગિરિસૂરિ મહારાજ** છે. જૈનશાસનમાં આગમ અને અન્યગ્રન્થોની સુંદર, સરળ અને રોચક ટીકાઓના રચયિતા તરીકે તેમનું નામ સુપ્રસિદ્ધ છે. મધ્યમબુદ્ધિવાળા જીવો પણ સહેલાઈથી સમજી શકે તેવી તેમની શૈલી છે. શ્રીચન્દ્રપ્રજ્ઞપ્તિની ટીકામાં તેમણે અનેક ઠેકાણે શાસ્ત્રપાઠોનો ઉલ્લેખ કરેલ છે. તે જણાવે છે કે તેઓ બહુશ્રુત હતા. ટીકામાં અનેક સ્થળે વ્યાકરણના સૂત્રો અને પાણિનીય ધાતુપાઠના સૂત્રોનો ઉલ્લેખ જણાવે છે કે તેઓ ખૂબ સારા વૈયાકરણ હતા. અનેક સ્થળે ગણિત કરીને તેમણે સ્પષ્ટ કરેલ પદાર્થો જણાવે છે કે તેઓ ખૂબ સારા ગણિતજ્ઞ પણ હતા. તેઓ માત્ર વિદ્વાન જ ન હતા પણ તેમણે જ્ઞાનને ખરેખર પચાવ્યું હતું અને તેમના હૃદયમાં ગુરુતત્ત્વનો વાસ હતો. આ વાત ટીકામાં તેમણે કરેલા નીચેના ઉલ્લેખ ઉપરથી સુસ્પષ્ટ થાય છે - **'एतेन चैतदावेदयति इह शिष्येण सम्यगधीतशास्त्रेणापि गुर्व्वनुज्ञातेन स तत्त्वोपदेशोऽपरस्मै दातव्यो नान्यथेति।' (पृ.२३)** ટીકામાં તેમણે કરેલ ઉલ્લેખ - **'यदि वा सम्प्रत्यपि भगवान् भक्त्यानुध्यायमानो ध्यातृणामभिभवति रागादिक्लेशान् 'भत्तीइ जिणवराणं खिज्जंती पुव्वसंचिया कम्मा।' ( ) इति वचनप्रामाण्यात्।' (पृ.२)** તેમની અદ્વિતીય પ્રભુભક્તિને જણાવે છે. તેઓ વિક્રમની ૧૨મી સદીમાં થયા. તેઓ કલિકાલ-સર્વજ્ઞ હેમચન્દ્રસૂરિ મહારાજના સમકાલીન હતા. ટીકામાં એક સ્થળે કરેલા નીચેના ઉલ્લેખ ઉપરથી એ પણ જણાય છે કે તેમણે પોતે પણ એક વ્યાકરણ ટીકા સહિત રચેલું - **'....चादयो हि पदान्तराभिहितमेवार्थं स्पष्टयन्ति न पुनः स्वातन्त्र्येणैकमप्यर्थमभिदधते**

इति निर्णीतमेतत् स्वोपज्ञशब्दानुशासने।' (पृ.४९१) સટીક આ વ્યાકરણ '**आचार्यश्री-मलयगिरिविरचितं शब्दानुशासनं स्वोपज्ञवृत्तियुतम्।**' નામથી પ્રસિદ્ધ છે. તે ત્રુટક અને અપૂર્ણ મળે છે. તે ઈ.સન્ ૧૯૬૭માં લાલભાઈ દલપતભાઈ ભારતીય સંસ્કૃતિ વિદ્યામંદિર, અમદાવાદ તરફથી પ્રકાશિત થયેલ છે. તેનું સંપાદન પંડિતવર્ય શ્રી બેચરદાસ જીવરાજ દોશીએ કરેલ છે.

'**જૈન સાહિત્યનો બૃહદ્ ઈતિહાસ**'ના આધારે પૂજ્ય મલયગિરિસૂરિ મહારાજ સંબન્ધી કેટલીક વિગતો જણાવું છું -

'**જિનમંડનગણિ**એ રચેલ **કુમારપાલપ્રબંધ**માં મલયગિરિસૂરિ મહારાજ સંબંધિત કેટલીક વાતોનો ઉલ્લેખ કર્યો છે. તે નીચે મુજબ છે -

'આ.હેમચન્દ્રસૂરિજીએ ગુરુની આજ્ઞા લઈને અન્ય ગચ્છીય દેવેન્દ્રસૂરિજી અને મલયગિરિસૂરિજીની સાથે કળાઓમાં કુશળતા પ્રાપ્ત કરવા માટે ગૌડદેશ તરફ વિહાર કર્યો. માર્ગમાં ખિલ્લૂર ગામમાં એક સાધુ બિમાર હતો.તેની ત્રણેએ સારી રીતે સેવા કરી. તે સાધુ રૈવતકતીર્થ (ગિરનાર)ની યાત્રા માટે બહુ આતુર હતો. તેની અંતિમ સમયની ઈચ્છા પૂરી કરવા માટે ગામના લોકોને સમજાવીને ડોળીનો પ્રબંધ કરી તે લોકો સૂઈ ગયા. સવારે ઉઠીને જુએ છે તો ત્રણે જણા રૈવતકમાં બેઠેલા છે. આ સમયે શાસનદેવીએ આવીને તેમને કહ્યુ કે તમારુ ઈચ્છિત કાર્ય અહીં જ સમ્પન્ન થઈ જશે. હવે તમારે ગૌડદેશમાં જવાની કોઈ આવશ્યકતા નથી. આમ કહીને એમને અનેક મન્ત્ર, ઔષધી વગેરે આપીને દેવી પોતાના સ્થાને ચાલી ગઈ.

એક વખત ગુરુએ તેમને સિદ્ધચક્ર મન્ત્ર આપ્યો. ત્રણેએ અંબિકાદેવીની સહાયતાથી ભગવાન શ્રીનેમિનાથ (રૈવતકદેવ) ની સામે બેસીને સિદ્ધચક્ર મન્ત્રની આરાધના કરી. મન્ત્રના અધિષ્ઠાતા વિમલેશ્વરદેવે પ્રસન્ન થઈને ત્રણેને કહ્યુ કે તમે પોતાને ઈચ્છિત વરદાન માંગો. તે સમયે આ.હેમચન્દ્રસૂરિજીએ રાજાને પ્રતિબોધ આપવાનો, આ.દેવેન્દ્રસૂરિજીએ એક રાતમાં કાંતિનગરીથી સેરીસક ગ્રામમાં મંદિર લાવવાનો અને આ.મલયગિરિસૂરિજીએ જૈનસિદ્ધાન્તોની વૃત્તિઓ-ટીકાઓ રચવાનું વરદાન માંગ્યું. ત્રણેને પોતપોતાની ઈચ્છાનુસાર વરદાન આપીને દેવ પોતાના સ્થાન પર ચાલ્યા ગયા.'

મલયગિરિસૂરિ મહારાજ એક બહુ મોટા ટીકાકાર હતા. તેમણે પોતાના પાંડિત્યનો ઉપયોગ ટીકાઓ રચવામાં કર્યો હતો. તેથી જ તેમની ટીકાઓની વિદ્વત્સમાજમાં ખૂબ

પ્રતિષ્ઠા છે. તેઓ પોતાની ટીકાઓમાં સર્વપ્રથમ મૂલ સૂત્ર, ગાથા અથવા શ્લોકના શબ્દાર્થની વ્યાખ્યા કરે છે અને તે અર્થનો સ્પષ્ટ નિર્દેશ કરી દે છે. તદનન્તર વિશેષ સ્પષ્ટીકરણ અથવા વિસ્તૃત વિવેચનની આવશ્યકતા પ્રતીત થતા '**अयं भावः, किमुक्तं भवति, अयमाशयः, इदमत्र हृदयम्**' વગેરે પદો સાથે સંપૂર્ણ અભીષ્ટાર્થ સ્પષ્ટ કરી દે છે. વિષય સાથે સમ્બદ્ધ અન્ય પ્રાસંગિક વિષયોની ચર્ચા કરવી તથા તદ્વિષયક પ્રાચીન પ્રમાણોનો ઉલ્લેખ કરવો પણ મલયગિરિસૂરિ મહારાજની એક બહુ મોટી વિશેષતા છે.

મલયગિરિસૂરિ મહારાજે કેટલા ગ્રન્થો લખ્યા, તેનો સ્પષ્ટ ઉલ્લેખ તો ક્યાંય ઉપલબ્ધ નથી થતો. તેમના જેટલા ગન્થો હાલ ઉપલબ્ધ છે તથા જે ગન્થોનાં નામોનો ઉલ્લેખ તો તેમની કૃતિઓમાં છે પરન્તુ ગ્રન્થો ઉપલબ્ધ નથી તે બધાની સૂચિ નીચે આપી છે.

ઉપલબ્ધગ્રંથો

ક્રમ	નામ	શ્લોકપ્રમાણ	ક્રમ	નામ	શ્લોકપ્રમાણ
૧.	ભગવતીસૂત્ર-દ્વિતીયશતકવૃત્તિ	૩,૭૫૦	૧૧.	પિંડનિર્યુક્તિટીકા	૬,૭૦૦
૨.	રાજપ્રશ્નીયોપાંગટીકા	૩,૭૦૦	૧૨.	જ્યોતિષ્કરંડકટીકા	૫,૦૦૦
૩.	જીવાજીવાભિગમોપાંગટીકા	૧૬,૦૦૦	૧૩.	ધર્મસંગ્રહણીવૃત્તિ	૧૦,૦૦૦
૪.	પ્રજ્ઞાપનોપાંગટીકા	૧૬,૦૦૦	૧૪.	કર્મપ્રકૃતિવૃત્તિ	૮,૦૦૦
૫.	ચન્દ્રપ્રજ્ઞપ્ત્યુપાંગટીકા	૯,૫૦૦	૧૫.	પંચસંગ્રહવૃત્તિ	૧૮,૮૫૦
૬.	સૂર્યપ્રજ્ઞપ્ત્યુપાંગટીકા	૯,૫૦૦	૧૬.	ષડશીતિવૃત્તિ	૨,૦૦૦
૭.	નન્દીસૂત્રટીકા	૭,૭૩૨	૧૭.	સપ્તતિકાવૃત્તિ	૩,૭૮૦
૮.	વ્યવહારસૂત્રવૃત્તિ	૩૪,૦૦૦	૧૮.	બૃહત્સંગ્રહણીવૃત્તિ	૫,૦૦૦
૯.	બૃહત્કલ્પપીઠિકાવૃત્તિ(અપૂર્ણ)	૪,૬૦૦	૧૯.	બૃહત્ક્ષેત્રસમાસવૃત્તિ	૯,૫૦૦
૧૦.	આવશ્યકવૃત્તિ(અપૂર્ણ)	૧૮,૦૦૦	૨૦.	મલયગિરિશબ્દાનુશાસન	૫,૦૦૦

અનુપલબ્ધ ગ્રન્થો

૧. જંબૂદ્વીપપ્રજ્ઞપ્તિટીકા ૨. ઓઘનિર્યુક્તિટીકા ૩. વિશેષાવશ્યકભાષ્યટીકા
૪. તત્ત્વાર્થાધિગમસૂત્રટીકા ૫. ધર્મસારપ્રકરણટીકા ૬. દેવેન્દ્રનરકેન્દ્રપ્રકરણટીકા'

પ્રતિપરિચય

સટીક શ્રીચન્દ્રપ્રજ્ઞપ્તિ ગ્રન્થના સંશોધન માટે શ્રીચન્દ્રપ્રજ્ઞપ્તિ મૂળની ૮ હસ્તલિખિત પ્રતો અને શ્રીચન્દ્રપ્રજ્ઞપ્તિટીકાની ૧૬ પ્રતોનો ઉપયોગ મેં કર્યો છે. તેનો પરિચય નીચે મુજબ છે -

૧) આ પ્રત પાટણના સંઘવીના પાડાના જ્ઞાનભંડારની છે. આ પ્રત તાડપત્રીય છે. આ પ્રત વિ.સં.૧૪૮૦ પોષ સુદ ૧૩ બુધવારે લખાયેલી છે. આ પ્રતની ઝેરોક્સ કોપી શ્રીજિનશાસન આરાધના ટ્રસ્ટના પાટણના જ્ઞાનભંડારમાંથી મળી છે. તે ઝેરોક્સ કોપી પૂ.મુ.જંબૂવિજયજી મહારાજની પ્રેરણાથી થયેલ છે. આ પ્રતમાં તાડપત્રીય કુલ ૨૬૫ પાના છે. આ પ્રતને **A** સંજ્ઞા આપી છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૨) આ પ્રત અજિમગંજના જ્ઞાનભંડારની છે. આ પ્રત કાગળની છે. આ પ્રત વિ.સં.૧૬૨૬ ફાગણ વદ ૧ મંગળવારે લખાયેલી છે. આ પ્રતની ઝેરોક્સ કોપી આ. શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા પાસેથી મળી છે. આ પ્રતમાં કુલ ૧૩૭ પાના છે. આ પ્રતને **B** સંજ્ઞા આપી છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૩) આ પ્રત શ્રીસીમંધરસ્વામી જ્ઞાનભંડાર, તાળાવાળાની પોળ, સૂરતની છે. તે કાગળની છે. આ પ્રતમાં લેખન સંવત લખેલ નથી, પણ લખાણ ઉપરથી તે ૧૭મી સદીની હોવાનું અનુમાન કરી શકાય છે. આ પ્રતની ઝેરોક્સ કોપી આ. શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા પાસેથી મળી છે. આ પ્રતમાં કુલ ૧૭૦ પાના છે. આ પ્રતને **C** સંજ્ઞા આપી છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૪) આ પ્રત બાલાપુરના જ્ઞાનભંડારની છે. તે કાગળની છે. આ પ્રત વિ.સં.૧૮૫૩ વૈશાખ વદ ૬ ના દિવસે લખાયેલી છે. આ પ્રતની ઝોરોક્સ કોપી આ.શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા પાસેથી મળી છે. આ પ્રતમાં કુલ ૧૯૭ પાના છે. આ પ્રતને **D** સંજ્ઞા આપી છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે. આ પ્રત બિકાનેરમાં પં. રાજવિજયજીએ લખેલ છે.

૫) આ પ્રત શ્રીજૈનાનન્દ પુસ્તકાલય, સૂરતની છે. તે કાગળની છે. આ પ્રત વિ.સં. ૧૯૨૬ જેઠ સુદ ૨ ના દિવસે લખાયેલી છે. આ પ્રતની ઝેરોક્સ કોપી પૂ. આ.કલ્યાણબોધિસૂરિ મ. અને પૂ.પં. અપરાજિત વિ.મ. પાસેથી મળી છે. આ

પ્રતમાં કુલ ૧૯૧ પાના છે. આ પ્રતને **E** સંજ્ઞા આપી છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૬) આ પ્રત પૂ.આ.વિજયજંબૂસૂરિજી હસ્તલિખિત કોશ, ડભોઈની છે.તે કાગળની છે. આ પ્રત વિ.સં.૧૫૨૮ ભાદરવા સુદ ૧૨ મંગળવારે લખાયેલ છે. આ પ્રતને અંતે લેખકે ૧૮ શ્લોકની પ્રશસ્તિ લખી છે. આ પ્રતની ઝેરોક્સ કોપી પૂ.આ.કલ્યાણબોધિસૂરિ મ. અને પૂ.પં. અપરાજિત વિ.મ. પાસેથી મળી છે. આ પ્રતમાં કુલ ૧૬૨ પાના છે. આ પ્રતને **F** સંજ્ઞા આપી છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૭) આ પ્રત આહોરના જ્ઞાનભંડારની છે. તે કાગળની છે. તેમાં લેખન સંવત લખેલ નથી, પણ લખાણ ઉપરથી તે ૧૫મી સદીની હોવાનું અનુમાન કરી શકાય છે. આ પ્રતની ઝેરોક્સ કોપી પૂ. આ.કલ્યાણબોધિસૂરિ મ. અને પૂ.પં. અપરાજિત વિ.મ. પાસેથી મળેલ છે. આ પ્રતમાં કુલ ૧૬૯ પાના છે. આ પ્રતને **G** સંજ્ઞા આપેલ છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૮) આ પ્રત મુનિરાજશ્રી માણેકવિજયજી શાસ્ત્રસંગ્રહ, દશપુરાની છે. તે કાગળની છે. આ પ્રત દશપુરામાં વિ.સં.૧૯૬૨ કારતક વદ ૭ ના દિવસે લખાયેલ છે. આ પ્રતની ઝરોક્સ કોપી પૂ. આ.કલ્યાણબોધિસૂરિ મ. અને પૂ.પં.અપરાજિત વિ.મ.પાસેથી મળેલ છે. આ પ્રતમાં કુલ ૨૬૨ પાના છે. આ પ્રતને **H** સંજ્ઞા આપેલ છે. આ પ્રતમાં શ્રીચંદ્રપ્રજ્ઞપ્તિ મૂળ અને ટીકા બન્ને છે. શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની મને ઉપલબ્ધ થયેલ બધી પ્રતોમાં આ પ્રત સૌથી વધુ શુદ્ધ છે. સટીક શ્રીચંદ્રપ્રજ્ઞપ્તિ ગ્રન્થના સંશોધનમાં આ પ્રત ખૂબ જ ઉપયોગી બની છે.

૯) આ પ્રત શ્રીહેમચન્દ્રાચાર્ય જૈન જ્ઞાનભંડાર, શ્રીલહીરવકીલ જ્ઞાનભંડાર, પાટણની છે. તે કાગળની છે. આ પ્રતમાં લેખનસંવત ભૂસાઈ ગયેલ છે, પણ આ પ્રત ૧૬મી સદીની હોવાનું અનુમાન કરી શકાય છે. આ પ્રતની ઝેરોક્સ કોપી પૂ. મુ.જંબુવિજયજી મ.ની પ્રેરણાથી થયેલ છે.મને આ કોપી પૂ. આ.કલ્યાણબોધિસૂરિ મ. અને પૂ.પં. અપરાજિત વિ. મ. પાસેથી મળેલ છે. આ પ્રતમાં કુલ ૧૫૬ પાના છે. આ પ્રતને **I** સંજ્ઞા આપેલ છે.આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૧૦) આ પ્રત શ્રીહેમચન્દ્રાચાર્ય જૈન જ્ઞાનભંડાર, પાટણની છે. તે કાગળની છે. આ પ્રતમાં લેખનસંવત લખેલ નથી, પણ તે ૧૫મી સદીની હોવાનું અનુમાન કરી શકાય છે. આ પ્રતની ઝેરોક્સ કોપી પૂ. મુ.જંબુવિજયજી મ.ની પ્રેરણાથી થયેલ છે. મને આ

કોપી આ. શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા તરફથી મળેલ છે. આ પ્રતમાં કુલ ૧૩૮ પાના છે. આ પ્રતને **J** સંજ્ઞા આપેલ છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૧૧) આ પ્રત શ્રીહેમચન્દ્રાચાર્ય જૈન જ્ઞાનભંડાર, શ્રીમોદી જૈન જ્ઞાનભંડાર, પાટણની છે. તે કાગળની છે. આ પ્રતની ઝેરોક્સ કોપી પૂ. મુ.જંબૂવિજયજી મ. ની પ્રેરણાથી થયેલ છે. મને આ કોપી આ.શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા પાસેથી મળેલ છે. આ પ્રતમાં લેખનસંવત લખેલ નથી, પણ તે ૧૬મી સદીની હોવાનું અનુમાન કરી શકાય છે. આ પ્રતમાં કુલ ૧૬૮ પાના છે. આ પ્રતને **K** સંજ્ઞા આપેલ છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૧૨) આ પ્રત જેસલમેર જ્ઞાનભંડારની છે. તે કાગળની છે. આ પ્રત વિ.સં.૧૪૮૯ આસો સુદ ૮ શુક્રવારે લખાયેલ છે. આ પ્રતની ઝેરોક્સ કોપી આ.શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા તરફથી મળેલ છે. આ પ્રતમાં કુલ ૯૬ પાના છે. આ પ્રતને **L** સંજ્ઞા આપી છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે. આ પ્રત અન્ય પ્રતો કરતા લંબાઈ-પહોળાઈમાં ઘણી મોટી છે.

૧૩) આ પ્રત ભાંડારકર ઓરિએન્ટલ રીસર્ચ ઈન્સ્ટીટ્યુટ, પૂનાની છે. તે કાગળની છે. આ પ્રતમાં લેખનસંવત લખેલ નથી, પણ તે ૧૬મી સદીની હોવાનું અનુમાન કરી શકાય છે. આ પ્રતમાં કુલ ૨૩૮ પાના છે. આ પ્રતની ઝરોક્સ કોપી પૂ. મુ. જંબુવિજયજી મ.ની પ્રેરણાથી થયેલ છે. મને આ કોપી શ્રીજિનશાસન આરાધના ટ્રસ્ટ, પાટણના જ્ઞાનભંડારમાંથી મળી છે. આ પ્રતને **M** સંજ્ઞા આપેલ છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૧૪) આ પ્રત જેસલમેર જ્ઞાનભંડારની છે. તે તાડપત્રની છે. તે વિ.સં. ૧૪૮૮ માગશર સુદ ૨ ગુરુવારે લખાયેલ છે. આ પ્રતની સીડી આ. શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા તરફથી મળેલ છે. તેમાંથી પ્રિન્ટ કઢાવેલ છે. આ પ્રતમાં કુલ ૩૩૫ પાના છે. આ પ્રતને **N** સંજ્ઞા આપેલ છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની છે.

૧૫) આ પૂ. આ. ગુણરત્નસૂરિ મ.ના શિષ્યરત્ન પૂ.મુ. મોક્ષરત્ન વિ.મ. એ તૈયાર કરેલ શ્રીચંદ્રપ્રજ્ઞપ્તિટીકાની પ્રેસકોપી છે. તેમાં થોડા પાના સુધી પૂ. આ. કલ્યાણબોધિસૂરિ મ. અને પૂ.પં. અપરાજિત વિ.મ. એ પણ સંશોધન કરેલ છે. આ પ્રેસકોપી પૂ. આ. કલ્યાણબોધિસૂરિ મ. અને પૂ.પં. અપરાજિત વિ.મ. પાસેથી મળેલ છે.આ પ્રેસકોપીને **T** સંજ્ઞા આપેલ છે.

૧૬) આ પ્રત છપાયેલ સટીક સૂર્યપ્રજ્ઞપ્તિની છે. તેને **S** સંજ્ઞા આપેલ છે. સટીક શ્રીચન્દ્રપ્રજ્ઞપ્તિ અને સટીક શ્રીસૂર્યપ્રજ્ઞપ્તિમાં ઘણું સામ્ય હોવાથી છપાયેલ સટીક શ્રીસૂર્યપ્રજ્ઞપ્તિની પ્રત પણ ખૂબ ઉપયોગી બની છે.

૧૭) આ પ્રત પાટણના સંઘવીના પાડાના જ્ઞાનભંડારની છે. તે તાડપત્રની છે. તે વિ.સં.૧૪૭૯ જેઠ વદ ૧૦ ગુરુવારે લખાયેલ છે. આ પ્રતની ઝેરોક્સ કોપી શ્રીજિનશાસન આરાધના ટ્રસ્ટના પાટણના જ્ઞાનભંડારમાંથી મળેલ છે. તે ઝેરોક્સ કોપી પૂ. મુ. જંબુવિજયજી મહારાજની પ્રેરણાથી થયેલ છે. આ પ્રતમાં ૫૪ પાના છે. આ પ્રતને **O** સંજ્ઞા આપેલ છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિમૂળની છે.

૧૮) આ પ્રત સૂરતના જ્ઞાનભંડારની છે. તે કાગળની છે. તે વિ.સં. ૧૫૬૭ અષાઢ સુદ ૧૫ ના દિવસે લખાયેલ છે. આ પ્રતની ઝેરોક્સ કોપી આ. શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા પાસેથી મળેલ છે. આ પ્રતમાં ૪૦ પાના છે. આ પ્રતને **P** સંજ્ઞા આપેલ છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિમૂળની છે.

૧૯) આ પ્રત સૂરતના જ્ઞાનભંડારની છે. તે કાગળની છે. તે વિ.સં. ૧૬૦૮ કારતક સુદ ૪ ના દિવસે લખાયેલ છે. આ પ્રતની ઝેરોક્સ કોપી આ. શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા પાસેથી મળેલ છે. આ પ્રતમાં ૫૩ પાના છે. આ પ્રતને **Q** સંજ્ઞા આપેલ છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિમૂળની છે.

૨૦) આ પૂ. મુ. પુણ્યવિજયજી મ.એ તૈયાર કરેલ શ્રીચંદ્રપ્રજ્ઞપ્તિમૂળની પ્રેસકોપી છે. આ પ્રેસકોપીની ઝેરોક્સ કોપી આ.શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા પાસેથી મળી છે. આ ઝેરોક્સ કોપી પૂ. મુ. જંબૂવિજયજી મ.ની પ્રેરણાથી થયેલ છે. આ પ્રેસકોપીમાં ૧૦૬ પાના છે. આ પ્રેસકોપીને **R** સંજ્ઞા આપેલ છે.

૨૧) આ પ્રત પં. શ્રીધર્મવિજયજીગણિ ચિત્કોષ, ખેતરવસીનો પાડો, પાટણની છે. તે કાગળની છે. તેમાં પહેલું-છેલ્લું પાનું નથી. તેથી લેખનસંવતનો ખ્યાલ નથી આવતો, પણ આ પ્રત ૧૫મી કે ૧૬મી સદીની હોવાનો સંભવ છે. આ પ્રતની ઝેરોક્સ કોપી પૂ. આ.જગચ્ચન્દ્રસૂરિ મ. (ડહેલાવાળા) પાસેથી મળી છે. આ પ્રતમાં કુલ ૬૧ પાના છે. આ પ્રતને **U** સંજ્ઞા આપેલ છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિમૂળની છે. શ્રીચંદ્રપ્રજ્ઞપ્તિમૂળની મને ઉપલબ્ધ થયેલ બધી પ્રતોમાં આ પ્રત સૌથી વધુ શુદ્ધ છે. શ્રીચંદ્રપ્રજ્ઞપ્તિમૂળના સંશોધનમાં આ પ્રત ખૂબ જ ઉપયોગી બનેલ છે.

૨૨) આ પ્રત નડિયાદ જ્ઞાનભંડારની છે. તેમાં લેખનસંવત લખેલ નથી, પણ તે ૧૭મી

સદીની હોવાનો સંભવ છે. આ પ્રત કાગળની છે. આ પ્રતની ઝેરોક્સ કોપી નડિયાદ શ્રી શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ પાસેથી મળેલ છે. આ પ્રતમાં કુલ ૬૦ પાના છે. આ પ્રતને **V** સંજ્ઞા આપેલ છે. આ પ્રત શ્રીચંદ્રપ્રજ્ઞપ્તિમૂળની છે.

ઉપરોક્ત પ્રતોની ફોટોકોપિઓ મને મેળવી આપનાર (૧) શ્રીજિનશાસન આરાધના ટ્રસ્ટ, પાટણ, (૨) શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા, (૩) પૂજ્ય આ. કલ્યાણબોધિસૂરિ મહારાજ, (૪) પૂજ્ય પં.અપરાજિતવિજયજી મહારાજ, (૫) પૂજ્ય આ. જગચ્ચન્દ્રસૂરિ મહારાજ (ડહેલાવાળા), (૬) નડિયાદ શ્રી શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, નડિયાદ - આ સંસ્થાઓ, સંઘો અને મહાત્માઓએ મારી ઉપર ખૂબ ઉપકાર કર્યો છે. તે બદલ તેમનો હું ખૂબ ખૂબ આભાર માનું છું.

બધી પ્રતોની સંકલના કરી શ્રીચન્દ્રપ્રજ્ઞપ્તિ મૂળ અને ટીકાના શુદ્ધ પાઠનું સંયોજન કરેલ છે. પાઠાંતરો ફૂટનોટમાં જણાવ્યા છે. જ્યાં બધી પ્રતોમાં અશુદ્ધ પાઠ જ હોય અને તે અયોગ્ય લાગતો હોય ત્યાં તે પાઠ [ ] માં મુકેલ છે. જ્યાં શુદ્ધ પાઠ કોઈ પણ પ્રતમાં ન મળ્યો હોય ત્યાં પૂર્વાપર વિચાર કરીને, મૂળનો પાઠ હોય તો ટીકાને અનુસારે, ટીકાનો પાઠ હોય તો મૂળને અનુસારે અને શ્રીસૂર્યપ્રજ્ઞપ્તિ મૂળ-ટીકાને અનુસારે તે શુદ્ધ પાઠ જોડેલ છે, તે ( )માં મુકેલ છે.

ગ્રન્થને અંતે સાત પરિશિષ્ટો તૈયાર કર્યા છે. તેમાં અવતરણસૂચિ, અવતરણોના મૂળગ્રન્થોની સૂચિ, શબ્દસૂચિ, ટીકામાં લખેલા શાસ્ત્રનામોની સૂચિ, મૂળમાં લખેલા શાસ્ત્રનામોની સૂચિ, ટીકામાં લખેલા વિશેષનામોની સૂચિ અને મલયગિરિશબ્દાનુશાસનના સૂત્રોની અકારાદિક્રમે સૂચિ બતાવી છે.

સટીક શ્રીચન્દ્રપ્રજ્ઞપ્તિ અને સટીક શ્રીસૂર્યપ્રજ્ઞપ્તિમાં ઘણુખરું સામ્ય હોવા છતાં તે બન્ને સર્વથા સમાન નથી, આ વાત બન્ને ગ્રન્થોનો તુલનાત્મક અભ્યાસ કર્યા પછી જણાય છે. છપાયેલ સટીક શ્રીસૂર્યપ્રજ્ઞપ્તિનું સંશોધન થયેલ નથી. તેથી તેમાં અમુક સ્થાનોમાં અશુદ્ધિ પણ છે. તે સટીક શ્રીચન્દ્રપ્રજ્ઞપ્તિ નામના આ ગ્રન્થમાં તે તે સ્થાને જણાવેલ છે.

પૂજ્યપાદ ભવોદધિતારક ગુરુદેવશ્રી વૈરાગ્યદેશનાદક્ષ આચાર્યદેવ શ્રીમદ્વિજય **હેમચન્દ્રસૂરીશ્વરજી** મહારાજાની કૃપા, પ્રેરણા અને માર્ગદર્શનથી જ આ ગ્રન્થનું સંશોધન અને સંપાદન કરવા હું સમર્થ બન્યો છું. આ પ્રસંગે તેમના ચરણોમાં કૃતજ્ઞતાપૂર્વક અનંતશઃ વંદના કરું છું.

આ ગ્રન્થના સંશોધન અને સંપાદનમાં સહાયક થયેલ મહાત્માઓ, સંસ્થાઓ અને સંઘોનો પણ આ પ્રસંગે ફરી ખૂબ ખૂબ આભાર માનું છું.

સટીક શ્રીચન્દ્રપ્રજ્ઞપ્તિના આ પહેલા ભાગમાં પહેલા પ્રાભૃતથી દશમા પ્રાભૃત સુધીના દશ પ્રાભૃતોનો સમાવેશ કર્યો છે. બાકીના દશ પ્રાભૃતોનો સમાવેશ બીજા ભાગમાં કર્યો છે.

આ ગ્રન્થના સંશોધન અને સંપાદનમાં ક્યાંય છદ્મસ્થપણાના કારણે ક્ષતિ રહી ગઈ હોય તો તે બદલ હું ત્રિવિધે ક્ષમા યાચું છું અને વિદ્વાનોને તે ક્ષતિઓનું પરિમાર્જન કરવા પ્રાર્થના કરું છું.

સટીક આ ગ્રન્થનો સાંગોપાંગ અભ્યાસ કરી બધા અધિકારી સંયમીઓ જિનવચનના જ્ઞાતા બને અને તેની ઉપર અતૂટ શ્રદ્ધા પેદા કરી પરંપરાએ શીઘ્ર મુક્તિ પામે એ જ અંતરની એક અભિલાષા છે.

લિ.

પરમ પૂજ્ય સીમન્ધરજિનોપાસક આચાર્યદેવ
શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજાનો
ચરણોપાસક
મુનિ રત્નબોધિવિજય

વિરમગામ
વિ.સં. ૨૦૬૫, આસો સુદ ૧૪
(પૂજ્ય ગુરુદેવશ્રીનો ૫૭મો વડીદીક્ષાદિવસ)

अन्नाणी किं काही, किं वा नाहीहि छेयपावगं ?

अज्ञानं खलु दुःखकारणम्। ज्ञानं दुःखं विनाशयति। न ज्ञानमात्रेण दुःखं विनश्यति, परन्तु सम्यग्ज्ञानेन, अर्हता केवलज्ञानेन जगतस्तात्त्विकं स्वरूपं ज्ञातं देशनाभिश्च दर्शितम्। अर्हद्वचनैरज्ञानिनः सम्यग्ज्ञानं प्राप्नुवन्ति। अर्हद्वचनानि पूर्वमहापुरुषैः शब्दरूपेण ग्रथित्वा शास्त्राणि रचितानि। मुख्यशास्त्राणि आगमा इति कीर्त्यन्ते। पुरा चतुरशीतिरागमा आसन्। साम्प्रतं पञ्चचत्वारिंशदागमाः सन्ति। तेषु द्वादशोपाङ्गानि सन्ति। तेभ्यः **'श्रीमती चन्द्रप्रज्ञप्तिः'** एकमुपाङ्गम्। १,८५४ अनुष्टुब्वृत्तप्रमितमिदमुपाङ्गमज्ञातनामकेन **पूर्वाचार्येण** सूत्रितम्। सुगमवृत्तिरचनाविशारदैः **श्रीमलयगिरिसूरिभिरस्य** ९,४०० अनुष्टुब्वृत्तप्रमिता सुबोधा सरला च वृत्तिर्विनिर्मिता। मूलसूत्रोक्तगूढार्था वृत्तौ सुस्पष्टीकृता वृत्तिकृद्भिः।

श्रीचन्द्रप्रज्ञप्तिमूलवृत्ती प्रायः श्रीसूर्यप्रज्ञप्तिमूलवृत्त्योः सदृश्यौ। स्तोकस्थानेषु तयोर्भेदोऽस्ति।

अस्मिन्ग्रन्थरत्ने विंशतिः प्राभृतानि सन्ति। तेभ्यो दश प्राभृतान्यस्मिन् प्रथमे भागे प्रकाशितानि। शेषाणि दश प्राभृतानि द्वितीये भागे प्रकाशिष्यन्ते।

इदं ग्रन्थरत्नं प्रश्नोत्तरभङ्ग्या रचितम्। अत्रावान्तरविभागरूपाणि प्राभृतानि प्राभृतानामवान्तरविभागरूपाणि प्राभृतप्राभृतानि च सन्ति। सर्वेषु प्राभृतेषु प्राभृतप्राभृतेषु च गौतमगणभृत्पृष्टप्रश्नानामुत्तरं प्रयच्छन् श्रीवीरप्रभुः परदर्शनिमतरूपाः प्रतिपत्तीः प्रदर्श्याऽन्ते स्वमतं दर्शयति।

शुक्लपक्षे चन्द्रः कथं वर्द्धते ? कृष्णपक्षे चन्द्रः कथं हीयते ? रात्रिदिवसा हीनाधिकप्रमाणाः कथं सञ्जायन्ते ? समभूतलादूर्द्ध्वं ज्योतिष्कविमानां कियदुच्चत्वप्रमाणम् ? चन्द्र-सूर्य-ग्रह-नक्षत्र-ताराः कति ? संवत्सराः कतिविधाः ? कस्मिन्संवत्सरे कियन्ति रात्रिन्दिवानि ? ग्रहणं कथं भवति ? तिथीनां क्षयवृद्धयः कथं भवन्ति ? अधिकमासः कथं भवति ? नक्षत्राणि कियन्ति ? केन नक्षत्रेण चन्द्रसूर्ययोः कियान्योगः ?

पूर्णमास्याममावास्यायाश्च चन्द्रसूर्ययोर्योगः केन नक्षत्रेण भवति ? कस्मिन्नक्षत्रे प्रारब्धं कार्यं किंस्वरूपे भोजने कृते निर्विघ्नं सिध्यति ? दिवसतिथि-रात्रितिथि-दिवस-रात्रि-मुहूर्त्तमासानां नामानि कानि ? इत्यादि प्रश्नानामुत्तराण्यस्य ग्रन्थरत्नस्य पठनेन ज्ञास्यन्ते। अस्य ग्रन्थरत्नस्य पठनेनाऽर्वाचीनभूगोलमतस्याऽतात्त्विकत्वं जिनवचनानाञ्च तात्त्विकत्वं व्यक्तीभविष्यति। ततश्चाऽर्हद्वचनेषु श्रद्धाबहुमानौ प्रादुर्भविष्यतः।

प्रथमे प्राभृतेऽयमर्थाधिकारः एकस्मिन्संवत्सरे सूर्यः कति मण्डलानि सकृत् कति च मण्डलानि द्विर्व्रजति ? इति। प्रथमे प्राभृतेऽष्टौ प्राभृतप्राभृतानि सन्ति। तत्र प्रथमे प्राभृतप्राभृते दिवसरात्रिगतानां मुहूर्त्तानां बृद्ध्यपवृद्धी प्रतिपादिते। द्वितीये प्राभृतप्राभृते द्वयोः सूर्ययोरर्द्धमण्डलसंस्थितिर्निरूपिता। तृतीये प्राभृतप्राभृते सूर्योऽपरेण सूर्येण चीर्ण्णं कियत्क्षेत्रं प्रतिचरति ? इति विशदीकृतम्। चतुर्थे प्राभृतप्राभृते सूर्यौ परस्परं किय-त्प्रमाणमन्तरं कृत्वा चरतः ? इति निदर्शितम्। पञ्चमे प्राभृतप्राभृते कियत्प्रमाणं जम्बूद्वीपं लवणसमुद्रं वाऽवगाह्य सूर्यश्चारं चरति ? इति वर्णितम्। षष्ठे प्राभृतप्राभृते एकैकेन रात्रिन्दिवेनैकैकः सूर्यः कियत्प्रमाणं क्षेत्रं विमुच्य चारं चरति ? इति प्रोक्तम्। सप्तमे प्राभृतप्राभृते चन्द्रादिविमानानां संस्थानं ज्ञापितम्। अष्टमे प्राभृतप्राभृते मण्डलानां बाहल्यं स्पष्टीकृतम्। द्वितीये प्राभृतेऽयमर्थाधिकारः - कथं सूर्यस्तिर्यक्भ्रमति ? इति। द्वितीये प्राभृते त्रीणि प्राभृतप्राभृतानि सन्ति। तत्र प्रथमे प्राभृतप्राभृते सूर्यस्योदयास्तौ निरूपितौ। द्वितीये प्राभृतप्राभृते सूर्यस्य मण्डलान्मण्डलान्तरे सङ्क्रमणं प्रतिपादितम्। तृतीये प्राभृतप्राभृते प्रतिमण्डलं सूर्यस्य मुहूर्त्तगतिः निदर्शिता। तृतीये प्राभृतेऽयमर्थाधिकारः-चन्द्रः सूर्यो वा कियत् क्षेत्रं प्रकाशयति ? इति। चतुर्थे प्राभृतेऽयमर्थाधिकारः - चन्द्रसूर्यविमानानामवस्थानरूपसंस्थितिस्तापक्षेत्रसंस्थितिश्च कथं भवतः ? इति। पञ्चमे प्राभृतेऽयमर्थाधिकारः-सूर्यस्य लेश्या कुत्र प्रतिहता ? इति। षष्ठे प्राभृतेऽयमर्थाधिकारः-कियत्कालं सूर्यस्यौजोऽवस्थितं भवति वर्द्धते हीयते च ? इति। सप्तमे प्राभृते-ऽयमर्थाधिकारः - के पुद्गलाः सूर्यलेश्यासंस्पृष्टा भवन्ति ? इति। अष्टमे प्राभृते-ऽयमर्थाधिकारः कथं उदयसंस्थितिर्भवति ? इति। नवमे प्राभृतेऽयमर्थाधिकारः-किम्प्रमाणा पौरुषीछाया भवति ? इति। दशमे प्राभृतेऽयमर्थाधिकारः-चन्द्रसूर्ययोर्नक्षत्रेण सह योगः

कथं भवति ? इति। दशमे प्राभृते द्वाविंशतिः प्राभृतप्राभृतानि सन्ति। तत्र प्रथमे प्राभृतप्राभृते नक्षत्राणामावलिकाक्रमः प्रतिपादितः। द्वितीये प्राभृतप्राभृते नक्षत्राणां चन्द्रेण सह योगस्य मुहूर्त्तपरिमाणं प्रोक्तम्। तृतीये प्राभृतप्राभृते नक्षत्राणां पूर्वभागादिप्रकाराः प्रदर्शिताः। चतुर्थे प्राभृतप्राभृते नक्षत्राणां चन्द्रेण सह योगस्यादिर्दर्शितः। पञ्चमे प्राभृतप्राभृते कुलान्युपकुलानि कुलोपकुलानि च निरूपितानि। षष्ठे प्राभृतप्राभृते पौर्णमास्य अमावास्याश्च केन नक्षत्रेण समाप्यन्ते ? इति निदर्शितम्। सप्तमे प्राभृतप्राभृते पौर्णमास्यमावास्यानां चन्द्रयोगमाश्रित्य सन्निपातो वर्णितः। अष्टमे प्राभृतप्राभृते नक्षत्राणां संस्थानं प्रोक्तम्। नवमे प्राभृतप्राभृते नक्षत्राणां तारापरिमाणं स्पष्टीकृतम्। दशमे प्राभृतप्राभृते कानि नक्षाणि स्वयमस्तङ्गमनेनाऽहोरात्रसमाप्त्या कं मासं नयन्ति ? इति प्रज्ञापितम्। एकादशे प्राभृतप्राभृते नक्षत्राद्यधिकृत्य चन्द्रमार्गाः प्ररूपिताः। द्वादशे प्राभृतप्राभृते नक्षत्राधिपतीनां देवानां नामानि प्रोक्तानि। त्रयोदशे प्राभृतप्राभृते मुहूर्त्तानां नामानि कथितानि। चतुर्दशे प्राभृतप्राभृते दिवसानां रात्रीणाञ्च नामानि प्रदर्शितानि। पञ्चदशे प्राभृतप्राभृते तिथीनां स्वरूपं नामानि च प्रतिपादितानि। षोडशे प्राभृतप्राभृते नक्षत्राणां गोत्राणि दर्शितानि। सप्तदशे प्राभृतप्राभृते कस्मिन्नक्षत्रे प्रारब्धं कार्यं किंस्वरूपे भोजने कृते निर्विघ्नं सिद्धिमासादयति ? इति वर्णितम्। अष्टादशे प्राभृतप्राभृते सूर्याणां चन्द्राणाञ्च नक्षत्रेण सह चाराणां सङ्ख्या प्रदर्शिता। एकोनविंशतितमे प्राभृतप्राभृते मासानां नामानि निरूपितानि। विंशतितमे प्राभृतप्राभृते पञ्चविधाः संवत्सराः निदर्शिताः। एकविंशतितमे प्राभृतप्राभृते नक्षत्राणां द्वाराणि कथितानि। द्वाविंशतितमे प्राभृतप्राभृते नक्षत्राणां स्वरूपं प्रपञ्चितम्।

अद्यावधीदं ग्रन्थरत्नमप्रकाशितमासीत्। तत्त्वत्रयकृपया मयेदं ग्रन्थरत्नं हस्तलिखितप्रतिभ्यो लिप्यन्तरीकृतम्। ततोऽनेकहस्तलिखितप्रतिभ्य इदं संशोधितं सम्पादितञ्च। ततश्चाद्येदं ग्रन्थरत्नं प्रकाशितम्।

अस्य ग्रन्थरत्नस्य संशोधनाय श्रीचन्द्रप्रज्ञप्तिमूलग्रन्थस्याष्टौ हस्तलिखित-झेरोक्स-प्रतयः श्रीचन्द्रप्रज्ञप्तिटीकायाश्च षोडश हस्तलिखित-झेरोक्स-प्रतय उपयुक्ताः।

तासां परचिय इत्थं ज्ञेयः-

(१) इयं चन्द्रप्रज्ञप्तिवृत्तेस्ताडपत्रीया **A** सञ्ज्ञका प्रतिः पाटणस्थसङ्घवीपाटकज्ञानालय-सत्का लिखिता वि.सं. १४८० वर्षे पौषशुक्लत्रयोदश्यां बुधवासरे ।

(२) इयं चन्द्रप्रज्ञप्तिवृत्तेः **B** सञ्ज्ञका प्रतिः अजिमगञ्जज्ञानालयसत्का लिखिता वि.सं. १६२६ वर्षे फाल्गुनकृष्णप्रतिपदि मङ्गलवासरे।

(३) इयं चन्द्रप्रज्ञप्तिवृत्तेः **C** सञ्ज्ञका प्रतिः सूरतस्थतालावालाप्रतोलिस्थश्रीसीमन्धर-स्वामिज्ञानालयसत्का वैक्रमीयसप्तदशशताब्द्यां लिखितेति सम्भाव्यते।

(४) इयं चन्द्रप्रज्ञप्तिवृत्तेः **D** सञ्ज्ञका प्रतिः बालापुरज्ञानालयसत्का लिखिता वि.सं. १८५३ वर्षे वैशाखकृष्णषष्ठ्याम्।

(५) इयं चन्द्रप्रज्ञप्तिवृत्तेः **E** सञ्ज्ञका प्रतिः सूरतस्थश्रीजैनानन्दपुस्तकालयसत्का लिखिता वि.सं. १९२६ वर्षे ज्येष्ठशुक्लद्वितीयायाम्।

(६) इयं चन्द्रप्रज्ञप्तिवृत्तेः **F** सञ्ज्ञका प्रतिः दर्भावतीस्थाचार्यविजयजम्बूसूरिहस्त-लिखितकोशसत्का लिखिता वि.सं.१५२८ वर्षे भाद्रपदशुक्लद्वादश्यां मङ्गल-वासरे।

(७) इयं चन्द्रप्रज्ञप्तिवृत्तेः **G** सञ्ज्ञका प्रतिः आहोरस्थज्ञानालयसत्का वैक्रमीयपञ्चदश-शताब्द्यां लिखितेति सम्भाव्यते।

(८) इयं चन्द्रप्रज्ञप्तिमूलवृत्त्योः **H** सञ्ज्ञका प्रतिर्दशपुरास्थमुनिराजश्रीमाणेकविजय-शास्त्रसङ्ग्रहसत्का लिखिता वि.सं. १९६२ वर्षे कार्त्तिककृष्णसप्तम्याम्। श्रीचन्द्रप्रज्ञप्तिवृत्तेरियं शुद्धतमा प्रतिः संशोधनेऽतीवोपयोगिनी भूता।

(९) इयं चन्द्रप्रज्ञप्तिवृत्तेः **I** सञ्ज्ञका प्रतिः पाटणस्थश्रीहेमचन्द्राचार्यजैनज्ञानालय-श्रीलहीरवकीलज्ञानालयसत्का वैक्रमीयषोडशशताब्द्यां लिखितेति सम्भाव्यते।

(१०) इयं चन्द्रप्रज्ञप्तिवृतेः **J** सञ्ज्ञका प्रतिः पाटणस्थश्रीहेमचन्द्राचार्यजैनज्ञानालयसत्का वैक्रमीयपञ्चदशशताब्द्यां लिखितेति सम्भाव्यते।

(११) इयं चन्द्रप्रज्ञप्तिवृतेः **K** सञ्ज्ञका प्रतिः पाटणस्थश्रीहेमचन्द्राचार्यजैनज्ञानालय-श्रीमोदीजैनज्ञानालयसत्का वैक्रमीयषोडशशताब्द्यां लिखितेति सम्भाव्यते।

(१२) इयं चन्द्रप्रज्ञप्तिवृत्तेः **L** सञ्ज्ञका प्रतिः जेसलमेरज्ञानालयसत्का लिखिता वि.सं. १४८९ वर्षे अश्वयुक्शुक्लाष्टम्याम्।

(१३) इयं चन्द्रप्रज्ञप्तिवृतेः **M** सञ्ज्ञका प्रतिः पुणेस्थभाण्डारकरइन्स्टीट्युटसत्का लिखिता वैक्रमीयषोडशशताब्द्यामिति सम्भाव्यते।

(१४) इयं चन्द्रप्रज्ञप्तिवृत्तेस्ताडपत्रीया **N** सञ्ज्ञका प्रतिः जेसलमेरज्ञानालयसत्का लिखिता वि.सं. १४८८ वर्षे मार्गशीर्षशुक्लद्वितीयायां गुरुवासरे।

(१५) इयं चन्द्रप्रज्ञप्तिवृत्तेः **T** सञ्ज्ञका प्रेसकोपी लिखिता आचार्यगुणरत्नसूरिशिष्यरत्न-मुनिराजश्रीमोक्षरत्नविजयैः।

(१६) इयं S सञ्ज्ञका प्रतिः मुद्रितसटीकसूर्यप्रज्ञप्तेः।

(१७) इयं चन्द्रप्रज्ञप्तिमूलस्य ताडपत्रीया **O** सञ्ज्ञका प्रतिः पाटणस्थसङ्घवीपाटक-ज्ञानालयसत्का लिखिता वि.सं. १४७९ वर्षे ज्येष्ठकृष्णदशम्यां गुरुवासरे।

(१८) इयं चन्द्रप्रज्ञप्तिमूलस्य P सञ्ज्ञका प्रतिः सूरतस्थज्ञानालयसत्का लिखिता वि.सं. १५६७ वर्षे आषाढपूर्णिमायाम्।

(१९) इयं चन्द्रप्रज्ञप्तिमूलस्य **Q** सञ्ज्ञका प्रतिः सूरतस्थज्ञानालयसत्का लिखिता वि.सं. १६०८ वर्षे कार्त्तिकशुक्लचतुर्थ्याम्।

(२०) इयं चन्द्रप्रज्ञप्तिमूलस्य **R** सञ्ज्ञका प्रेसकोपी लिखिता मुनिराजश्रीपुण्यविजयैः।

(२१) इयं चन्द्रप्रज्ञप्तिमूलस्य **U** सञ्ज्ञका प्रतिः पाटणस्थखेतरवसीपाटकस्थपन्न्यास-श्रीधर्मविजयगणिचित्कोषसत्का वैक्रमीयायां पञ्चदश्यां षोडश्यां वा शताब्द्यां लिखितेति सम्भाव्यते। चन्द्रप्रज्ञप्तिमूलस्य शुद्धतमेयं प्रतिः संशोधनेऽतीवोपयोगिनी भूता।

(२२) इयं चन्द्रप्रज्ञप्तिमूलस्य **V** सञ्ज्ञका प्रतिः नडियादस्थज्ञानालयसत्का वैक्रमीयसप्त-दशशताब्द्यां लिखितेति सम्भाव्यते।

A-M-S-O-सञ्ज्ञकप्रतिफोटोकोपयः पाटणस्थश्रीजिनशासनआराधनाट्रस्टसकाशात्प्राप्ताः।

B-C-D-J-K-L-N-P-Q-R - सञ्ज्ञकप्रतिफोटोकोपयः कोबास्थश्रीकैलाससागरसूरिज्ञान-मन्दिरसकाशात्प्राप्ताः।

E-F-G-H-I-T-सञ्ज्ञकप्रतिफोटोकोपय आचार्यकल्याणबोधिसूरिपन्न्यासापराजितविजय-सकाशात्प्राप्ताः।

U - सञ्ज्ञकप्रतिफोटोकोपिराचार्यजगच्चन्द्रसूरि(डहेलावाला)सत्काशात्प्राप्ता।

V - सञ्ज्ञकप्रतिफोटोकोपिर्नडियादश्रीश्वेताम्बरमूर्त्तिपूजकजैनसङ्घसकाशात्प्राप्ता।

(१) पाटणस्थश्रीजिनशासनआराधनाट्रस्टः (२) कोबास्थश्रीकैलाससागरसूरि-ज्ञानमन्दिरं, (३) पूज्य आचार्यकल्याणबोधिसूरिः, (४) पूज्यः पन्न्यासअपराजितविजयः, (५) पूज्य आचार्यजगच्चन्द्रसूरिः (डहेलावाला), (६) नडियादस्थनडियादश्रीश्वेताम्बर-मूर्त्तिपूजकजैनसङ्घश्च-एते महात्मसंस्थासङ्घा अस्य ग्रन्थरत्नस्य संशोधनकार्ये हस्तलिखित-प्रतिफोटोकोप्यर्पणेनातीव सहायीभूताः। अत्र प्रसङ्गे साधुवादार्पणपूर्वं ताननुमोदयामि।

अस्मिन्ग्रन्थरत्ने सर्वप्रतीनां सङ्कलनां कृत्वा शुद्धः पाठः संयोजितः। पाठान्तराणि टिप्पण्यां दर्शितानि। यत्र सर्वासु प्रतिष्वशुद्धोऽयोग्यश्च पाठ उपलब्धस्तत्र स [ ] चिह्ने प्रक्षिप्तः। यत्र कस्याश्चिदपि प्रतौ शुद्धः पाठो नोपलब्धस्तत्र पूर्वापरं विचिन्त्य, टीकानुसारेण, मूलानुसारेण, सूर्यप्रज्ञप्ति-मूल-टीकानुसारेण वा स शुद्धः पाठः ( ) चिह्ने प्रक्षिप्तः।

ग्रन्थान्ते सप्त परिशिष्टानि न्यस्तानि। तेष्ववतरणसूचिरवतरणमूलग्रन्थसूचिः शब्द-सूचिर्वृत्त्युक्तशास्त्रनामसूचिर्मूलोक्तशास्त्रनामसूचिर्वृत्त्युक्तविशेषनामसूचिर्मलयगिरिशब्दानुशासन-सूत्रसूचिश्च दर्शिता।

परमपूज्य-भीमभवोदधितारक-परमोपकारि-गुरुदेव-आचार्यदेव-श्रीमद्विजय**हेमचन्द्र-सूरीश्वराणां** पुण्य-कृपा-प्रेरणा-मार्गदर्शनैरेव मयेदं ग्रन्थरत्नं संशोधितं सम्पादितञ्च। अत्र प्रसङ्गे पूज्यपादान् कृतज्ञभावेन वन्दे।

अस्य ग्रन्थरत्नस्य संशोधने सम्पादने च मतिमान्द्याद्या काचित् क्षतिर्जाता स्यात्तत्कृते क्षमां याचे बहुश्रुताँश्च तत्सम्मार्जनकृते प्रार्थये।

अस्य ग्रन्थरत्नस्य पठनेन सर्वेऽधिकृतसंयमिनो जिनप्रवचनज्ञा भवन्त्वित्यभिलषति।

— परार्थपरायण-आचार्यदेव-श्रीमद्विजय-
हेमचन्द्रसूरीश्वराणां
शिष्याणुः
मुनिरत्नबोधिविजयः।

राजनगरम्,
वि.सं.२०६८, अक्षयतृतीया

A Glance

The living beings of the world are sorrowful. The most important cause of their sorrows is ignorance. They are wandering in this world due to the darkness of ignorance. If they get the light of knowledge their sorrows will go away and they will attain happiness.

The Teerthankaras give the light of knowledge. Their disciples make scriptures from their preachings. The main scriptures are called Agamas. Formerly, there were eightyfour agamas. Recently, there are fortyfive agamas. Among them there are twelve Upangas. One of the twelve upangas is **'Chandapannatti Suttam'**. Except 'Chandapannatti Suttam' the rest fortyfour agamas with their commentaries have been published till know. Among them some agamas are corrected. 'Chandapannatti Suttam' with its commentary was neither published nor corrected till know. So, I desired to correct and publish this scripture. My Gurudev granted me permission for this work. I prepared a script of this scripture and corrected it with the help of many manuscripts. I made a presscopy of this scripture. Thus, it is being published today. By the blessings of Bhagwaan and Gurudev, this work has been completed without hindrances.

'Chandapannatti Suttam' was composed by an **unknown Acharya Maharaj** of the past. It measures about 1854 anushtubverses. Its commentary was composed by **Acharya Shree Malaygirisuri Maharaja**, who is well-known for his talent of composing simple commentaries. This commentary measures about 9400 anushtubverses. The commentary cleary describes the difficult terms of the text.

The text and the commentary of 'Chandapannatti Suttam' are most probably similar to those of **'Surpannatti Suttam'**. In some places they differ.

There are twenty prabhrutas in this scripture. Among them ten prabhrutas are published in this first volume. The rest ten prabhrutas are published in the second volume.

This scripture is composed in the style of question and answer. There are prabhrutas and prabhrutaprabhrutas in this scripture. Prabhrutas are divisions of the scripture. Prabhrutaprabhrutas are divisions of prabhrutas.

In all the prabhrutas and prabhrutaprabhrutas Shree Gautam Gandhar asks questions and Shree Mahaveer Swami Bhagwaan answers them. In his answers he first shows the beliefs of other philospohers and then shows his own doctrine.

The deities are of four types, viz - Bhawanpati, Vyantar, Jyotish and Vaimaanik. The Jyotish deities are of five types, viz - Moon, Sun, Planet, Constellation and Star. The total details of the five types of Jyotish deities and their Vimaanas (residing abodes) have been described in this scripture. By the study of this scripture we get wide knowledge of the Jyotishchakra.

(1) In the bright fortnight why the moon increases ?

(2) In the dark fortnight why the moon decreases ?

(3) Why the timeperiod of the days and the nights increases and decreases ?

(4) From the surface of the earth at what height do the Jyotishvimaanas dwell ?

(5) How many moons, suns, planets, constellations and stars are there in the universe ?

(6) How many types of years are there ?

(7) In which type of year how many days and nights are there ?

(8) How the eclipse happens ?

(9) How does the number of tithis increase or decrease ?

(10) Why does the extra month come ?

(11) What is the timelimit of the union of the moon and the sun with each constellation ?

(12) On the fullmoonday and nomoonday the moon and the sun unite with which constellation ?

(13) In which constellation started work can be completed without any hindrance after taking which type of food ?

(14) What are the names of the tithis of the day, the tithis of the night, the days, the nights, the muhurtas and the months ?

The answers to these questions and such types of other questions can be known after a thorough study of this scripture.

The topics of the prabhrutas and the prabhrutaprabhrutas can be known from the index.

I have used eight manuscripts of the text and sixteen manuscripts of the commentary in correcting this scripture. The list and introduction of the scriptures is as follows -

(1) This is a manuscript of the commentary. It was written in 1480 year of the Vikram Era. It is from Sanghvipadagnanalaya of Patan. It is denoted by **A**.

(2) This is a manuscript of the commentary. It was written in 1626 year of the Vikram Era. It is from Ajimganjgnanalaya. It is denoted by **B**.

(3) This is a manuscript of the commentary. It can be assumed that it was written in the seventeenth century of the Vikram Era. It is from Shree Simandharswamignanalaya of Taalawalapole in Surat. It is denoted by **C**.

(4) This is a manuscript of the commentary. It was written in 1853 year of the Vikram Era. It is from Balapurgnanalaya. It is denoted by **D**.

(5) This is a manuscript of the commentary. It was written in 1925 year of the Vikram Era. It is from ShreeJainanandpustakalaya of Surat. It is denoted by **E**.

(6) This is a manuscript of the commentary. It was written in 1528 year of the Vikram Era. It is from Acharyavijay Jambusuri Hastalikhitkosh of Darbhavati. It is denoted by **F**.

(7) This is a manuscript of the commentary. It can be assumed that it was written in the fifteenth century of the Vikram Era. It is from Gnanalaya of Aahore. It is denoted by **G**.

(8) This is a manuscript of the text with the commentary. It was written in 1962 year of the Vikram Era. It is from Muniraj Shree Manekvijay Shaastra Sangraha of Dashpura. It is denoted by **H**. Being very correct, this manuscript was very much usefull in the correctionwork.

(9) This is a manuscript of the commentary. It can be assumed that it was written in the sixteenth century of the Vikram Era. It is from Shree Hemchandracharya Jain Gnanalaya - Shree Laheer Vakil Gnanalaya of Patan. It is denoted by **I**.

(10) This is a manuscript of the commentary. It can be assumed that it was written in the fifteenth century of the Vikram Era. It is from Shree Hemchandracharya Jain Gnanalaya of Patan. It is denoted by **J**.

(11) This is a manuscript of the commentary. It can be assumed that it was written in the sixteenth century of the Vikram Era. It is from Shree Hemchandracharya Jain Gnanalaya - Shree Modi Jain Gnanalaya of Jesalmer. It is denoted by **K**.

(12) This is a manuscript of the commentary. It was written in 1489 year of the Vikram Era. It is from Gnanalaya of Jesalmer. It is denoted by **L**.

(13) This is a manuscript of the commentary. It can be assumed that it was written in the sixteenth century of the Vikram Era. It is from Bhandarkar Institute of Pune. It is denoted by **M**.

(14) This is a manuscript of the commentary. It was written in 1488 year of the Vikram Era. It is from Jesalmer Gnanalaya. It is denoted by **N**.

(15) This is a presscopy of the commentary. It was written by Muniraj Shree Mokshratnavijay Maharaj, a disciple of Acharya Gunaratnasuri Maharaj. It is denoted by **T**.

(16) This is a printed script of the text and the commentary of Surya-pragnapti. It is denoted by **S**.

(17) This is a manuscript of the text. It was written in 1479 year of the Vikram Era. It is from Sanghvi Pada Gnanalaya of Patan. It is denoted by **O**.

(18) This is a manuscript of the text. It was written in 1567 year of the Vikram Era. It is from Surat Gnanalaya. It is denoted by **P**.

(19) This is a manuscript of the text. It was written in 1608 year of the Vikram Era. It is from Surat Gnanalaya. It is denoted by **Q**.

(20) This is a presscopy of the text. It was written by Muniraj Shree Punyavijay Maharaj. It is denoted by **R**.

(21) This is a manuscript of the text. It can be assumed that it was written in the fifteenth or the sixteenth century of the Vikram Era. It is from Pannyas Shree Dharmavijaygani Chitkosh of Khetarvasipada in Patan.

It is denoted by **U**. Being very correct, this manuscript was very usefull in the correction-work.

(22) This is a manuscript of the text. It can be assumed that it was written in the seventeenth century of the Vikram Era. It is from Nadiyad Gnanalaya. It is denoted by **V**.

Among these manuscripts, the manuscripts denoted by A, N, O are written on palmleaves. The rest are written on paper.

I received the photocopies of the manuscripts denoted by A, M, S, O from Shree Jinshasan Aradhana Trust of Patan, those denoted by B, C, D, J, K, L, N, P, Q, R from Shree Kailassagarsuri Gnanmandir of Koba, those denoted by E, F, G, H, I, T from Acharya Kalyanbodhisuri Maharaj and Pannyas Aparajitvijay Maharaj, that denoted by U from Acharya Jagacchandrasuri Maharaj (Dehlawala) and that denoted by V from Nadiad Shree Shwetambar Murtipujak Sangh. These Mahatmas, Institutions and Sanghas have been very very helpfull in this correction-work by supplying the photocopies of the manuscripts. I gratefully thank them and praise them from their help.

After referring all the manuscripts, I have compiled the most correct version in this book. I have shown the differing versions in the footnotes. Wherever I found incorrect and improper version in all the manuscripts, there I have mentioned that version in [ ] box brackets. Wherever I didn't find proper version in any of the manuscripts, there after thinking on the previous and behind versions or in accordance with the commentary or in accordance with the text or in accordance with the text and the commentary of Suryapragnaptisutram I have mentioned the perfect version in ( ) round brackets.

At the end, I have prepared seven appendixes which show list of quotations in the commentary, list of scriptures from which the quotations are taken in the commetary, list of words in the text, list of scripture-names in the commentary, list of scripture-names in the text, list of chief-names in the commentary and list of sutras in Malyagiri Shabdanushasan.

I have corrected and edited this scripture by the blessings, inspirations and guidance of my gurudev His Holiness Param Pujya Acharya Dev

Shreemad Vijay Hemchandrasurishwarji Maharaj. At this moment, I gratefully bow to him with great reverence.

If any mistake has remained in the correction and in the edition of this scripture, I apologize for it and entreat the scholars to correct it.

I wish that all authorized ascetics should get acquainted by the Jaindoctrines after a thorough and deep study of this scripture.

- Disciple of

HisHoliness

Param Pujya Acharyadev Shreemad Vijay


Hemchandrasurishwariji Maharaj

Muni Ratnabodhi Vijay

Sirohi

2069 V.E.


Dt. 27-06-2013.



A = સંઘવીના પાડાનો જ્ઞાનભંડાર, પાટણ.

શરૂઆત : ॥९०॥ श्रीवर्द्धमानाय नमः ॥ श्रीसीमंधरस्वामिने नमः ॥छ॥ मुक्ताफलमिव करतलकेलितं विश्वं....

અંત : इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्टिटीका समाप्ताः ॥छ॥ ग्रंथाग्रं ९५०० श्लोकमानेन यथा ॥ सं.१४८० वर्षे पोष शुदि १३ बुधे लिखितं ।



B = અજિમગંજ જ્ઞાનભંડાર

શરૂઆત : ९०॥ श्री वर्द्धमानाय नमः ॥....

मुक्ताफलमिव करतलकलितं विश्वं समस्तमपि...

અંત : इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीका समाप्ता ॥छा॥ ॥छा॥ ग्रंथाग्रं ९५०० श्लोकमानेन ॥छा॥ ॥ संवत् १६२६ वर्षे फागुण वदि १ भौमे । अद्येह श्रीअम्मदावादराजनगरमध्ये..... श्रीचंद्रप्रज्ञप्तिवृत्तिर्लेखिता ॥छा॥ ॥छा॥ ॥छा॥ ॥छा॥ ॥छा॥ ॥छा॥ ॥छा॥






C = श्रीसीमंधरस्वामी ज्ञानभंडार, ताळावाळानी पोळ, सुरत

शરૂआत : ॥९०॥ श्रीवर्द्धमानाय नमः ॥ मुक्ताफलमिव करतलकलितं विश्वं समस्तमपि....


अंत : इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्टिीका समाप्तः ।छ॥ ग्रंथाग्रं ९४०० श्लोकमानेन यथा मु । मतिचंद्रनिश्रया ॥



D = બાલાપુર જ્ઞાનભંડાર.

શરૂઆત : ।।ए९०।। श्रीजिनाय नमः ।। मुक्ताफलमिव करतलकलितं विश्वं समस्तमपि...

અંત : इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीका समाप्ता ।।श्री।। ग्रंथाग्रं ९७२० श्लोकमाने यथा ।। संवत् १८५३ वर्षे मिती वैशाख वदि ७ दिने ।। लि। पं. राजविजयेन । श्रीवीकानेरमध्ये श्रीअजितजिनप्रासादात्।। श्रीरस्तुः ।।



E = श्रीजैनानन्द पुस्तकालय, सुरत.

शરૂआत : ॥ श्रीजिनाय नमः ॥ मुक्ताफलमिव करतलकलितं विश्वं समस्तमपि....


अंत : इति श्रीमलयगिरिविरचितायां वृहत्चंद्रप्रज्ञप्तिटीका समाप्ताः ॥ ग्रंथाग्रं । ९४०० ॥ श्लोकमानेन यथा ॥ संवत् १९२८ मीती जेष्ट सुदी २

F = પૂ.આ. વિજયજંબૂસૂરિજી હસ્તલિખિત કોશ, ડભોઈ

શરૂઆત : ए९०॥ श्रीवर्द्धमानाय नमः ॥ मुक्ताफलमिव करतलकलितं विश्वं समस्तमपि...

અંત : इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्ति टीका समाप्ताः ॥छा॥ ॥छा॥ ग्रंथाग्रं ९५०० ॥छा॥ संवत् १५२८ वर्षे भाद्रपद शुदि १२ भूमे॥ ॥ श्रीसीमंधरस्वामिने नमः ॥....








G = आहोर ज्ञानभंडार

शરૂआत : ॥ श्रीवर्द्धमानाय नमः मुक्ताफलमिव करतलकलितं विश्वं समस्तमपि....

अंत : इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्तिटीका समाप्तं छ ग्रंथाग्रं ९४०० श्लोकमाने यथा छ छ ॥ श्री ॥ छ ॥१॥.....








H = મુનિરાજશ્રી માણેકવિજયજી શાસ્ત્રસંગ્રહ, દશપુરા

શરૂઆત : ॥ ए९० ॥ नमो अरिहंताणं जयइ नवणलिणकुवलयविगसियसयवत्त...

શરૂઆત : ॥ ए९०॥ श्रीवर्द्धमानाय नमः मुक्ताफलमिव करतलकलितं विश्वं.....

અંત : इति चंदपण्णत्ती सम्मत्ता ग्रंथाग्रंथ १८५४


અંત : इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्तिटीका समाप्ता ॥छ॥ ॥छ॥ ग्रंथाग्रंथ ९५०० श्लोकमानेन शुभं भवतु ॥ इति श्रीदशपुरामध्ये संवत १९६२ना कार्तिकमासे कृष्णपक्षे सप्तमीने दिवसे संपूर्णं लिखितं पटेल नाथाभाइ सनाभाइ गाम बोरसद ॥ मुनि महाराजजी माणेकविजयजी ॥ श्री ॥ श्री ॥ छ ॥



I = श्रीहेमचन्द्राचार्य जैन ज्ञानभंडार, श्रीलहीरवकील ज्ञानभंडार, पाटण

शરૂआत : ॥९०॥ श्रीवर्द्धमानाय नमः ॥ मुक्ताफलमिव करतलकलितं विश्वं....

अंत : इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्तिटीका समाप्ताः ॥छ॥ शुभं भवतु श्रीश्रमणसंघस्य ॥छ॥




J = શ્રીહેમચંદ્રાચાર્ય જૈન જ્ઞાનભંડાર, પાટણ

શરૂઆત : ॥ ए ९० ए श्रीवर्द्धमानाय नमः ॥ मुक्ताफलमिव करतलकलितं विश्वं.....

અંત : इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्तिटीका समाप्ता:॥ छ लृ ॥छ॥ ग्रंथाग्रं ९५००







K = શ્રીહેમચન્દ્રાચાર્ય જૈન જ્ઞાનભંડાર, શ્રીમોદી જૈન જ્ઞાનભંડાર, પાટણ

શરૂઆત : શ્રીવર્દ્ધમાનાય નમઃ મુક્તાફલમિવ કરતલકલિતં વિશ્વં....

અંત : इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्तिटीका समाप्तं छ ग्रंथाग्रं ९४०० श्लोकमान यथा छ छ ॥ श्री ॥ छ ॥१॥.....






L = જેસલમેર જ્ઞાનભંડાર, જેસલમેર

શરૂઆત : ॥ ९० ॥ श्रीवर्द्धमानाय नमः ॥ मुक्ताफलमिव करतलकलितं विश्वं....

અંત : इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्तिटीका समाप्ता ॥ छ ॥ श्रीः ॥ ग्रंथाग्रं ९५०० श्लोकमानेन ॥ शभुं भवतु ॥ श्रीकल्याणमस्तु ॥ संवत् १४८९ वर्षे अश्विनमासे शुक्लपक्षे अष्टम्यां वारशुक्रे श्रीमत् अणलपुरे लिखितं ॥






M = ભાંડારકર ઓરિએન્ટલ રીસર્ચ ઈન્સ્ટીટ્યૂટ, પૂના

શરૂઆત : ॥ ए९० ॥ श्री वर्द्धमानाय नमः मक्ताफलमिव करतलकलितं विश्वं....

અંત : इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्तिटीका समाप्ताः ॥ छ ॥ ग्रंथाग्रं ९५०० ॥
श्रीरस्तुः छ ॥



N = જેસલમેર જ્ઞાનભંડાર, જેસલમેર


શરૂઆત : ॥ ९० ॥ ॐ नमः श्रीवर्द्धमानाय ॥ मुक्ताफलमिव करतलकलितं विश्वं समस्तमपि....

અંત : समाप्ता चंद्रप्रज्ञप्तिटीका ॥ ग्रंथाग्रं ९५०० ॥ संवत् १४८८ वर्षे मार्गशीर्ष सुदि २ गुरौ श्रीमति श्रीस्तंभतीर्थे...

O = संघवीना पाडानो भंडार, पाटण

शરૂआत : ॥ ९० ॥ नमो अरिहंताणं ॥ जयति नवणलिण कुवलयविगसियसयवत्तपत्तलदलच्छो...


अंत : इति चंदपण्णत्ती समाप्ता ॥ छ ॥ छ ॥ श्रीः ॥ ग्रंथ संख्या २०५४ मंगलं महाश्रीः ॥ ॥ शुभं भवतु ॥
संवत् १४७९ वर्षे ज्येष्ट वदि दशम्यां गुरौ गरकरणे ॐ श्री सीमंधरस्वामिने नमः ॥ छ ॥ श्रीः ॥



P = સુરત જ્ઞાનભંડાર

શરૂઆત : ९० ए ॐ नमो अरिहं ॥ जयति नवणलिणकुवलयवियसियसयवत्त...


અંત : ॥ श्रीः ॥ ॥ छ ॥ चंद्रप्रज्ञप्तिसूत्रं संपूर्णं ॥ छ ॥ ॥ श्री ॥ ॥ छ ॥ ॥ संवत् १५६७ वर्षे आषाढ शुदि १५ शुक्रे लिखिता पुस्तिका ॥ छ ॥ ॥ शुभं भवतु ॥ छ ॥ ॥ श्रीः ॥ ॥ कल्याणमस्तु ॥ छ ॥ ॥ छ ॥ ॥ श्रीः ॥ ॥ छ ॥ ॥ श्रीः ॥ ....



Q = સુરત જ્ઞાનભંડાર

શરૂઆત : ए ९० नमो अरिहंताणं जयति नवणलिणकुवलयविगसिय.....

અંત : इति चंदपण्णत्ती ससम्मत्ता ।। छ ।। श्री ।। श्री ।। छ ।। ग्रंथाग्रं संख्या ।।१८५४।। ।।छ।। ।।श्री।। ।।छ।। ।।श्री।। छ।। संवत् १६०८ वर्षे कार्तिक शुदि ४ रवौ भणसाली वर्धमानसुतजिनाज्ञाप्रतिपालकभणसाली हंसराजतत्पुत्र मेघजी सह तेन पुण्यार्थं पुस्तकं गृहीतं ।।छ।। शुभं भवतु ।।छ।। ।।



॥ नमो अरिहंताणं ॥

जयति नवण्णालिणि कुवलयविगसिय सयवत्तपत्तलट्ठलच्छो ।
वीरो गयंदसयगल सललिय गयविक्कमो भयवं ॥

णमिऊण असुरसुरगरुल भूयगपरिवंदिए गतकिलेसे ।
अरिट्ठे सिद्धासरिजो वज्झाए सङ्घसाहू य ॥

फुडवियडपायडत्थं वुच्छं पुव्वसुयसारणीसंदं ।
सुहुमगणिणो वइट्ठं जोइसगणरायपन्नत्तिं ॥

णामेण इंदभूतिति गोतमो वंदिऊण तिविहेण ।
पुच्छइ जिणवरवसहं जोइसरायस्स पण्णत्तिं ॥

कति मंडलाति वच्चंति तिरिच्छा किं व गच्छंति ।
ओभासंति केवतियं केया ते संठिती ॥

कहिं पडिहया लेसा कहं ते ओयसंठिती ।
किं सूरिओ वसंघेति कहं ते ओयसंठिती ॥

कति कट्ठा जोगिणी च्छाया जोएति किं तिआहिए ।
के ते संवच्छराणाई कइ संवच्छरा तिंय ॥

कहं चंदमसो वुड्ढी कया ते जोगिणा वहू ।
के सिंघगती वुत्तो किं तेजोसिणात्तवरयणं ॥

वयणोवग्घाय उद्दाणं सूरिया कति आहिया ।
अणुभावे केतिमे वुत्ते एवमेताणि वीसति ॥छ॥

वे णिच्चालोए णिच्चुज्जोए सयंपहे ओभासे सयंकरे यसेंकरे ओभंकरे जसंकरे अतए विरए

J.J-435

असोगे वीयसोगे विनत्ते विचत्थे विसाले सुव्वते अणिअट्टी एकजडी दुजडी करेकरिए रायगले

भायकेऊ धुप्पकेतू इति एस पागडत्था । अमेसु जणाहिनय दुल्लुभेसु दृणमो ।
उक्किट्ठिया भगवती जोतिसरायस्स पण्णत्ती ॥
संगहिता विसंती चउदसपुव्वेसु पडिणीए ।
अबहुसुए न देया नत्थिवरीए भवे देया ॥
सद्धा धिइ उट्ठाणुच्छाहकम्मबल विरियपुरिसकारेहिं ।
जो भिक्खमणो वि सैनो अभंगणे नमिवविज्जाहिं ॥
सो चउरणकुलगण संघसाहिरो णाणविणयचरिहीणो ।
अरहंत घोरगणहरमेरं किर होति जोतीणो ।
नमहा जिनि उट्ठाणुच्छाहकम्म बलविरिय सिद्धिखमं णाणं ।
धारेयव्वं णिच्चा जय आधीणे सु रायव्वं ॥छ॥

इति चंदपण्णत्ती सम्मत्ता ॥छ॥ ग्रन्थाग्रं १८५४॥

R = પૂ.મુનિરાજશ્રી પુણ્યવિજયજી મહારાજે તૈયાર કરેલ શ્રીચંદ્રપ્રજ્ઞપ્તિમૂળની પ્રેસકોપી.


શરૂઆત : जयति नवण्णालिणि कुवलयविगसिय.....

અંત : इति चंदपण्णत्ती सम्मत्ता ॥ छ ॥ ग्रंथाग्रं १८५४ ॥

T = પૂજ્ય મુનિરાજશ્રી મોક્ષરત્નવિજયજી મહારાજે તૈયાર કરેલ ચંદ્રપ્રજ્ઞપ્તિટીકાની પ્રેસકોપી.

શરૂઆત : ॥ ऐँ ॥ मुक्ताफलमिव करतलकलितं.....


અંત : इति श्रीमलयगिरिविरचितायां बृहत् चंद्रप्रज्ञप्तिटीका समाप्ताः। ग्रंथाग्र ९४०० श्लोकमानेन यथासूत्रटीका संमिलिते ग्रंथाग्रं ११२०० ॥छ॥



U = पं. श्रीधर्मविजयजी गणि चित्कोष, खेतरवसीनो पाडो, पाटण. (त्रुटक, अपूर्ण)

शરૂआत : णे सिग्घगता पविसंते मंदगता वि य चुलसीयं सय पुरिसाणं.....

अंत : भवणवासीणं देवाणं एत्तो अणंतगु.....



V = નડિયાદ શ્રી શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ જ્ઞાનભંડાર, નડિયાદ.

શરૂઆત : ॥૧૦॥ ૐ નમો અરહંતાણં જયતિ णवलणकुवल विगसियवत्तपत्तल...

અંત : इति चंदपण्णत्ती संमत्तं ग्रंथाग्रंथ २००० सुभं भवतु कल्याणमस्तु लेखक पावकजये।

મુનિ રત્નબોધિવિજયજીએ તૈયાર કરેલ સટીક શ્રીચંદ્રપ્રજ્ઞપ્તિની પ્રેસકોપી

શરૂઆત : मुक्ताफलमिव करतलकलितं[1].....

અંત : समाप्ता चन्द्रप्रज्ञप्तिटीका। ग्रन्थाग्रं ९४००[3] श्लोकमानेन[4]। शुभ भवतु।

विषयानुक्रमः

प्राभृतम्	प्राभृत-प्राभृतम्	विषयः	पृष्ठ क्र.
१	-	सूर्यो वर्षमध्ये कति मण्डलानि सकृत् कति वा मण्डलानि द्विर्व्रजति ?	१-९६
	१	दिवसरात्रिगतानां मुहूर्त्तानां वृद्ध्यपवृद्धी।	१-३६
	२	द्वयोः सूर्ययोरर्द्धमण्डलसंस्थितिः।	३७-४६
	३	सूर्योऽपरेण सूर्येण चीर्णं कियत्क्षेत्रं प्रतिचरति ?	४७-५२
	४	सूर्यौ परस्परं कियत्प्रमाणमन्तरं कृत्वा चरतः ?	५३-६२
	५	कियत्प्रमाणं जम्बूद्वीपं लवणसमुद्रं वाऽवगाह्य सूर्यश्चारं चरति ?	६३-६८
	६	एकैकेन रात्रिन्दिवेनैकैकः सूर्यः कियत्प्रमाणं क्षेत्रं विमुच्य चारं चरति ?	६९-७७
	७	चन्द्रादिविमानानां संस्थानम्।	७८-८०
	८	मण्डलानां बाहल्यम्।	८१-९६
२	-	सूर्यस्य तिर्यग्गतिः।	९७-१३४
	१	सूर्यस्योदयास्तौ।	९७-१०४
	२	सूर्यस्य मण्डलात्मण्डलान्तरे सङ्क्रमणम्।	१०५-१०८
	३	प्रतिमण्डलं सूर्यस्य मुहूर्त्तगतिः।	१०९-१३४
३	-	चन्द्रः सूर्यो वा कियत्क्षेत्रं प्रकाशयति ?	१३५-१४२
४	-	श्वेतायाः संस्थितिः।	१४३-१६४
५	-	सूर्यस्य लेश्या कस्मिन्प्रतिहता ?	१६५-१७०
६	-	ओजसः संस्थितिः।	१७१-१७९
७	-	के पुद्गलाः सूर्यलेश्यासंस्पृष्टा भवन्ति ?	१८०-१८२
८	-	सूर्यस्योदयसंस्थितिः।	१८३-१९९
९	-	पौरुषीछायाप्रमाणम्।	२००-२१४

विषयानुक्रमः

प्राभृतम्	प्राभृत-प्राभृतम्	विषयः	पृष्ठ क्र.
१०	-	चन्द्रसूर्ययोर्नक्षत्रेण सह योगः।	२१५-४२०
	१	नक्षत्राणामावलिकाक्रमः।	२१५-२१७
	२	नक्षत्राणां चन्द्रेण सह योगस्य मुहूर्त्तपरिमाणम्।	२१८-२२४
	३	नक्षत्राणां पूर्वभागादिप्रकाराः।	२२५-२२७
	४	नक्षत्राणां चन्द्रेण सह योगस्यादिः।	२२८-२३८
	५	कुलान्युपकुलानि कुलोपकुलानि च।	२३९-२४०
	६	पौर्णमास्य अमावास्याश्च केन नक्षत्रेण समाप्यन्ते?	२४१-२७५
	७	पौर्णमास्यमावास्यानां चन्द्रयोगमाश्रित्य सन्निपातः।	२७६-२७८
	८	नक्षत्राणां संस्थानम्।	२७९-२८०
	९	नक्षत्राणां तारापरिमाणम्।	२८१-२८२
	१०	कानि नक्षत्राणि स्वयमस्तङ्गमनेनाऽहोरात्रसमाप्त्या कं मासं नयन्ति?	२८३-२९३
	११	नक्षत्राद्यधिकृत्य चन्द्रमार्गाः।	२९४-३११
	१२	नक्षत्राधिपतीनां देवानां नामानि।	३१२-३१३
	१३	मुहूर्त्तानां नामानि।	३१४-३१५
	१४	दिवसानां रात्रीणाञ्च नामानि।	३१६-३१८
	१५	तिथयः।	३१९-३२२
	१६	नक्षत्राणां गोत्राणि।	३२३-३२४
	१७	कस्मिन्नक्षत्रे प्रारब्धं कार्यं किंस्वरूपे भोजने कृते निर्विघ्नं सिध्यति ?	३२५-३२६
	१८	सूर्याणां चन्द्राणाञ्च नक्षत्रेण सह चाराणां सङ्ख्या।	३२७-३२८
	१९	मासानां नामानि।	३२९-३३०
	२०	पञ्चविधाः संवत्सराः।	३३१-३७०
	२१	नक्षत्राणां द्वाराणि।	३७१-३७४
	२२	नक्षत्राणां स्वरूपम्।	३७५-४२०

पूर्वाचार्यविरचितं श्रीमलयगिरिसूरिविरचितवृत्तिविभूषितं

चंदपण्णत्तिसुत्तं

प्रथमो भागः

प्रथमं प्राभृतम्

प्रथमं प्राभृतप्राभृतम्

टीकाकर्त्तुर्मङ्गलम्— मुक्ताफलमिव करतलकेलितं[१] विश्वं समस्तमपि सततं।
यो वेत्ति विगतकर्म्मा स जयति नाथो जिनो वीरः॥१॥
सर्वश्रुतपारगताः प्रतिहतनिःशेषकुपथसन्तानाः।
जगदेकतिलकभूता जयन्ति गणधारिणः सर्व्वे॥२॥
विलसतु मनसि सदा मे जिनवाणी परमकल्पलतिकेव।
कल्पितसकलनरामरशिवसुखफलदानदुर्ललिता[२]॥३॥
चन्द्रप्रज्ञप्तिमहं गुरूपदेशानुसारतः किञ्चित्।
विवृणोमि यथाशक्ति स्पष्टं स्वपरोपकाराय॥४॥

तत्राविघ्नेनेष्टप्रसिद्ध्यर्थमादाविष्टदेवतास्तवमाह[३]—

मू० जयइ[४] नवणलिणकुवलयवियसियसयवत्तपत्तलदलच्छो[५]।[६]
वीरो गइंदमयगलसललियगयविक्कमो[७][८] भगवं[९]॥१॥

टी० इह स्तवो द्विधा- गुणोत्कीर्त्तनरूपः[१०] प्रणामरूपश्च। तत्र गुणोत्कीर्त्तनरूपः साक्षादनया गाथयाऽभिहितः, प्रणामरूपः सामर्थ्यगम्यो यथा च सामर्थ्यगम्यता तथा

---

१. केलितं A। २. .....सुखसन्तानदुर्ललिता - N। ३. तत्राविघ्नेष्ट... - J, तत्राविघ्नप्रसि... - E। ४. जयति - P,Q,O। प्राकृतशैल्या एवमादिप्रकाराः पाठान्तरा अग्रेऽप्यनेकस्थलेषु कासुचित्प्रतिषु दृश्यन्ते, ते सर्वे भिन्नार्थाप्रदर्शकत्वान्मया न प्रदर्शिताः। ५. णव... - B,D,E,G,K,N। ६. विगसिय - O,Q। ७. गयंद ... - D,O,P,Q,R। ८. गइ - B। ९. भयवं - A,B,D,E,G,K,O,P,Q,R। १०. गुणोत्कीर्त्तनरूपः साक्षादनया गाथयाऽभिहितः - A,F,M।

भावयिष्यते। तत्र **जयति** रागादिशत्रूनभिभवति **'जि जि अभिभवे' (पाणिनीय-धातुपाठः, भ्वादि ९७१-९७२)** इति वचनात्। [१]यद्यपि च न सम्प्रति रागादि-शत्रूनभिभवति तेषामग्रे एव [२]निर्मूलकाषङ्कषितत्वात् तथापि तत्फलं सिद्धत्व-लक्षणमद्याप्यविच्युतमवति[३]ष्ठते इति फले हेतूपचाराज्जयतीत्युक्तम्। यदि वा सम्प्रत्यपि भगवान् भक्त्यानुध्यायमानो ध्यातॄणामभिभवति रागादिक्लेशान्, [४]**'भत्तीइ जिण-वराणं खिज्जंति पुव्वसंचिया कम्मा।'**( ) इति वचनप्रामाण्यात्। ततो जयतीत्युक्तम्। अथवा **जयति** सर्वानपि सुरासुरप्रभृतीन् प्राणिनः स्वगुणैरतिशेते धातूनामनेकार्थत्वात्। यश्च सकलसुरासुरेभ्योऽपि स्वगुणैरतिशायी स प्रेक्षावतामवश्यं प्रणामार्हो गुणैरधिकत्वात्। ततो जयतीति, किमुक्तं भवति ? तं प्रति प्रणतोऽस्मीति। एतेन [५]प्रणामरूपः स्तवः सामर्थ्यगम्यो भावितः। कोऽसौ ? इत्याह **वीरः, 'शूर वीर विक्रान्तौ' (पाणिनीयधातुपाठः, चुरादि ३७०-३७१)**, वीरयति स्म कषायादिशत्रून् प्रति विक्रामति स्मेति वीरः। इदं च वीर इति नाम न यादृच्छिकं किन्तु यथावस्थितमनन्यसाधारणं परीषहोपसर्गादिविषयं वीरत्वमपेक्ष्य [६]सुरासुरकृतम्। अतो वीर इति नाम्ना अपायापगमातिशयो ध्वन्यते। अथवा **'ईर गतिप्रेरणयोः'** विशेषेणाऽपुनर्भावस्वरूपेण ईरयति प्रेरयति आत्मनः सकाशाच्च्यावयति याति च शिवमिति वीरः। अत्राप्यपायापगमातिशयप्रतिपत्तिः। किंविशिष्टः ? इत्याह - **'नवनलिण'** इत्यादि। प्राकृते [७]पूर्वपरनिपातो विशेषणानामतन्त्र इति पत्तलशब्दो वियसियशब्दश्च नलिनादिशब्दानां पूर्वं द्रष्टव्यः। **'पत्तल'**मिति पत्रसमृद्धं [८]**"पत्तसमिद्धं तिक्खं च पत्तलम्'** ( ) इति वचनात्। **नवं** प्रत्यग्रं **विकसितं** व्याकोशीभूतमभिनवोद्बुद्धमित्यर्थः। **नलिन**मीषद्रक्तमम्बुजं, उक्तश्च **'ईषच्छ्वेतं विदुः**

---

१. यद्यपि न... - D,E। २. निमूल... - A,C,E। ३. ...तिष्ठति - H,N,T। ४. भक्त्या जिनवराणां क्षीयन्ते पूर्वसञ्चितानि कर्म्माणि। ५. .....रूपस्तवः - F, M। ६. सुरकृतं - M। ७. पूर्वनिपातो - A, B, C, D, E, F, G, I, J, K, L, M। ८. "पत्तसमिद्धं ति केचित् 'पत्तल'मिति वचनात्" इति पाठान्तरम् - H।

पद्ममीषन्नीलमथोत्पलं ईषद्रक्तं तु नलिनम्' ( ) इत्यादि। [१][पद्मं] **कुवलयं** नीलोत्पलं, **शतपत्रं** पत्रशतसङ्ख्योपेतं पद्ममेव, तेषां **दलं** - पत्रं तद्वत् दीर्घे मनोहारिणी वाऽ**क्षिणी** यस्य स तथा। पुनः कथम्भूतः? इत्याह - **गजेन्द्रमदकल-ललितगतविक्रमः**। अत्रापि मदकलशब्दस्य विशेषणभूतस्य विशेष्यात्परनिपातः प्राकृतत्वात्। मदकलो मदमभिगृह्णानस्तरुणो[२] गजो, गजानामिन्द्रो गजेन्द्रः शेषगजेभ्यो गुणैरधिकतरत्वात्।[३] मदकलश्चासौ गजेन्द्रश्च मदकलगजेन्द्रः। तस्येव सललितो मनोज्ञलीलया सहितो गतरूपो गमनरूपो विक्रमो यस्य स तथा। पुनः कथम्भूतः? इत्याह - **भगवान्** भगः समग्रैश्वर्यादिरूपः, उक्तञ्च- '**ऐश्वर्यस्य समग्रस्य रूपस्य यशसः श्रियः। धर्मस्याथ प्रयत्नस्य षण्णां भग इतीङ्गना ॥४२॥**' (**अनेकार्थनाममाला**) भगोऽस्यास्तीति भगवान्। [४]अनेन ज्ञानातिशयो वागतिशयः पूजातिशयश्चोक्तः। तत्रैश्वर्यवाचित्वविवक्षायां पूजातिशयः, प्रयत्नवाचित्वविवक्षायां वागतिशयश्च प्रवर्त्तते। न च ज्ञानातिशयमन्तरेण तथारूपो वागतिशयः पूजातिशयश्च प्रवर्त्तते। आभ्यां ज्ञानातिशयोऽप्याक्षिप्यते। एते च ज्ञानातिशयादयश्चत्वारोऽप्यतिशया देहसौन्ध्यादीनामतिशयानामुपलक्षणं तानन्तरेणैतेषामसम्भवात्। [५]ततश्चतुस्त्रिंशदतिशयोपेतो भगवान् वीरो जयतीत्युक्तं द्रष्टव्यम् ॥१॥

तदेवं वर्त्तमानतीर्थाधिपतेर्वर्धमानस्वामिनो नमस्कारमभिधाय सम्प्रति सामान्यतः पञ्चानामपि परमेष्ठिनां नमस्कारमाह—

मू० [६]नमिऊण असुरसुरगरुलभुयगपरिवंदिए गयकिलेसे।
अरिहे [७]सिद्धायरिए [८]उवज्झाए सव्वसाहू [९]य ॥२॥

टी० असुरसुरगरु[१०]डभुजगपरिवन्दितान् गतक्लेशान् अपगतसमस्तरागादि-

---

१. [ ] चिह्नान्तर्गतः पाठोऽशुद्धो भाति, एवमग्रेऽपि ज्ञेयम्। २. तरुणो गजानामिन्द्रो - A,B,C,D, F,G,H,I,J,K,L,M। ३. गुणैरधिकत्वात् - B,E,J,K,L। ४. अनेन वागतिशयः पूजातिशयश्च प्रवर्त्तते - B,C,D,E,F,G,I,J,K,L,M। ५. ततश्च चतु...-T। ६. णमिऊण-H, O, P, Q। ७. सिद्धायरिओवज्झाए - R, सिद्धायरिउवज्झाए - V। ८. उज्झाए - K। ९. अ-B, D, E, G, K। १०. ...गरुल...- मूले।

क्लेशान् अर्हन्ति त्रिदशकृतां समवसरणादिरूपां पूजामिति **अर्हन्त**स्तीर्थकृतस्तान्, तथा **सिद्धान्** अपगतसकलकर्म्ममलान्, **आचार्यान्** पञ्चविधज्ञानाद्याचारस्वयम्परिपालनपरोपदेशदानसंततप्रवृत्तान्, **उपाध्यायान्** यथाशक्तिद्वादशाङ्गस्वयमध्ययनपराध्यापननिषण्णमानसान्, **साधून्** ज्ञानादिक्रियाभिर्मुक्तिसाधनप्रवणान्, **नत्वा** नमस्कृत्य ॥२॥

किमित्याह–

मू० फुडविगडपागडत्थं वोच्छं पुव्वसुयसारनीसंदं।
सुहुमगणिणोवदिट्ठं जोइसगणरायपण्णत्तिं॥३॥

टी० स्फुटो यथावस्थितो निर्म्मलबोधविषयो, **विकटो** विस्तीर्णः सूक्ष्मतरबुद्धिगम्य इत्यर्थः, **प्रकटः** साक्षादक्षरेषु परिस्फुरन्निवार्थो यस्यां सा तथा ताम्। **पूर्वश्रुतसारनिस्यन्दं** पूर्वगतश्रुते सारनिस्यन्दभूताम्, एतेन पूर्व्वेभ्य इयं चन्द्रप्रज्ञप्तिरुद्धृतेत्यावेदितम्। इयं च न पूर्वाणि स्वयमधीत्य तत उद्धृता, किन्तु गुरूपदेशानुसारतस्तत आह– **सूक्ष्मगण्युपदिष्टां** सूक्ष्मः- सूक्ष्ममतिपरिकलितो गणी-आचार्यो गणोऽस्यास्तीति व्युत्पत्तेस्तेनोपदिष्टां यथा पूर्वाणि गुरुणा व्याख्यातानि तथा तेभ्य उद्धृतेति भावः। ज्योतींषि ग्रहनक्षत्रतारकाणि तेषां गणः समूहस्तस्य राजा अधिपतिर्**ज्योतिर्गणराजश्चन्द्रस्तस्य प्रज्ञप्तिं** प्रज्ञप्यते प्ररूप्यते अनयेति प्रज्ञप्तिर्यथावस्थिततत्स्वरूपप्रतिपादिका वचनसन्ततिस्तां **वक्ष्ये** प्रतिपादयिष्यामि॥३॥

तत्र पूर्वेषु चन्द्रादिवक्तव्यता गौतमप्रश्नभगवन्निर्वचनरूपा। तत इयमपि चन्द्रप्रज्ञप्तिस्तथैव वक्तव्येति प्रथमतो गौतमप्रश्नोपक्षेपमावेदयति–

---

१. सन्तत - C, I। २. वियडपायडत्थं H, O, R, T। ३. वुच्छं - H,O,R,T। ४. ...सागर... -। ५. ...इट्ठं - H, T। ६. जोतिस.. - O। ७. विस्तीर्णसूक्ष्मतरबुद्धिगम्य - A, C, I, L M। ८. यस्याः - A, B, D, E, F, G, M। ९. पूर्वश्रुते सारनिस्यन्दं - A। १०. तेन - E। ११. सुहुमगणिणोवदिट्ठं- मूले। १२. प्रज्ञप्यते अनयेति - B, G, I, K। १३. रूपात इयमपि - B, G, K।

मू० [१]**नामेण इंदभूइत्ति गोयमो वंदिऊण तिविहेणं।**
[२]**पुच्छति जिणवरवसहं जोइसरायस्स पन्नत्तिं॥४॥**

टी० यो **नाम्ना** जगति **इन्द्रभूति**रिति प्रसिद्धो **गौतमो** गौतमगोत्रः। स भगवन्तं **जिनवरवृषभं** वर्द्धमानस्वामिनमन्यस्य समीपे तत्प्रश्नासम्भवात्। **त्रिविधेन** मनसा वाचा कायेन च **वन्दित्वा** नमस्कृत्य **ज्योतीराजस्य** चन्द्रमस उपलक्षणमेतत् सूर्यादेश्च [३]प्रज्ञप्यते प्ररूप्यते इति **प्रज्ञप्ति**श्चन्द्रादीनां यथावस्थिता स्वरूपस्थितिस्तां **पृच्छती**ति ॥४॥

शिष्यस्य प्रश्नावकाशमाशङ्क्य प्रथमतो विंशतौ प्राभृतेषु यद्वक्तव्यं तदुपक्षिपन् गाथापञ्चकमाह—

मू० **कइ मंडलाइं वच्चइ तिरिच्छो[४] किं व गच्छइ।**
ओभासइ केवइयं [५]सेयताइ किं ते संठिती॥५॥
कहिं पडिहया लेसा कहं ते ओयसंठिई।
[६]के सूरियं वरयंते कहं ते उदयसंठिई॥६॥
कइकट्ठा पोरिसीछाया जोगेत्ति किं ते आहिए।
के[७] ते संवच्छराणाई कइ संवच्छरा इय॥७॥
कहं चंदमसो वुड्ढी कया ते [८]जोसिणा बहू।
के सिग्घगई वुत्ते [९]कहं [१०]जोसिणलक्खणं॥८॥
चयणोववाय उच्चत्तं सूरिया कइ आहिया।
अणुभावे केरिसे वुत्ते [११]एवमेताइं वीसई॥९॥

---

१. णामेण - H। २. पुच्छइ - B, D, E, G, H, K। ३. प्रज्ञप्यते इति - A, B, C, D, E, F, G, I, J, K, L, M। ४. तिरिच्छा - F, K, O, P, R। ५. सेयाइ - K, सेयता - R। ६. किं - R। ७. किं - K। ८. दोसिणा - K, V। ९. किं ते - O, P, R। १०. दोसिण - K, P, V। ११. एवमेताणि - O, R।

टी० प्रथमे प्राभृते सूर्यो वर्षमध्ये **कति मण्डलानि** एकवारं कति वा मण्डलानि द्विःकृत्वो **व्रजती**त्येतन्निरूपणीयम्। किमुक्तं भवति ? एवं गौतमेन प्रश्ने कृते तदनन्तरं सर्वं तद्विषयं निर्वचनं प्रथमप्राभृते वक्तव्यमिति। एवं सर्वत्रापि भावनीयम् १। द्वितीये प्राभृते **किं** कथं वाशब्दः पूर्वप्राभृतवक्तव्यतापेक्षया[१] समुच्चये **तिर्यग्व्रजती**ति[२] वक्तव्यम् २। तृतीये चन्द्रः सूर्यो वा **कियत्** क्षेत्र[**मा**][३]**(मव)भासयति** प्रकाशयतीति ३। चतुर्थे **श्वेततायाः** प्रकाशस्य **किं** कथं **ते** तव मते **संस्थिति**-र्व्यवस्थेति४। पञ्चमे **कस्मिन्** सूर्यस्य **प्रतिहता लेश्येति**५। षष्ठे **कथं** केन प्रकारेण किं सर्व्वकालमेकरूपावस्थायितया उत अन्यथा (**ते** तव मते) **ओजसः** प्रकाशस्य **संस्थिति**रवस्थानमिति६। सप्तमे **के** पुद्गलाः **सूर्यं वरयन्ति**[४] सूर्यलेश्यामाप्तुमिच्छन्ति सूर्यलेश्यासंस्पृष्टा भवन्तीत्यर्थः७। अष्टमे **कथं** केन प्रकारेण भगवन् ! **ते** तव मतेन सूर्यस्य**उदयसंस्थितिः**८। नवमे **कतिकाष्ठा** किम्प्रमाणा **पौरुषीच्छाया**९। दशमे **योग इति** वस्तु **किं ते** त्वया भगवन्नाख्यातमिति१०। एकादशे **कस्ते** तव मतेन **संवत्सराणामादिः**११। द्वादशे **कति संवत्सरा इति**१२। त्रयोदशे **कथं** केन प्रकारेण **चन्द्रमसो वृद्धिर्**वृद्धिप्रतिभास उपलक्षणमेतत् तेन वृद्ध्यपवृद्धिप्रतिभास इत्यर्थः१३। चतुर्दशे **कदा** कस्मिन् काले **ते** तव मतेन चन्द्रमसो **ज्योत्स्ना बहुः** प्रभूतेति१४। पञ्चदशे **कश्चन्द्रादीनां** मध्ये **शीघ्रगतिरुक्त** इति१५। षोडशे **किं ज्योत्स्नालक्षण**मिति वक्तव्यम्१६। सप्तदशे चन्द्रमसादीनां **च्यवनमुपपातश्च** स्वमतपरमतापेक्षया वक्तव्यः१७। अष्टादशे चन्द्रादीनां समतलाद्भूभागादूर्ध्व**मुच्चत्वं** यावति प्रदेशे व्यवस्थितत्वं तत् स्वमतपरमतापेक्षया प्रतिपाद्यम्१८। एकोनविंशतितमे **कति सूर्या** जम्बूद्वीपादावा**ख्याता** इत्यभिधेयम्१९। विंशतितमे **कोऽनुभाव**[५]श्चन्द्रा-दीनामिति२०। **एवम**नन्तरोदितेन प्रकारेण **एतानि** अनन्तरोदितार्थाधिकारोपेतानि

---

१. .... वक्तव्यापेक्षा - K। २. गच्छइ - मूले। ३. [ ] चिह्नान्तर्गतः पाठोऽशुद्धो भाति। ( ) चिह्नान्तर्गतः पाठः शुद्धो भाति, स मया मुद्रितसूर्यप्रज्ञप्तिमूलटीकानुसारेण चन्द्रप्रज्ञप्तिमूल-टीकानुसारेण स्वयञ्च विचार्य प्रक्षिप्तः। एवमग्रेऽपि ज्ञेयम्। ४. वरयन्ति सूर्यलेश्यासंस्पृष्टा.... - F। ५. केरिसे - मूले।

विंशतिः प्राभृतान्यस्यां चन्द्रप्रज्ञप्तौ वक्तव्यानि। अथ प्राभृतमिति कः शब्दार्थः ? उच्यते, इह प्राभृतं नाम लोके प्रसिद्धं यदभीष्टाय पुरुषाय देशकालोचितं दुर्लभं वस्तु परिणामसुन्दरमुपनीयते। ततः प्राभ्रियते[१] प्रकर्षेण समन्तात् भ्रियते पोष्यते चित्तमभीष्टस्य[२] पुरुषस्यानेनेति प्राभृतमिति व्युत्पत्तेः **'कृद्बहुलम्'** (**मलयगिरि-शब्दानुशासने कृदन्ते १/१२**) इति वचनाच्च करणे क्तप्रत्ययः[३]। विवक्षिता अपि च ग्रन्थपद्धतयः परमदुर्लभाः परिणामसुन्दराश्चाभीष्टेभ्यो विनयादिगुणकलितेभ्यः शिष्येभ्यो देशकालौचित्येनोपनीयन्ते। ततः प्राभृतानीव प्राभृतानि प्राभृतेषु चाऽन्तर्गतानि प्राभृतानि प्राभृतप्राभृतानि। तदेवमुक्ता विंशतेरपि प्राभृतानामर्थाधिकाराः ॥५॥ ॥६॥ ॥७॥ ॥८॥ ॥९॥

सम्प्रति प्रथमे प्राभृते यान्यपान्तरालवर्त्तीन्यष्टौ प्राभृतप्राभृतानि तेषामर्थाधिकारानुपदिदिक्षुराह—

मू० वड्ढोवड्ढी मुहुत्ताणं अद्धमंडलसंठिई।
के ते चिण्णं पडियरति अंतरं किं चरंति य ॥१०॥
ओगाहइ केवइयं केवतियं च विकंपई।
मंडलाण य संठाणे विक्खंभे अट्ठ पाहुडा॥११॥

टी० प्रथमस्य प्राभृतस्य सत्के प्रथमे प्राभृतप्राभृते **मुहूर्त्तानां** दिवसरात्रिगतानां **वृद्ध्यपवृद्धी** वक्तव्ये १, द्वितीये **अर्द्धमण्डलस्य** द्वयोरपि सूर्ययोः प्रत्यहोरात्र-मर्द्धमण्डलविषया **संस्थिति**र्व्यवस्था वक्तव्या २, तृतीये[४] **ते** तव मतेन **कः** सूर्यः कियदपरेण सूर्येण **चीर्णं** क्षेत्रं **प्रतिचरती**ति वक्तव्यम् ३, चतुर्थे द्वावपि सूर्यौ परस्परं **कियत्**प्रमाणम**न्तरं** कृत्वा चारं **चरत** इति प्रतिपाद्यम् ४, पञ्चमे **कियत्**प्रमाणं द्वीपं समुद्रं वाऽ**वगाह्य** सूर्यश्चारं चरतीति ५, षष्ठे एकैकेन रात्रिन्दिवेन एकैकः सूर्यः **कियत्**प्रमाणं क्षेत्रं **विकम्प्य** विमुच्य चारं चरतीति ६, सप्तमे **मण्डलानां**

---

१. प्राभ्रियते पोष्यते... - A, B, C, D, E, F, G, I, J, K, L, M। २. चित्तमभीष्टपुरुषस्या... - T। ३. क्तप्रत्ययः विवक्षितः - G। ४. तृतीये तव... A, G, M।

संस्थानमभिधातव्यम् ७, अष्टमे मण्डलानामेव **विष्कम्भो** बाहल्यमिति। एवमर्थाधिकारसमन्वितानि प्रथमे प्राभृते **अष्टौ प्राभृतप्राभृतानि** ॥१०॥॥११॥

सम्प्रति प्रथम एव प्राभृते चतु[रा](र्था)दिषु प्राभृतप्राभृतेषु यत्र यावत्यः प्रतिपत्तयः परमतरूपास्तत्र तावतीरभिधित्सुराह–

मू० छप्पंच य सत्तेव य अट्ठ य तिन्नि य हवंति पडिवत्ती।
पढमस्स पाहुडस्स उ [१]हवंति एयाउ पडिवत्ती॥१२॥

टी० प्रथमस्य प्राभृतस्य चतु[रा](र्था)दिषु प्राभृतप्राभृतेषु यथाक्रम**मेताः प्रतिपत्तयः** परमतरूपा **भवन्ति,** तद्यथा – चतुर्थे प्राभृतप्राभृते **षट्** प्रतिपत्तयः पञ्चमे **पञ्च** षष्ठे **सप्त** सप्तमे **अष्टौ** अष्टमे **तिस्र** इति ॥१२॥

सम्प्रति द्वितीये प्राभृते यदर्थाधिकारोपेतानि त्रीणि प्राभृतप्राभृतानि तान् प्रतिपादयति–

मू० पडिवत्तीओ उदये अदुवत्थमणेसु य।
भेयघाए कण्णकला मुहुत्ताण गई इय॥१३॥

टी० द्वितीयस्य प्राभृतस्य प्रथमे प्राभृतप्राभृते सूर्यस्य**उदये अस्तमयनेषु** च **प्रतिपत्तयः** परमतरूपाः प्रतिपाद्याः स्वमत[२]प्रतिपत्तिश्च। द्वितीये [३]**भेदे घातः कर्ण्णकला** च वक्तव्या। किमुक्तं भवति ? - भेदो मण्डलस्यापान्तरालं तत्र घातो गमनं **'हन हिंसागत्योः'(पाणिनीयधातुपाठः, अदादि २)**इति वचनात्, स एकेषां मतेन प्रतिपाद्यः, यथा विवक्षितमण्डले सूर्येणापूरिते सति तदनन्तरं सूर्यो अपरमनन्तरं मण्डलं सङ्क्रामतीति। तथा **कर्ण्णः** कोटिभागस्तमधिकृत्यापरेषां मतेन **कला** वक्तव्याः, यथा विवक्षिते मण्डले द्वावपि सूर्यौ प्रथमक्षणे प्रविष्टौ सन्तौ पूर्वापरकोटिद्वयं लक्षीकृत्य बुद्ध्या परिपूर्ण्णं यथावस्थितं मण्डलं विवक्षित्वा [४]तदपरमण्डलस्य कर्ण्णकोटिभागरूपमभिसमीक्ष्य ततः कलया कलया [५]मात्रया इत्यर्थः

१. एयाओ हवंति पडिवत्ती - O, V। २. ....प्रतिपत्तयश्च - H। ३. भेदो घातः K। ४. ततः परमण्डलस्य - S। ५. मात्रया मात्रया - S।

अपरमण्डलाभिमुखमभिसर्पन्तौ चारं चरत इति। तृतीयप्राभृतप्राभृते [१]प्रतिमण्डलं [२]**मुहूर्त्तेषु गति**र्गतिपरिमाणमभिधातव्यम्॥१३॥

तत्र निष्कामति प्रविशति वा सूर्ये यादृशी गतिर्भवति तादृशीमभिधित्सुराह–

मू० णिक्खममाणे सिग्घगई पविसंते मंदगई इय।
चुलसीइसयं पुरिसाणं तेसिं च पडिवत्तीओ॥१४॥

टी० निष्क्रामन् सर्वाभ्यन्तरान्मण्डलाद्बहिर्निर्गच्छन् सूर्यो यथोत्तरं मण्डलं सङ्क्रामन् **शीघ्रगतिः** [३]शीघ्रशीघ्रतरगतिर्भवति **प्रविशन्**सर्वबाह्यान्मण्डलादभ्यन्तरमागच्छन् प्रतिमण्डलं **मन्दगतिर्**मन्दमन्दतरगतिस्तेषाञ्च मण्डलानां **चतुरशीतं** चतुरशीत्यधिकं **शतं** सूर्यस्य भवति। **तेषाञ्च** मण्डलानां विषये प्रतिमुहूर्त्तं सूर्यस्य गतिपरिमाणचिन्तायां **पुरुषाणां प्रतिपत्तयो** मतान्तररूपा भवन्ति॥१४॥

सम्प्रति कस्मिन् प्राभृतप्राभृते कति प्रतिपत्तय इत्येतन्निरूपयति–

मू० उदयंमि अट्ठ भणिया भेदग्घाए दु [४]चेव पडिवत्ती।
चत्तारि मुहुत्तगईए होंति बिइयंमि पडिवत्ती॥१५॥

टी० द्वितीये प्राभृते त्रिष्वपि प्राभृतप्राभृतेषु यथाक्रममेतत्सङ्ख्याः प्रतिपत्तयो भवन्ति। तद्यथा – प्रथमे प्राभृतप्राभृते **उदये** सूर्योदयवक्तव्यतोपलक्षिते **अष्टौ भणिता**स्तीर्थकरगणधरैः प्रतिपत्तयः। द्वितीये प्राभृतप्राभृते **भेदघात**रूपपरमतवक्तव्यतोपलक्षिते **द्वे एव प्रतिपत्ती** भवतः। तृतीये प्राभृतप्राभृते **मुहूर्तगतिके** मुहूर्त्तगतिवक्तव्यतोपलक्षिते **चतस्रः प्रतिपत्तयो भवन्ति, 'चत्तारि'** इति च सूत्रे नपुंसकत्वनिर्देशः प्राकृतत्वात्, प्राकृते हि लिङ्गं व्यभिचारि, यदाह **पाणिनिः स्वप्राकृतलक्षणे- 'लिङ्गं व्यभिचार्यपी'**ति॥१५॥

---

१. प्रतिमण्डले- A, B, C, D, E, F, G, I, J, K, L, M। २. मुहुत्ताण गई - मूले। ३. शीघ्रगति...- A, B, C, D, E, F, G, I J, K, L, M, N, S, शीघ्रतरगति.... T। ४. दुवे व - A, C, D, E, F, G, I, J, M, दुवे य - S।

सम्प्रति दशमे प्राभृते यान्यपान्तरालवर्त्तीनि द्वाविंशतिसङ्ख्यानि प्राभृतप्राभृतानि तेषामर्थाधिकारमाह–

मू० आवलिय मुहुत्तग्गे एवंभागा य जोगस्स।
[१]कुला य [२]पोण्णमासी य सन्निवाए य संठिई॥१६॥
तारग्गं च नेताइं चंदमग्गत्ति यावरे।
[३]देवाण य अज्झयणा मुहुत्ताणं [४]नामया इय॥१७॥
दिवसा राई य वुत्ता य तिहि [ग](गो)त्ता भोयणाणि य।
आइच्चचार मासा य पंच संवच्छरा इय॥१८॥
जोइसस्स दाराइं णक्खत्तविजए इय।
दसमे पाहुडे एए बावीसं पाहुडपाहुडा॥१९॥

टी० दशमे प्राभृते एतानि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, एतदर्थाधिकारोपेतानि **द्वाविंशतिः प्राभृतप्राभृतानि** भवन्ति। तद्यथा – प्रथमे प्राभृतप्राभृते नक्षत्राणा**मावलिका**क्रमो वक्तव्यो, यथा अभिजिदादीनि नक्षत्राणि भवन्तीति १। द्वितीये नक्षत्रविषयं **मुहूर्त्ताग्रं** मुहूर्त्तपरिमाणम् २। तृतीये **एवम्भागा** इति पूर्व्वपश्चिमादिप्रकारेण भागा वक्तव्याः ३। चतुर्थे **'जोगस्स'** इति **योगस्या**दिरभिधातव्यस्तथा च वक्ष्यति – **कहं ते जोगस्स आदी आहियत्ति वएज्जा?**(पृष्ठ २२८) इति ४। पञ्चमे **कुलानि** चशब्दादुपकुलानि [५]कुलोपकुलानि च वक्तव्यानि च ५। षष्ठे **पौर्ण्णमासी**वक्तव्यताऽभिधेया ६। सप्तमे **सन्निपात** इति अमावस्यापौर्ण्णमासीसन्निपातो वक्तव्यः ७। अष्टमे नक्षत्राणां **संस्थितिः** संस्थानं वक्तव्यम् ८। नवमे नक्षत्राणां **ताराग्रं** तारापरिमाणमभिधेयम् ९। दशमे **नेता** वक्तव्यो यथा कति नक्षत्राणि स्वयमस्तङ्गमनेनाहोरात्रसमाप्त्या कं मासं नयन्तीति १०।

---

१. कुलाइ - A, B, C, D, E, F, G, I, J, K। २. पुण्णिमासी - O, पुन्नमासी J। ३. देवयाण य P, देवताण य U। ४. णामधेज्जाइं - U। ५. कुलोपकुलानि वक्तव्यानि - T।

अपरस्मिन्नेकादशे प्राभृतप्राभृते [१]**चन्द्रमार्गाश्च** मण्डलानि नक्षत्राद्यधिकृत्य वक्तव्यानि ११। द्वादशे नक्षत्राधिपतीनां **देवतानामध्ययनानि** अधीयते ज्ञायते एभिरित्यध्ययनानि नामानि वक्तव्यानि १२। त्रयोदशे **मुहूर्त्तानां नामकानि** वाच्यानि १३। चतुर्दशे **दिवसा रात्रयश्चोक्ताः** १४। पञ्चदशे **तिथयः** १५। षोडशे **गोत्राणि** नक्षत्राणाम् १६। सप्तदशे नक्षत्राणां **भोजनानि** वाच्यानि, यथेदं नक्षत्रमेवंरूपे भोजने कृते शुभाय भवतीति १७। अष्टादशे **आदित्यानां** उपलक्षणमेतत् चन्द्रमसां च **चारा** वक्तव्याः १८। एकोनविंशतितमे **मासाः** १९। विंशतितमे **संवत्सराः** २०। एकविंशतितमे **ज्योतिषो** नक्षत्रचक्रस्य **द्वाराणि** वक्तव्यानि, यथाऽमूनि नक्षत्राणि पूर्वद्वाराणीत्यादि २१। द्वाविंशतितमे **नक्षत्राणां विचयश्चन्द्र-सूर्ययोगादिविषयो** निर्णयो वक्तव्य **इति** २२। तदेवमुक्ता प्राभृतसङ्ख्या तेषामर्थाधिकाराश्च ॥१६॥ ॥१७॥ ॥१८॥ ॥१९॥

सम्प्रति यदुक्तं प्रथमस्य प्राभृतस्य प्रथमे प्राभृतप्राभृते मुहूर्त्तानां वृद्ध्यपवृद्धी वक्तव्ये इति (पृष्ठ ७) [२]तद्विवक्षुर्यस्यां नगर्यां यस्मिन्नुद्याने वने यथा भगवान् गौतमस्वामी भगवतः श्रीमन्महावीरस्यान्ते पृष्टवान् यथा च तस्मै भगवान् व्यागृणाति स्म तथोपदिदर्शयिषुरिदमाह–

मू० ते णं काले णं ते णं समए णं मिहिला [३]नामं नयरी [४]होत्था।

टी० '**ते**' इति प्राकृतशैलीवशात्तस्मिन्निति द्रष्टव्यम्। अस्यायमर्थो यदा भगवान् विहरति स्म **तस्मिन्** '**ण**'मिति वाक्यालङ्कारे दृष्टश्चान्यत्रापि णंशब्दो वाक्या-लङ्कारार्थो, यथा 'इमा णं पुढवी' इत्यादाविति, **काले**ऽधिकृतावसर्प्पिणी-चतुर्थविभागरूपे, अत्रापि णंशब्दो वाक्यालङ्कारार्थः। '**ते णं समए णं**' ति समयो अवसरवाची, तथा च लोके वक्तारो, 'नाद्याप्येतस्य वक्तव्यस्य समयो वर्त्तते', किमुक्तं भवति ? 'नाद्याप्येतस्य वक्तव्यस्यावसरो वर्त्तते' इति, **तस्मिन्निति** यस्मिन्

१. चन्द्रमार्गाश्चन्द्रमण्डलानि - S। २. तद्विवक्षया - E। ३. नाम - T। ४. होत्था इति - H।

समये भगवान् प्रस्तुतां मुहूर्त्तवृद्ध्यपवृद्धिवक्तव्यतामचकथत् तस्मिन् **समये मिथिला नाम नगरी अभवत्**। नन्विदानीमपि सा नगरी वर्त्ततेऽतः कथमुक्तमभवदिति ? उच्यते, वक्ष्यमाणवर्ण्णकग्रन्थोक्तविभूतिसमन्विता तदैवाऽभवत्, न तु विवक्षित-प्रकरणकर्त्तुः प्रकरणविधानकाले। एतदपि कथमवसेयमिति चेत् ? उच्यते, अयञ्चावसर्प्पिणीकालोऽवसर्प्पिण्यां च शुभा भावा हानिमुपगच्छन्ति। एतच्च सुप्रतीतं जिनप्रवचनवेदिनामतो अभवदित्युच्यमानं न विरोधभाक्।

सम्प्रत्यस्या नगर्या वर्ण्णकमाह–

मू० रिद्धि[१]त्थिमियसमिद्धा वण्णओ इति।

टी० ऋद्धा भवनैः पौरजनैश्चातीव वृद्धिमुपागता **'ऋध वृद्धौ' (पाणिनीय-धातुपाठः, दिवादि १३९)**इति वचनात्, स्तिमिता [२]स्वचक्रपरचक्रतस्करडमरादि-समुत्थभयकल्लोलमालावर्जिता, समृद्धा धनधान्यादिविभूतियुक्ता। ततः पदत्रयस्यापि कर्मधारयः **ऋद्धस्तिमितसमृद्धा**। इत्यादिरूप **औपपातिक**ग्रन्थप्रसिद्धः समस्तोऽपि **वर्ण्णको (औपपातिकसूत्रम्, सूत्र १, पृष्ठ १-६)** द्रष्टव्यः। स च ग्रन्थगौरव-भयान्न लिख्यते। केवलं तत एवौपपातिकादवसेयः।

मू० तीसे णं मिहिलाए नयरीए बहिया उत्तरपुरच्छिमे दिसी[३]भागे एत्थ णं माणिभद्दे [४]नामं चेईए होत्था चिराइए वण्णओ इति।

टी० तस्या मिथिलाया नगर्या [५]बहिर्य उत्तरपौरस्त्य उत्तरपूर्वरूपो **दिग्भागो** दिग्विभाग ईशानकोण इत्यर्थः। एकारो मागधभाषाऽनुरोधतः प्रथमैकवचनप्रभवः, यथा **'कयरे आगच्छइ दित्तरूवे' (उत्तरा० १२/६)** इत्यादौ। **अत्र** अस्मिन् उत्तरपौरस्त्यदिग्भागे **माणिभद्रमिति नाम चैत्यमभवत्**, चितेर्लेप्यादिचयनस्य भावः कर्म्म वा चैत्यम्, तच्च सञ्ज्ञाशब्दत्वाद्देवताप्रतिबिम्बे प्रसिद्धम्, ततस्तदाश्रयभूतं

---

१. रिद्धिवण्णओ - P, U। २. स्वचक्रतस्कर- A, B, C, D, E, F, G, I, J, K, L, M।
३. दिसिभागे - T। ४. नाम - T। ५. बहिर्य उत्तरपूर्वरूपो - J।

यद्देवताया गृहं तदप्युपचारात् [१]चैत्यम्, तच्चेह व्यन्तरायतनं द्रष्टव्यम्, न तु भगवतामर्हतामायतनमिति, तस्य च **चिरातीत**मित्यादिरूप **औपपातिक**ग्रन्थोक्तो **वर्णको** (**औपपातिकसूत्रम्, सूत्र २, पृष्ठ ८**) वेदितव्यः।

मू० तीसे णं मिहिलाए नयरीए [२]जियसत्तू नामं राया धारिणी देवी वण्णओ।

टी० तस्याश्च मिथिलायां नगर्यां जितशत्रुर्नाम राजा, तस्य **देवी** समस्तान्तःपुरप्रधाना भार्या [३]सकलगुणधारणाद् **धारिणी**ना[मा](म्नी)। **वण्णओत्ति** तस्य राज्ञस्तस्याश्च देव्या **औपपातिक**[४]ग्रन्थोक्तो **वर्ण्णको**ऽभिधातव्यः (**औपपातिकसूत्रम्, सूत्र ६-७, पृष्ठ २०-२३**)।

मू० ते णं काले णं ते णं समए णं तम्मि माणिभद्दे चेइए सामी [५]समोसढो, परिसा निग्गया, धम्मो कहिओ, परिसा पडिगया।

टी० तस्मिन् काले तस्मिन् समये तस्मिन् माणिभद्रे चैत्ये स्वामी जगद्गुरुर्भगवान् श्रीमन्महावीरोऽर्हन् सर्वज्ञः सप्तहस्तप्रमाणशरीरोच्छ्रयः समचतुरस्रसंस्थानो वज्रर्षभनाराचसंहननः कज्जलप्रतिमकालिमोपेतस्निग्धा[ङ्कु](कुञ्)[६]चितप्रदक्षिणावर्त्तमूर्द्धजः उत्तप्ततपनीयाभिराम[७]केशान्तकेशभूमिरातपत्राकारोत्तमाङ्गसन्निवेशः परिपूर्णशशाङ्कमण्डलादप्यधिकतरवदनशोभः पद्मोत्पलसुरभिगन्धनिःश्वासो वदनत्रिभागप्रमाणकम्बूपमचारुकन्धरः सिंहशार्दूलवत्परिपूर्णविपुलस्कन्धप्रदेशो महापुरकपाटपृथुलवक्षःस्थलाभोगो यथावस्थितलक्षणोपेतः [८]श्रीवृक्ष[:]परिघोपमप्रलम्बबाहु[९]युगलः सूर्यशशिचक्रसौवस्तिकादिप्रशस्तलक्षणोपेतपाणितलः सुजातपार्श्वो [१०]झषोदरः सूर्यकरसंस्पर्शसञ्जातविकोशपद्मोपमनाभिमण्डलः सिंहवत्संवर्त्तितकटीप्रदेशो निगूढ-

---

१. तच्चैत्यम् - A, G, J, M। २. जियसत्तू राया - A, H, I, K, N, T। ३. सकलगुणधारिणी धारिणीनामा- A, G। ४. .. ग्रन्थोक्तवर्ण्णको - B, M। ५. समोसढे - U। ६. अकुञ्चिताः = न वक्राः, आकुञ्चिताः = ईषद्वक्राः। ७. केशान्तिकैश - A, B, C, D, E, F, G, I, J, K, L, M, N। ८. श्रीवृक्षः - पिप्पलवृक्षः। ९. .... प्रलम्बबाहुः - A, B, G, J। १०. झषः - मत्स्यः।

जानुः कुरुविन्दवृत्तजङ्घायुगलः सुप्रतिष्ठितकूर्म्मचारुचरणः प्रशस्तलक्षणाङ्कित-चरणतलप्रदेशो निराश्रवो निर्म्ममश्छिन्नश्रोता निरुपलेपोऽपगतप्रेमरागद्वेषश्चतुस्त्रिंशदति-शयोपेतो देवोपनीतेषु नवसु कनककमलेषु पादन्यासं कुर्वन् [१]आकाशगतेन धर्मचक्रेण आकाशगतेन छत्रेण आकाशगताभ्यां चामराभ्यां आकाशगतेनातिस्वच्छस्फटिक-विशेषमयेन सपादपीठेन सिंहासनेन पुरतो देवैः प्रकृष्यमाणेन २ धर्म्मध्वजेन चतुर्दशभिः श्रमणसहस्रैः षट्त्रिंशत्सङ्ख्यैरार्यिकासहस्रैः परिवृतो यथास्वकल्पं सुखेन विहरन् यथारूपमवग्रहं गृहीत्वा संयमेन तपसा चात्मानं भावयन् **समवसृतः**। समवसरणवर्ण्णनं च भगवत **औपपातिक**ग्रन्थादवसेयम् (**औपपातित्रसूत्रम्, सूत्र १३-२६, पृष्ठ ४८-९९**)। '**परिसा निग्गय**'त्ति [२]मिथिलाया नगर्या वास्तव्यो लोकः समस्तोऽपि भगवन्तमागतं श्रुत्वा भगवद्वन्दनार्थं स्वस्मात् स्वस्मात् आश्रयाद्विनिर्गत इत्यर्थः। तन्निर्गमश्चैवम्– **'तए णं मिहिलाए नयरीए सिंघाडगतियचउक्कचच्चरचउम्मुहमहा[३]पहमुहेसु बहुजणो अन्नमन्नस्स एवमा-इक्खइ एवमाभासेइ एवं पन्नवेइ एवं परूवेइ एवं खलु देवाणुप्पिया समणे भगवं महावीरे आइगरे तित्थयरे जाव सव्वन्नू सव्वदरिसी आगासगएणं छत्तेणं जाव सुहंसुहेणं विहरमाणे इह आगए इह समागए इह समोसढे इहेव मिहिलाए नयरीए बहिया माणिभद्दे चेइए अहापडिरूवं ओग्गहं ओगिण्हित्ता अरिहा जिणे केवली (समण)गणपरिवुडे संजमेणं तवसा अप्पाणं भावेमाणे विहरइ तं महप्फलं खलु देवाणुप्पिया तहारूवाणं अरिहंताणं भगवंताणं नामगोयस्स वि सवणयाए किमंग पुण अभिगमणवंदणनमंसणपडिपुच्छण-पज्जुवासणयाए तं सेयं खलु एगस्स वि आयरियस्स धम्मियस्स सुवयणस्स [४]सवणयाए आणुगामिए किमंग पुण विउलस्स अट्ठस्स गहणयाए ? तं**

---

१. आकाशगतेन छत्रेण आकाशगतेनातिस्वच्छ... A, B, C, D, E, F, G, I, J, K, L, M।
२. मिथिलानगर्या - G। ३. महापहपहेसु K, महापहेसु H, S। ४. सवणयाए किमंग - H, T।

गच्छामो णं देवाणुप्पिया समणं भगवं महावीरं वंदामो नमंसामो सक्कारेमो [१]सम्माणेमो कल्लाणं मंगलं देवयं चेइयं पज्जुवासेमो एयं णे इहभवे परभवे अ हियाए सुहाए अणुगामियत्ताए भविस्सइ। तए णं मिहिलाए नयरीए बहवे उग्गा भोगा' इत्याद्यौपपातिकग्रन्थोक्तं सर्वमवसेयं यावत् समस्ताऽपि राजप्रभृतिका पर्षत् पर्युपासीना तिष्ठति। (**औपपातिकसूत्रम्, सूत्र २७-३३, पृष्ठ १०७-१४५**) **'धम्मो कहिओ'**त्ति तस्याः पर्षदः पुरतो निःशेषजनभाषानुयायिन्या अर्द्ध-मागधभाषया धर्म्म उपदिष्टः। स चैवं **'अत्थि लोए अत्थि अलोए अत्थि जीवा अत्थि अजीवा'** (**औपपातिकसूत्रम्, सूत्र ३४, पृष्ठ १४८**) इत्यादि, तथा **'जह जीवा बज्झंती [२]मुच्चंती जह य संकिलिस्संति। जह दुक्खाणं अंतं करेंति केइ अपडिबद्धा॥४॥** (**औपपातिकसूत्रम्**) **अट्टनियट्टितचित्ता जह जीवा सागरं भवमुवेंति। जह य परिहीणकम्मा सिद्धा सिद्धालयमुवेंति॥ तहा आइक्खइ त्ति।' 'परिसा पडिगय'** त्ति परिषत् प्रतिगता स्वस्थानं गता। सा चैवं – **'तए णं सा महइ महालिया परिसा समणस्स भगवतो महावीरस्स अंतिए धम्मं सोच्चा निसम्म हट्ठतुट्ठा जाव समणं भगवं महावीरं तिक्खुत्तो [३]आयाहिणपयाहिणं करेइ करित्ता वंदइ नमंसइ वंदित्ता नमंसित्ता एवं वयासी-सुयक्खाए णं भंते ! निग्गंथे पावयणे, नत्थि णं केइ अण्णे [४]समणे वा माहणे वा एरिसं धम्ममाइक्खित्तए। एवं वइत्ता जामेव दिसं पाउयभूया तामेव दिसं पडिगया। तए णं से जियसत्तू राया समणस्स भगवतो महावीरस्स (अंतिए) धम्मं सोच्चा हट्ठतुट्ठे जाव हयहियए समणं भगवं महावीरं वंदइ नमंसइ वंदित्ता नमंसित्ता [५]पसिणाइं पुच्छइ पुच्छित्ता अट्ठाइं (परियाइ) परियाइत्ता उट्ठाए उट्ठेइ उट्ठाए उट्ठित्ता समणं भगवं[तं] महावीरं वंदइ नमंसइ वंदित्ता नमंसित्ता एवं वयासी – सुयक्खाए णं भंते ! निग्गंथे पावयणे**

१. सम्माणेमो कल्लाणेमो कल्लाणं - M। २. जह य मुच्चंति - M। ३. आयाहिणं पयाहिणं - T। ४. समणे माहणे वा - T। ५. पसिणाइं पुच्छित्ता - M।

जाव एरिसं धम्ममाइक्खित्तए। एवं वइत्ता हत्थिं दुरुहइ दुरुहित्ता समणस्स भगवतो महावीरस्संतियाओ माणिभद्दाओ चेइयाओ पडिनिक्खमइ पडिनिक्खमित्ता जामेव दिसं पाउब्भूए तामेव दिसं पडिगए।' इति। इदं च सकलमपि सुगमम्, नवरं यामेव दिशमवलम्ब्य किमुक्तं भवति ? यतो दिशः सकाशात् प्रादुर्भूतः समवसरणे समागतस्तामेव दिशं प्रतिगतः।

मू० ते णं काले णं ते णं समए णं समणस्स भगवतो महावीरस्स [१]जेट्ठे अंतेवासी इंदभूई नामं अणगारे [२]गोयमगोत्तेणं [३]सत्तुस्सेहे समचउरंससंठाणसंठिए जाव [४]पज्जुवासेमाणे एवं वयासी।

टी० तस्मिन् काले तस्मिन् समये, 'णं'शब्दो वाक्यालङ्कारार्थः, **श्रमणस्य भगवतो महावीरस्य ज्येष्ठ** इति प्रथमः **'अन्तेवासी'** शिष्यः, अनेन पदद्वयेन तस्य सकलसङ्घाधिपतित्वमावेदयति, **इन्द्रभूति**रिति मातापितृकृतनामधेयः। **'नामं'**ति प्राकृतत्वात् विभक्तिपरिणामेन नाम्नेति द्रष्टव्यम्। अन्तेवासी च किल विवक्षया श्रावकोऽपि स्यादतस्तदाशङ्काव्यवच्छेदार्थमाह – **अनगारः**, न विद्यते अगारं गृहमस्येत्यनगारः। अयञ्च विगतगोत्रोऽपि स्यादत आह – **[५]गौतमगोत्रेण** गौतमाह्वयगोत्रसमन्वित इत्यर्थः। अयञ्च तत्कालोचितदेहपरिमाणापेक्षया न्यूनाधिकदेहोऽपि स्यादत आह – **सप्तोत्सेधः** सप्तहस्तप्रमाणशरीरोच्छ्रयः। अयञ्चैत्थम्भूतो लक्षणहीनोऽपि सम्भाव्येतातस्तदाशङ्कापनोदार्थमाह – **समचतुरस्रसंस्थानसंस्थितः** समाः शरीरलक्षणशास्त्रोक्तप्रमाणाविसंवादिन्यश्चतस्रोऽस्रयो यस्य तत्समचतुरस्रं, अस्रयस्त्विह चतुर्दिग्विभागोपलक्षिताः शरीरावयवा द्रष्टव्याः। अन्ये त्वाहुः– समा अन्यूनाधिकाश्चतस्रोऽप्यस्रयो यत्र तत्समचतुरस्रं अस्रयश्च पर्यङ्कासनोपविष्टस्य जानुनोरन्तरं, आसनस्य ललाटोपरिभागस्य चान्तरं, दक्षिणस्कन्धस्य वामजानुन-

---

१. जिट्ठे - O। २. गोयमे गोत्तेणं - O। ३. सत्तुस्सेहे जाव पज्जु... - O, V। ४. पज्जुवासमाणे - K। ५. गौतमो गोत्रेण - F।

श्चान्तरं, वामस्कन्धस्य दक्षिणजानुनश्चान्तरमिति। अपरे त्वाहुर्विस्तरोत्सेधयोः समत्वात् समचतुरस्रं तच्च तत्संस्थानञ्च, संस्थानमाकारस्तेन संस्थितो व्यवस्थितः। यावत् शब्दादिदमनुक्तमप्यवसेयम्– **'वज्जरिसहनारायसंघयणे कणगपुलगनिघसपम्हगोरे उग्गतवे दित्ततवे[१] तत्ततवे महातवे उराले घोरे घोरगुणे घोरतवस्सी घोरबंभचेरवासी उच्छूढसरीरे संखित्तविउलतेउलेसे चउदसपुव्वी चउणाणोवगए सव्वक्खरसन्निवाई समणस्स भगवतो महावीरस्स अदूरसामंते उड्ढंजाणू अहोसिरे झाणकोट्ठोवगए संजमेणं तवसा अप्पाणं भावेमाणे विहरइ। तए णं से भगवं गोयमे जायसड्ढे जायसंसए जायकोउहल्ले उप्पन्नसड्ढे उप्पण्णसंसए उप्पण्णकोउहल्ले संजायसड्ढे संजायसंसए संजायकोउहल्ले समुप्पन्नसड्ढे समुप्पन्नसंसए समुप्पन्नकोउहल्ले उट्ठाए उट्ठेइ, उट्ठाए उट्ठित्ता जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ, उवागच्छित्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेइ, आयाहिणपयाहिणं करेत्ता वंदइ नमंसइ, वंदित्ता नमंसित्ता नच्चासण्णे नातिदूरे सुस्सूसमाणे नमंसमाणे अभिमुहे विणएणं पंजलिउडे पज्जुवासेमाणे[२] एवं वयासी।'** इति। अस्यायमर्थः – **'वज्जरिसहनारायसंघयणे'**त्ति नाराचमुभयतो मर्कटबन्धः ऋषभस्तदुपरि वेष्टनपट्टः कीलिका अस्थित्रयस्यापि भेदकमस्थि, एवंरूपं संहननं यस्य स तथा। **'कणगपुलगनिघसपम्हगोरे'**त्ति कनकस्य सुवर्णस्य यः पुलको लवस्तस्य यो निकषः कषपट्टके रेखारूपस्तथा पद्मग्रहणेन पद्मकेसराण्युच्यन्ते, अवयवे समुदायोपचारात्, यथा देवदत्तस्य हस्ताग्ररूपो[३] अवयवोऽपि देवदत्तस्तथा च देवदत्तस्य हस्ताग्रं स्पृष्ट्वा लोको वदति देवदत्तो मया स्पृष्ट इति, ततः कनकपुलकनिकषवत् पद्मकेसरवच्च यो गौरः स कनकपुलकनिकषपद्मगौरः। अथवा कनकस्य यः पुलको द्रुतत्वे सति बिन्दुस्तन्निकषो वर्ण्णतः[४] सदृशः

१. दित्ततवे महातवे तत्ततवे - T। २. पज्जुवासमाणे - H। ३. हस्ताग्ररूपोऽपि अवयवो - N। ४. वर्ण्णः तत्सदृशः - S।

कनकपुलकनिकषः, तथा पद्मवत् पद्मकेसरवत् यो गौरः स पद्मगौरः। ततः पदद्वयस्य कर्म्मधारयः। अयश्च विशिष्टचरणरहितोऽपि शङ्क्येतात आह – **उग्गत[पः](पाः)** उग्रमप्रधृष्यं तपोऽनशनादि यस्य स तथा, यदन्येन प्राकृतेन पुंसा न शक्यते चिन्तयितुमपि मनसा तद्विधेन तपसा युक्त इत्यर्थः। तथा दीप्तं[१] जाज्वल्यमानदहन इव कर्म्मवनगहनदहनसमर्थतया[२] ज्वलितं तपो धर्म्मध्यानादि यस्य स तथा। **'तत्ततवे'**त्ति तप्तं तपो येन स तप्ततपाः। एवं हि तेन तप्तं तपो येन सर्वाण्यप्यशुभानि कर्म्माणि भस्मसात्कृतानीति। महत् प्रशस्तमाशंसादोषरहितत्वात् तपो यस्य स **महातपाः**। तथा **'उराले'**त्ति उदारः प्रधानः, अथवा उरालो भीष्मः, उग्रादिविशेषणविशिष्टतपःकरणतः पार्श्वस्थानामल्पसत्त्वानां भयानक इत्यर्थः। तथा **घोरो** निर्घृणः परीषहेन्द्रियादिरिपुगणविनाशनमधिकृत्य निर्दय इत्यर्थः। तथा घोरा अन्यैर्दुरनुचरा गुणाः साम्यादयो यस्य स तथा। घोरैस्तपोभिस्तपस्वी। **'घोरबंभचेरवासि'**त्ति घोरं दारु[ण्य](ण)मल्पसत्त्वैर्दुरनुचरत्वात् ब्रह्मचर्यं यत् तत्र वस्तुं शीलं यस्य स तथा। **'उच्छूढसरीरे'**त्ति उच्छूढमुज्झितं उज्झितमिव उज्झितं संस्कारपरित्यागात् शरीरं येन स उच्छूढशरीरः। **'संखित्तविउलतेउलेसे'**त्ति सङ्क्षिप्ता शरीरान्तर्गतत्वेन ह्रस्वतां गता विपुला विस्तीर्णा अनेकयोजनप्रमाणक्षेत्राश्रितवस्तु-दहनसमर्थत्वात्तेजोलेश्या विशिष्टतपोजन्यलब्धिविशेषप्रभवा तेजोज्वाला यस्य स तथा। **'चउदसपुव्वि'**त्ति चतुर्दशपूर्वी, अनेन श्रुतकेवलितामाह। स चावधि-ज्ञानादिविकलोऽपि स्यादत आह – **'चउनाणोवगए'** मतिश्रुतावधिमनःपर्याय-रूपज्ञानचतुष्टयसमन्वित इत्यर्थः। उक्तविशेषणद्वयकलितोऽपि कश्चिन्न समग्रश्रुत-विषयव्यापिज्ञानालोको भवति चतुर्दशपूर्वविदामपि षट्स्थानपतितत्वेन श्रवणादत आह – **'सर्वाक्षरसन्निपाती'** अक्षराणां सन्निपाताः संयोगा अक्षरसन्निपाताः सर्वे च ते अक्षरसन्निपाताश्च सर्वाक्षरसन्निपातास्ते यस्य ज्ञेयाः सन्ति स तथा, किमुक्तं

---

१. जाज्वल्यमानं दहन - H। २. कर्म्मवनदहनसमर्थतया - A, M।

भवति ? या काचिज्जगति पदानुपूर्व्वी वाक्यानुपूर्व्वी वा सम्भवति ताः सर्वा अपि जानातीति। एवंगुणविशिष्टो भगवान् विनयराशिरिव साक्षादिति कृत्वा शिष्टाचारत्वाच्च **श्रमणस्य भगवतो महावीरस्य अदूरसामन्ते विहरती**ति योगः। तत्र दूरं विप्रकृष्टं सामन्तं सन्निकृष्टं तत्प्रतिधेषाददूरसामन्तं तत्र नातिदूरे नातिनिकटे इत्यर्थः। किंविशिष्टः सन् तत्र विहरतीत्यत आह – **'उड्ढंजाणु'**त्ति ऊर्ध्वे जानुनी यस्यासावूर्द्ध्वजानुः शुद्धपृथिव्यासनवर्जनात् औपग्रहिकनिषद्याया अभावाच्च उत्कटुकासन इत्यर्थः। **अधःशिरा** नोर्द्ध्वं तिर्यग् वा विक्षिप्तदृष्टिः किन्तु नियतभूभागनियमितदृष्टिरिति भावः। **'झाणकोट्ठोवगए'**त्ति ध्यानं धर्म्यं शुक्लं वा तदेव कोष्ठः कुशूलो ध्यानकोष्ठः तमुपगतो ध्यानकोष्ठोपगतो, यथाहि कोष्ठके धान्यं क्षिप्तमविसृतं भवति एवं भगवानपि ध्यानतोऽविप्रकीर्णेन्द्रियान्तःकरणवृत्तिरित्यर्थः। **संयमेन** पञ्चाश्रवादिनिरोधलक्षणेन **तपसा** अनशनादिना चशब्दो अत्र समुच्चयार्थो लुप्तो द्रष्टव्यः। संयमतपोग्रहणं चाऽनयोः प्रधानमोक्षाङ्गत्वख्यापनार्थं, प्राधान्यं संयमस्य नवकर्म्मानुपादानहेतुत्वेन तपसश्च पुराणकर्म्मनिर्जराहेतुत्वेन, तथाहि अभिनवकर्म्मानुपादानात् पुराणकर्म्मक्षपणाच्च जायते सकलकर्म्मक्षयलक्षणो मोक्षस्ततो भवति संयमतपसोर्मोक्षं प्रति प्राधान्यमिति। **'अप्पाणं भावेमाणे विहरइ'**त्ति आत्मानं भावयन् वासयन् विहरति तिष्ठतीत्यर्थः। **'ततो[1] णं से'** इति ततो ध्यानकोष्ठोपगतविहरणादनन्तरं **'ण'**मिति वाक्यालङ्कारे स **भगवान् गौतमो 'जातसड्ढे'** इत्यादि, जातश्रद्धादिविशेषणः सन् उत्तिष्ठतीति[2] योगः। तत्र जाता प्रवृत्ता श्रद्धा इच्छा वक्ष्माणार्थतत्त्वज्ञानं प्रति यस्यासौ जातश्रद्धः। तथा जातः संशयो यस्य स **जातसंशयः**। संशयो नाम अनवधारितार्थं ज्ञानं, स चैवं – इह मुहूर्त्तवृद्ध्यपवृद्धिवक्तव्यता अन्यथा अन्यथा तीर्थान्तरीयैरुपदिश्यते, ततः किं तत्त्वम् ? इति संशयः। तथा **'जातकुऊहल्ले'** त्ति जातं कुतूहलं यस्य स जातकुतूहलः

---

१. तए - मूले। २. योगः। जाता... - A, B, C, D, E, F, G, I, J, K, L M।

जातौत्सुक्य इत्यर्थः, यथा कथमेनां मुहूर्त्तवृद्ध्यपवृद्धिवक्तव्यतां भगवान् प्रज्ञापयिष्यतीति। तथा '**उप्पण्णसड्ढे**' त्ति उत्पन्ना प्रागभूता सती भूता श्रद्धा यस्यासौ उत्पन्नश्रद्धः। अथ जातश्रद्ध इत्येतावदेवास्तु किमर्थमुत्पन्नश्रद्ध इत्यभिधीयते ? प्रवृत्तश्रद्धत्वेनैव उत्पन्नश्रद्धत्वस्य लब्धत्वात्, न ह्यनुत्पन्ना श्रद्धा प्रवर्त्तते इति, अत्रोच्यते, [१]हेतुत्वप्रदर्शनार्थं प्रवृत्तश्रद्धः, तथाहि कथं प्रवृत्तश्रद्ध ? इति उच्यते यत उत्पन्नश्रद्ध इति, हेतुत्वोपदर्शनं चोपपन्नं तस्य काव्यालङ्कारत्वात्, यथा '**प्रवृत्तदीपामपवृत्तभास्करां, प्रकाशचन्द्रां बुबुधे विभावरीम्।**' इत्यत्र हि यद्यपि प्रवृत्तदीपत्वादेवा[प्र](प)वृत्तभास्करत्वमवगतं तथापि अपवृत्तभास्करत्वं प्र[दीप्त](वृत्त)दीपत्वादेर्हेतुतयोपन्यस्तमिति समीचीनम्। '**उप्पण्णसंसये उप्पण्णकोउहल्ले**' इति प्राग्वत्। तथा '**संजातसड्ढे**' इत्यादिपदषट्कं प्राग्वत्, नवरमिह स[म](म्)शब्दः प्रकर्षादिवचनो वेदितव्यः। '**उट्ठाए उट्ठेइ**'त्ति उत्थानमुत्था ऊर्ध्वं वर्त्तनं तया उत्तिष्ठति। इह '**उट्ठेइ**' इत्युक्ते क्रियारम्भमात्रमपि [२]प्रतीयते यथा वक्तुमुत्तिष्ठतीति ततस्तद्व्यवच्छेदार्थमुत्थायेत्युक्तम्। [३]'**जेणेवे**'त्यादि प्राकृतशैलीवशात् अव्ययत्वाच्च येनेति यस्मिन्नित्यर्थे द्रष्टव्यम्, यस्मिन् दिग्भागे **श्रमणो भगवान् महावीरो** वर्त्तते, '**तेणेवे**'त्ति तस्मिन्नेव दिग्भागे **उपागच्छति**। इह वर्त्तमानकालनिर्देशस्तत्कालापेक्षया उपागमनक्रियाया वर्त्तमानत्वात् परमार्थतस्तूपागतवानिति द्रष्टव्यम्। **उपागम्य** च **श्रमणं भगवन्तं महावीरं** कर्म्मतापन्नं **त्रिःकृत्वस्त्रीन्वारान्** [कृत्वा] **आदक्षिणप्रदक्षिणं करोति,** आदक्षिणात् दक्षिणहस्तात् आरभ्य प्रदक्षिणः परितो भ्राम्यतो दक्षिण एव आदक्षिणप्रदक्षिणस्तं करोतीति। **कृत्वा वन्दते** स्तौति **नमस्यति** कायेन प्रणमति **वन्दित्वा नमस्यित्वा** च **न नैवात्यासन्नो**ऽतिनिकटोऽवग्रहपरिहारात्, अथवा नात्यासन्ने स्थाने वर्त्तमान इति

१. हेतुत्वप्रदर्शनार्थं प्रवृत्तश्रद्ध इति, हेतुत्वोपदर्शनं चोपपन्नं... A, B, C, D, E, F, G, I, J, K, L, M, हेतुत्वप्रदर्शनार्थम्, तथाहि - T। २. प्रतियते - H। ३. मूले तु 'उट्ठाए उट्ठेइ, उट्ठाए उट्ठित्ता जेणेव....' इति पाठः।

गम्यम्, तथा **न** नैवा**तिदूरो**ऽतिविप्रकृष्टो [१]अनौचित्यपरिहारात्, अथवा [२]नातिदूरे स्थाने वर्त्तमान इति गम्यम्। '**सुस्सूसमाणे**'त्ति भगवद्वचनानि श्रोतुमिच्छन्। [३]'**अभिमुहे**'त्ति अभि भगवन्तं प्रति मुखमस्येति अभिमुखः। '**विणयेणं**'त्ति विनयेन हेतुना, '**पंजलिउ[डु](डे)**'त्ति प्रकृष्टः प्रधानो ललाटपट्टघटितत्वेन अञ्जलिर्हस्तन्यासविशेषः कृतो विहितो येन स प्राञ्जलिकृतः, भार्योढादेराकृतिगणतया कृतशब्दस्य परनिपातः। '**पज्जुवासेमाणे**' इति पर्युपासीनः सेवमानः। अनेन च विशेषणकदम्बकेन श्रवण-विधिरुपदर्शितः। उक्तञ्च '**[४]निद्दा[५]विकहापरिवज्जिएहिं गुत्तेहिं पंजलिउडेहिं। भत्तिबहुमाणपुव्वं उवउत्तेहिं सुणेयव्वं॥२३॥**' (**पुष्पमाला**) इति। '**एवं वयासि**'त्ति एवं वक्ष्यमाणेन प्रकारेण मुहूर्त्तवृद्धिअपवृद्धिवक्तव्यताविषयं प्रश्नमवादीत् उक्तवान्।

कथमुक्तवान् ? इत्याह–

मू० ता कहं ते मुहुत्ताणं वुड्ढोवुड्ढी [६]आहिय त्ति वएज्जा?

टी० 'ता कहं ते मुहुत्ताणं [७]वुड्ढोवड्ढी' इत्यादि। अत्र तावत्शब्दः क्रमार्थः। क्रमश्चायमस्त्यन्यदपि प्रभूतं चन्द्रसूर्यादिविषयं प्रष्टव्यं परं तदास्तां सम्प्रत्येतदेव **तावत्पृच्छामि – कथं** केन प्रकारेण भगवन् ! **त्वया मुहूर्त्तानां** दिवसरात्रिविषयाणां **वृद्ध्यपवृद्धी आख्याते इति** भगवान् प्रसादमाधाय **वदेत्** यथावस्थितं वस्तुस्वरूपं कथयेत् येन मे संशयापगमो भवति अपगतसंशयश्च परेभ्यो निःशङ्कमुपदिशामीति। अत्राह – ननु गौतमोऽपि चतुर्दशपूर्वधरः सर्वाक्षरसन्निपाती सम्भिन्नश्रोताः सकलप्रज्ञापनीयभावपरिज्ञाकुशलः सूत्रतश्च प्रवचनस्य प्रणेता सर्वज्ञदेशीय एव, उक्तञ्च '[८]**संखाईए वि भवे साहइ जं वा परो उ पुच्छेज्जा। न य णं अणाइसेसी**

---

१. अनौचित्यं परिहरन् - A, B, C, D, E, F, G, I, J, K, L, M, N। २. नातिदूरस्थाने - G, K। ३. मूले तु 'सुस्सूसमाणे नमंसमाणे अभिमुहे...' इति पाठः। ४. निद्राविकथापरिवर्जितैः गुप्तैः प्राञ्जलिकृतैः। भक्तिबहुमानपूर्वं उपयुक्तैः श्रोतव्यम्॥२३॥ ५. विगहा - G। ६. आहिते त्ति - U। ७. वुड्ढोवुड्ढी - मूले। ८. सङ्ख्यातीतानपि भवान् कथयति, यत् वा परः तु पृच्छेत्। न च तं अनतिशेषी विजानाति एषः छद्मस्थः॥

वियाणइ एस छउमत्थो ॥' ( ) इति, ततः कथं संशयसम्भवः? तदभावाच्च कथं पृच्छतीति? उच्यते, यद्यपि भगवान् गौतमो यथोक्तगुणविशिष्टस्तथापि तस्याद्यापि मतिज्ञानावरणीयाद्युदये वर्त्तमानत्वात् छद्मस्थता छद्मस्थस्य च कदाचिदनाभोगोऽपि जायते। यत उक्तम्– '**न हि नामानाभोगश्छद्मस्थस्येह कस्यचिन्नेति। ज्ञानावरणीयं हि ज्ञानावरणप्रकृतिकर्म्म ॥**' ( ) ततोऽनाभोगसम्भवादुपपद्यते [१]भगवतो गौतमस्यापि संशयः। न चैतदनार्षं यत उक्तं **उपासकदशासु** आनन्दश्रमणोपासकाऽवधिनिर्णयविषये– [२]'**तेणं भंते ! किं आणंदेणं समणोवासएणं तस्स ठाणस्स आलोइयव्वं जाव पडिक्कमियव्वं उयाहु मए ? तओ णं गोयमाई समणे भगवं महावीरे गोयमं एवं वयासी - तुमं चेव णं तस्स ठाणस्स आलोएहि जाव पडिक्कमाहि आणंदं च समणोवासयं एयमट्ठं खामेहि। तए णं समणे भगवं गोयमे समणस्स भगवतो महावीरस्स अंतिए एयमट्ठं विणएणं पडिसुणेइ पडिसुणित्ता तस्स ठाणस्स आलोएइ जाव पडिक्कमइ आणंदं च समणोवासयं एयमट्ठं खामेइ त्ति।**' (**उपासकदशाङ्गम्, प्रथममध्ययनम्, सूत्र १४, पृष्ठ ३२-३३**) अथवा भगवानपगतसंशयोऽपि शिष्यसम्प्रत्ययार्थं पृच्छति, तथाहि– तमर्थं शिष्येभ्यः प्ररूप्य तेषां सम्प्रत्ययार्थं तत्समक्षं भूयोऽपि भगवन्तं पृच्छतीति। यदि वा इत्थमेव

---

१. भगवतोऽपि संशयः - A, B, C, D, E, F, G, H, I, J, K। २. 'तेन भगवन् ! किं आनन्देन श्रमणोपासकेन तत् स्थानं आलोचयितव्यं यावत् प्रतिक्रमितव्यं उताहो मया ? ततः गौतमादिः श्रमणः भगवान् महावीरः गौतमं एवं अब्रवीत् - गौतम ! त्वमेव तत् स्थानं ओलचय यावत् प्रतिक्रमस्व आनन्दं च श्रमणोपासकं एनमर्थं क्षमय। ततः श्रमणः भगवान् गौतमः श्रमणस्य भगवतः महावीरस्य अन्तिके एनमर्थं विनयेन प्रतिशृणोति प्रतिशृत्य तत्स्थानं आलोचयति यावत् प्रतिक्रामति आनन्दं च श्रमणोपासकं एनमर्थं क्षमयति इति।' **उपासकदशासु** त्वयं पाठ इत्थं दृश्यते- 'तं णं भंते ! किं आणंदेणं समणोवासएणं तस्स ठाणस्स आलोएयव्वं जाव पडिवज्जेयव्वं उदाहु मए ? तओ णं गोयमाई समणे भगवं महावीरे भगवं गोयमं एवं वयासी - गोयमा ! तुमं चेव णं तस्स ठाणस्स आलोएहि जाव पडिवज्जाहि आणंदं च समणोवासयं एयमट्ठं खामेहि। तए णं से भगवं गोयमे समणस्स भगवतो महावीरस्स 'तह'त्ति एयमट्ठं विणएणं पडिसुणेइ पडिसुणेत्ता तस्स ठाणस्स आलोएइ जाव पडिवज्जइ आणंदं च समणोवासयं एयमट्ठं खामेइ त्ति।'

सूत्ररचनाकल्प इति न कश्चिद्दोषः।

एवं भगवता गौतमेन प्रश्ने कृते सति भगवान् श्रीवर्धमानस्वामी प्रतिवचनमभिधातुकामः सविशेषबोधाधानाय प्रथमतो नक्षत्रमासे यावन्तो मुहूर्त्ताः सम्भवन्ति तावतो निरूपयति–

मू० ता अट्ठ एकूणवीसे मुहुत्तसए सत्तावीसं च सत्तसट्ठिभागे मुहुत्तस्स आहिए त्ति वएज्जा।

टी० **'ता अट्ठे'**त्यादि। **तावद्** इति शिष्योक्तपदानुवादः स च न्यायमार्गप्रदर्शनार्थस्तथाहि– सर्वेणापि गुरुणा शिष्येण प्रश्ने कृते सति शिष्यपृष्टस्य पदस्य अन्यस्य वा शिष्योक्तस्य तथाविधपदस्यानुवादपुरस्सरं प्रवचनमभिधातव्यं येन गुरुषु शिष्याणां बहुमानो भवति यथाऽहं गुरूणां सम्मत इति। अन्यच्च तावत् शब्दस्यायमर्थः – आस्तामन्यत्प्रतिवक्तव्यमिदानीं तावदेतावदेव तवाग्रे कथयामि। एकस्मिन् नक्षत्रमासे **अष्टौ मुहूर्त्तशतान्येकोनविंशत्यधिकानि** एकस्य तु **मुहूर्त्तस्य सप्तविंशतिः सप्तषष्टिभागा मयाऽऽख्याता इति** स्वशिष्येभ्यो **वदेत्**। एतेन चैतदावेदयति इह शिष्येण सम्यगधीतशास्त्रेणापि गुर्व्वनुज्ञातेन सता तत्त्वोपदेशोऽपरस्मै दातव्यो नान्यथेति। अथ कथमेकस्मिन्नक्षत्रमासे अष्टौ मुहूर्त्तशतान्येकोनविंशत्यधिकानि भवन्त्येकस्य च मुहूर्त्तस्य सप्तविंशतिः सप्तषष्टिभागा इति ? उच्यते, इह युगे चन्द्रचन्द्राभिवर्धित[चन्द्र]चन्द्राभिवर्धितरूपसंवत्सरपञ्चकात्मके [१]सप्तषष्टिः नक्षत्रमासाः। युगे चोक्तस्वरूपे अहोरात्राणामष्टादशशतानि त्रिंशदधिकानि १,८३०। तत एतेषां सप्तषष्ट्या भागो ह्रियते। लब्धाः सप्तविंशतिरहोरात्राः, शेषा तिष्ठति एकविंशतिः। सा मुहूर्त्तानयनार्थं त्रिंशता गुण्यते, जातानि षट् शतानि त्रिंशदधिकानि ६३०। तेषां सप्तषष्ट्या भागे हृते लब्धा नव मुहूर्त्ताः, शेषा अवतिष्ठते सप्तविंशतिः २७। आगतं नक्षत्रमासः सप्तविंशतिरहोरात्रा नव मुहूर्त्ता एकस्य च मुहूर्त्तस्य

१. सप्तषष्टिनक्षत्रमासाः - D, M, J।

सप्तविंशतिः सप्तषष्टिभागाः। तत्र सप्तविंशतिरहोरात्रा मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते जातान्यष्टौ शतानि दशोत्तराणि ८१०। तेषां मध्ये उपरितना नव मुहूर्त्ताः प्रक्षिप्यन्ते। जातान्यष्टौ शतानि एकोनविंशत्यधिकानि ८१९। आगतं नक्षत्रमासे मुहूर्त्तपरिमाणमष्टौ शतान्येकोनविंशत्यधिकानि एकस्य च मुहूर्त्तस्य सप्तविंशतिः सप्तषष्टिभागा इति। इदश्च नक्षत्रमासानां मुहूर्त्तपरिमाणमुपलक्षणं, तेन सूर्यादिमासानामप्यहोरात्रसङ्ख्यां परिभाव्य मुहूर्त्तपरिमाणं यथागमं भावनीयम्। तच्चैवं– सूर्यमासा युगे षष्टिर्भवन्ति युगे चाष्टादशशतानि त्रिंशदधिकान्यहोरात्राणां, ततस्तेषां षष्ट्या भागे हृते लब्धास्त्रिंशदहोरात्रा एकस्य चाहोरात्रस्यार्द्धम्। एतावत् सूर्यमासपरिमाणम्। त्रिंशत्मुहूर्त्ताश्चाहोरात्रे इति त्रिंशत् त्रिंशता गुण्यते जातानि नव शतानि मुहूर्त्तानां अर्द्धे चाहोरात्रस्य पञ्चदशमुहूर्त्तास्तत आगतं [१]सूर्यमासमुहूर्त्तपरिमाणं नव शतानि पञ्चदशोत्तराणि ९१५। तथा युगे द्वाषष्टिश्चन्द्रमासास्ततोऽष्टादशशतानां त्रिंशदधिकानां द्वाषष्ट्या भागो ह्रियते, लब्धा एकोनत्रिंशदहोरात्रा द्वात्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य। तत्र द्वात्रिंशत् द्वाषष्टिभागा मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते। जातानि नव शतानि षष्ट्यधिकानि ९६०। तेषां द्वाषष्ट्या भागो ह्रियते लब्धाः पञ्चदशमुहूर्त्ताः, शेषा तिष्ठति त्रिंशत् ३०। एकोनत्रिंशच्चाहोरात्रा मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते। जातान्यष्टौ शतानि सप्तत्यधिकानि ८७०। ततः पाश्चात्याः पञ्चदशमुहूर्त्ता एषु मध्ये प्रक्षिप्यन्ते। तत आगतं चन्द्रमासे मुहूर्त्तपरिमाणमष्टौ शतानि पञ्चाशीत्यधिकानि त्रिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य। कर्म्ममासश्च त्रिंशदहोरात्रप्रमाणस्ततस्तत्र मुहूर्त्तपरिमाणं नव शतानि मुहूर्त्तानाम्। तदेवं मासगतं मुहूर्त्तपरिमाणमुक्तमेतदनुसारेण च चन्द्रादिसंवत्सरगतं[च] मुहूर्त्तपरिमाणं स्वयं भावनीयम्। तथा च सत्यवगतं मुहूर्त्तपरिमाणम्।

सम्प्रति प्रत्ययनं ये दिवसरात्रिविषये मुहूर्त्तानां वृद्ध्यपवृद्धी ते अवबोद्धुकाम

---

१. सूर्यमासे मुहूर्त्तपरिमाणं - A, B, C, D, E, F, G, I, J, K, L, M।

इदं पृच्छति –

मू० ता जया णं सूरिए सव्वब्भंतराओ मंडलाओ सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति सव्वबाहिराओ मंडलाओ सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति एस णं अद्धा केवतियं राइंदियग्गेणं आहिताति वदेज्जा ?

टी० 'ता जया ण'मित्यादि। **तावत्**शब्दार्थभावना सर्वत्रापि प्रागुक्तानुसारेण यथायोगं स्वयं भावनीया, शेषस्य च वाक्यस्यायमर्थः- **यदा** यस्मिन्काले **'ण'**मिति वाक्यालङ्कारे (१**सूर्यः सर्वाभ्यन्तरान्मण्डलाद्**निर्गत्य प्रत्यहोरात्रमेकैकमण्डल-चारेण यावत् **सर्वबाह्यं मण्डलमुपसङ्क्रम्य चारं चरति**-परिभ्रमणमुपपद्यते, **सर्वबाह्याच्च मण्डला**दपसृत्य प्रतिरात्रिन्दिवमेकैकमण्डलपरिभ्रमणेन यावत् सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य चारं चरति, **एषा** एतावती, **'ण'**मिति पूर्ववत्) **अद्धा कियता रात्रिन्दिवाग्रेण** रात्रिन्दिवपरिमाणे**नाख्याता इति वदेत्** ?

अत्र प्रतिवचनम् –

मू० ता तिण्णि छावट्ठे रायंदियसए रायंदियग्गेणं आहिया ति वदेज्जा।

टी० 'ता तिण्णि' इत्यादि। एषा अद्धा **रात्रिन्दिवाग्रेण त्रिभी रात्रिन्दिवशतैः षट्षष्टैः** षट्षष्ट्यधिकैराख्याता **इति वदेत्** स्वशिष्येभ्यः।

पुनः पृच्छति–

मू० ता एताए णं अद्धाए सूरिए कइ मंडलाइं चरति ? कइ मंडलाइं दुक्खुत्तो चरइ ?

टी० 'ता एयाए ण'मित्यादि। **'ता'** इति पूर्ववत्। **एतया** एतावत्या षट्षष्टिसहितरात्रिन्दिवशतत्रयपरिमाणया **अद्धया कति मण्डलानि सूर्यो (चरति ? कति मण्डलानि) द्विःकृत्वश्चरति** ? कति वा मण्डलान्येकवारम् ? इति शेषः।

१. ( ) चह्नान्तर्गतः पाठः सर्वासु प्रतिषु त्रुटितो भाति, अतो मया सूर्यप्रज्ञप्तिवृत्त्यनुसारेण स अत्र पूरितः।

अत्र प्रतिवचनम्–

मू० ता चुलसी[ति](यं) मंडलसयं चरइ। बासीयं च मंडलसतं दुक्खुत्तो चरति। तं जहा णिक्खममाणे चेव पविसमाणे चेव। दुवे[१] खलु मंडलाइं सइं सइं चरति तं० सव्वब्भंतरं[२] च मंडलं सव्वबाहिरं च मंडलं।

टी० 'ता चुलसीय'मित्यादि। [३]सामान्यतश्चतुरशीतं-चतुरशीत्यधिकं **मण्डलशतं चरति**, अधिकस्य मण्डलस्य सूर्यसत्कस्याभावात्, तत्रापि चतुरशीति-शतमध्ये **द्व्यशीतं** द्व्यशीत्यधिकं **मंडलशतं द्विकृत्वश्चरति**। **तद्यथा** सर्वाभ्यन्तरात् मण्डलाद्बहि**र्निष्क्रामन्** सर्वबाह्यान्मण्डलाच्चाभ्यन्तरं **प्रविशन्**। **द्वे च मण्डले [४]सकृत् सकृत्** एकैकं वारं **चरति** परिभ्रमति **[५]सर्वाभ्यन्तरश्च मण्डलं सर्वबाह्यश्च मण्डलम्**।

भूयः प्रश्नयति–

मू० जति खलु तस्सेव आइच्चसंवच्छरस्स [६]सइं अट्ठारसमुहुत्ते दिवसे भवइ, सइं अट्ठारसमुहुत्ता राई भवइ, [७]सइं दुवालसमुहुत्ते दिवसे भवति, [८]सइं दुवालसमुहुत्ता राती भवति। ते पढमे छम्मासे अत्थि अट्ठारसमुहुत्ता राती णत्थि अट्ठारसमुहुत्ते दिवसे, अत्थि दुवालसमुहुत्ते दिवसे नत्थि दुवालसमुहुत्ता राती भवति। दोच्चे छम्मासे अत्थि अट्ठारसमुहुत्ते दिवसे नत्थि अट्ठारसमुहुत्ता रत्ती, अत्थि दुवालसमुहुत्ता राती णत्थि दुवालसमुहुत्ते दिवसे भवति। पढमे वा छम्मासे दोच्चे वा छम्मासे णत्थि पण्णरसमुहुत्ते दिवसे णत्थि पण्णरसमुहुत्ता राती भवति। जण्णं पढमे वा छम्मासे दोच्चे वा छम्मासे णत्थि पन्नरसमुहुत्ते

---

१. दु चेव - H, O। २. सव्वब्भंतरं मंडलं - U। ३. सामान्यतश्चतुरशीत्यधिकं ... - H। ४. सकृत् एकैकं - N, T। ५. तं० सव्वब्भंतरं - मूले। ६. सयं U। ७. सयं U, O। ८. सयं - U।

दिवसे नत्थि पन्नरसमुहुत्ता राती भवति, तत्थ य को हेऊ त्ति वदेज्जा ?

टी० 'जइ खलु' इत्यादि। **यदि खलु** षट्ष[ष्टिर](ष्ट्य)धिकरात्रिन्दिवशतत्रयपरिमाणायामद्धायां द्व्यशीतिमण्डलशतं द्विकृत्वश्चरति [१]द्वे च मण्डले एकैकवारमिति तत एवं सति यदेतद्भगवद्भिः प्ररूप्यते **तस्य** षट्षष्ट्यधिकरात्रिन्दिवशतत्रयपरिमाणस्य **सूर्यसंवत्सरस्य** मध्ये **सकृत्** एकवार**मष्टादशमुहूर्त्त**प्रमाणो **दिवसो भवति सकृच्चाष्टादशमुहूर्त्ता रात्रिः**। तथा **सकृदेकवारं द्वादशमुहूर्त्तो दिवसो भवति सकृच्च द्वादशमुहूर्त्ता रात्रिः**। तत्रापि **प्रथमे षण्मासे अष्टादशमुहूर्त्ता रात्रिः न त्वष्टादशमुहूर्त्तो दिवसः**। तथा **अस्ति** तस्मिन्नेव प्रथमे षण्मासे **द्वादशमुहूर्त्तो दिवसो न तु द्वादशमुहूर्त्ता रात्रिः। द्वितीये षण्मासे अस्त्यष्टादशमुहूर्त्तो दिवसो नत्वष्टादशमुहूर्त्ता रात्रिः**। तथाऽस्ति तस्मिन्नेव द्वितीये षण्मासे **द्वादशमुहूर्त्ता रात्रिर्न तु द्वादशमुहूर्त्तो दिवसः**। तथा **प्रथमे षण्मासे द्वितीये वा षण्मासे नास्त्येतद्**यदुत **पञ्चदशमुहूर्त्तो** भवति **दिवसः, नाप्यस्त्येतत्** यदुत **पञ्चदशमुहूर्त्ता रात्रि**रिति। [२]तत्रैवंविधवस्तुतत्त्वा[३]धाने को हेतुः ? किं कारणं ? कया युक्त्या एतत् प्रतिपत्तव्यम् ? इति भावार्थ इति वदेत्।

अत्र प्रतिवचनमाह –

मू० ता अयण्णं जंबुद्दीवे द्दीवे सव्वदीवसमुद्दाणं सव्वब्भंतराए जाव विसेसाहिए परिक्खेवेणं पण्णत्ते। ता जता णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तया णं उत्तमकट्ठपत्ते उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। से णिक्खममाणे सूरिए णवं संवच्छरं [आयामीणे] (अयमाणे) पढमंसि अहोरत्तंसि अब्भंतराणंतरं मंडलं उवसंकमित्ता चारं चरति।

---

१. द्वे मण्डले - N। २. जण्णं पढमे वा..... तत्थ य को हेऊ त्ति वदेज्जा ? - मूले।
३. ... तत्त्वावगमे - S।

ता जता णं सूरिए अब्भंतराणंतरं मंडलं उवसंकमित्ता चारं चरति तदा णं अट्ठारसमुहुत्ते दिवसे भवति दोहिं एगट्ठिभागमुहुत्तेहिं ऊणे, दुवालसमुहुत्ता राती भवति दोहिं एगट्ठिभागमुहुत्तेहिं अहिया। [से] (ता) णिक्खममाणे सूरिए दोच्चंसि अहोरत्तंसि अब्भिंत[रअब्भंत]रं (तच्चं) मंडलं उवसंकमित्ता चारं चरति। ता जता णं सूरिए अब्भिंतरं तच्चं मंडलं उवसंकमित्ता चारं चरति तदा णं अट्ठारसमुहुत्ते दिवसे भवति चउहिं एगट्ठिभागमुहुत्तेहिं ऊणे दुवालसमुहुत्ता राती भवति चउहिं एगट्ठिभागमुहुत्तेहिं अहिता। एवं खलु एतेणं उवाएणं णिक्खममाणे सूरिए तदणंतराओ तदणंतरं मंडलातो मंडलं संकममाणे (२) दो एगट्ठिभागमुहुत्ते एगमेगे मंडले दिवसखेत्तस्स णिव्वेढेमाणे २ रातिखेत्तस्स अभिवड्ढमाणे २ सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति। ता जता णं सूरिए[1] सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति तता णं सव्वब्भंतरमंडलं पणिहाय एगेणं तेसीतेणं रातिंदियसतेणं तिन्नि छावट्ठे एगट्ठिभागमुहुत्तसते दिवसखेत्तस्स णिव्वेढेत्ता राइखित्तस्स अभिवड्ढेत्ता चारं चरति। तता णं उत्तमकट्ठपत्ता उक्कोसिता अट्ठारसमुहुत्ता राती भवति जहण्णए दुवालसमुहुत्ते दिवसे भवति। एस णं पढमे छम्मासे। एस णं पढमस्स छम्मासस्स पज्जवसाणे। से पविसमाणे सूरिए दोच्चं छम्मासं अय[मी](मा)णे पढमंसि अहोरत्तंसि बाहिराणंतरं मंडलं उवसंकमित्ता चारं चरति। ता जता णं सूरिए बाहिराणंतरं मंडलं उवसंकमित्ता चारं चरति तता णं अट्ठारसमुहुत्ता राती भवति दोहिं एगट्ठिभागमुहुत्तेहिं

---

१. सूरिए सव्वब्भंतराओ मंडलाओ सव्वबाहिरं - V।

ऊणा दुवालसमुहुत्ते दिवसे भवइ दोहिं एगट्ठिभागमुहुत्तेहिं अहिए। से पविसमाणे सूरिए दोच्चंसि अहोरत्तंसि बाहिरं तच्चं मंडलं उवसंकमित्ता चारं चरति। ता जता णं सूरिए बाहिरं तच्चं मंडलं उवसंकमित्ता चारं चरति तता णं अट्ठारसमुहुत्ता राई भवति चउहिं एगट्ठिभागमुहुत्तेहिं ऊणा, दुवालसमुहुत्ते दिवसे भवति चउहिं एगट्ठिभागमुहुत्तेहिं अहिए। एवं खलु एतेणं उवाएणं पविसमाणे सूरिए ततणंतरातो तयणंतरं मंडलाओ मंडलं संकममाणे२ दो दो एगट्ठिभागमुहुत्ते एगमेगे मंडले राईखित्तस्स णिव्वेड्ढेमाणे२ दिवसखित्तस्स अभिवड्ढेमाणे२ सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति। ता जया णं सूरिए सव्वबाहिरातो मंडलाओ सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं सव्वबाहिरं मंडलं पणिहाय एगेणं तेसीतेणं रातिंदियसतेणं तिण्णि छावट्ठे एगट्ठिभागमुहुत्तसते रातिखेत्तस्स णिव्वेड्ढित्ता दिवसखेत्तस्स अभिवड्ढेत्ता चारं चरति। तता णं उत्तमकट्ठपत्ते उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। एस णं दोच्चे छम्मासे। एस णं दोच्चस्स छम्मासस्स पज्जवसाणे। एस णं आदिच्चे संवच्छरे।[1] एस णं आदिच्चसंवच्छरस्स[2] पज्जवसाणे। इति खलु तस्सेवं आदिच्च-संवच्छरस्स सयं अट्ठारसमुहुत्ते दिवसे भवति, सयं अट्ठारसमुहुत्ता राती भवति, सयं दुवालसमुहुत्ते दिवसे भवति, सइं दुवालसमुहुत्ता राती[3] भवति। पढमे छम्मासे अत्थि अट्ठारसमुहुत्ता राती णत्थि अट्ठारसमुहुत्ते दिवसे, अत्थि दुवालसमुहुत्ते दिवसे णत्थि दुवाल-

१. आदिच्चस्स संवच्छरस्स एस णं पज्जवसाणे - Q। २. आदिच्चस्स संवच्छरस्स - U, V।
३. राती भवति - U।

समुहुत्ता राती भवति। दुच्चे छम्मासे अत्थि अट्ठारसमुहुत्ते दिवसे णत्थि अट्ठारसमुहुत्ता राती, अत्थि दुवालसमुहुत्ता राती णत्थि दुवालसमुहुत्ते दिवसे भवति। पढमे (वा) छम्मासे दोच्चे (वा) छम्मासे णत्थि पण्णरसमुहुत्ते दिवसे णत्थि पन्नरसमुहुत्ता राती भवति। णण्णत्थ राइंदियाणं वड्ढोवड्ढीए मुहुत्ताणं वा चयोवचएणं, णण्णत्थ वा अणुवायगतीए, [1]पुव्वेण दोण्णि भागा पाहुडिया, गाहाओ भाणियव्वाओ।

पढमं पाहुडपाहुडं सम्मत्तं।

टी० '**ता अयं ण**'मित्यादि। **अयं** प्रत्यक्षत उपलभ्यमानो '**ण**'मिति वाक्यालङ्कारे **जम्बूद्वीपो** जम्बूद्वीपनामा **द्वीपः** सर्वेषां द्वीपसमुद्राणां अभ्यन्तर इति **सर्वाभ्यन्तरः** सर्वमध्यवर्त्ती सर्वेषामपि शेषद्वीपसमुद्राणामित आरभ्य यथागमोक्तक्रमं द्विगुणद्विगुणविष्कम्भतया भवनात् '**[2]जाव परिक्खेवेणं पण्णत्ते**' इति अत्र यावत् शब्दोपादानात् इदमन्यद्ग्रन्थान्तरे प्रसिद्धं सूत्रमवगन्तव्यम्– '**सव्वखुड्डागे वट्टे तेल्लापूपसंठाणसंठिए वट्टे रहचक्कवालसंठाणसंठिए वट्टे पुक्खरपउमकण्णियासंठाणसंठिए वट्टे पडिपुण्णचंदसंठाणसंठिए जोयणसयसहस्सआयामविक्खंभेणं तिण्णि जोयणसयसहस्साइं सोलस सहस्साइं दोन्नि य सत्तावीसे जोयणसए तिण्णि कोसे अट्ठावीसं च धणुसयं तेरस अंगुलाइं अद्धंगुलं च किंचि विसेसाहिए परिक्खेवेणं पन्नत्ते।**' इति। अत्र '**सव्वखुड्डागे**' त्ति सर्वेभ्योऽप्यन्येभ्यो द्वीपसमुद्रेभ्यः क्षुल्लको लघुरायामविष्कम्भाभ्यां योजनलक्षमात्रप्रमाणत्वात्। शेषं प्रायः सुगमम्, परिधिपरिमाण[3]गणितञ्च क्षेत्रसमासटीकातः परिभावनीयम्। '**ता**' इति ततो **यदा** '**ण**'मिति पूर्ववत् **सूर्यः सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य चारं चरति तदा** '**ण**'मिति प्राग्वत् **उत्तमकाष्ठाप्राप्तो**ऽत्र

---

१. 'पुव्वेण दोण्णि भागा पाहुडिया' - एतेषां पदानां टीका न विद्यते। सूर्यप्रज्ञप्तिमूलेऽप्येतानि पदानि न दृश्यन्ते। २. जाव विसेसाहिए परिक्खेवेणं - मूले। ३. .....गणनं - F।

काष्ठाशब्दः प्रकर्षवाची प्रकर्षप्राप्तो यतः परमन्यो अधिको न भवति स इत्यर्थः। **'उक्कोसए'** त्ति उत्कर्षतीत्युत्कर्षः, उत्कर्ष एवोत्कर्षकः उत्कृष्ट इत्यर्थः। **अष्टादशमुहूर्त्तो दिवसो भवति**। तस्मिन्नेव च सर्वाभ्यन्तरे मण्डले सूर्ये चारं चरति **जघन्या** सर्वलघ्वी **द्वादशमुहूर्त्ता रात्रिः**। एषोऽहोरात्रः पाश्चात्यस्य सूर्यसंवत्सरस्य पर्यवसानम्। ततः **स सूर्यस्तस्मात्सर्वाभ्यन्तरान्मण्डलान्निष्क्रामन् नवं सूर्यसंवत्सरमाददानः** प्रवर्त्तमानः **प्रथमे अहोरात्रे 'अ[भ्यं](ब्भिं)तरानंतरं'**ति सर्वाभ्यन्तरान्मण्डलादनन्तरं द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरति। ततो यदा सूर्योऽभ्यन्तरानन्तरं** सर्वाभ्यन्तरान्मण्डलादनन्तरं द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरति तदाऽष्टादशमुहूर्त्तो दिवसो द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामूनो भवति द्वाभ्यां च मुहूर्त्तैकषष्टिभागाभ्यामधिका द्वादशमुहूर्त्ता रात्रिः**। कथमेतदवसीयते इति चेत् ? उच्यते, इह एकं मण्डलमेकेनाहोरात्रेण द्वाभ्यां सूर्याभ्यां परिसमाप्यते। एकैकः सूर्यश्च प्रत्यहोरात्रं मण्डलस्य त्रिंशदधिकानष्टादशशतसङ्ख्यान् भागान् परिकल्प्य एकैकं भागं दिवसक्षेत्रस्य रात्रिक्षेत्रस्य वा यथायोगं [१]हापयिता वर्द्धयिता वा भवति। स चैको मण्डलगतत्रिंशदधिकाष्टादशशततमो भागो द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यां गम्यते, तथाहि – तानि मण्डलगतानि त्रिंशदधिकाष्टादशशतानि भागानां द्वाभ्यां सूर्याभ्यामेकेनाहोरात्रेण गम्यन्ते। अहोरात्रश्च त्रिंशन्मुहूर्त्तप्रमाणस्ततः सूर्यद्वयापेक्षया षष्टिमुहूर्त्ता लभ्यन्ते। अतस्त्रैराशिककर्मावकाशो- यदि षष्ट्या मुहूर्त्तैरष्टादशशतानि त्रिंशदधिकानि मण्डलस्य भागानां गम्यन्ते तत एकेन मुहूर्त्तेन किं गम्यते ? ततः राशित्रयस्थापना ६०। १,८३०।१ अत्रान्त्येन राशिना [२]एकलक्षणेन मध्यराशेर्गुणनाज्जातानि तान्येवाष्टादशशतानि त्रिंशदधिकानि १,८३०। तेषामाद्येन राशिना षष्टिलक्षणेन भागो ह्रियते। लब्धाः सार्द्धास्त्रिंशद्भागाः। एतावन्मुहूर्त्तेन गम्यते मुहूर्त्तश्च एकषष्टिभागी क्रियते। तत आगतं एको भागो द्वाभ्यां

१. हापयित्वा वर्द्धयित्वा - F, G, K, T। २. एककलक्षणेन - G, M, T।

मुहूर्त्तैकषष्टिभागाभ्यां गम्यते। यदि वा त्र्यशीत्यधिकेनाहोरात्रशतेन षण्मुहूर्त्ता हानौ वा वृद्धौ वा प्राप्यन्ते, तत एकेनाहोरात्रेण किं प्राप्यते ? राशित्रयस्थापना १८३।६।१ अत्रान्त्येन राशिना एकलक्षणेन[१] मध्यराशिर्गुण्यते जातास्त एव षट् तेषां त्र्यशीत्यधिकेन शतेन भागहरणं तत्रोपरितनराशेः स्तोकत्वाद्भागो न लभ्यते। ततश्चेद्यच्छेदकराश्योस्त्रिकेनापवर्त्तना[२]ज्जात उपरितनो राशिः द्विकरूपोऽधस्तन एकषष्टिरूपः। आगतं द्वावेकषष्टिभागौ मुहूर्त्तस्य एकस्मिन्नहोरात्रे वृद्धौ हानौ वा प्राप्येते इति। तथा **'ता'** इति तस्मात् द्वितीयान्मण्डला**न्निष्क्रामन् सूर्यो द्वितीये अहोरात्रे** सर्वाभ्यन्तरं मण्डलमपेक्ष्य **तृतीयं[३] मण्डलमुपसङ्क्रम्य चारं चरति। 'ता जया ण'**मित्यादि। **तत्र यदा** तस्मिन् सर्वाभ्यन्तरं मण्डलमपेक्ष्य **तृतीये मण्डले उपसङ्क्रम्य चारं चरति तदा चतुर्भिर्मुहूर्त्तैकषष्टिभागैर्हीनोऽष्टादशमुहूर्त्तप्रमाणो दिवसो भवति, चतुर्भिर्मुहूर्त्तैकषष्टिभागैरधिका द्वादशमुहूर्त्तप्रमाणा रात्रिः। एवमुक्तनीत्या खलु** निश्चित**मेतेना**नन्तरोदिते**नोपायेन** प्रतिमण्डलं दिवसरात्रिविषयमुहूर्त्तैकषष्टिभागद्वयहानिवृद्धिरूपेण **निष्क्रामन्** मण्डलपरिभ्रमणगत्या शनैः शनैः दक्षिणाभिमुखं गच्छन् **सूर्यः 'तयणंतरा'** इति तस्माद्विवक्षितानन्तरा**न्मण्डलात् 'तयणंतर'**मिति तद् विवक्षितमनन्तरं **मण्डलं सङ्क्रामन् सङ्क्रामन् एकैकस्मिन् मण्डले मुहूर्त्तस्य द्वौ द्वावेकषष्टिभागौ दिवसक्षेत्रस्य निर्वेष्टयन् (२) रात्रिक्षेत्रस्य** प्रतिमण्डलं द्वौ द्वौ मुहूर्त्तस्य एकषष्टिभागा**वभिवर्द्धयन्** (२) त्र्यशीत्यधिकशततमे अहोरात्रे प्रथमषण्मासपर्यवसानभूते **सर्वबाह्यं मण्डलमुपसङ्क्रम्य चारं चरति। 'ता'** इति ततो **यदा** यस्मिन् काले अहोरात्ररूपे **'ण'**मिति प्रागिव **सूर्यः** सर्वाभ्यन्तरान्मण्डलान्मण्डलपरिभ्रमणगत्या शनैः शनैः निष्क्रम्य [सर्वाभ्यन्तरं] **(सर्वबाह्यं) मण्डलमुपसङ्क्रम्य चारं चरति तदा सर्वाभ्यन्तरमण्डलं[४] प्रणिधाय**

---

१. एककलक्षणेन - G, M, T। २. ...पवर्त्तना जात - K। ३. तृतीयमण्डलं - G, T।
४. सर्वाभ्यन्तरं मण्डलं - T।

मर्यादीकृत्य द्वितीयान्मण्डलादारभ्येत्यर्थः, **एकेन त्र्यशीत्यधिकेन रात्रिन्दिवशतेन त्रीणि षट्षष्टानि** षट्षष्ट्यधिकानि **मुहूर्त्तैकषष्टिभागशतानि दिवसक्षेत्रस्य निर्वेष्ट्य** हापयित्वा **रजनिक्षेत्रस्य** तान्येव त्रीणि मुहूर्त्तैकषष्टिभागशतानि षट्षष्ट्यधिकानि **अभिवर्द्ध्य चारं चरति। तदा 'ण'**मिति पूर्ववत्, **उत्तमकाष्ठाप्राप्ता** परमप्रकर्षप्राप्ता **उत्कर्षिका** उत्कृष्टा **अष्टादशमुहूर्त्ता** अष्टादशमुहूर्त्तप्रमाणा **रात्रिर्भवति जघन्यश्च द्वादशमुहूर्त्तप्रमाणो दिवसः**। एषा प्रथमा षण्मासी यदि वा **एतत् प्रथमं षण्मासं** सूत्रे च पुंस्त्वनिर्देश आर्षत्वात्। **एष** त्र्यशीत्यधिकशततमोऽहोरात्रः **प्रथमस्य षण्मासस्य पर्यवसानम्। 'से पविसमाणे'** इत्यादि। **स सूर्यः** सर्वबाह्यान्मण्डलादभ्यन्तरं **प्रविशन् द्वितीयं षण्मासमाददानः** प्रतिपद्यमानो द्वितीयस्य षण्मासस्य **प्रथमे अहोरात्रे** सर्वबाह्यान्मण्लादर्वागनन्तरं द्वितीयं **मण्डलं उपसङ्क्रम्य चारं चरति। 'ता'** इति **तत्र यदा सूर्यो बाह्यात्** सर्वबाह्यान्मण्डलादर्वाक्तनं द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरति तदा द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामूना अष्टादशमुहूर्त्ता रात्रिर्भवति, द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामधिको द्वादशमुहूर्त्तप्रमाणो दिवसः**। ततस्ततोऽपि द्वितीयस्मात् मण्डलादभ्यन्तरं **स सूर्यः प्रविशन्** द्वितीयस्य षण्मासस्य **द्वितीये अहोरात्रे 'बाहिरं[1] तच्चं'**ति सर्वबाह्यान्मण्डलादर्वाक्तनं[2] तृतीयं **मण्डलमुपसङ्क्रम्य चारं चरति। 'ता जया ण'**मित्यादि। **तत्र यदा 'ण'**मिति पूर्ववत् **सूर्यः** सर्वबाह्यान्मण्डलादर्वाक्तनं **तृतीयमण्डलमुपसङ्क्रम्य चारं चरति तदा अष्टादशमुहूर्त्ता रात्रिः चतुर्भिः 'एगट्ठिभागमुहुत्तेहिं'**ति प्राकृतत्वा[द्वाभ्या](द्व्यत्या)सेन पदोपन्यासः, एवं तु यथावस्थितपदनिर्देशो द्रष्टव्यो **मुहूर्त्तैकषष्टिभागैरूना** भवति, **चतुर्भिर्मुहूर्त्तैकषष्टिभागैरधिको द्वादशमुहूर्त्तप्रमाणो दिवसः। 'एवं खलु एएण'**मित्यादि। **एव**मुक्तनीत्या **खल्वेतेनानन्तरोदितेनोपायेन** प्रतिमण्डलं दिवसरात्रिविषयमुहूर्त्तैक-

---

१. बाहिरतच्चं - T। २. .....र्वाक्तनतृतीयमण्डल.. - A, D।

षष्टिभागद्वयवृद्धिहानिरूपेण **प्रविशन्** मण्डलपरिभ्रमणगत्या शनैः शनैरुत्तराभिमुखं गच्छन् '**तयणंतराउ**'त्ति तस्माद्विवक्षितादनन्तरान्**मण्डलात्** '**तयणंतर**'मिति **तद्** विवक्षितम**नन्तरं मण्डलं सङ्क्रामन् (२) एकैकस्मिन् मण्डले मुहूर्त्तस्य द्वौ द्वौ एकषष्टिभागौ रजनिक्षेत्रस्य निर्वेष्टयन् (२) दिवसक्षेत्रस्य** द्वौ द्वौ प्रतिमण्डलं मुहूर्त्तस्यैकषष्टिभागौ **अभिवर्द्धयन्** (२) त्र्यशीत्यधिकशततमे अहोरात्रे द्वितीय-षण्मासपर्यवसानभूते '**सव्वब्भंतरं**'ति **सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य चारं चरति**। '**ता**' इति **तत्र यदा** यस्मिन्काले '**ण**'मिति प्राग्वत् **सूर्यः सर्व-बाह्यान्(मण्डलान्)मण्डल**परिभ्रमणगत्या शनैः शनैरभ्यन्तरं प्रविश्य [१]**सर्वाभ्यन्तर-मण्डलमुपसङ्क्रम्य चारं चरति तदा सर्वबाह्यमण्डलं प्रणिधाय** मर्यादीकृत्य तदर्वाक्तनात् द्वितीयान्मण्डलादारभ्य इत्यर्थः, **एकेन त्र्यशीत्यधिकेन रात्रिन्दिवशतेन त्रीणि षट्षष्ट्यधिकानि मुहूर्त्तस्य एकषष्टिभागशतानि** [२]**रजनिक्षेत्रस्य निर्वेष्ट्य** हापयित्वा **दिवसक्षेत्रस्य** तान्येव त्रीणि षट्षष्टानि मुहूर्त्तैकषष्टिभागशतानि **अभिवर्द्ध्य चारं चरति**। **तदा** '**ण**'मिति वाक्यालङ्कारे **उत्तमकाष्ठाप्राप्तः** परमप्रकर्षप्राप्त **उत्कर्षक** उत्कृष्टोऽष्टादशमुहूर्त्तो **दिवसो भवति जघन्या च द्वादशमुहूर्त्ता रात्रिः**। **एतद्** [३]**द्वितीयं षण्मासम्,** यदि वा एषा द्वितीया षण्मासी, सूत्रे पुंस्त्वनिर्देश आर्षत्वात्। **एष** षट्षष्ट्यधिकत्रिंशत्तमोऽहोरात्रो **द्वितीयस्य षण्मासस्य पर्यवसान**भूतः। **एष** एवम्प्रमाण [४]**आदित्यसंवत्सरः** सूर्यसंवत्सरः। **एष** षट्षष्ट्यधिकत्रिंशत्तमोऽहोरात्र [५]**आदित्यस्य** आदित्यसम्बन्धिनः **संवत्सरस्य पर्यवसानम्।** सम्प्रत्युपसंहारमाह – '**इइ खलु तस्सेव**'मित्यादि। यस्मादेवं **इति** तस्मात् कारणात् **तस्य आदित्यसम्बन्धिनः संवत्सरस्य** मध्ये **एवं** उक्तेन प्रकारेण **सकृदेकवार**म**ष्टादशमुहूर्त्तो दिवसो भवति, सकृच्चाष्टादशमुहूर्त्ता रात्रिः**। तथा

---

१. सव्वब्भंतरं मंडलं - मूले। २. रातिखेत्तस्स - मूले। ३. द्वितीयषण्मासम् - I, C। ४. आदिच्चे संवच्छरे - मूले। ५. आदिच्चसंवच्छरस्स - मूले।

सकृद्द्वादशमुहूर्त्तो दिवसो भवति सकृच्च द्वादशमुहूर्त्ता रात्रिः। तत्र [१]**प्रथमषण्मासे अस्त्यष्टादशमुहूर्त्ता रात्रिः** सा च प्रथमषण्मासपर्यवसानभूते अहोरात्रे, **न त्वष्टादशमुहूर्त्तो दिवसः**। तथाऽस्ति तस्मिन्नेव प्रथमे षण्मासे **द्वादशमुहूर्त्तो दिवसः** सोऽपि प्रथमषण्मासपर्यवसानभूतेऽहोरात्रे **न** तु **द्वादशमुहूर्त्ता रात्रिः**। **द्वितीये षण्मासे अस्त्येतद्** यदुत **अष्टादशमुहूर्त्तो दिवसो भवति,** स च द्वितीयषण्मासपर्यवसानभूते अहोरात्रे, **न त्वष्टादशमुहूर्त्ता रात्रिः**। तथा तस्मिन्नेव द्वितीये षण्मासे (**अस्ति द्वादशमुहूर्त्ता रात्रिः** साऽपि तस्मिन्नेव द्वितीय-षण्मास)पर्यवसानभूतेऽहोरात्रे, **न** पुनरस्त्येतत् यदुत **द्वादशमुहूर्त्तो दिवसो भवति** इति। तथा **प्रथमे वा षण्मासे द्वितीये वा षण्मासे नास्त्येतद्** यदुत **पञ्चदशमुहूर्त्तो दिवसो भवति, नाप्यस्त्येतद्** यदुत **पञ्चदशमुहूर्त्ता रात्रिः**। किं सर्वथा नेत्याह- **नान्यत्र रात्रिन्दिवानां वृद्ध्यपवृद्ध्योरन्यत्र** न भवति, रात्रिन्दिवानां वृद्ध्यपवृद्धौ च भवति पञ्चदशमुहूर्त्ता रात्रिः पञ्चदशमुहूर्त्तो दिवसः। ते च वृद्ध्यपवृद्धी रात्रिन्दिवानां कथं भवत इत्याह – '[२]**मुहुत्ताणं चयोवचएणं**' **मुहूर्त्तानां** पञ्चदशसङ्ख्यानां **चयोपचयेन** चयेनाधिकत्वेन वृद्धिरपचयेन हीनत्वेनापवृद्धिः। इयमत्र भावना - पञ्चदशमुहूर्त्तप्रमाणे[३] दिवसरात्री न भवतो हीनाधिकपञ्चदशमुहूर्त्तप्रमाणे तु[४] दिवसरात्री भवत एव। '**नन्नत्थ वा अणुवायगइ(ए)**'त्ति, **वा**शब्दः प्रकारान्तरसूचने **अन्यत्रानुपातगतेः** पञ्चदशमुहूर्त्तो दिवसो पञ्चदशमुहूर्त्ता रात्रिर्न भवति, अनुसारगत्या तु भवत्येव, सा चानुसारगतिरेवं- यदि त्र्यशीत्यधिकशततमे मण्डले षण्मुहूर्त्ता वृद्धौ हानौ वा प्राप्यन्ते ततोऽर्वागर्द्धगतौ त्रयो मुहूर्त्ताः प्राप्यन्ते। त्र्यशीत्यधिकशतस्य चार्द्धं सार्द्धा [५]एकनवतिः। तत आगतमेकनवतिसङ्ख्येषु मण्डलेषु गतेषु द्विनवति-

---

१. पढमे छम्मासे - मूले। २. मुहुत्ताणं वा चयोवचएणं - मूले। ३. ... प्रमाणे तु - H। ४. तु ते दिवसरात्री - A, B, C, D, E, F, G, I, J, K, L, M। ५. एकनवतिः। आगत... - J।

तमस्य च मण्डलस्यार्द्धे गते पञ्चदशमुहूर्त्ताः प्राप्यन्ते, तत ऊर्ध्वं रात्रिकल्पनायां पञ्चदशमुहूर्त्तो दिवसः पञ्चदशमुहूर्त्ता च रात्रिर्लभ्यते, नान्यथेति। **'गाहाओ भाणियव्वाओ'**त्ति, अत्रानन्तरोक्तार्थसङ्ग्राहिका ग्रन्थान्तरसुप्रसिद्धा गाथा वर्त्तन्ते ता [१]**भणितव्याः** पठनीयाः। ताश्च सम्प्रति क्वापि पुस्तके न दृश्यन्ते इति व्यवच्छिन्नाः सम्भाव्यन्ते। ततो न कथयितुं व्याख्यातुं वा शक्यन्ते, यो वा यथासम्प्रदायादवगच्छति तेन तथा शिष्येभ्यः कथनीया व्याख्यानीयाश्चेति।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्टीकायां प्रथमस्य प्राभृतस्य प्रथमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

देवगुर्वादिसामग्र्यां, यः प्रमादपरायणः।
नीरेण भरितेऽभ्यर्णे, तटाके तृषितः स्थितः॥

पानीयं को निबध्नीयात्, ग्रन्थौ वस्त्रेण कोविदः।
तथा शास्त्रेषु सर्वेषु, सम्पूर्णं जिनभाषितम्॥

यः समुत्पतितं क्रोधं, मानं चापि नियच्छति।
स श्रियो भाजनं पुंसां, यश्चापत्सु न मुह्यति॥

१. भणितव्याः भावनीयाः - T।

द्वितीयं प्राभृतप्राभृतम्

तदेवमुक्तं प्रथमस्य प्राभृतस्य प्रथमं प्राभृतप्राभृतम्। सम्प्रति [१]द्वितीयं प्राभृत-प्राभृतमर्द्धमण्डलसंस्थितिप्रतिपादकं विवक्षुरिदं प्रश्नसूत्रमाह–

मू० ता कहं ते अद्धमंडलसंठिती आहिता ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति क्रमार्थः पूर्ववद्भावनीयः **कथं** केन प्रकारेण भगवन् ! **'ते'** तव मतेन **अर्द्धमण्डलसंस्थिति**रर्द्धमण्डलव्यवस्था **आख्याता इति वदेत्**? पृच्छतः अयमभिप्रायः इह [२]एकैकः सूर्य एकैकेनाहोरात्रेण एकैकस्य मण्डलस्यार्द्धमेव भ्रमणेन पूरयति, ततः संशयः कथमेकैकस्य सूर्यस्य प्रत्यहोरात्रमेकैकार्द्धमण्डलपरिभ्रमणव्यवस्थेति ?

अत्र भगवान्प्रत्युत्तरमाह–

मू० [तत्थ](ता) खलु इमा दुविहा अद्धमंडलसंठिती पन्नत्ता, तं जहा- [३]दाहिणा चेव अद्धमंडलसंठिती उत्तरा चेव अद्ध-मंडलसंठिती।

टी० 'ता खलु' इत्यादि। **'ता'** इति तत्रार्द्धमण्डलव्यवस्थाविचारे **खलु** निश्चित**मिमे द्वे**[४] **अर्द्धमण्डलसंस्थिती** मया **प्रज्ञप्ते। तद्यथा** – एका **दक्षिणा चैव** दक्षिणदिग्भाविसूर्यविषया **अर्द्धमण्डलसंस्थिति**रर्द्धमण्डलव्यवस्था द्वितीया **उत्तरा चैव** उत्तरदिग्भाविसूर्यविषया **अर्द्धमण्डलसंस्थितिः**।

एवमुक्ते सति [सूर्यं] (भूयः) पृच्छति –

मू० ता कहं ते दाहिणा अद्धमंडलसंठिती आहितेति वदेज्जा ?

टी० 'ता कहं ते' इत्यादि। इह द्वे अपि अर्द्धमण्डलसंस्थिती ज्ञातव्ये तत्रेदं **तावत्** पृच्छामि **कथं 'ते' त्वया** [५]भगवन् ! **दक्षिणा** दक्षिणदिग्भाविसूर्यविषया **अर्द्धमण्डलसंस्थितिराख्याता इति वदेत्** ?

---

१. द्वितीयमर्द्धमण्डल.....- E, J, K, N। २. एकैकसूर्य - T। ३. दाहिणा चेव उत्तरा चेव - H। ४. दुविहा - मूले। ५. भगवन् दक्षिणदिग्भावि... - M।

भगवानाह –

मू० ता अयण्णं [१]जंबुद्दीवे दीवे सव्वदीवसमुद्दाणं जाव परिक्खेवेणं। ता जया णं सूरिए [२]सव्वब्भंतरदाहिणअद्धमंडलसंठितिं उवसंकमित्ता चारं चरति तता णं उत्तमकट्ठपत्ते उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ जहण्णिया दुवालसमुहुत्ता राई भवइ। से निक्खममाणे सूरिए नवं संवच्छरं अय[मी](मा)णे पढमंसि अहोरत्तंसि दाहिणाए अंतराए भागाए तस्सादिपदेसाते [३]अब्भिंतराणंतरं उत्तरं अद्धमंडलसंठिइं उवसंकमित्ता चारं चरति। ❖(ता) जया णं सूरिए अब्भंतराणंतरं उत्तरं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरइ❖ तया णं अट्ठारसमुहुत्ते दिवसे भवइ दोहिं एगट्ठिभागमुहुत्तेहिं ऊणे दुवालसमुहुत्ता राई भवति दोहिं एगट्ठिभागमुहुत्तेहिं अहिया। से णिक्खममाणे सूरिए दोच्चंसि अहोरत्तंसि उत्तराए अंतराए भागाए तस्सातेपदेसाते [४]अब्भिंतरं तच्चं दाहिणं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति। ▼ता जया णं सूरिए अब्भिंतरं तच्चं मंडलं उवसंकमित्ता चारं चरइ▼ तया णं अट्ठारसमुहुत्ते दिवसे भवति चउहिं एगट्ठिभागमुहुत्तेहिं ऊणे दुवाल-समुहुत्ता राई भवति चउहिं एगट्ठिभागमुहुत्तेहिं अहिया। एवं खलु एएणं उवाएणं णिक्खममाणे सूरिए तदणंतरातो तदणंतरं तंसि तंसि देसंसि तं तं अद्धमंडलसंठितिं संकममाणे २ दाहिणाए अंतराए भागाए तस्सादिपदेसाए सव्वबाहिरं उत्तरं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति। ता जया णं सूरिए सव्वबाहिरं उत्तरं अद्धमंडलसंठितिं

---

१. जंबुद्दीवे सव्व..... - U। २. सव्वब्भंतरं दाहिण.. - R, U। ३. अब्भंतरा ... - R, U। ❖...❖ चिह्नान्तर्गतपाठः A, H, Q, R प्रतिषु न दृश्यते। ४. अब्भिंतरतच्चं - R। ▼...▼ चिह्नान्तर्गतपाठः A, H, Q प्रतिषु न दृश्यते।

उवसंकमित्ता चारं चरति तता णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता राई भवति जहण्णिए दुवालसमुहुत्ते दिवसे भवति। एस णं पढमे छम्मासे। एस णं पढमस्स छम्मासस्स पज्जवसाणे। से पविसमाणे सूरिए दोच्चं छम्मासं अय[मी](मा)णे पढमंसि अहोरत्तंसि उत्तराए जाव पएसाए बाहिराणंतरं दाहिणं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति। ता जया णं सूरिए[१] बाहिराणंतरं दाहिणं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति तता णं दिवस(राइ)प्पमाणं भाणितव्वं। से पविसमाणे सूरिए दोच्चंसि अहोरत्तंसि दाहिणाए जाव पदेसाए बाहिरं तच्चं उत्तरं अद्धमंडल-संठितिं उवसंकमित्ता चारं चरति। ता जया णं सूरिए बाहिरं[२] तच्चं उत्तरं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति तता णं रातिंदिवसप्पमाणं तं चेव भाणियव्वं। एवं खलु एएणं उवाएणं पविसमाणे सूरिए तयणंतराओ तदणंतरं[३] तंसि तंसि देसंसि तं तं अद्धमंडलसंठितिं संकममाणे उत्तराए जाव पदेसाए सव्वब्भंतरं दाहिणं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति। ता जया णं सूरिए सव्वब्भंतरं दाहिणं अद्धमंडलसंठितिं[४] जाव चारं चरति तता णं उत्तमकट्ठपत्ते[५] उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। एस णं दोच्चे छम्मासे। एस णं दोच्चस्स छम्मासस्स पज्जवसाणे। एस णं आदिच्चे संवच्छरे। एस णं[६] आदिच्चस्स संवच्छरस्स पज्जवसाणे।

---

१. तता णं अट्ठारसमुहुत्ता राती भवति दोहिं एगट्ठिभागमुहुत्तेहिं ऊणा दुवालसमुहुत्ते दिवसे भवति दोहिं एगट्ठिभागमुहुत्तेहिं अहिए। - P। २. तता णं अट्ठारसमुहुत्ता राती भवति चउहिं एगट्ठिभागमुहुत्तेहिं ऊणा दुवालसमुहुत्ते दिवसे भवति चउहिं एगट्ठिभागमुहुत्तेहिं अहिए। - P। ३. तंसि देसंसि - O। ४. ....संठितिं उवसंकमित्ता चारं - U। ५. उक्कोसए जाव दिवसे - U। ६. आदिच्चसंवच्छरस्स - U।

टी० '**ता अयण्ण**'मित्यादि। इदं जम्बूद्वीपवाक्यं प्रागिव [सूर्य] (स्वयं) परिपूर्णं परिभावनीयम्। '**ता जया ण**'मित्यादि। '**ता**' इति **तत्र यदा** '**ण**'मिति वाक्यालङ्कारे [१]**सूर्यः** [२]**सर्वाभ्यन्तरां** सर्वाभ्यन्तरमण्डलगतां **दक्षिणामर्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति तदा** '**ण**'मिति पूर्ववत् **उत्तमकाष्ठाप्राप्तः** परमप्रकर्षप्राप्त **उत्कर्षक** उत्कृष्टोऽष्टादशमुहूर्त्तो **दिवसो भवति जघन्या च द्वादशमुहूर्त्ता रात्रिः**। इह सर्वाभ्यन्तरे मण्डले प्रविष्टः सन् (सूर्यः) प्रथमक्षणादूर्ध्वं शनैः शनैः सर्वाभ्यन्तरानन्तरद्वितीयमण्डलाभिमुखं तथाकथञ्चनापि मण्डलगत्या परिभ्रमति येनाहोरात्रपर्यन्ते सर्वाभ्यन्तरमण्डलगतान् अष्टाचत्वारिंशदेकषष्टिभागान् अपरे च द्वे योजने अतिक्रम्य सर्वाभ्यन्तरानन्तरद्वितीयार्द्धमण्डलसीमायां वर्त्तते। तथा चाह- '**से निक्खममाणे**' इत्यादि। **स सूर्यः** सर्वाभ्यन्तरगतात् दक्षिणस्मादर्द्धमण्डलात् प्रथमक्षणादूर्ध्वं शनैःर **निष्क्रामन्** अहोरात्रेऽतिक्रान्ते सति **नवं** [३]अभिनवं **संवत्सरमाददानो** नवस्य संवत्सरस्य **प्रथमेऽहोरात्रे दक्षिणदिग्भाविनो अन्तरात्** सर्वाभ्यन्तरमण्डलगताष्टचत्वारिंशद्योजनैकषष्टिभागाभ्यधिकयोजनद्वयप्रमाणापान्तरालरूपाद्(**भागाद्**)विनिर्गत्य '**तस्साइपएसाए**' इति तस्य सर्वाभ्यन्तरानन्तरस्योत्तरार्द्धमण्डलस्यादिप्रदेशमाश्रित्या**भ्यन्तरानन्तरां** सर्वाभ्यन्तरमण्डलानन्तरा**मुत्तरामर्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति**। स चादिप्रदेशादूर्ध्वं शनैः शनैरपरमण्डलाभिमुखमत्रापि तथा कथञ्चनापि चरति येन तस्याहोरात्रस्य पर्यन्ते तदपि मण्डलमन्ये च द्वे योजने परित्यज्य दक्षिणदिग्भाविनः तृतीयस्यार्द्धमण्डलस्य सीमायां भवति। '**ता जया ण**'मित्यादि। **ततो यदा सूर्यः** सर्वाभ्यन्तरानन्तरां द्वितीया**मुत्तरार्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति तदा दिवसोऽष्टादशमुहूर्त्तो द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामूनो भवति, जघन्या च द्वादशमुहूर्त्तप्रमाणा रात्रिः द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामभ्यधिका**। ततस्तस्या अपि

१. सूर्यः सर्वाभ्यन्तरमण्डलगतां - U। २. सव्वब्भंतरदाहिणअद्धमंडलसंठितिं - मूले। ३. अभिनवसंवत्सर - T।

द्वितीयस्या उत्तरार्द्धमण्डलसंस्थितेरुक्तप्रकारेण **स सूर्यो निष्क्राम[ति](न्)** अभिनवस्य सूर्यसंवत्सरस्य **द्वितीये अहोरात्रे उत्तरस्मादुत्तरदिग्भाविनोऽन्तराद्भागाद्** द्वितीयोत्तरार्द्धमण्डलगताष्टाचत्वारिंशद्योजनैकषष्टिभागाभ्यधिकयोजनद्वयप्रमाणरूपान्तरालरूपाद्विनिर्गत्य **'तस्साएपएसाए'** इति तस्य दक्षिणदिग्भाविनस्तृतीयस्यार्द्धमण्डलस्यादिप्रदेशमाश्रित्य **'अब्भंतरं तच्चं'** ति सर्वाभ्यन्तरमण्डलमपेक्ष्य तृतीयां **दक्षिणार्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति**। अत्रापि चारं चरति आदि[त्य]प्रदेशादूर्द्ध्वं शनैः शनैरपरमण्डलाभिमुखं, तेन तस्याहोरात्रस्य पर्यन्ते तन्मण्डलगतान् अष्टचत्वारिंशद्योजनैकषष्टिभागान् अपरे च द्वे योजनेऽपहाय चतुर्थस्योत्तरस्यार्द्धमण्डलस्य सीमायामवतिष्ठते। **'ता जया ण'** मित्यादि। **ततो यदा 'ण'**मिति पूर्ववत् **(सूर्यः)** सर्वाभ्यन्तरान्मण्डलात्**तृतीयां दक्षिणामर्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति तदा अष्टादशमुहूर्त्तो दिवसो भवति चतुर्भिर्मुहूर्त्तैकषष्टिभागैरूनो द्वादशमुहूर्त्ता रात्रिश्चतुर्भिर्मुहूर्त्तैकषष्टिभागैरभ्यधिका। 'एवं खलु'** इत्यादि। **एवमुक्तनीत्या खलु** निश्चित**मेतेनोपायेन** प्रत्यहोरात्रमष्टाचत्वारिंशद्योजनैकषष्टिभागाभ्यधिकयोजनद्वयविकम्पनरूपेण **निष्क्रामन् सूर्यस्तदनन्तरा**दर्द्धमण्डलादनन्तरं **तस्मिन् २ देशे** दक्षिणपूर्वभागे उत्तरपश्चिमभागे वा **तां तामर्द्धमण्डलसंस्थितिं सङ्क्रामन्** (२) द्व्यशीत्यधिकशततमाहोरात्रपर्यन्ते गते **दक्षिणस्मात्** दक्षिणदिग्भाविनोऽन्तरात् द्व्यशीत्यधिकशततममण्डलगताष्टाचत्वारिंशद्योजनैकषष्टिभागाभ्यधिकात्तदनन्तरयोजनद्वयप्रमाणादपान्तरालरूपाद्**भागात्** **'तस्साइपएसाए'** इति तस्य सर्वबाह्यमण्डलगतस्योत्तरस्यादिप्रदेशमाश्रित्य **सर्वबाह्यामुत्तरार्द्धमण्डलसंस्थितिमुप(सङ्)क्रम्य चारं चरति**। स चादिप्रदेशादूर्द्ध्वं शनैः शनैः सर्वबाह्यानन्तराभ्यन्तरदक्षिणार्द्धमण्डलाभिमुखं तथा कथञ्चनाऽपि चरति

---

१. तृतीयस्यादिप्रदेश... - T। २. अब्भिंतरं - मूले। ३. द्वयकम्पन... - T। ४. ...नन्तरार्द्धमण्डलात्तदनन्तरं - T। ५. .... नन्तरं योजन... - T।

येन तस्याहोरात्रस्य पयन्ते[१] सर्वबाह्यानन्तराभ्यन्तरदक्षिणार्द्धमण्डलसीमायां भवति। **'ता जया ण'**मित्यादि। **तत्र यदा 'ण'**मिति पूर्ववत् **सूर्यः सर्वबाह्यामुत्तरामर्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्ता उत्कर्षिका** उत्कृष्टाऽष्टादशमुहूर्त्ता **रात्रिर्भवति जघन्यश्च द्वादशमुहूर्त्तो दिवसः**। **'एस ण'**मित्यादि प्राग्वद्भावनीयम्। **'से पविसमाणे'** इत्यादि। **स सूर्यः** सर्वबाह्योत्तरार्द्धमण्डलादिप्रदेशादूर्द्ध्वं शनैः शनैः सर्वबाह्यानन्तरद्वितीयदक्षिणार्द्धमण्डलाभिमुखं सङ्क्रामन् तस्मिन्नहोरात्रेऽतिक्रान्ते सति अभ्यन्तरं **प्रविशन् द्वितीयं षण्मासमाददानो** द्वितीयस्य षण्मासस्य **प्रथमे अहोरात्रे उत्तरस्मादुत्तरदिग्भाविसर्वबाह्यमण्डलगतादन्तरात्सर्वबाह्योत्तरार्द्धमण्डलगताष्टाचत्वारिंशद्योजनैकषष्टिभागाभ्यधिकाद(न)न्तरार्वाग्भावियोजनद्वयप्रमाणादपान्तरालरूपाद्भागात्, 'तस्साएपएसाए'** इति तस्य दक्षिणदिग्भाविनः सर्वबाह्यानन्तरस्य दक्षिणस्यार्द्धमण्डलस्यादिप्रदेशमाश्रित्य **बाह्यस्य** मण्डलस्यानन्तरा**मभ्यन्तरां दक्षिणामर्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति**। अत्रापि चारादिप्रदेशादूर्द्ध्वं तथाकथञ्चनाप्यभ्यन्ताराभिमुखो वर्त्तते येनाहोरात्रपर्यन्ते सर्वबाह्यान्मण्डलादभ्यन्तरस्य तृतीय(स्योत्तर)स्यार्द्धमण्डलस्य सीमायां भवति। **'ता जया ण'**मित्यादि। **ततो यदा सूर्यो बाह्यादनन्तरां दक्षिणामर्द्धमण्डलसंस्थितिमुप[२](सङ्)क्रान्तः चारं चरति तदा 'ण'**मिति पूर्ववत् **'दिवसराइ[३]प्पमाणं [४]भाणियव्वं'**ति दिवसरात्रिप्रमाणं पूर्ववद्भणितव्यम्। तच्चैवं- **'अट्ठारसमुहुत्ता राई भवति दोहिं एगट्ठिभागमुहुत्तेहिं ऊणा दुवालसमुहुत्ते दिवसे भवइ दोहिं एगट्ठिभागमुहुत्तेहिं अहिए'** इति। **'से पविसमाणे'** इत्यादि। ततस्तस्मिन्नहोरात्रेऽतिक्रान्ते सति **स सूर्योऽभ्यन्तरं प्रविशन्** द्वितीयस्य षण्मासस्य **द्वितीयेऽहोरात्रे दक्षिणस्माद्**भागाद्दक्षिणदिग्भाविनोऽन्तराद्दक्षिणदिग्भाविसर्व-

---

१. सर्वबाह्यानन्तरदक्षिणा... - T। २. उवसंकमित्ता - मूले। ३. ...राय... - H। ४. भणियव्वं ति - T।

बाह्यानन्तरद्वितीयमण्डलगताष्टाचत्वारिंशद्योजनैकषष्टिभागाभ्यधिकानन्तरार्वाग्भावि-योजनद्वयप्रमाणादपान्तरालरूपाद् **भागाद्** विनिःसृत्य **'तस्साइपएसाए'** इति तस्य सर्वबाह्याभ्यन्तरस्य तृतीयस्योत्तरस्यार्द्धमण्डलस्यादिप्रदेशमाश्रित्य **बाह्यतृतीयां**[१] सर्वबाह्याया अर्द्धमण्डलसंस्थि[तिं](तेः) तृतीयाम **र्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति**। अत्रापि चारादिप्रदेशादारभ्य शनैः शनैरपराभ्यन्तरार्द्धमण्डलाभिमुखं तथाकथञ्चनापि प्रवर्त्तमानो द्रष्टव्यो येन तदहोरात्रपर्यन्ते सर्वबाह्यादर्द्धमण्डलादर्वाक्तनस्याभ्यन्तरस्य चतुर्थस्य दक्षिणस्यार्द्धमण्डलस्य सीमायां वर्त्तते। **'ता जया ण'**मित्यादि। **तत्र यदा सूर्यः** सर्वबाह्यादर्द्धमण्डलादर्वाक्तनीं **तृतीया(मुत्तरा)मर्द्ध-मण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति तदा 'ण'**मिति पूर्ववत् **'राइंदिव-सप्पमाणं तं चेव भाणियव्वं'** ति **रात्रिदिवसप्रमाणं तदेव** प्रागुक्तं **भणितव्यम्**। तच्चैवं - **'अट्ठारसमुहुत्ता राई भवइ चउहिं एगट्ठिभागमुहुत्तेहिं ऊणा दुवालसमुहुत्ते दिवसे हवइ**[२] **चउहिं एगट्ठिभागमुहुत्तेहिं अहिए'** इति। **'एवं खलु'** इत्यादि। **एव**मुक्तेन प्रकारेण **खलु** निश्चित**मेतेनोपायेन** प्रत्यहो-रात्रमभ्यन्तरमष्टा[३]चत्वारिंशद्योजनैकषष्टिभागयोजनद्वयविकम्परूपेण शनैः२ रभ्यन्तरं **प्रविशन् सूर्यस्तदनन्तरादर्द्धमण्डलात्तदनन्तरं**[४] **तस्मिन् २ (देशे)** दक्षिणपूर्वभागे वा (उत्तरापरभागे वा) **तां तामर्द्धमण्डलसंस्थितिं सङ्क्रामन्** द्वितीयस्य षण्मासस्य द्व्यशीत्यधिकशततमाहोरात्रपर्यन्ते गते **उत्तरस्मात्** उत्तरदिग्भाविनोऽन्तरात् सर्वबाह्य-मण्डलमपेक्ष्य यत् त्र्यशीत्यधिकशततमं मण्डलं तद्गताष्टाचत्वारिंशद्योजनैकषष्टि-भागाभ्यधिकतदनन्तराभ्यन्तरयोजनद्वयप्रमाणादपान्तरालरूपात् **भागात्** **'तस्साइ-पएसाए'** इति तस्य सर्वाभ्यन्तरमण्डलगतस्यार्द्धमण्डलस्य दक्षिणस्यादिप्रदेशमाश्रित्य **सर्वाभ्यन्तरां दक्षिणामर्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति**। स चादि-

---

१. बाहिरं तच्चं - मूले। २. भवइ - D। ३. ... मष्टचत्वा... - T। ४. ....नन्तरे - T, ... नन्तरां - S।

प्रदेशादूर्द्ध्वं शनैः२ सर्वाभ्यन्त(रानन्त)रमण्डलाभिमुखं तथा कथञ्चनापि चारं [१]प्रतिपद्यते येन तस्याहोरात्रस्य पर्यन्ते सर्वाभ्यन्तरानन्तरस्योत्तरस्यार्द्धमण्डलस्य सीमायां भवतीति। **'ता जया ण'**मित्यादि। **तत्र यदा सूर्यः सर्वाभ्यन्तरां दक्षिणार्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्तो उत्कर्षक उत्कृष्टोऽष्टादशमुहूर्त्तप्रमाणो दिवसो भवति** सर्व**जघन्या** च **द्वादशमुहूर्त्ता रात्रिः**। **'एस ण'**मित्यादि निगमनवाक्यं प्राग्वत्। तदेवमुक्ता दक्षिणार्द्धमण्डलसंस्थितिः।

साम्प्रतमुत्तरामर्द्धमण्डलसंस्थितिं जिज्ञासुः प्रश्नयति—

मू० ता कहं ते उत्तरा अद्धमंडलसंठिती आहिया ति वदेज्जा? ता जदा णं सूरिए सव्वब्भंतरं उत्तरं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति तता णं उत्तमकट्ठपत्ते उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। से णिक्खममाणे सूरिए णवं संवच्छरं अय[मी](मा)णे पढमंसि अहोरत्तंसि उत्तराए जाव पएसाए [२]अब्भिंतराणंतरं दाहिणं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति। ता जया णं सूरिए [३]अब्भिंतराणंतरं दाहिणं जाव चारं चरति तया णं अट्ठारसमुहुत्ते दिवसे भवति दोहिं एगट्ठिभागमुहुत्तेहिं ऊणे दुवालसमुहुत्ता राती भवति दोहिं एगट्ठिभागमुहुत्तेहिं अहिया। से णिक्खममाणे सूरिए दोच्चंसि अहोरत्तंसि दाहिणाए जाव पदेसाए [४]अब्भिंतरं तच्चं उत्तरं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति। ता जया णं सूरिए अब्भिंतरं तच्चं उत्तरं जाव चारं चरति तया णं दिवसराईप्पमाणं तं चेव भाणियव्वं। एवं खलु एएणं उवाएणं णिक्खममाणे सूरिए ततणंतराओ तदणंतरं तंसि तंसि देसंसि तं तं

१. प्रपद्यते - T। २. अब्भंतराणंतरं - U। ३. अब्भंतराणंतरं - U। ४. अब्भंतरं - U।

अद्धमंडलसंठितिं जाव चारं चरति। ता जया णं सूरिए सव्वबाहिरं दाहिणं अद्धमंडल जाव चारं चरति तदा णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता राई भवति जहण्णए दुवालसमुहुत्ते[१] दिवसे भवइ। एस णं पढमे छम्मासे। एस णं पढमस्स छम्मासस्स पज्जवसाणे। से पविसमाणे सूरिए दोच्चं छम्मासं अय[मी](मा)णे पढमंसि अहोरत्तंसि दाहिणाए जाव पदेसाए बाहिराणंतरं उत्तरं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति। ता जदा णं सूरिए बाहिराणंतरं उत्तरं अद्धमंडल जाव चारं चरति तता णं अट्ठारसमुहुत्ता राती भवति दोहिं एगट्ठिभागमुहुत्तेहिं ऊणा दुवालसमुहुत्ते दिवसे भवति दोहिं एगट्ठिभागमुहुत्तेहिं अहिए। से पविसमाणे सूरिए दोच्चंसि अहोरत्तंसि उत्तराए जाव पदेसाए बाहिरं तच्चं दाहिणं अद्धमंडलसंठितिं उव जाव चारं चरति। ता जया णं सूरिए बाहिरं तच्चं दाहिणं जाव चारं चरति तता णं अट्ठारसमुहुत्ता राती भवति चउहिं एगट्ठिभागमुहुत्तेहिं ऊणा दुवालसमुहुत्ते दिवसे भवति चउहिं एगट्ठिभागमुहुत्तेहिं अहिए। एवं खलु एएणं उवाएणं पविसमाणे सूरिए ततणंतराओ ततणंतरं तंसि तंसि देसंसि तं तं अद्धमंडलसंठितिं संकममाणे २ दाहिणाए जाव पएसाए सव्वब्भंतरं उत्तरं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति। ता (जया) णं सूरिए सव्वब्भंन्तरं उत्तरं अद्धमंडलसंठितिं जाव चारं चरति तदा णं उत्तमकट्ठपत्ते[२] उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। एस णं दोच्चे छम्मासे। एस णं दुच्चस्स छम्मासस्स पज्जवसाणे। एस णं

१. जाव - H। २. ...पत्तए - H।

आतिच्चसंवच्छरे[१]। एस णं आतिच्चस्स संवच्छरस्स पज्जवसाणे[२]। गाहाओ।

बिइयं पाहुडपाहुडं सम्मत्तं।

टी० 'ता कहं ते' इत्यादि। एतत् प्राग्वद् व्याख्येयम्। **'ता जया ण'**मित्यादि। **'ता'** इति **तत्र यदा सूर्यः सर्वाभ्यन्तरामुत्तरामर्द्धमण्डलसंस्थितिमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्त उत्कर्षकोऽष्टादशमुहूर्त्तो दिवसो भवति जघन्या च द्वादशमुहुर्त्ता रात्रिः**। एवं सकलमपि सूत्रं उत्तरार्द्धमण्डलसंस्थिति-प्रतिपादकं प्रागुक्तसूत्रव्याख्यानुसारतः स्वयं परिभवनीयम्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य द्वितीयं प्राभृतप्राभृतं समाप्तम्।

* * * * *

जिनधर्मफलाकाङ्क्षा, पूर्यते नान्यशासनैः।
सहकारफलाकाङ्क्षा, सा यथा नाम्लिकाफलैः॥

जैनं मतं परित्यज्य, गृहीतं परशासनम्।
अन्धकारं कृतं तेन, निमील्य नयने निजे॥

द्वे कार्ये कुलीन इह, प्राणान्तेऽपि करोति न।
परद्रव्यापहारं च, परस्त्रीपरिरम्भणम्॥

---

१. आतिच्चे संवच्छरे - P, V। २. पज्जवसाणे। बिइयं - U, पज्जवसाणे। - V।

तृतीयं प्राभृतप्राभृतम्

तदेवमुक्तं द्वितीयं प्राभृतप्राभृतम्। सम्प्रति तृतीयमारभ्यते। तत्रार्थाधिकारश्चीर्ण-प्रतिचरणमतस्तद्विषयं प्रश्नसूत्रमाह-

मू० ता के ते चिण्णं पडिचरति आहितेति वदेज्जा?

टी० 'ता के ते' इत्यादि। (**'ता'**) इति पूर्ववत्। **कस्ते** त्वया भगवन् सूर्यः स्वयं परेण वा **चीर्णं** क्षेत्रं **प्रतिचरति** प्रतिचरन् **आख्यात इति वदेत्** ?

एवं भगवता गौतमेनोक्ते भगवान् वर्द्धमानस्वामी आह–

मू० तत्थ खलु इमे दुवे सूरिया पण्णत्ता। तं जहा - भारहए चेव सूरिए एरवए चेव सूरिए। ता एए णं दुवे सूरिया तीसाए तीसाए मुहत्तेहिं एगमेगं अद्धमंडलं चरंति, सट्ठीए सट्ठीए मुहुत्तेहिं एगमेगं मंडलं संघाडेंति। ता णिक्खममाणा एए खलु सूरिया णो अण्णमण्णस्स चिण्णं पडिचरंति, पविसमाणे खलु एए[1] चेव दुवे सूरिया अण्णमण्णस्स चिण्णं पडिचरंति। तं जहा सयमेगं चोयालं।

टी० 'तत्थ' इत्यादि। **तत्रास्मिञ्जम्बूद्वीपे** परस्परं चीर्णक्षेत्रप्रतिचरणचिन्तायां **खलु** निश्चितं यथावस्थितश्च[2] वस्तुतत्त्वमधिकृत्य **इमौ द्वौ सूर्यौ प्रज्ञप्तौ। तद्यथा – भारतश्चैव सूर्यः ऐरावतश्चैव सूर्यः**। **'ता एए ण'**मित्यादि। **तत एतौ 'ण'**मिति वाक्यालङ्कारे **द्वौ सूर्यौ** प्रत्येकं **त्रिंशता (त्रिंशता) मुहूर्त्तैरेकैकमर्द्धमण्डलं चरतः, षष्ट्या षष्ट्या मुहूर्त्तैः** पुनः प्रत्येक**मेकैकं** परिपूर्णं **मण्डलं सङ्घातयतः** पूरयतः। **'ता णिक्खममाणा'** इत्यादि। **'ता'** इति **तत्र** सूर्यसत्कैकसंवत्सरमध्ये **इमौ** द्वावपि **खलु सूर्यौ** सर्वाभ्यन्तरान्मण्डला**न्निष्क्रामन्तौ नो अन्योऽन्यस्य** परस्परेण **चीर्णं** क्षेत्रं **प्रतिचरतः**। नैकोप्यपरेण चीर्णं क्षेत्रं प्रतिचरति नाप्यपरोऽपरेण चीर्णमिति भावः। सर्वबाह्यान्मण्डलादभ्यन्तरं **प्रविशन्तौ** द्वावपि **खलु सूर्यावन्योन्यस्य**

---

१. एए चेव सूरिए ताए णं दुवे सूरिया - H। २. ....स्थितं वस्तु... - C।

परस्परेण **चीर्ण्णं प्रतिचरतस्तद्यथा शतमेकं चतुश्चत्वारिंशम्**। किमुक्तं भवति ? यैश्चतुर्विंशत्यधिकशतसङ्ख्यैर्भागैर्मण्डलं पूर्यते तेषां चतुश्चत्वारिंशदधिकं शतं उभयसूर्यसमुदायचिन्तायां परस्परेण प्रतिचीर्ण्णं प्रतिमण्डलमवाप्यते इति।

एतदवगमार्थं प्रश्नसूत्रमाह –

मू० तत्थ णं के हेतू त्ति वदेज्जा ?

टी० 'तत्थ णं के हेऊ त्ति वइज्जा' इति। **तत्र** एवंविधाया वस्तुतत्त्वव्यवस्थाया अवग[म](मे) **को हेतुः** का उपपत्तिः **इति** अत्रार्थे भगवान् **वदेत्** ?

अत्र भगवानाह –

मू० ता अयण्णं [1]जंबुद्दीवे दीवे जाव परिक्खेवेणं। तत्थ णं अयं भारहए सूरिए जंबुद्दीवस्स दीवस्स पाईणपडिणायतउदीण-दाहिणमाययाए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता दाहिण-पुरच्छिमंसि चउभागमंडलंसि बाणउतिं सूरियमताइं (जाइं) सूरिए अप्प[णो](णा) चिण्णाइं पडिचरति, उत्तरपच्चत्थिमेल्लंसि चउभाग-मंडलंसि एकाणउतिं सूरिय[मा](म)ताइं जाइं सूरिए अप्पणा चेव चिण्णाइं पडिचरति। तत्थ णं अयं भारहए सूरिए एरावयगस्स सूरियस्स जंबुद्दीवस्स दीवस्स पातीणपडिणायतउदीणदाहिणमाययाए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता उत्तरपुरच्छिमंसि चउभाग-मंडलंसि बाणउतिं सूरिय[मा](म)यातिं जाइं सूरिए परस्स चिण्णाइं पडिचरति, दाहिणपच्चत्थिमेल्लंसि चउब्भागमंडलंसि एक्काणउइं सूरियमताइं जाइं सूरिए परस्स चेव चिण्णाइं पडिचरति। तत्थ णं अयं एरावए सूरिए जंबुद्दीवस्स दीवस्स पाईणपडिणायत-उदीणदाहिणमाययाए जीवाए मंडलं चउव्वीसेणं सएणं छेत्ता

१. जंबुद्दीवे जाव - U।

उत्तर[पुर](पच्च)च्छिमेल्लंसि[१] चउभागमंडलंसि बाणउतिं सूरियमयाइं जाइं सूरिए अप्पणा चेव चिण्णाइं पडिचरति दाहिणपुरच्छिमिल्लंसि चउभागमंडलंसि एक्काणउइं (सूरियमताइं) जाइं सूरिए अप्पणा चेव चिण्णाइं पडिचरति। तत्थ णं एरावतए सूरिए भारहयस्स सूरियस्स जंबुद्दीवस्स पाईणपडिणायय जाव मंडलं चउव्वीसेणं सतेणं छेत्ता दाहिणपच्चच्छिमंसि चउभागमंडलंसि बाणउतिं सूरियमयाइं जाइं सूरिए परस्स चिण्णाइं पडिचरति उत्तरपुरच्छिमेल्लंसि चउभागमंडलंसि एक्काणउतिं सूरियमताइं (जाइं) सूरिए परस्स (चेव) चिण्णाइं पडिचरति। ता णिक्खममाणा खलु एते दुवे सूरिया णो अण्ण-मण्णस्स चिण्णं पडिचरंति, पविसमाणा खलु एते दुवे सूरिया अण्णमण्णस्स चिण्णं पडिचरंति सयमेगं चोयालं। (गाहाउ)।

तइयं पाहुडपाहुडं।

टी० '**ता अयं ण**'मित्यादि। इदं जम्बूद्वीपस्वरूपप्रतिपादकं वाक्यं प्राग्वत् [सूर्य] (स्वयं) परिपूर्णं भावनीयम्। '**तत्थ ण**'मित्यादि। **तत्र** जम्बूद्वीपे '**ण**'मिति प्राग्वत् '**अयं भारहे[२] चेव सूरिए**' इति। सर्वबाह्यस्य मण्डलस्य दक्षिणस्मिन्नर्द्धमण्डले यश्चारं चरितुमारभते स भरतक्षेत्रप्रकाशकत्वाद्भारत(: यस्त्वितर)स्तस्यैव सर्वबाह्यस्य मण्डलस्योत्तरस्मिन्नर्द्धमण्डले चारं चरति स ऐरवतक्षेत्रप्रकाशकत्वादैरावतः। तत्रायं प्रत्यक्षत उपलभ्यमानो जम्बूद्वीपस्य सम्बन्धी भारतः सूर्यो यस्मिन्२ मण्डले परिभ्रमति तत् तन्[३]**मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा** विभज्य चतुर्विंशत्यधिकशत-सङ्ख्यान् भागान् तस्य तस्य मण्डलस्य परिकल्प्येत्यर्थः, भूयश्च **प्राचीना-पाचीनायतया** पूर्वापरायतया **उदीच्यदक्षिणायतया** उदग्दक्षिणायतया **जीवया**

---

१. ...च्छिमेणंसि - R, Q, ... च्छिमंसि - U। २. भारहए सूरिए - मूले। ३. जंबुद्दीवस्स दीवस्स पाईणपडिणायतउदीणदाहिणमाययाए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता - मूले।

प्रत्यश्चया दवरिकया इत्यर्थः, तत्तन्मण्डलं चतुर्भिर्भागैर्विभज्य[१] **दक्षिणपौरस्त्ये** दक्षिणपूर्वे आग्नेयकोणे इत्यर्थः '**चउभागमंडलंसि**' त्ति प्राकृतत्वात् पदव्यत्ययो **मण्डलचतुर्भागे** तस्य तस्य मण्डलस्य चतुर्थे भागे सूर्यसंवत्सरसत्कद्वितीय-षण्मासमध्ये **द्विनवतिं**[२] **सूर्यमतानि** द्वानवतिसङ्ख्यानि मण्डलानि स्वयं सूर्येण मतानि चीर्णानि किमुक्तं भवति ? पूर्वं सर्वाभ्यन्तरान्मण्डलान्निष्क्रामता स्वयं चीर्णानि प्रतिचरतीति गम्यते। एतदेव व्याचष्टे '**जाइं सूरिए अप्पणा चिण्णाइं पडिचरति**' इति **यानि सूर्यः आत्मना** स्वयं पूर्वं सर्वाभ्यन्तरान्मण्डलान्निष्क्रमणकाले इति शेषः **चीर्णानि प्रतिचरति** तानि च द्वानवतिसङ्ख्यानि मण्डलानि चतुर्भागमात्ररूपाणि चीर्णानि प्रतिचरति[३] न तु परिपूर्णचतुर्भागमण्डलमात्राणि, किन्तु स्वस्वमण्डलगत-चतुर्विंशत्यधिकशतसत्काष्टादशभागप्रमितानि, ते चाष्टादशभागा न सर्वेष्वपि मण्डलेषु प्रतिनियते एव देशे किन्तु क्वापि मण्डले कुत्रापि, केवलं दक्षिणपौरस्त्यरूप-चतुर्भागमध्ये ततो '**दाहिणपुरच्छिमंसि**[४] **चउभागमंडलंसी**'त्युक्तम्। एवमुत्तरेष्वपि मण्डलचतुर्भागेष्वष्टादशभागप्रमितत्वं भावनीयम्। स एव भारतः सूर्यस्तेषामेव द्वितीयानां षण्मासानां मध्ये **उत्तरपश्चिमे चतुर्भागे**[५] **मण्डले** मण्डलचतुर्भागे **एकनवति**सङ्ख्यानि मण्डलानि स्वस्वमण्डलगतचतुर्विंशत्यधिकशतसत्काष्टादश-भागप्रमितानि **सूर्यमतानि** स्वयं सूर्येण पूर्वं सर्वाभ्यन्तरान्मण्डलान्निष्क्रमणकाले चीर्णानि प्रतिचरतीति गम्यते। एतदेव व्याचष्टे '**जाइं सूरिए अप्पणा चेव चिण्णाइं पडिचरइ।**' एतत् पूर्ववद् व्याख्येयम्। इह सर्वबाह्यमण्डलात्[६] शेषाणि मण्डलानि त्र्यशीत्यधिकशतसङ्ख्यानि तानि न द्वाभ्यामपि सूर्याभ्यां द्वितीयषण्मासमध्ये प्रत्येकं परिभ्रम्यन्ते सर्वेष्वपि च दिग्भागेषु प्रत्येकं (एकं) मण्डलमेकेन सूर्येण परिभ्रम्यते द्वितीयमपरेण। एवं यावत्सर्वान्तिमण्डलम्। तत्र दक्षिणपूर्वे दिग्भागे द्वितीयषण्मासमध्ये

---

१. विभज्य दक्षिणपूर्वे - C। २. द्विनवतं - C, K। ३. न परिपूर्णचतुर्भागमात्राणि - K। ४. ...पुरत्थि... - T। ५. चउभागमंडलंसि - मूले। ६. सर्वबाह्यात् मण्डलात् - E, T।

भारतः सूर्यो द्विनवतिमण्डलानि [१]परिभ्रमति एकनवतिमण्डलान्यैरावतः, उत्तरपश्चिमे दिग्विभागे द्विनवतिमण्डलान्यैरावतः परिभ्रमति, एकनवतिमण्डलानि भारतः। एतच्च पट्टिकादौ मण्डलस्थापनां कृत्वा परिभावनीयम्। तत उक्तं दक्षिणपूर्वे द्विनवति-सङ्ख्यानि उत्तरपश्चिमे त्वेकनवतिसङ्ख्यानि भारतः स्वयं चीर्णानि प्रतिचरतीति। तदेवं भारतसूर्यस्य स्वयं चीर्णप्रतिचरणपरिमाणमुक्तम्। इदानीं तस्यैव भारतसूर्यस्य परचीर्णप्रतिचरणपरिमाणमाह- **'तत्थ णं अयं भारहए'** इत्यादि। **तत्र** जम्बूद्वीपे **अयं** प्रत्यक्षत उपलभ्यमानो जम्बूद्वीपस्य सम्बन्धी **भारतः सूर्यो** यस्मिन् मण्डले परिभ्रमति तन्म[२]**ण्डलं चतुर्विंशत्यधिकेन भागशतेन छित्त्वा** भूयश्च **प्राचीना-पाचीनायतया उदीच्यदक्षिणायतया** च **जीवया** दवरिकया तत्तन्मण्डलं चतुर्भिर्भागैर्विभज्य **उत्तरपूर्वे** ईशानकोणे इत्यर्थः **चतुर्भागमण्डले** तस्य तस्य मण्डलस्य चतुर्थे भागे तेषामेव द्वितीयानां (षण्मासानां) मध्ये **ऐरावतस्य-(सूर्यस्य)** [३]**द्विनवतिसूर्यमतानि** द्विनवतिसङ्ख्यानि ऐरावतेन सूर्येण पूर्वं निष्क्रमण-काले चीर्णानि प्रतिचरति। एतदेव च व्यक्तिकरोति **'जाइं सूरिए परस्स चिण्णाइं पडिचरइ' यानि सूर्यो** भारतः **'परस्स चिण्णाइं'** इत्यत्र षष्ठी तृतीयार्थे **परेण** ऐरावतेन सूर्येण पूर्वं निष्क्रमणकाले **चीर्णानि प्रतिचरति।** [४]**दक्षिणपश्चिमे** च **चतुर्भागमण्डले** चतुर्भागमात्रे मण्डले **एकनवतिमे**कनवतिसङ्ख्यानि ऐरावतस्य सूर्यस्येत्यत्रापि सम्बध्यते। ततोऽयमर्थः — [५]ऐरावतस्य सूर्यस्य सम्बन्धीनि **सूर्यमतानि** किमुक्तं भवति ? ऐरावतेन सूर्येण पूर्वं निष्क्रमणकाले मतीकृतानि प्रतिचरति। एतदेवाह **'जाइं सूरिए [६]परस्स चिण्णाइं पडियरइ।'** एतत्पूर्ववद् व्याख्येयम्। अत्राप्येकस्मिन्विभागे [एक](द्वा)नवतिरेकस्मिन्विभागे एकनवतिरित्यत्र भावना प्रागिव भावनीया। तदेवं भारतः सूर्यो दक्षिणपूर्वे द्विनवतिसङ्ख्यानि उत्तरपश्चिमे

१. परिचरति - B, E, K। २. जंबुद्दीवस्स दीवस्स पातीणपडिणायतउदीणदाहिणमाययाए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता - मूले। ३. बाणउतिं सूरियमयातिं - मूले। ४. दक्षिणपश्चिमे चतुर्भागमण्डले - T। ५. ऐरावतसूर्यस्य - T। ६. परस्स चेव चिण्णाइं - मूले।

एकनवतिसङ्ख्यानि स्वयं चीर्णानि उत्तरपूर्वे द्विनवतिसङ्ख्यानि दक्षिणपश्चिमे एकनवतिसङ्ख्यानि ऐरावतसूर्यचीर्णानि प्रतिचरतीत्युपपादितम्। सम्प्रत्यैरावतः सूर्य उत्तरपश्चिमे दिग्भागे द्विनवतिसङ्ख्यानि मण्डलानि दक्षिणपूर्वे एकनवतिसङ्ख्यानि स्वयं चीर्णानि दक्षिणपश्चिमे द्विनवतिसङ्ख्यान्युत्तरपूर्वे एकनवतिसङ्ख्यानि भारतसूर्यचीर्णानि प्रतिचरतीति प्रतिपादयति। **'तत्थ (णं) अयं एरावए सूरिए'** इत्यादि। एतच्च सकलमपि प्रागुक्तसूत्रस्य[१] व्याख्यानुसारेण स्वयं व्याख्येयम्। सम्प्रत्युपसंहारमाह– **'ता निक्खममाणा खलु'** इत्यादि। अस्यायं भावार्थः - इह भारतसूर्योऽभ्यन्तरं प्रविशन् प्रतिमण्डलं द्वौ चतुर्भागौ स्वयं चीर्णौ प्रतिचरति द्वौ तु परचीर्णौ, ऐरावतोऽप्यभ्यन्तरं प्रविशन् प्रतिमण्डलं द्वौ चतुर्भागौ स्वयं[२] चीर्णौ प्रतिचरति द्वौ तु परचीर्णाविति सर्वसङ्ख्यया प्रतिमण्डलमेकैकस्मिन्नहोरात्रे उभयसूर्यचीर्णप्रतिचरणविवक्षायामष्टौ चतुर्भागाः प्रतिचीर्णाः प्राप्यन्ते। ते च चतुर्भागाश्चतुर्विंशत्यधिकशतसत्काष्टादशभागप्रमिताः। एतच्च प्रागेव भावितम्। ततोऽष्टादशाष्टभिर्गुणिताश्चतुश्चत्वारिंशदधिकं[३] शतं भागानां भवति। तत एतदुक्तं[४] भवति **'पविसमाणा खलु[५] दुवे सूरिया अण्णमण्णस्स चिण्णं पडिचरंति[६]। तं जहा सयमेगं चोयालं।'** इति। **'गाहाउत्ति।'** अत्रापि एतदर्थप्रतिपादिकाः काश्चन सुप्रसिद्धा गाथा वर्त्तन्ते। ताश्च व्यवच्छिन्ना इति न कथयितुं शक्यम्। यो वा यथासम्प्रदायादवगच्छति तेन तथा वक्तव्याः।

यदत्र कुर्वता टीकां, विरुद्धं भाषितं मया।
क्षन्तव्यं तत्र तत्त्वज्ञैः, शोध्यं तच्च विशेषतः॥

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य तृतीयं प्राभृतप्राभृतं समाप्तम्।

* * * * *

---

१. ...सूत्रानुसारेण-G। २. स्वचीर्णौ - A, H, I, K, N। ३. ...धिकशतं - A, B, G, J, L। ४. एतदुक्तं पविस... - A, G। ५. खलु एते दुवे - मूले। ६. पडिचरंति सयमेगं... मूले।

चतुर्थं प्राभृतप्राभृतम्

तदेवमुक्तं तृतीयं प्राभृतप्राभृतम्। सम्प्रति चतुर्थं वक्तव्यम्। तस्य चायमर्थाधिकारः कियत्प्रमाणं परस्परमन्तरं कृत्वा चारं चरत ? इति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता केवइयं एते दुवे सूरिया अण्णमण्णस्स अंतरं कट्टु चारं चरंति आहिते ति वदेज्जा?

टी० 'ता केवइयं एए दुवे सूरिया' इत्यादि। **'ता'** इति पूर्ववत्। **एतौ** द्वावपि **सूर्यौ** जम्बूद्वीपगतौ **कियत्प्रमाणं परस्परमन्तरं कृत्वा चारं चरतश्चरन्तावाख्यातावि[1]ति भगवान् वदेत्**?

एवं भगवता गौतमेन प्रश्ने कृते सति शेषकुमतिविषयतत्त्वबुद्धिव्युदासार्थं परमतरूपाः प्रतिपत्तीर्दर्शयति–

मू० तत्थ खलु इमाओ छ पडिवत्तीओ पण्णत्ताओ। तत्थेगे एवमाहंसु-(ता) एगं जोयणसहस्सं एगं तेत्तीसं जोयणसतं अण्णमण्णस्स अंतरं कट्टु सूरिया चारं चरंति आहिते ति वदेज्जा। एगे एवमाहंसु (१)। एगे पुण एवमाहंसु - ता एगं जोयणसहस्सं एगं च चोत्तीसं जोयणसयं अण्णमण्णस्स अंतरं कट्टु सूरिया चारं चरंति आहिया ति वएज्जा। एगे एवमाहंसु २। एगे पुण एवमाहंसु - ता एगं जोयणसहस्सं एगं च पणतीसं जोयणसतं अण्णमण्णस्स अंतरं कट्टु सूरिया चारं चरंति आहिए त्ति वदेज्जा। एगे एवमाहंसु ३। एगे पुण एवमाहंसु - ता एगं दीवं एगं समुद्दं अण्णमण्णस्स अंतरं कट्टु सूरिया चारं चरंति। एगे एवमाहंसु ४। एगे पुण एवमाहंसु - ता दोण्णि दीवे दोण्णि समुद्दे अण्णमण्णस्स जाव

---

१. ....चरन्तौ व्याख्या... - H, K।

आहिते ति वदेज्जा। एगे एवमाहंसु ५। एगे पुण एवमाहंसु - ता तिण्णि दीवे तिण्णि समुद्दे अण्णमण्णस्स अंतरं कट्टु सूरिया चारं चरंति आहिते ति वदेज्जा। एगे एवमाहंसु ६। वयं पुण एवं वदामो - ता पंच पंच जोयणाइं पणतीसं च एगट्ठिभागे जोयणस्स एगमेगे मंडले[१] अण्णमण्णस्स अंतरं अहिवड्ढेमाणा वा निवुड्ढेमाणा वा सूरिया चारं चरंति आहिते ति वदेज्जा।

टी० **'तत्थ खलु इमाओ'** इत्यादि। **तत्र** परस्परमन्तरचिन्तायां **खलु** निश्चित**मिमा** वक्ष्यमाणस्वरूपाः **षट् प्रतिपत्तयो** यथास्वरुचिवस्त्वभ्युपगमलक्षणा-(स्)तैस्तैस्तीर्थान्तरीयैराश्रीयमाणाः **प्रज्ञप्ताः**। एतदेव दर्शयति - **'तत्थेगे'** इत्यादि। तेषां षण्णां त(त्त)त्प्रतिपत्तिप्ररूपकाणां तीर्थान्तरीयाणां मध्ये **एके** तीर्थान्तरीयाः प्रथमं स्वशिष्यं प्रत्**येवमाहुः 'ता एग'**मित्यादि। **'ता'** इति पूर्ववद्भावनीयम्। **एकं योजनसहस्रमेकञ्च त्रयस्त्रिंशदधिकं योजनशतं परस्परस्यान्तरं कृत्वा** जम्बूद्वीपे द्वौ **सूर्यौ चारं चरत**श्चरन्तौ[२]**वाख्यातावि**ति **वदेत्** स्वशिष्येभ्यः। अत्रैवोपसंहारमाह– **'एगे एवं आहंसु'** (**एके एवमाहुः**।) एवं सर्वत्राप्यक्षरयोजना कर्त्तव्या। **एके पुनर्द्वितीयास्तीर्थान्तरीया एवमाहुरेकं योजनसहस्रमेकं चतुस्त्रिंशं** चतुस्त्रिंशदधिकं **योजनशतं परस्परमन्तरं कृत्वा चारं चरतः** २। **एके पुनस्तृतीया एवमाहुरेकं योजनसहस्रं एकं च पञ्चत्रिंशदधिकं योजनशतं परस्परमन्तरं कृत्वा चारं चरतः** ३। **एके पुनश्चतुर्था एवमाहुरेकं द्वीपं**[३] **एकं समुद्रं परस्परमन्तरं कृत्वा चारं चरतः** ४। **एके पुनः** पञ्चमा **एवमाहुर्द्वौ द्वीपौ द्वौ समुद्रौ परस्परमन्तरं कृत्वा चारं चरतः** ५। **एके** षष्ठाः **पुनरेवमाहुस्त्रीन् द्वीपान् त्रीन् समुद्रान् परस्परमन्तरं कृत्वा चारं चरतः**। एते सर्वेऽपि तीर्थान्तरीया मिथ्यावादिनो, [४]यथातत्त्ववस्तु-

---

१. अण्णमण्णस्संतरं - H। २. ....चरन्तौ व्याख्या... J। ३. समुद्रमेकं - M, L। ४. यथातथं वस्तु ... T।

व्यवस्थापनाऽभावात्। तथा चाह **'वयं पुण'** इत्यादि। **वयं पुनरासादित**-केवलज्ञानलाभाः परतीर्थिकवस्तुव्यवस्थाव्युदासेन **एवं** वक्ष्यमाणप्रकारेण केवलज्ञानेन यथावस्थितं वस्तुतत्त्वमुपलभ्य **वदामः**। कथं वदथ यूयं भगवन्त ? इत्याह – **'ता पंचे'**त्यादि। **'ता'** इति आस्तां तावदन्यद्वक्तव्यमिदं **तावत्कथ्यते** – द्वावपि सूर्यौ सर्वाभ्यन्तरान्मण्डलान्निष्क्रामन्तौ प्रतिमण्डलं **पञ्च पञ्च योजनानि पञ्चत्रिंशतं चैकषष्टिभागान् योजनस्य** पूर्वपूर्वमण्डलगतान्तरपरिमाणे **अभिवर्द्धयन्तौ** वाशब्द उत्तरविकल्पापेक्षया समुच्चये **'निवुड्ढेमाणा वा'** इति सर्वबाह्यान्मण्डलादभ्यन्तरं प्रविशन्तौ पञ्च पञ्च योजनानि पञ्चत्रिंशतं च एकषष्टिभागान् योजनस्य पूर्वपूर्व-मण्डलगतान्तरपरिमाणात् **हापयन्तौ** वाशब्दः पूर्वविकल्पापेक्षया (समुच्चये) **सूर्यौ चारं चरतश्चरन्तावाख्यातावि**ति स्वशिष्येभ्यो **वदेत्**।

एवमुक्ते भगवान् गौतमो निजशिष्यनिःशङ्कतत्त्वव्यवस्थापनार्थं भूयः प्रश्नयति –

मू० तत्थ णं को हेऊ त्ति वदेज्जा ?

टी० 'तत्थ ण'मित्यादि। **तत्र** एवंविधाया[1] वस्तुव्यवस्थाया अवगमे **को हेतुः** का उपपत्तिः **इति** प्रसादं कृत्वा **वदेत्** ?

भगवानाह –

मू० ता अयण्णं जंबुद्दीवे दीवे जाव परिक्खेवेणं। ता जया णं एते दुवे सूरिया सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरंति तता णं णवणउतिं जोयणसहस्साइं छच्च चत्ताले जोयणसते अण्णमण्णस्स अंतरं कट्टु चारं चरंति। तता णं उत्तमकट्ठपत्ते उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। ते णिक्खममाणा सूरिया णवं संवच्छरं अयमाणा पढमंसि अहोरत्तंसि अब्भंतराणंतरं मंडलं उवसंकमित्ता चारं चरंति। ता जया णं एते

१. एवंविधायां वस्तुव्यवस्थायां - G।

दुवे सूरिया अब्भंतराणंतरं जाव चारं चरंति तता णं णवणउतिं जोयणसहस्साइं छच्च पणयाले जोयणसए पणतीसं च एगट्ठिभागे जोयणस्स अण्णमण्णस्स अंतरं कट्टु चारं चरंति। तता णं अट्ठारसमुहुत्ते दिवसे भवति दोहिं एगट्ठिभागमुहुत्तेहिं ऊणे दुवालसमुहुत्ता राती भवति दोहिं एगट्ठिभागमुहुत्तेहिं अहिया। ते णिक्खममाणा सूरिया दोच्चंसि अहोरत्तंसि अब्भंतरं तच्चं मंडलं उवसंकमित्ता चारं चरंति। ता जया णं एते दुवे सूरिया [१]अब्भंतरं तच्चं [२]मंडलं उवसंकमित्ता चारं चरंति तता णं णवणउतिं जोयणसहस्साइं छच्च एक्कावण्णे जोयणसए णव य एगट्ठिभागे जोयणस्स अण्णमण्णस्स अंतरं कट्टु चारं चरंति। तता णं अट्ठारसमुहुत्ते दिवसे भवति चउहिं एगट्ठिभागमुहुत्तेहिं ऊणे दुवालसमुहुत्ता राती भवति चउहिं एगट्ठिभागमुहुत्तेहिं अहिया। एवं खलु एतेणं उवाएणं णिक्खममाणा एते दुवे सूरिया तयणंतराउ तयणंतरं मंडलं उवसंकममाणा पंच पंच जोयणाइं पणतीसं च एगट्ठिभागे जोयणस्स एगमेगे मंडले अण्णमण्णस्स अंतरं अहिव-ड्ढेमाणा २ सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरंति। ता जया णं एते दुवे सूरिया सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरंति तया णं एगं जोयणसतसहस्सं छच्च सट्ठे जोयणसए अण्णमण्णस्स अंतरं कट्टु चारं चरंति। तया णं उत्तमकट्ठपत्ता जाव राती भवति जहण्णे दुवालस जाव दिवसे भवति। एस णं पढमे छम्मासे। एस णं पढमस्स छम्मासस्स पज्जवसाणे। ते पविसमाणा सूरिया दोच्चं छम्मासं

१. अब्भिंतरं - U। २. मंडलं जाव चारं - U।

अयमाणा पढमंसि अहोरत्तंसि बाहिराणंतरं मंडलं उवसंकमित्ता चारं चरंति। ता जया णं एते दुवे सूरिया बाहिराणंतरं मंडलं जाव चारं चरंति तता णं एगं जोयणसयसहस्सं छच्च चउप्पण्णे जोयणसते छव्वीसं च एगट्ठिभागे जोयणस्स अण्णमण्णस्स अंतरं कट्टु चारं चरंति। तता णं अट्ठारसमुहुत्ता राती भवति दोहिं एगट्ठिभागमुहुत्तेहिं ऊणा दुवालसमुहुत्ते दिवसे भवति दोहिं एगट्ठि जाव अहिए। ते पविसमाणा सूरिया दोच्चंसि अहोरत्तंसि बाहिरं तच्चं मंडलं उव जाव चारं चरंति। ता जया णं एते दुवे सूरिया बाहिरं तच्चं मंडलं जाव चारं चरंति तता णं एगं जोयणसयसहस्सं छच्च अडयाले जोयणसए बावण्णं एगट्ठिभागे जोयणस्स अण्णमण्णस्स अंतरं कट्टु चारं चरंति। तता णं अट्ठारसमुहुत्ता राती भवति चउहिं एगट्ठिभागमुहुत्तेहिं[१] ऊणा दुवालसमुहुत्ते दिवसे भवति चउहिं एगट्ठिभागमुहुत्तेहिं जाव अहिए। एवं खलु एएणं उवाएणं पविसमाणा एते दुवे सूरिया तयणंतराउ तयणंतरं मंडलाओ मंडलं उवसंकममाणा पंच पंच जोयणाइं पणतीसं च एगट्ठिभागे जोयणस्स एगमेगे मंडले अण्णमण्णस्स अंतरं णिव्वेट्ठेमाणा २ सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरंति। (ता जया णं एते दुवे सूरिया सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरंति) तया णं णवणउतिं जोयणसहस्साइं छच्च चत्ताले जोयणसते अण्णमण्णस्स अंतरं कट्टु चारं चरति। तता णं उत्तमकट्ठपत्ते जाव दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। एस णं दोच्चे छम्मासे। एस णं दोच्चस्स छम्मासस्स पज्जवसाणे। एस णं आइच्चे संवच्छरे। एस णं आइच्चसंवच्छरस्स[२] पज्जवसाणे।

---

१. ...भाग जाव ऊणा - U। २. आतिच्चस्स संवच्छरस्स - U।

चउत्थं पाहुडपाहुडं समत्तं।

टी० '**ता अयण्ण**'मित्यादि। इदं जम्बूद्वीपस्वरूपप्रतिपादकं वाक्यं पूर्ववत् परिपूर्णं स्वयं परिभावनीयम्। '**ता जया ण**'मित्यादि। **तत्र यदा** '**ण**'मिति वाक्यालङ्कारे **एतौ** जम्बूद्वीपप्रसिद्धौ भारतैरावतौ **द्वावपि सूर्यौ**[१] **सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य चारं चरतस्तदा**[२] **नवनवतियोजनसहस्राणि षट् योजनशतानि चत्वारिंशानि** चत्वारिंशदधिकानि **परस्परमन्तरं कृत्वा चारं**[३] **चरतश्चरन्ता**[४]वाख्याताविति वदेत्। कथं सर्वाभ्यन्तरे मण्डले द्वयोः सूर्ययोः परस्परमेतावत्प्रमाणमन्तरमिति चेत् ? उच्यते, इह जम्बूद्वीपो योजनलक्षप्रमाणविष्कम्भस्तत्रैकोऽपि सूर्यो जम्बूद्वीपस्य मध्ये[५] अशीत्यधिकं योजनशतमवगाह्य सर्वाभ्यन्तरे मण्डले चारं चरति द्वितीयोऽप्यशीत्यधिकं योजनशतमवगाह्य, अशीत्यधिकश्च शतं द्वाभ्यां गुणितं त्रीणि शतानि षष्ट्यधिकानि ३६० भवन्ति, एतानि जम्बूद्वीपविष्कम्भपरिमाणलक्षरूपादपनीयन्ते। ततो यथोक्तमन्तरपरिमाणं भवति। '**तया ण**'मित्यादि। **तदा** सर्वाभ्यन्तरमण्डलपरिभ्रमणकाले **उत्तमकाष्ठाप्राप्तः** परमप्रकर्षप्राप्त **उत्कर्षक**[६] उत्कृष्टोऽष्टादशमुहूर्त्तो **दिवसो भवति जघन्या** सर्वजघन्या **द्वादशमुहूर्त्ता रात्रिः**। '**ते निक्खममाणा**' इत्यादि। ततस्तस्मात्सर्वाभ्यन्तरान्मण्डलात्तौ द्वावपि **सूर्यौ निष्क्रामन्तौ नवं** सूर्यसंवत्सरमाददानौ नवस्य सूर्यसंवत्सरस्य **प्रथमे अहोरात्रे अभ्यन्तरानन्तरमिति** सर्वाभ्यन्तरान्मण्डलादनन्तरं[७] द्वितीयं **मण्डलमुपसङ्क्रम्य चारं** [चरंति](**चरतः**)। '**ता जया ण**'मित्यादि। **ततो यदा एतौ द्वावपि सूर्यौ** सर्वाभ्यन्तरानन्तरं **मण्डलमुपसङ्क्रम्य चारं चरतस्तदा**[८] **नवनवतियोजनसहस्राणि षट्शतानि पञ्चचत्वारिंशदधिकानि योजनानां**

---

१. सर्वाभ्यन्तरमण्डल.. - T। २. णवणउतिं जोयणसहस्साइं - मूले। ३. ....चरंति। तता णं... - मूले। ४. ...चरन्तौ व्याख्या.... - H, T। ५. अशीत्यधिकयोजन.. - G। ६. उत्कृष्टकः - F, K। ७. द्वितीयमण्डल.... - F, G, I। ८. णवणउतिं जोयणसहस्साइं - मूले।

पञ्चत्रिंशतं चैकषष्टिभागान् योजनस्येत्येतावत्प्रमाणं परस्परमन्तरं कृत्वा चारं चरतः[१] चरन्तावाख्यातावि ति वदेत्। तदा कथमेतावत्प्रमाणमन्तरमिति चेत् ? उच्यते, इहैकोऽपि सूर्यः सर्वाभ्यन्तरमण्डलगतानष्टाचत्वारिंशदेकषष्टिभागान् योजनस्य अपरे च द्वे योजने विकम्प्य सर्वाभ्यन्तरानन्तरे द्वितीये मण्डले चरति। एवं द्वितीयोऽपि। ततो द्वे योजने अष्टाचत्वारिंशदेकषष्टिभागा योजनस्येति द्वाभ्यां गुण्यते, गुणिते च सति पञ्च योजनानि पञ्चत्रिंशच्चैकषष्टिभागा योजनस्येति भवति, एतावदधिकं पूर्वमण्डलगतादनन्तरोक्तात्परिमाणादत्र प्राप्यते। ततो यथोक्तमन्तरपरिमाणं [च] भवति। **'तया ण'**मित्यादि। **तदा** सर्वाभ्यन्तरानन्तरद्वितीयमण्डलचारचरणकाले **अष्टादशमुहूर्त्तो दिवसो भवति द्वाभ्यां 'एगट्ठिभागमुहुत्तेहिं'ति मुहूर्त्तैकषष्टि-भागाभ्यामूनो भवति, द्वादशमुहूर्त्ता रात्रिर्द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामधिका। 'ते निक्खममाणे'**[२] इत्यादि। ततस्तस्मादपि द्वितीयान्मण्डला**न्निष्क्रामन्तौ सूर्यौ** नवस्य सूर्यसंवत्सरस्य **द्वितीये अहोरात्रे अभ्यन्तरस्य**[३] सर्वाभ्यन्तरस्य मण्डलस्य **तृतीयं मण्डलमुपसङ्क्रम्य चारं चरतः**। **'ता जया ण'**मित्यादि। **ततो यदा 'ण'**मिति पूर्ववत्, **एतौ द्वौ सूर्यौ अभ्यन्तरतृतीयं**[४] सर्वाभ्यन्तरतृतीयं सर्वाभ्यन्तरस्य तृतीय**मण्डलमुपसङ्क्रम्य चारं चरतस्तदा** तस्मिन् तृतीयमण्डलचारचरणकाले **नवनवतियोजनसहस्राणि षट्शतानि एकपञ्चाशदधिकानि**[५] **योजनानां**[६] **नव चैकषष्टिभागान् योजनस्य परस्परमन्तरं कृत्वा चारं चरतः**। तदा कथमेताव-त्प्रमाणमन्तरकरणमिति चेत् ? उच्यते, इहाप्येकः सूर्यः सर्वाभ्यन्तरद्वितीयमण्ड-लगतानष्टाचत्वारिंशदेकषष्टिभागान्[७] योजनस्यापरे च द्वे योजने विकम्प्य चारं चरति, द्वितीयोऽपि, ततो द्वे योजने अष्टाचत्वारिंशच्चैकषष्टिभागा योजनस्येति द्वाभ्यां गुण्यते,

१. चरन्तौ व्याख्यातावि ति - H, I। २. निक्खममाणा - मूले। ३. अभ्यन्तरस्य मण्डलस्य - C, I। ४. अभ्यन्तरतृतीयं सर्वाभ्यन्तरस्य... - F, I, T I, अब्भंतरं तच्चं - मूले। ५. णवणउतिं जोयणसहस्साइं - मूले। ६. योजनानां च नवैक... - T। ७. योजनस्यापरे द्वे - A, C, N, योजनस्य परे च द्वे - T।

[१]द्विगुणने च पञ्चयोजनानि पञ्चत्रिंशच्चैकषष्टिभागा योजनस्येति भवति। एतावत् पूर्वमण्डलगतादन्तरपरिमाणादधिकमत्र प्राप्यते इति भवति यथोक्तमत्रान्तरपरिमाणम्। **'तया ण'**मित्यादि। **तदा** सर्वाभ्यन्तरान्मण्डलात्तृतीयमण्डलचारचरणकालेऽ**ष्टादश-मुहूर्त्तो दिवसो भवति चतुर्भिर्मुहूर्त्तैकषष्टिभागैरूनो द्वादशमुहूर्त्ता रात्रिश्चतुर्भि-र्मुहूर्त्तैकषष्टिभागैरधिका**। **'एव'**मित्यादि। **एव**मुक्तेन प्रकारेण खलु निश्चित-**मेतेनोपायेन** प्रतिमण्डलमेकतोऽप्येकसूर्यो द्वे योजने अष्टाचत्वारिंशतं चैकषष्टिभागान् योजनस्य विकम्प्य चारं चरत्यपरतोऽ[२]प्यपरसूर्य इत्येवंरूपेण **निष्क्रामन्तौ एतौ** जम्बूद्वीपगतौ **द्वौ सूर्यौ** पूर्वस्मात् **तदनन्तरान्**मण्डलाद[३]**नन्तरं मण्डलं सङ्क्रामन्तौ** एकैकस्मिन् मण्डले पूर्वपूर्वमण्डलगतान्तरपरिमाणापेक्षया **पञ्च पञ्च योजनानि पञ्चत्रिंशतं चैकषष्टिभागान्योजनस्य परस्परमभिवर्द्धयन्तौ** नवसूर्यसंवत्सरसत्के त्र्यशीत्यधिकशततमे अहोरात्रे प्रथमषण्मासपर्यवसानभूते **सर्वबाह्यमण्डलमुप-सङ्क्रम्य चारं चरतः**। **'ता जया ण'**मित्यादि। **ततो यदा एतौ द्वौ सूर्यौ सर्वबाह्यमण्डलमुपसङ्क्रम्य चारं चरतस्तदा** तावेकं **योजनशतसहस्रं षट्शतानि षष्ट्यधिकानि** १,००,६६० **परस्परमन्तरं कृत्वा चारं चरतः**। कथमेतदवसेयमिति चेत् ? उच्यते, इह प्रतिमण्डलं [४]पञ्चयोजनानि पञ्चत्रिंशच्चैक-षष्टिभागा योजनस्येति अन्तरपरिमाणचिन्तायामभिवर्द्धमानं प्राप्यते। सर्वाभ्यन्तराच्च मण्डलात्सर्व[५]बाह्यमण्डलं त्र्यशीत्यधिकशततमम्। ततः पञ्च योजनानि त्र्यशीत्यधिकेन शतेन गुणितानि जातानि नवशतानि पञ्चदशोत्तराणि ९१५। एकषष्टिभागाश्च पञ्चत्रिंशत्सङ्ख्यास्त्र्यशीत्यधिकेन शतेन गुण्यन्ते। जातानि तेषां चतुःषष्टिशतानि पञ्चोत्तराणि ६,४०५। तेषामेकषष्ट्या भागे हृते लब्धं पञ्चोत्तरं योजनशतं १०५। एतत्प्राक्तने योजनराशौ प्रक्षिप्यते। जातानि दशशतानि विंशत्यधिकानि योजनानां

---

१. द्विगुणेन - B, D, E, F, G, H, I, J, K, L, M। २. ...प्यपरः सूर्य - C। ३. तयणंतरं मंडलं उवसंकममाणा - मूले। ४. पञ्चयोजनानि पञ्चयोजनानि पञ्चत्रिंश... - A। ५. ...बाह्यं मण्डलं - E।

१,०२०। एतत्सर्वाभ्यन्तरमण्डलगते अन्तरपरिमाणे नवनवतियोजनसहस्राणि षट्शतानि चत्वारिंशदधिकानि ९९,६४० इत्येवंरूपे प्रक्षिप्यते। ततो यथोक्तं सर्वबाह्ये मण्डले अन्तरपरिमाणं भवति। **'तया ण'**मित्यादि। **तदा** सर्वबाह्यमण्डलचार-चरणकाले **'ण'**मिति पूर्ववत् **उत्तमकाष्ठाप्राप्ता** परमप्रकर्षप्राप्ता उत्कृष्टाऽष्टादशमुहूर्त्ता **रात्रिर्भवति जघन्यश्च द्वादशमुहूर्त्तो दिवसः**। **'एस णं पढमे छम्मासे'** इत्यादि प्राग्वत्। **'ते पविसमाणा'** [१] इत्यादि। **तौ** ततः सर्वबाह्यान्मण्डलादभ्यन्तरं **प्रविशन्तौ** द्वौ **सूर्यौ** [२]**द्वितीयषण्मासमाददानौ** द्वितीयस्य षण्मासस्य [३]**प्रथमे अहोरात्रे बाह्यानन्तरं** सर्वबाह्यान्मण्डलादर्वागनन्तरं द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरतः**। **'ता जया ण'**मित्यादि। **तत्र यदा एतौ द्वौ सूर्यौ** [४]सर्व**बाह्यानन्तर**मर्वाक्तनमनन्तरं द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरतस्तदा एकं योजनशतसहस्रं षट्शतानि चतुःपञ्चाशदधिकानि षड्[त्रिं](विं)शतिं चैकषष्टिभागान् योजनस्य परस्परमन्तरं कृत्वा चारं चरतः**। कथमेतावत्तस्मिन् सर्वबाह्यान्मण्डलादर्वाक्तने द्वितीये मण्डले परस्परमन्तरकरणमिति चेत् ? उच्यते, इहैकोऽपि सूर्यः सर्वबाह्य-मण्डलगतानष्टाचत्वारिंशदेकषष्टिभागान् योजनस्यापरे च द्वे योजने अभ्यन्तरं प्रविशन् [५]सर्वबाह्यादर्वाक्तने द्वितीये मण्डले चारं चरति, अपरोऽपि। ततः सर्वबाह्य(मण्डल)-गताद[न]न्तरपरिमाणादत्रान्तरपरिमाणं पञ्चभिर्योजनैः पञ्चत्रिंशता चैकषष्टिभागैर्योजन-स्योनं भवति। ततो यथोक्तमत्रान्तरपरिमाणमिति। **'तया ण'**मित्यादि। **तदा** [६]सर्वबाह्यान्मण्डलादर्वाक्तनद्वितीयमण्डलचारचरणकाले **अष्टादशमुहूर्त्ता रात्रिर्भवति द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामूना द्वादशमुहूर्त्तो दिवसो द्वाभ्यां मुहूर्त्तैकषष्टि-भागाभ्यामधिकः**। **'ते पविसमाणा'** इत्यादि। ततस्तस्मादपि सर्वबाह्यमण्डला-दर्वाक्तनद्वितीयमण्डलादभ्यन्तरं **प्रविशन्तौ तौ द्वौ सूर्यौ** द्वितीयस्य षण्मासस्य **द्वितीये**

---

१. इत्यादि। ततः - E। २. द्वितीयं षण्मास... - E। ३. प्रथमाहोरात्रे - E। ४. सर्वबाह्यादनन्तर... - E। ५. सर्वबाह्यगताद.... - H। ६. सर्वबाह्यानन्तराऽर्वाक्तनद्वितीय... - M।

अहोरात्रे '[१]**बाहिरं तच्चं**' ति सर्व**बाह्यान्**मण्डलादर्वाक्तनं **तृतीयं मण्डलमुपसङ्क्रम्य चारं चरतः**। '**ता जया ण**'मित्यादि। **तत्र यदा एतौ द्वौ सूर्यौ** सर्व**बाह्यान्**मण्डलादर्वाक्तनं **तृतीयं मण्डलमुपसङ्क्रम्य चारं चरतस्तदा एकं योजनशतसहस्रं षड्योजनशतानि अष्टचत्वारिंशदधिकानि द्विपञ्चाशतं चैकषष्टिभागान् योजनस्य परस्परमन्तरं कृत्वा चारं चरतः**, प्रागुक्तपूर्वमण्डलगतादि[न](न्तरपरिमाणादत्रा)न्तरपरिमाणस्य पञ्चभिर्योजनैः पञ्चत्रिंशता चैकषष्टिभागैर्योजनस्य हीनत्वात्। '**तया ण**'मित्यादि। **तदा** सर्वबाह्यान्मण्डलादर्वाक्तनतृतीयमण्डलचारचरणकाले **अष्टादशमुहूर्त्ता रात्रिर्भवति चतुर्भिर्मुहूर्तैकषष्टिभागैरूना द्वादशमुहूर्त्तो दिवसश्चतुर्भिरेकषष्टिभागैर्मुहूर्त्तस्याधिकः**। '**एवं खलु**' इत्यादि। **एव**मुक्तेन प्रकारेण **खलु** निश्चित**मेतेनोपायेन** एकतोऽप्येकः सूर्योऽभ्यन्तरं प्रविशन् पूर्व्वपूर्व्वमण्डलगतादन्तरपरिमाणादनन्तरेऽनन्तरे विवक्षिते मण्डलेऽन्तरपरिमाणस्याष्टाचत्वारिंशतमेकषष्टिभागान् द्वे च योजने हापयत्यपरतोऽप्यपरः सूर्य इत्येवंरूपेण **एतौ** जम्बूद्वीपगतौ **सूर्यौ तदनन्तरान्मण्डलात् तदनन्तरं मण्डलं** [२]सङ्क्रामन्तौ **एकैकस्मिन् मण्डले** पूर्वपूर्वमण्डलगतादन्तरपरिमाणात् [३]**पञ्च पञ्च योजनानि पञ्चत्रिंशतं चैकषष्टिभागान् योजनस्य परस्परमन्तर**परिमाणं **निर्वेष्टयन्तौ** हापयन्तावित्यर्थः द्वितीयषण्मासस्य त्र्यशीत्यधिकशततमेऽहोरात्रे सूर्यसंवत्सरपर्यवसानभूते **सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य चारं चरतः**। '**ता जया ण**'मित्यादि। **तत्र यदा एतौ द्वौ सूर्यौ सर्वाभ्यन्तरमण्डलमुपसङ्क्रम्य चारं चरतस्तदा** [४]**नवनवतियोजनसहस्राणि** [५]**षड्योजनशतानि चत्वारिंशानि** चत्वारिंशदधिकानि **परस्परमन्तरं कृत्वा चारं चरतः**। अत्र चैवंरूपान्तरपरिमाणे भावना प्रागेव कृता। शेषं सुगमम्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य चतुर्थं प्राभृतप्राभृतं समाप्तम्।

* * * * *

१. बाहिरतच्चं - T। २. उवसंकममाणा - मूले। ३. पञ्च योजनानि - D। ४. णवणउतिं जोयणसहस्साइं - मूले। ५. षड्योजनशतानि चत्वारिंशदधिकानि - D, G।

पञ्चमं प्राभृतप्राभृतम्

तदेवमुक्तं चतुर्थं प्राभृतप्राभृतम्। सम्प्रति पञ्चममारभ्यते तस्य चायं पूर्वमुपदर्शितोऽर्थाधिकारो – यथा कियन्तं द्वीपं समुद्रं वा सूर्योऽवगाहते ? इति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता केवतियं ते दीवं [समुद्दे] (समुद्दं वा) ओगाहित्ता सूरिए चारं चरति आहिते ति वदेज्जा ?

टी० 'ता केवइयं[1] दीवं समुद्दं वा ओगाहित्ता सूरिए चारं चरति' इत्यादि। **'ता'** इति पूर्ववत् **कियन्तं** कियत्प्रमाणं **द्वीपं समुद्रं वा अवगाह्य सूर्यश्चारं चरति** चरन् **आख्यात इति वदेत्** ?

एवं प्रश्नकरणादनन्तरं भगवान् निर्वचनमभिधातुकाम[2] एतद्विषयपरतीर्थिकप्रतिपत्तिमिथ्याभावोपदर्शनार्थं प्रथमतस्ता एव परतीर्थिकप्रतिपत्तीः सामान्यत उपन्यस्यति –

मू० तत्थ खलु इमातो पंच पडिवत्तीतो पण्णत्ताओ- तं० तत्थेगे एवमाहंसु - ता एगं जोयणसहस्सं एगं च तेत्तीसं जोयणसतं दीवं वा समुद्दं वा ओगाहित्ता सूरिए चारं चरति आहिते ति वदेज्जा। एगे एवमाहंसु १। एगे पुण एवमाहंसु - (ता) एगं जोयणसहस्सं एगं[3] च चोत्तीसं जोयणसतं ओगाहित्ता सूरिए चारं चरति आहिते ति वदेज्जा। एगे एवमाहंसु २। एगे पुण एवमाहंसु- ता एगं जोयणसहस्सं एगं च पणतीसं जोयणसतं ओगाहित्ता सूरिए चारं चरति आहिते ति वदेज्जा। एगे एवमाहंसु - ३। एगे पुण एवमाहंसु ता अवड्ढं दीवं अवड्ढं समुद्दं (वा) ओगाहित्ता सूरिए चारं चरति आहिए ति वदेज्जा। एगे एवमाहंसु ४। एगे पुण एवमाहंसु - ता णो किंचि दीवं[1] णो किंचि समुद्दं

---

१. केवइयं ते - मूले। २. प्रतिवचनमिति पाठान्तरं - H। ३. एगं चोत्तीसं - U। ४. दीवं वा समुद्दं वा - U।

ओगाहित्ता सूरिए चारं चरति आहिते ति वदेज्जा। एगे एवमाहंसु ५।

टी० '**तत्थ खलु**' इत्यादि। **तत्र** सूर्यस्य चारं चरतो द्वीपसमुद्रावगाहनविषये **खल्विमा** वक्ष्यमाणस्वरूपाः **पञ्च प्रतिपत्तयः** परमतरूपाः **प्रज्ञप्तास्तद्यथा - एके** तीर्थान्तरीया **एवमाहुः** '**ता**' इति **तावत्**शब्दस्तेषां तीर्थान्तरीयाणां प्रभूतवक्तव्यतोपक्रमे[१] क्रमोपदर्शनार्थः **एकं योजनसहस्रमेकञ्च त्रयस्त्रिंशदधिकं योजनशतं द्वीपं समुद्रं वा अवगाह्य सूर्यश्चारं चरति**। किमुक्तं भवति ? यदा सर्वाभ्यन्तरमण्डलमुपसङ्क्रम्य[२] चारं चरति तदा एकं योजनसहस्रमेकञ्च त्रयस्त्रिंशदधिकं योजनशतं जम्बूद्वीपमवगाह्य चारं चरति। तदा च परमप्रकर्षप्राप्तोऽष्टादशमुहूर्त्तो दिवसो भवति सर्वजघन्या च द्वादशमुहूर्त्ता रात्रिः। यदा तु सर्वबाह्यमण्डलमुपसङ्क्रम्य[३] चारं चरितुमार[भ्यु](भ)ते तदा लवणसमुद्रमेकं योजनसहस्रमेकञ्च त्रयस्त्रिंशदधिकं योजनशतमवगाह्य सूर्यश्चारं चरति। तदा चोत्तमकाष्ठाप्राप्ता अष्टादशमुहूर्त्तप्रमाणा रात्रिर्भवति सर्वजघन्यो द्वादशमुहूर्त्तप्रमाणो दिवसः। अत्रैवोपसंहारमाह – '**एगे एवमाहंसु १।**' **एके पुनर्द्वितीया एवमाहुः** '**ता**' इति पूर्ववत् **एकं**[४] **योजनसहस्रमेकं चतुस्त्रिंशदधिकं योजनशतं** द्वीपं समुद्रं वा **अवगाह्य सूर्यश्चारं चरति,** भावना प्राग्वत्। अत्रैवोपसंहारमाह – '**एगे एवमाहंसु २।**' **एके पुनस्तृतीया एवमाहुरेकं योजनसहस्रमेकं च पञ्चत्रिंशदधिकं योजनशतं** द्वीपं समुद्रं वा **अवगाह्य सूर्यश्चारं चरति**। अत्रापि भावना प्रागिव। अत्रैवोपसंहारमाह – '**एगे एवमाहंसु ३।**' **एके पुनश्चतुर्थास्तीर्थान्तरीया एवमाहुः** '**अवड्ढं**' ति अपगतं सदप्यवगाहाभावतो न विवक्षितमर्द्धं यस्य तमपार्द्धमर्द्धहीनमर्द्धमात्रमित्यर्थः **द्वीपं समुद्रं वाऽवगाह्य**[५] **सूर्यश्चारं चरति**। इयमत्र भावना - यदा सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य सूर्यश्चारं चरति तदार्द्धं जम्बूद्वीपमवगाहते। तदा

---

१. ....पक्रमोपदर्शनार्थः - C। २. सर्वाभ्यन्तरं मण्डल... - B। ३. सर्वबाह्यं मण्डल... - A। ४. एकयोजन.... - A,B। ५. अवड्ढं दीवं अवड्ढं समुद्दं वा - मूले।

च दिवसः परमप्रकर्षप्राप्तोऽष्टादशमुहूर्त्तप्रमाणो भवति सर्वजघन्या च द्वादश-मुहूर्त्तप्रमाणा रात्रिः। यदा पुनः सर्वबाह्यमण्डलमुपसङ्क्रम्य सूर्यश्चारं चरति तदा अर्द्ध-अपरिपूर्णं लवणसमुद्रमवगाहते। तदा च सर्वोत्कर्षप्राप्ता अष्टादशमुहूर्त्तप्रमाणा रात्रिः सर्वजघन्यो द्वादशमुहूर्त्तो दिवसः। अत्रैवोपसंहारमाह– **'एगे एवमाहंसु ४।'** **एके पुनः** पञ्चमास्तीर्थान्तरीया **एवमाहुः नं[1] किञ्चित् द्वीपं समुद्रं वाऽवगाह्य सूर्यश्चारं चरति**। अत्रायं भावार्थः - यदाऽपि सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य सूर्यश्चारं चरति तदाऽपि न किमपि जम्बूद्वीपमवगाहते किं पुनः शेषमण्डलपरिभ्रमणकाले। यदापि सर्वबाह्यमण्डलमुपसङ्क्रम्य सूर्यश्चारं चरति तदापि लवणसमुद्रं [वा] न किमप्यवगाहते, किं पुनः शेषमण्डलपरिभ्रमणकाले। किन्तु द्वीपसमुद्रयोरपान्तराल एव सकलेष्वपि मण्डलेषु चारं चरति। अत्रोपसंहारमाह – **'एगे एवमाहंसु।'**

तदेवमुक्ता उद्देशतः पञ्चाऽपि प्रतिपत्तयः। सम्प्रत्येता एव स्पष्टं भावयति–

मू० तत्थ जे ते एवमाहंसु ता एगं जोयणसहस्सं एगं तेत्तीसं जोयणसयं ओगाहित्ता सूरिए चारं चरति ते णं एवमाहंसु ता जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तदा णं जंबुद्दीवं २ एगं च जोयणसहस्सं एगं च तेत्तीसं जोयणसयं ओगाहित्ता चारं चरति। तदा णं उत्तमकट्ठपत्ते उक्कोसए[2] अट्ठारसमुहुत्ते दिवसे भवइ जहन्निआ दुवालसमुहुत्ता राई भवति। ता जया णं सूरिए सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरइ तया णं लवणसमुद्दं एगं जोयणसहस्सं एगं च तित्तीसं जोयणसयं ओगाहित्ता चारं चरति। तदा णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता राती भवति जहण्णए दुवालसमुहुत्ते दिवसे भवति। एवं चोत्तीसे वि पणतीसे वि एवं भाणियव्वं। तत्थ जे ते एवमाहंसु ता अवड्ढं दीवं अवड्ढं समुद्दं

१. णो किंचि दीवं णो किंचि समुद्दं - मूले। २. उक्कोसे - U।

ओगाहित्ता सूरिए जाव चारं चरति ते णं एवमाहंसु ता जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं अवड्ढं जंबुद्दीवं ओगाहित्ता चारं चरति। तता णं दिवसराइप्पमाणं उक्कोसजहण्णगं भाणियव्वं। एवं सव्वबाहिरए वि, णवरं अवड्ढं लवणसमुद्दं ओगाहित्ता, तता णं दिवसराइप्पमाणं उब्भासगं[1]। तत्थ जे ते एवमाहंसु ता णो किंचि दीवं णो किंचि समुद्दं ओगाहित्ता सूरिए चारं चरति ते णं एवमाहंसु ता जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं णो किंचि जंबुद्दीवं दीवं ओगाहित्ता चारं चरति। तता णं उत्तमकट्ठपत्ते अट्ठारसमुहुत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। ता जता णं सूरिए सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति तता णं णो किंचि लवणसमुद्दं ओगाहित्ता चारं चरति। तता णं उत्तमकट्ठपत्ता जाव राती भवति जहण्णए दुवालसमुहुत्ते दिवसे भवति। एगे एवमाहंसु।

टी० '**तत्थ जे ते एवमाहंसु**' इत्यादि। प्रायः समस्तमपीदं व्याख्यातार्थं सुगमं च, नवरं '**एवं चोत्तिसे वि**' त्ति। एवं त्रयस्त्रिंशदधिकयोजनशत-विषयप्रतिपत्तिवत् चतुस्त्रिंशे शते या द्वितीया प्रतिपत्तिस्तस्यामालापको वक्तव्यः। स चैवं – '**तत्थ जे ते एवमाहंसु एगं जोयणसहस्सं एगं चउत्तीसं जोयणसयं दीवं समुद्दं वा ओगाहित्ता चारं चरति ते एवमाहंसु - (ता) जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तया णं जंबूद्दीवं एगं जोयणसहस्समेगं च चोत्तीसं जोयणसयं ओगाहित्ता चारं चरइ। तया णं उत्तमकट्ठपत्ते अट्ठारसमुहुत्ते दिवसे भवइ जहण्णिया दुवालसमुहुत्ता राई भवइ। ता जया णं सूरिए सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरइ तया णं**

१. उक्कोसजहन्नगं तहेव - P, उब्भासगं उक्कोसजहण्णगं भाणितव्वं तहेव - U।

लवणसुद्दं एगं जोयणसहस्सं एगं चोत्तीसं जोयणसयं ओगाहित्ता चारं चरति। तया णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता राई भवइ जहण्णए दुवालसमुहुत्ते दिवसे भवइ। पणतीसे वि एवं चेव भाणियव्वं।' एवमुक्तेन [१]प्रकारेण पञ्चत्रिंशे पञ्चत्रिंशदधिकयोजनशतविषयायामपि प्रतिपत्तौ सूत्रं भणितव्यम्। तच्च सुगमत्वात् स्वयं भावनीयम्। **'एवं [२]सव्वबाहिरे वि'**त्ति। एवं सर्वाभ्यन्तरमण्डल इव सर्वबाह्येऽपि मण्डले आलापको वक्तव्यः। नवरं जम्बूद्वीपस्थाने **'अवड्ढं लवणसमुद्दं ओगाहित्ता'** इति वक्तव्यम्। तच्चैवं – **'(ता) जया णं सूरिए सव्वबाहिरं मंडलमुवसंकमित्ता चारं चरइ तया णं अवड्ढं लवणसमुद्दं ओगाहित्ता चारं चरति। तया णं राइंदियप्पमाणं उब्भासगत्ति।' 'तया ण'**मिति वचनपूर्वकं रात्रिन्दिवपरिमाणं जम्बूद्वीपापेक्षया विपरीतं वक्तव्यम्, यज्जम्बूद्वीपावगाहे दिवसप्रमाणमुक्तं तद्रात्रेर्द्रष्टव्यम्, यद्रात्रेस्तद्दिवसस्य। तच्चैवं - **'तया णं उत्तम-कट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता राई [३]भवइ जहन्नए दुवालसमुहुत्ते दिवसे भवइ।'** एवमुत्तरसूत्रेऽप्यक्षरयोजना भावनीया।

तदेवं परतीर्थिकप्रतिपत्तीरुपदर्श्य सम्प्रत्येतासां मिथ्याभावोपदर्शनार्थं स्वमत-मुपदर्शयति–

मू० वयं पुण एवं वदामो - ता जता णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं जंबुद्दीवं दीवं असीतिं जोयणसयं ओगाहित्ता चारं चरति। तता णं उत्तमकट्ठपत्ते अट्ठारसमुहुत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। ता जया णं सूरिए सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति तता णं लवणसमुद्दं तिण्णि तीसे जोयणसते ओगाहित्ता चारं चरति। तता णं उत्तमकट्ठपत्ता अट्ठारसमुहुत्ता राती भवति जहण्णए दुवालसमुहुत्ते

१. प्रकारेण पञ्चत्रिंशदधिक... - N। २. सव्वबाहिरए - मूले। ३. भवइ तइया णं जहन्नए - J।

दिवसे भवति[१]। इत्थ गाहाउ भाणियव्वाउ।

पढमस्स पंचमं पाहुडपाहुडं ५।

टी० '**वयं पुण**' इत्यादि। **वयं पुनरुत्पन्नकेवलज्ञानदर्शना एवं** वक्ष्यमाणप्रकारेण **वदामस्तमेव** प्रकारमाह– **यदा सूर्यः सर्वाभ्यन्तरमण्डलमुपसङ्क्रम्य[२] चारं चरति तदा** अमुं **जम्बूद्वीपं अशीत्यधिकं योजनशतमवगाह्य चारं चरति। तदा चोत्तमकाष्ठाप्राप्त उत्कर्षकोऽष्टादशमुहूर्त्तो दिवसो भवति सर्वजघन्या द्वादशमुहूर्त्ता रात्रिः। 'एवं सव्वबाहिरे वि**'त्ति। एवं सर्वाभ्यन्तरमण्डल इव सर्वबाह्येऽपि मण्डले आलापको वक्तव्यः। स चैवं - '**(ता) जया णं सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति**' इति। '**नवर**'मिति सर्वबाह्यमण्डलगतादालापकादस्यालापकस्य विशेषोपदर्शनार्थः, तमेव विशेषमाह – '**जया णं लवणं[३] समुद्दं तिन्नि तीसे जोयणसए ओगाहेत्ता[४] चारं चरइ तया णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता राई भवति जहन्नए दुवालसमुहुत्ते दिवसे भवइ।**' इति। इदं च सुगमम्। क्वचित्तु '**(एवं) सव्वबाहिरे वी**'त्यातिदेशमन्तरेण सकलमपि सूत्रं साक्षात् लिखितं दृश्यते। '**गाहाओ[५] भाणियव्वाओ[६]**' अत्राऽपि काश्चन प्रसिद्धा विवक्षितार्थसङ्ग्राहिका गाथाः सन्ति ता भणितव्यास्ताश्च[७] सम्प्रति व्यवच्छिन्ना इति न कथयितुं व्याख्यातुं वा शक्यन्ते, यथासम्प्रदायं वाच्या इति।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य पञ्चमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

---

१. भवति। पंचमं। - P। २. सर्वाभ्यन्तरं मण्डल... J। ३. लवणसमुद्दं - C। ४. ओगाहित्ता - C, F, I, J, M, T। ५. गाहाउ भाणियव्वाउ - मूले। ६. भणियव्वाओ - T। ७. भाणितव्या.... - A, B, D, E, F, G, H, I, J।

षष्ठं प्राभृतप्राभृतम्

तदेवमुक्तं पञ्चमं प्राभृतप्राभृतम्। सम्प्रति षष्ठं वक्तव्यम्। तस्य चायमर्थाधिकारः कियन्मात्रं क्षेत्रमेकेन रात्रिन्दिवेन सूर्यो विकम्पते ? इति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता केवतियं ते एगमेगेणं राइंदिएणं विकंपतित्ता २ सूरिए चारं चरति आहिते ति वदेज्जा ?

टी० '**ता केवइयं ते एगमेगेणं राइंदिएणं विकंपइत्ता**' इत्यादि। '**ता**' इति पूर्ववत् **कियत्**प्रमाणं क्षेत्रमिति गम्यते '**एगमेगेणं**' ति अत्र प्रथमादेकशब्दान्मकारोऽलाक्षणिकस्ततोऽयमर्थ एकैकेन **रात्रिन्दिवेन** अहोरात्रेण **विकम्प्य** विकम्पनं नाम स्वस्वमण्डलाद्बहिरवष्वष्कणमभ्यन्तरप्रवेशनं वा **सूर्य** आदित्यश्चारं **चरति** चारं चरन् **आख्यात इति** वदेत् ?

एवं भगवता गौतमेन प्रश्ने कृते सति एतद्विषयपरतीर्थिकप्रतिपत्तिमिथ्याभावोपदर्शनार्थमथ प्रथमतस्ता एव प्ररूपयति –

मू० तत्थ खलु इमातो सत्त पडिवत्तीओ पण्णत्ताओ। तत्थ एगे एवमाहंसु ता दो जोयणाइं अद्धबायालीसं च तेसीयसतभागे जोयणस्स एगमेगेणं राइंदिएणं विकंपइत्ता (२) सूरिए चारं चरति आहिए ति वदेज्जा। एगे एवमाहंसु (१)। एगे पुण एवमाहंसु - ता अट्ठाइज्जाइं जोयणाइं एगमेगेणं रातिंदिएणं विकंपतित्ता (२) सूरिए चारं चरति आहितेति वदेज्जा। एगे एवमाहंसु २। एगे पुण एवमाहंसु - तिण्णि तिभागूणाइं जोयणाइं एगमेगेणं रातिंदिएणं [१]विकंपतित्ता २ जाव चारं चरति आहिते ति वदेज्जा। एगे एवमाहंसु (३)। एगे पुण एवमाहंसु - ता तिण्णि जोयणाइं अद्धसगतालीसं च तेसीतिसते भागे जोयणस्स एगमेगेणं रातिंदिएणं [२]विकंपइत्ता २

१. विकंपावतित्ता २ - P, R, U। २. विकंपावइत्ता २ - P, R, U।

(सूरिए) चारं चरति आहिते ति वदेज्जा। एगे एवमाहंसु (४)। एगे पुण एवमाहंसु - ता अद्धुट्ठाइं जोयणाइं एगमेगे जाव वदेज्जा। एगे एवमाहंसु (५)। एगे पुण एवमाहंसु - चत्तारि चउभागूणाइं जोयणाइं एगमेगेणं रत्तिंदिएणं जाव आहिते ति वदेज्जा। एगे एव(माहंसु) (६)। एगे पुण एवमाहंसु - ता चत्तारि जोयणाइं अद्धबावण्णं च तेसीतिसतभागे जोयणस्स एगमेगेणं रातिंदिएणं [१]विकंपइत्ता २ सूरिए चारं चरति आहिए ति वदेज्जा। एगे एवमाहंसु (७)।

टी० 'तत्थ' इत्यादि। **तत्र** सूर्यविकम्पविषये **खल्विमाः सप्त प्रतिपत्तयः** परमतरूपाः **प्रज्ञप्तास्तद्यथा 'तत्थ एगे'** इत्यादि। **तत्र** तेषां सप्तानां प्रवादिनां मध्ये **एके एवमाहुः द्वे योजने** [२]अर्द्धः द्वाचत्वारिंशत्– द्वाचत्वारिंशत्तमो येषां ते अर्द्धद्वाचत्वारिंशतस्तान् सार्द्धैकचत्वारिंशत्सङ्ख्यानित्यर्थस्**त्र्यशीत्यधिकशत-भागान् योजनस्य,** किमुक्तं भवति ? त्र्यशीत्यधिकशतसङ्ख्यैर्भागैः प्रविभक्तस्य योजनस्य सम्बन्धिनो अर्द्धाधिकैकचत्वारिंशत्सङ्ख्यान् भागान्, **एकैकेन रात्रिन्दिवेन विकम्प्य २ सूर्यश्चारं चरति**। अत्रैवोपसंहारमाह – **'एगे एवमाहंसु १।' एके पुनर्द्वितीया एवमाहुरर्द्धतृतीयानि योजनानि एकैकेन रात्रिन्दिवेन विकम्प्य (२) सूर्यश्चारं चरति**। [३]अत्राप्युपसंहारः - **'एगे एवमाहंसु २।' एके पुनस्तृतीया एवमाहुस्त्रिभागोनानि त्रीणि योजनानि एकैकेन रात्रिन्दिवेन विकम्प्य २ सूर्यश्चारं चरति**। अत्रैवोपसंहारः **'एगे एवमाहंसु ३।' ए[गे](के) पुनश्चतुर्थास्तीर्थान्तरीया एवमाहुः त्रीणि योजनानि अर्द्धसप्तचत्वारिंशतश्च** सार्द्धषट्चत्वारिंशतश्चेत्यर्थः **त्र्यशीत्यधिकशतभागान् योजनस्य एकैकेन रात्रिन्दिवेन विकम्प्य २ सूर्यश्चारं चरति**। अत्रैवोपसंहारः **'एगे एवमाहंसु ४।' एके पुनः** पञ्चमा **एवमाहुरर्द्धचतुर्थानि योजनानि एकैकेन रात्रिन्दिवेन विकम्प्य**

---

१. विकंपावइत्ता - O,P,R,U। २. अर्द्धः द्वाचत्वारिंशत्तमो येषां - E। ३. अत्राप्युपसंहारमाह- E।

विकम्प्य सूर्यश्चारं चरति। [1]अत्रोपसंहारमाह **'एगे एवमाहंसु ५।' एके पुनः** षष्ठास्तीर्थान्तरीया **एवमाहुः चतुर्भागोनानि चत्वारि योजनानि एकैकेन रात्रिन्दिवेन विकम्प्य २ सूर्यश्चारं चरति।** अत्रोपसंहारवाक्यं **'एगे एवमाहंसु ६।' एके पुनः** सप्तमा **एवमाहुः चत्वारि योजनानि अर्द्धद्विपञ्चाशतश्च** सार्द्धैकपञ्चाशत्सङ्ख्यांश्च **त्र्यशीत्यधिकशतभागान् योजनस्य एकैकेन रात्रिन्दिवेन सूर्यो विकम्प्य २ चारं चरति।** अत्रोपसंहारः-**'एगे एवमाहंसु ७।'**

तदेवं मिथ्यारूपाः परप्रतिपत्तीरुपदर्श्य सम्प्रति स्वमतं भगवानुपदर्शयति–

मू० वयं पुण एवं वदामो-ता दो दो जोयणाइं अडयालीसं च एगट्ठिभागे जोयणस्स एगमेगे मंडले एगमेगेणं रातिंदिएणं [2]विकंपइत्ता २ सूरिए चारं चरति आहिए ति वदेज्जा।

टी० 'वयं पुण' इत्यादि। **वयं पुनरेवं** वक्ष्यमाणप्रकारेण केवलज्ञानोपलम्भपुरस्सरं **वदामो** यदुत [3]**द्वे द्वे योजने** [4]**अष्टचत्वारिंशतं चैकषष्टिभागान् योजनस्य एकैकेन रात्रिन्दिवेन सूर्यो** [5]**विकम्प्य २ चारं चरति** चारं चरन् **आख्यात इति वदेत्।**

साम्प्रतमस्यैव वाक्यस्य स्पष्टावगमनिमित्तं प्रश्नसूत्रमुपन्यस्यति –

मू० तत्थ णं के हेतू त्ति वदेज्जा ?

टी० 'तत्थ (णं) के हेतू' [इति वदेज्जा] (इत्यादि)। **तत्र** एवंविधवस्तुतत्त्वावगतौ **को हेतुः** का उपपत्तिः **इति वदेत्** भगवान्?

एवमुक्ते भगवानाह –

मू० ता अयण्णं जंबुद्दीवे २ जाव परिक्खेवेणं। ता जया णं सूरिए [6]सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तदा णं

---

१. अत्रोपसंहारः - E, H, T। २. विकंपावइत्ता २ - A, O, R, U। ३. द्वे योजने - A, B, C, D, E, F, G, I, J, K। ४. अष्टचत्वारिंशं - D, M, K, अष्टाचत्वारिंशं - G। ५. विकम्प्य चारं - D, M। ६. सव्वब्भंतरमंडलं - R।

[१]उत्तमकट्ठपत्ते अट्ठारसमुहुत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। से णिक्खममाणे सूरिए णवं संवच्छरं अयमाणे पढमंसी अहोरत्तंसि अब्भंतराणंतरं मंडलं उवसंकमित्ता चारं चरति। (ता जया णं सूरिए अब्भंतराणंतरं मंडलं उवसंकमित्ता चारं चरति) तता णं दो जोयणाइं अडयालीसं च एगट्ठिभागे जोयणस्स एगेणं रातिंदिएणं [२]विकंपइत्ता (२) चारं चरति। तता णं अट्ठारसमुहुत्ते दिवसे भवति दोहिं एगट्ठिभागमुहुत्तेहिं ऊणे दुवालसमुहुत्ता राती भवति दोहिं एगट्ठिभागमुहुत्तेहिं अहिया। से णिक्खममाणे सूरिए दोच्चंसि अहोरत्तंसि अब्भंतरं तच्चं मंडलं उवसंकमित्ता चारं चरति। ता जया णं सूरिए अब्भंतरं तच्चं मंडलं उवसंकमित्ता चारं चरति तता णं पंच जोयणाइं पणतीसं च एगट्ठिभागे जोयणस्स दोहिं राइंदिएहिं विकंप[ाव]इत्ता चारं चरति। तता णं अट्ठारसमुहुत्ते दिवसे भवति चउहिं एगट्ठिभाग(मुहुत्तेहिं) ऊणे दुवालसमुहुत्ता राती भवति चउहिं एगट्ठिभाग(मुहुत्तेहिं) अहिया। एवं खलु एतेणं उवाएणं णिक्खममाणे सूरिए ततणंतरातो ततणंतरं मंडलाओ मंडलं संकममाणे २ दो दो जोयणाइं अडयालीसं च एगट्ठिभागे जोयणस्स एगमेगे मंडले एगमेगेणं रातिंदिएणं विकंपमाणे वि २ सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति। ता जया णं सूरिए सव्वब्भंतराओ मंडलातो सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति तता णं सव्वब्भंतरं मंडलं पणिधाय एगेणं (तेसितेणं) रातिंदियसतेणं पंच दसुत्तरे जोयणसते विकंप[ाव]तित्ता चारं चरति। तता णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता राती भवति जहण्णए दुवालसमुहुत्ते दिवसे भवति।

१. उत्तमकट्ठपत्ते दिवसे - A, P, O। २. विकंपावइत्ता - R।

एस णं पढमे छम्मासे। एस णं [१]पढमस्स छम्मासस्स पज्जवसाणे। से पविसमाणे सूरिए दोच्चं छम्मासं अयमाणे पढमंसि अहोरत्तंसि बाहिराणंतरं मंडलं उवसंकमित्ता चारं चरति। (ता जया णं सूरिए बाहिराणंतरं मंडलं उवसंकमित्ता चारं चरति) तता णं दो जोयणाइं अडयालीसं च एगट्ठिभागे जोयणस्स एगेणं राइंदिएणं विकंप[ाव]इत्ता चारं चरति। तता णं अट्ठारसमुहुत्ता राती भवति दोहिं एगट्ठिभाग(मुहुत्तेहिं) ऊणा दुवालसमुहुत्ते दिवसे भवति दोहिं एगट्ठि(भागमुहुत्तेहिं) अहिए। से पविसमाणे सूरिए दोच्चंसि अहोरत्तंसि बाहिरं तच्चं (मंडलं) उवसंकमित्ता चारं चरति। ता जया णं सूरिए बाहिरं तच्चं मंडलं उवसंकमित्ता चारं चरति (तता णं पंच जोयणाइं पणतीसं च एगट्ठिभागे जोयणस्स दोहिं राइंदिएहिं विकंपइत्ता चारं चरति।) तता णं अट्ठारसमुहुत्ता राई भवति चउहिं एगट्ठिभागमुहुत्तेहिं ऊणा दुवालसमुहुत्ते दिवसे भवति चउहिं एगट्ठिभा[गेहिं](गमुहुत्तेहिं) अहिए। एवं खलु एतेणं उवाएणं पविसमाणे सूरिए तयणंतराओ तयणंतरं मंडलातो मंडलं संकममाणे२ दो दो जोयणाइं अडयालीसं च एगट्ठिभागे जोयणस्स एगमेगे मंडले एगमेगेणं रातिंदिएणं विकंपमाणे वि२ सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति। ता जता णं सूरिए सव्वबाहिरातो मंडलातो सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं सव्वबाहिरं मंडलं पणिहाय एगेणं तेसीतेणं रातिंदियसतेणं पंच दसुत्तरे जोयणसते विकंपइत्ता चारं चरति। तता णं उत्तमकट्ठपत्ते (अट्ठारसमुहुत्ते) दिवसे भवति जहण्णिया दुवालसमुहुत्ता राई भवति। एस णं दोच्चे छम्मासे। एस

१. पढमछम्मासस्स - A।

णं दोच्चस्स छम्मासस्स पज्जवसाणे। एस णं आदिच्चे संवच्छरे। एस णं आदिच्चस्स संवच्छरस्स पज्जवसाणे।६।

छट्ठं (पाहुडपाहुडं ६।)

टी० '**ता अयण्ण**'मित्यादि। इदं जम्बूद्वीपवाक्यं पूर्ववत् परिपूर्णं पठनीयं व्याख्यानीयञ्च। '**ता जया ण**'मित्यादि। **तत्र यदा सूर्यः सर्वाभ्यन्तर-मण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्तः** परमप्रकर्षप्राप्त उत्कर्षक उत्कृष्टोऽष्टादशमुहूर्त्तो **दिवसो भवति जघन्या** च **द्वादशमुहूर्त्ता रात्रिर्भवति। 'से निक्खममाणे'** इत्यादि। ततः सर्वाभ्यन्तरान्मण्डला**न्निष्क्रामन् सूर्यो नवं संवत्सरमाददानो** नवस्य संवत्सरस्य **प्रथमेऽहोरात्रे 'अब्भंतराणंतरं'** त्ति सर्वाभ्यन्तरस्य मण्डलस्या**नन्तरं** बहिर्भूतं [१]द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरति। 'ता जया ण**'मित्यादि। **तत्र यदा** तस्मिन् नवसंवत्सरसत्के प्रथमेऽहोरात्रे [२]सर्वा**भ्यन्तरानन्तरं** द्वितीयं **मण्डलमुपसङ्क्रम्य सूर्यश्चारं चरति** चारं चरितुमारभते **तदा 'ण**'मिति प्राग्वत् **द्वे योजने अष्टाचत्वारिंशतं च एकषष्टिभागान् योजनस्य एकेन रात्रिन्दिवेन** पाश्चात्येनाहोरात्रेण **विकम्प्य २ चारं चरति**। इयमत्र भावना-सर्वाभ्यन्तरे मण्डले प्रविष्टः सन् प्रथमक्षणादूर्द्ध्वं शनैः शनैस्तदनन्तरं द्वितीयमण्डलाभिमुखं तथाकथञ्चनमण्डलगत्या परिभ्रमति यथा तस्याहोरात्रस्य पर्यन्ते सर्वाभ्यन्तरमण्डलगतान् अष्टाचत्वारिंशतमेकषष्टिभागान् योजनस्यापरे च द्वे योजने अतिक्रान्तो भवति। ततो द्वितीयेऽहोरात्रे प्रथमक्षण एव द्वितीयमण्डलमुपसम्पन्नो भवति, तत उक्तं '**तया णं दो जोयणाइं अडयालीसं च एगट्ठिभागे जोयणस्स एगेणं राइंदिएणं विकंपइत्ता सूरिए चारं चरति।' त[ा ज]या ण**'मित्यादि। **तदा** सर्वाभ्यन्तरानन्तरद्वितीयमण्डलचारचरणकाले '**ण**'मिति पूर्ववत् **अष्टादशमुहूर्त्तो दिवसो भवति द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामूनः द्वादशमुहूर्त्ता रात्रिः द्वाभ्यां**

१. द्वितीयमण्डल - D, G, K। २. सर्वाभ्यन्तरानन्तरद्वितीयं - D।

मुहूर्त्तैकषष्टिभागाभ्यामधिका। तस्मिन्नपि द्वितीयमण्डले प्रथमक्षणादूर्द्ध्वं तथा कथञ्चनाऽपि तृतीयमण्डलाभिमुखं मण्डलपरिभ्रमणगत्या चारं चरति यथा तस्याहोरात्रस्य पर्यन्ते द्वितीयमण्डलगतान[१]ष्टाचत्वारिंशतमेकषष्टिभागान् [२]योजनस्यापरे च तद्बहिर्भूते द्वे योजने अतिक्रान्तो भवति। ततो नवसंवत्सरस्य द्वितीयेऽहोरात्रे प्रथमक्षण एव [३]तृतीयं मण्डलमुपसङ्क्रामति। तथा चाह **'से निक्खममाणे'** इत्यादि। **स सूर्यो** द्वितीयान्मण्डलात्प्रथमक्षणादूर्द्ध्वं शनैः शनै**र्निष्क्रामन्** बहिर्मुखं परिभ्रमन् नवसंवत्सरसत्के **द्वितीयेऽहोरात्रे 'अब्भं[४]तरं तच्चं'**ति सर्वाभ्यन्तरान्मण्डला**त्तृतीयमण्डलमुपसङ्क्रम्य चारं चरति**। तदा द्वाभ्यां रात्रिन्दिवाभ्यां यावत्प्रमाणं क्षेत्रं विकम्प्य चारं चरति तावन्निरूपयितुमाह– **'ता जया ण'**मित्यादि। **तत्र यदा सूर्यः** सर्वाभ्यन्तरान्मण्डला**त्तृतीयं [५]मण्डलमुपसङ्क्रम्य चारं चरति तदा द्वाभ्यां रात्रिन्दिवाभ्यां** सर्वाभ्यन्तरमण्डलगत-तदनन्तरद्वितीयमण्डलगताभ्यां **पञ्च योजनानि पञ्चत्रिंशतं च एकषष्टिभागान् योजनस्य विकम्प्य,** तथाह्येकेनाप्यहोरात्रेण द्वे योजनेऽष्टाचत्वारिंशच्च योजनस्यैकषष्टिभागा विकम्पिता द्वितीयेनाप्यहोरात्रेण तत उभयमीलने यथोक्तं विकम्पपरिमाणं भवति, एतावन्मात्रं विकम्प्य **चारं चरति**। **'तया ण'**मित्यादि रात्रिन्दिवपरिमाणं सुगमम्। सम्प्रति शेषमण्डलेषु गममाह – **'एवं खलु'** इत्यादि। **एव**मुक्तेन प्रकारेण **खलु** निश्चित**मेतेनोपायेन** तत्तन्मण्डलप्रवेशप्रथमक्षणादूर्द्ध्वं शनैः शनैः तत्तद्बहिर्भूतमण्डलाभिमुखगमनरूपेण तस्मात्तस्मान्मण्डला**न्निष्क्रामन् (सूर्यः) तदनन्तरान्मण्डलात्तदनन्तरं मण्डलं सङ्क्रामन्** (२) **एकैकेन रात्रिन्दिवेन द्वे द्वे योजने अष्टचत्वारिंशतं चैकषष्टिभागान् योजनस्य विकम्पयन्** २ प्रथमषण्मासपर्यवसानभूते त्र्यशीत्यधिकशततमेऽहोरात्रे **सर्वबाह्यं मण्डलमुपसङ्क्रम्य चारं**

---

१. ...नष्टचत्वा... - T। २. योजनस्य परे - ।। ३. तृतीयमण्डल... - D। ४. अब्भंतरतच्चं - D। ५. ... तृतीयमण्डल... - T।

चरति। **'ता जया ण'**मित्यादि सुगमम्। **'तया ण'**मित्यादि। **तदा सर्वाभ्यन्तरं मण्डलं प्रणिधाया**ऽवधीकृत्य तद्गतमहोरात्रमादिं कृत्वा इत्यर्थः **त्र्यशी[त्ये](ते)न** त्र्यशीत्यधिकेन **रात्रिन्दिवशतेन पञ्च दशोत्तराणि योजनशतानि विकम्प्य,** तथाह्येकैकस्मिन्नहोरात्रे द्वे द्वे योजने अष्टचत्वारिंशतं चैकषष्टिभागान् योजनस्य विकम्पयति, ततो द्वे योजने त्र्यशीत्यधिकेन शतेन गुण्येते, जातानि त्रीणि शतानि षट्षष्ट्यधिकानि ३६६, येऽपि चाष्टाचत्वारिंशदेकषष्टिभागा(ग्रन्थाग्रं १,०००)स्तेऽपि [१]त्र्यशीत्यधिकेन शतेन गुण्यन्ते, जातानि सप्ताशीतिशतानि चतुरशीत्यधिकानि ८,७८४। तेषां योजनानयनार्थमेकषष्ट्या भागो ह्रियते, लब्धं चतुश्चत्वारिंशदधिकं योजनशतं १४४। एतत् पूर्वस्मिन् योजनराशौ प्रक्षिप्यते, जातानि पञ्च शतानि दशोत्तराणि ५१०। एतावत्प्रमाणं विकम्प्य **चारं चरति**। **'तया ण'**मित्यादि रात्रिन्दिवसपरिमाणं सुगमम्। सर्वबाह्ये च मण्डले प्रविष्टः सन् प्रथमक्षणादूर्द्ध्वं शनैः शनैः अभ्यन्तरं सर्वबाह्यानन्तरं द्वितीयमण्डलाभिमुखं तथाकथञ्चनापि मण्डलगत्या परिभ्रमति येन प्रथमषण्मासपर्यवसानभूताहोरात्रपर्यवसाने सर्वबाह्यमण्डलगतानष्टाचत्वारिंशतमेकषष्टिभागान्योजनस्यापरे च द्वे योजने अतिक्रम्य सर्वबाह्यानन्तरद्वितीयमण्डलसीमायां वर्त्तते। ततोऽनन्तरे द्वितीयस्य षण्मासस्य प्रथमेऽहोरात्रे प्रथमक्षणे सर्वबाह्यानन्तरं द्वितीयमनन्तरं[२] मण्डलं प्रविशति। तथा चाह — **'से पविसमाणे'** इत्यादि। **स सूर्यः** सर्वबाह्यान्मण्डलादुक्तप्रकारेणाभ्यन्तरं **प्रविशन् द्वितीयं षण्मासमाददानो** द्वितीयषण्मासस्य **प्रथमेऽहोरात्रे 'बाहिराणंतरं'** ति [३]सर्वबाह्यमण्डलस्याभ्यन्तरं द्वितीय**मण्डलमुपसङ्क्रम्य चारं चरति**। **'ता जया ण'**मित्यादि। **'ता'** इति **तत्र यदा सूर्यो बाह्याऽनन्तरं सर्वबाह्यान्मण्डलादनन्तरमभ्यन्तरं** द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरति तदा एकेन रात्रिन्दिवेन** सर्वबाह्यमण्डलगतेन प्रथमषण्मासपर्यवसानभूतेन **द्वे योजनेऽष्टाचत्वारिंशतं च**

१. त्र्यशीत्यधिकशतेन - N। २. ....नन्तरमण्डलं - T। ३. सर्वबाह्यस्य मण्डलस्या... - T।

एकषष्टिभागान् योजनस्य विकम्प्य, एतच्चानन्तरमेव भावितं, **चारं चरति** चारं प्रतिपद्यते। **'तया ण'**मित्यादि रात्रिन्दिवपरिमाणं[१] तु सुगमम्। **'से पविसमाणे'** इत्यादि। **स सूर्यः** सर्वबाह्यानन्तराभ्यन्तरद्वितीयमण्डलादपि प्रथमक्षणादूर्द्ध्वं शनैः शनैरभ्यन्तरं **प्रविशन्** द्वितीयषण्मासस्य **द्वितीयेऽहोरात्रे** [२]**'बाहिरं तच्चं'** ति सर्वबाह्यस्य मण्डलस्याभ्यन्तरं **तृतीयं (मण्डल)मुपसङ्क्रम्य चारं चरति**। **'ता जया ण'**मित्यादि। **तत्र यदा सूर्यः** सर्वबाह्यान्मण्डलादभ्यन्तरं **तृतीयं मण्डलमुपसङ्क्रम्य चारं चरति तदा द्वाभ्यां रात्रिन्दिवाभ्यां** सर्वबाह्यमण्डलगतसर्वबाह्याऽनन्तरद्वितीयमण्डलगताभ्यां **पञ्च योजनानि पञ्चत्रिंशतं चैकषष्टिभागान् योजनस्य विकम्प्य,** तथाह्येकेनाप्यहोरात्रेण (प्रथम)षण्मासपर्यवसानभूतेन द्वे योजनेऽष्टाचत्वारिंशतं चैकषष्टिभागान् योजनस्य विकम्पयति द्वितीयेनाप्यहोरात्रेण द्वितीयषण्मासप्रथमेन, तत उभयमीलने यथोक्तं विकम्पपरिमाणं भवति, (एतावत्प्रमाणं विकम्प्य चारं चरति)। **'तया ण'**मित्यादि रात्रिन्दिवपरिमाणं सुगमम्। **'एवं खलु एएणं उवाएणं पविसमाणे'** इत्यादिसूत्रं प्रागुक्तसूत्रानुसारेण स्वयं परिभावनीयम्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य षष्ठं प्राभृतप्राभृतं समाप्तम्।

* * * * *

यः परवादे मूकः, परनारीवक्त्रवीक्षणेऽप्यन्धः।
पङ्गुः परधनहरणे, स जयति लोके महापुरुषः।।

---

१. .....परिमाणं सुगमम् - A। २. बाहिरतच्चं - T।

सप्तमं प्राभृतप्राभृतम्

तदेवमुक्तं षष्ठं प्राभृतप्राभृतम्। सम्प्रति सप्तममारभ्यते। तस्य चायमर्थाधिकारः पूर्व्वमुद्दिष्टो – यथा मण्डलानां चन्द्रादिविमानरूपाणां संस्थानं वक्तव्यमिति। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते मंडलसंठिती आहिया ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत् **कथं** केन प्रकारेण भगवन्! **ते** त्वया मण्डल**संस्थितिराख्याता इति** भगवान् **वदेत्** ?

एवं भगवता गौतमेन प्रश्ने कृते सति [१]एतद्विषयपरतीर्थिकप्रतिपत्तीनां मिथ्याभावोपदर्शनार्थं प्रथमतस्ता एवोपदर्शयति –

मू० तत्थ खलु इमातो अट्ठ पडिवत्तीओ पण्णत्ताओ- तत्थेगे एवमाहंसु ता समचउरंससंठिया णं मंडलसंठिती आहिय त्ति वदेज्जा। एगे एवमाहंसु १। एगे पुण एवमाहंसु ता विसमचउरंससंठिया णं मंडलसंठिती आहिता ति वदेज्जा। एगे एवमाहंसु २। एगे पुण एवमाहंसु ता समचउक्कोणसंठिया णं मंडलसंठिती आहिता ति वदेज्जा। एगे (एवमाहंसु) ३। एगे पुण एवमाहंसु ता विसमचउक्कोणसंठिता णं मंडलसंठिती आहिता ति वदेज्जा। एगे एव(माहंसु)४। एगे पुण एवमाहंसु ता समचक्कवालसंठिता णं (मंडलसंठिती) आहिता ति वदेज्जा। एगे एव(माहंसु ५)। एगे पुण एवमाहंसु ता विसमचक्कवालसंठिता णं मंडलसंठिती आहिता ति वदेज्जा। एगे एव(माहंसु ६)। एगे पुण एवमाहंसु ता चक्कद्ध-चक्कवालसंठिता णं (मंडलसंठिती) आहिता ति वदेज्जा। एगे

---

१. एतद्विषयतीर्थिक... B, K, L।

एवमाहंसु ७। एगे पुण एवमाहंसु ता छत्तागारसंठिता णं मंडलसंठिती आहिता त्ति वदेज्जा। (एगे एवमाहंसु ८)।

टी० '**तत्थ खलु**' इत्यादि। **तत्र** तस्यां मण्डलसंस्थितौ विषये **खल्विमा**[१] वक्ष्यमाणरूपा **अष्टौ प्रतिपत्तयः प्रज्ञप्तास्तद्यथा तत्र** तेषामष्टानां परतीर्थिकानां मध्ये **एके** प्रथमास्तीर्थान्तरीया **एवमाहुः** '**ता**' इति तेषामेव तीर्थान्तरीयाणामनेकवक्तव्यतोपक्रमोपदर्शनार्थः '**समचउरंससंठिया णं मंडलसंठिई आहिय त्ति वएज्जा**' इति **समचतुरस्रसंस्थानसंस्थिता** '**ण**'मिति वाक्यालङ्कारे **मण्डलसंस्थितिः** मण्डलसंस्थानं चन्द्रसूर्यविमानसंस्थितिरिति भावः, **आख्याता इति वदेत्**, अत्रोपसंहारः '**एगे एवमाहंसु।**' एवं सर्वाण्युपसंहारवाक्यानि भावनीयानि १। **एके पुनर्द्वितीया एवमाहुर्विषमचतुरस्रसंस्थिता मण्डलसंस्थितिराख्याता इति वदेत्** २। (**एके**) तृतीयाः **पुनरेवमाहुः समचतुःकोणसंस्थिता मण्डलसंस्थितिराख्याता इति वदेत्** ३। **एके पुनश्चतुर्था एवमाहु-र्विषमचतुःकोणसंस्थिता मण्डलसंस्थितिराख्याता इति वदेत्** ४। **एके** पञ्चमाः **पुनरेवमाहुः समचक्रवालसंस्थिता मण्डलसंस्थितिराख्याता इदि वदेत्** (५)। **एके पुनः**[२] षष्ठा **एवं आहुर्विषमचक्रवालसंस्थिता मण्डलसंस्थितिराख्याता**[३] **इति वदेत्** (६)। **एके पुनः** सप्तमा **एवमाहुश्चक्रार्द्धचक्रवालसंस्थिता मण्डलसंस्थितिराख्याता इति वदेत्** (७)। (**एके**) अष्टमा **पुनरेवमाहुः छत्राकारसंस्थिता** उत्तानीकृतछत्राकारसंस्थिता **मण्डलसंस्थितिराख्याता इति वदेत्** (८)।

मू० तत्थ जे ते एवमाहंसु ता छत्तागारसंठिता णं मंडलसंठिती आहिय (त्ति वदेज्जा) एएणं णएणं णेयव्वं, णो चेव णं इयरेहिं।

सत्तमं पाहुडपाहुडं समत्तं ७।

टी० '**तत्थ**' इत्यादि। **तत्र** तेषामष्टानां तीर्थान्तरीयाणां मध्ये **ये**

---

१. वक्ष्यमाणस्वरूपा - B, K, L, M। २. षष्ठा आहु... - I, B, K। ३. इति। - B, K।

एवमाहुश्छत्राकारसंस्थिता मण्डलसंस्थितिराख्याता[१] इति **एतेन नयेन,** (न)यो नाम प्रतिनियतैकवस्त्वंशविषयोऽभिप्रायविशेषो, यदाहुः **समन्तभद्रादयो 'नयो ज्ञातुरभिप्रायः'** ( ) इति। तत एतेन नयेन-एतेनाऽभिप्रायविशेषेण स्वमतेऽपि **ज्ञातव्यं,** चन्द्रादिविमानानां तत्त्वत उत्तानीकृतकपित्थार्द्धसंस्थानसंस्थितत्वात्। **न चैव** नैव **इतरैः** शेषैर्नयैः, तथावस्तुतत्त्वाऽभावात्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य सप्तमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

न हु होइ सोइअव्वो, जो कालगओ दढं समाहीए।
सो होइ सोइअव्वो, तवसंजमदुब्बलो जो उ।।

अन्नाणं खलु कट्टं, अन्नाणाओ न किंचि कट्टयरं।
भवसायरं अपारं, जेणावरिआ भमंति जिआ।।

सव्वट्ठसिद्धिवासी, देवा निवडंति आउए जिण्णे।
तेत्तीससागराऊ, का गणणा इयरजीवेसु।।

---

१. इति वदेत् एतेन - H।

अष्टमं प्राभृतप्राभृतम्

तदेवमुक्तं सप्तमं प्राभृतप्राभृतम्। साम्प्रतमष्टममारभ्यते। तस्य चायमर्थाधिकारः - मण्डलानां विष्कम्भो वक्तव्यः। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता सव्वा वि णं मंडलवता केवतियं बाहल्लेणं केवतियं आयामविक्खंभेणं केवतियं परिक्खेवेणं आहिते ति वदेज्जा?

टी० 'ता सव्वा वि णं मंडलवया' इत्यादि। **'ता'** इति पूर्ववत् **सर्वाण्यपि मण्डलपदानि** मण्डलरूपाणि पदानि मण्डलपदानि [१]सूर्यविमानस्थानानीत्यर्थः **कियन्मात्रं बाहल्येन कियत् आयामविष्कम्भाभ्यां कियत्परिक्षेपेण** परिधिना **आख्यातानि इति वदेत्**? सूत्रे स्त्रीत्वनिर्देशः प्राकृतत्वात्, प्राकृते हि लिङ्गं व्यभिचारि, यदाह पाणिनिः स्वप्राकृतलक्षणे – **'लिङ्गं व्यभिचार्यपी'**ति।

एवं भगवता गौतमेन प्रश्ने कृते सति भगवान् एतद्विषयपरतीर्थिकप्रतिपत्तीनां मिथ्याभावोपदर्शनाय प्रथमतस्ता एवोपन्यस्यति –

मू० तत्थ खलु इमातो तिण्णि पडिवत्तीओ (पण्णत्ताओ) - तत्थ एगे एवमाहंसु ता सव्वा वि णं मंडलवता जोयणं बाहल्लेणं एगं जोयणसहस्सं एगं च तेत्तीसं जोयणसयं आयामविक्खंभेणं तिण्णि जोयणसहस्साइं तिण्णि य णवणउए जोयणसते परिक्खेवेणं आहियत्ति वएज्जा। एगे एव(माहंसु १)। एगे पुण एवमाहंसु ता सव्वा वि णं मंडलवता जोयणं बाहल्लेणं एगं जोयणसहस्सं एगं च चोत्तीसं जोयणसतं आयामविक्खंभेणं तिण्णि जोयणसहस्साइं चत्तारि य बिउत्तरे जोयणसते परिक्खेवेणं आहिया, एगे एव(माहंसु २)। एगे पुण एव(माहंसु) ता सव्वा वि णं मंडलवता जोयणं बाहल्लेणं एगं च जोयणसहस्सं एगं च पणतीसं जोयणसयं

१. सूर्यविमानास्थानानीत्यर्थः - E, K।

आयामविक्खंभेणं तिण्णि जोयणसहस्साइं चत्तारि य पंचुत्तरे जोयणसते परिक्खेवेणं आहिये। एगे एवमाहंसु (३)।

टी० '**तत्थ खलु**' इत्यादि। **तत्र** मण्डलबाहल्यादिविचारविषये **खल्विमास्तिस्रः प्रतिपत्तयः प्रज्ञप्तास्तद्यथा** – **तत्र** तेषां त्रयाणां परतीर्थिकानां मध्ये **एके** तीर्थान्तरीया **एवमाहुः** '**ता**' इति प्राग्वत् **सर्वाण्यपि मण्डलपदानि** सूर्यमण्डलानि '**जोयणं बाहल्लेणं**' ति प्रत्येकं **योजन**[सहस्रं ए](**मे**)**कं बाहल्येन** पिण्डेन **एकं योजनसहस्रमेकञ्च त्रयस्त्रिंशं**-त्रयस्त्रिंशदधिकं **योजनशतं आयाम-विष्कम्भाभ्यां** '**आयामविक्खभेणं**'ति आयामश्च विष्कम्भश्च आयामविष्कम्भं समाहारो द्वन्द्वस्तेन प्रत्येकमायामेन विष्कम्भेन चेत्यर्थः **त्रीणि योजनसहस्राणि त्रीणि च नवनवतानि योजनशतानि परिक्षेपतः** प्रज्ञप्तानि। इह येषां तीर्थान्तरीयाणां मतेन मण्डलस्यायामविष्कम्भावेकयोजनसहस्रमेकं च योजनशतं त्रयस्त्रिंशदधिकमायामविष्कम्भाभ्यां ते परिरयपरिमाणं वृत्त(विष्कम्भ)परिमाणात्त्रि-गुणमेव परिपूर्णमिच्छन्ति न विशेषाधिकमतस्त्रीणि योजनसहस्राणि त्रीणि शतानि नवनवतानीत्युक्तं, तथाहि सहस्रस्य त्रीणि सहस्राणि शतस्य त्रीणि शतानि त्रयस्त्रिंशतश्च नवनवतिरिति। इदं च परिरयपरिमाणं '**विक्खंभवग्गदहगुणकरणी वट्टस्स परिरयो होइ**' (**बृहत्क्षेत्रसमासः ७**) इति परिरयगणितेन व्यभिचारि, ततो हि परिरयपरिमाणानयने त्रीणि योजनसहस्राणि पञ्च शतानि द्व्यशीत्यधिकानि किञ्चित्समधिकानि भवन्ति, तथाह्येकं योजनसहस्रमेकञ्च योजनशतं त्रयस्त्रिंशद-धिकमित्येकादशशतानि त्रयस्त्रिंशदधिकानि १,१३३ तेषाञ्च वर्ग्गो विधीयते, जाता एकको द्विकोऽष्टकस्त्रिकः षट्को अष्टको नवकः १२,८३,६८९, ततो दशभिर्[1]गुणिते जातमेकमधिकं शून्यं १,२८,३६,८९०, एतेषां वर्ग्गमूलानयने आगच्छति यथोक्तं परिरयपरिमाणमतस्तन्मतेन परिरयपरिमाणं व्यभिचारि। एवमुत्तरमपि मतद्वयं

१. दशभिर्गुणने - F, K।

परिभावनीयम्। अत्रैव प्रथममते उपसंहारः **'एगे एवमाहंसु १।' एके पुनरेवमाहुः सर्वाण्यपि** [१]**सूर्यमण्डलानि** प्रत्येकमेकं **योजनं बाहल्येन एकं** [२]**योजनसहस्रमेकं योजनशतं चतुस्त्रिंशदधिकमायामविष्कम्भाभ्यां** १,१३४ **त्रीणि योजनसहस्राणि चत्वारि योजनशतानि द्व्युत्तराणि** ३,४०२ **परिक्षेपतस्तथाह्येतेषामपि** मतेन विष्कम्भपरिमाणात् परिरयपरिमाणं परिपूर्णं त्रिगुणरूपम्। ततः सहस्रस्य त्रीणि सहस्राणि शतस्य त्रीणि शतानि चतुस्त्रिंशतो [३]द्व्युत्तरं शतमिति। अत्रैवोपसंहारः **'एगे एवमाहंसु २।' एके पुनरेवमाहुः सर्वाण्यपि मण्डलपदानि** सूर्यमण्डलानि प्रत्येकमेकं **योजनं बाहल्येन एकं योजनसहस्रमेकं च** [४]**योजनशतं पञ्चत्रिंश**-पञ्चत्रिंशदधिकं योजनशत**मायामविष्कम्भाभ्यां** १,१३५, **त्रीणि योजनसहस्राणि चत्वारि योजनशतानि पञ्चोत्तराणि** ३,४०५ **परिक्षेपतस्तथाहि** एकस्य योजन-सहस्रस्य त्रीणि योजनसहस्राणि शतस्य त्रीणि योजनशतानि पञ्चत्रिंश[त्](तः) [५]पञ्चोत्तरशतमिति।

एतानि च त्रीण्यपि मतानि मिथ्यारूपाणि, परिरयपरिमाणमात्रेऽपि[६] व्यभिचारात्। अतो भगवानेतेभ्यः पृथक्स्वमतमुपदर्शयति –

मू० वयं पुण एवं वदामो ता सव्वा वि णं मंडलवता अडयालीसं एगट्ठिभागे जोयणस्स बाहल्लेणं, अणियया आयामविक्खंभपरिक्खेवेणं आहिया ति वदेज्जा।

टी० 'वयं पुण' [मि](इ)त्यादि। **वयं पुनरेवं** वक्ष्यमाणप्रकारेण **वदामस्तमेव** प्रकारमाह – **'ता सव्वा वी'**त्यादि। **'ता'** इति पूर्ववत् **सर्वाण्यपि मण्डलपदानि** सूर्यमण्डलानि प्रत्येकं **बाहल्येनाष्टाचत्वारिंशदेकषष्टिभागा योजनस्यायाम-**

---

१. मंडलवता - मूले। २. योजनसहस्रमेकं च - D, F, K, T। ३. द्व्युत्तरशतमिति - T। ४. योजनशतं पञ्चत्रिंशदधिकं ... D, G। ५. पञ्चोत्तरं शत.... - A, D, G। ६. ... मात्रे व्यभि... T।

विष्कम्भपरिक्षेपेण आयामविष्कम्भपरिक्षेपैः पुनर**नियता(नि)** व्याख्यातानि[१] कस्यापि मण्डलस्य कियान् आयामो विष्कम्भः परिक्षेपश्चेति भाव **इति** स्वशिष्येभ्यो **वदेत्**।

एवमुक्ते भगवान् गौतमः पृच्छति –

मू० तत्थ णं के हेतू त्ति वदेज्जा?

टी० **'तत्थ णं के हेतू त्ति वएज्जा?' तत्र** मण्डलपदानामायामविष्कम्भ-परिक्षेपाऽनियतत्वे **को हेतुः** का उपपत्तिः **इति वदेत्** ?

अत्र भगवानाह –

मू० ता अयण्णं जंबुद्दीवे २ जाव परिक्खेवेणं। ता जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं सा मंडलवता अडयालीसं एगट्ठिभागे जोयणस्स बाहल्लेणं णवणउतिं जोयणसहस्साइं छच्च चत्ताले जोयणसते आयामविक्खंभेणं तिण्णि जोयणसयसहस्साइं पण्णरसजोयणसहस्साइं एगूणणउतिं च जोयणे परिक्खेवेणं। तता उत्तमकट्ठपत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। से णिक्खममाणे सूरिए णवं संवच्छरं अयमाणे पढमंसि अहोरत्तंसि अब्भंतराणंतरं मंडलं उवसंकमित्ता चारं चरति। ता जता णं सूरिए अब्भंतराणंतरं मंडलं उवसंकमित्ता चारं चरति तता णं सा मंडलवता अडयालीसं एगट्ठिभागे जोयणस्स बाहल्लेणं णवणउतिं जोयणसहस्साइं छच्च पणयाले जोयणसए पणतीसं च एगट्ठिभागे जोयणस्स आयामविक्खंभेणं, तिण्णि जोयणसयसहस्साइं पनरससहस्साइं एगं च सत्तुत्तरं जोयणसतं परिक्खेवेणं। तता णं अट्ठारसमुहुत्ते दिवसे भवति दोहिं एगट्ठिभाग-

१. आहिया - मूले।

मुहुत्तेहिं ऊणे दुवालसमुहुत्ता राती भवति दोहिं (एगट्ठिभागमुहुत्तेहिं) अहिया। से णिक्खममाणे सूरिए दोच्चंसि अहोरत्तंसि अब्भंतरं तच्चं मंडलं उवसंकमित्ता चारं चरति। ता जया णं सूरिए जाव चारं चरति तता णं सा मंडलवता अडयालीसं एगट्ठिभागे जोयणस्स बाहल्लेणं णवणउतिं जोयणसहस्साइं छच्च एक्कापन्ने जोयणसते णव य एगट्ठिभागे जोयणस्स आयामविक्खंभेणं तिण्णि जोयणसय-सहस्साइं पन्नरससहस्साइं एगं च पणवीसं जोयणसतं परिक्खेवेणं। तया अट्ठारसमुहुत्ते दिवसे भवति चउ(हिं एगट्ठिभागमुहुत्तेहिं) ऊणे दुवालसमुहुत्ता राती भवति चउहिं (एगट्ठिभागमुहुत्तेहिं) अहिया। एवं खलु एएणं उवाएणं णिक्खममाणे २ सूरिए ततणंतराउ तयणंतरं मंडलाउ मंडलं संकममाणे २ पंच पंच जोयणाइं पणतीसं च एगट्ठिभागे जोयणस्स एगमेगे मंडले विक्खंभवुड्ढिं अभिवड्ढेमाणे २ अट्ठारसजोयणाइं परिरयवुड्ढिं अभिवड्ढेमाणे २ सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति। ता जया णं सूरिए सव्व जाव चारं चरति तता णं सा मंडलवता [1]अडयालीसं च एगट्ठिभागे जोयणस्स बाहल्लेणं एगं जोयणसहस्सं छच्च सट्ठे जोयणसते आयामविक्खंभे(णं) तिण्णि जोयणसयसहस्साइं अट्ठारससहस्साइं तिण्णि य पण्णरसुत्तरे जोयणसते परिक्खेवेणं। तता णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठार-समुहुत्ता राती भवति जहण्णए दुवालसमुहुत्ते दिवसे भवति। एस णं पढमे छम्मासे। एस णं जाव पज्जवसाणे। से पविसमाणे सूरिए दोच्चं छम्मासं अयमाणे पढमंसि अहोरत्तंसि बाहिराणंतरं मंडलं

---

१. अडयालीसं एगट्ठिभागे - R, U।

उवसंकमित्ता चारं चरति। ता जया णं सूरिए जाव चारं चरति तता णं सा मंडलवता अडयालीसं जाव बाहल्लेणं एगं जोयणसत-सहस्सं छ चउप्पण्णे जोयणसते छव्वीसं च एगट्ठिभागे जोयणस्स आयामविक्खंभेणं तिण्णि जोयणसयसहस्साइं अट्ठारससहस्साइं दोण्णि य सत्ताणउते जोयणसते परिक्खेवेणं। तता णं अट्ठारसमुहुत्ता राती भवति दोहिं (एगट्ठिभागमुहुत्तेहिं) ऊ[णे](णा) दुवालसमुहुत्ते दिवसे भवति दोहिं (एगट्ठिभागमुहुत्तेहिं) अहिए। से पविसमाणे सूरिए दोच्चंसि अहोरत्तंसि [१]बाहिरं तच्चं मंडलं उवसंकमित्ता चारं चरति। ता जया णं सूरिए बाहिरं जाव चारं चरति तता णं सा मंडलवता अडयालीसं एगट्ठि जाव बाहल्लेणं एगं जोयणसयसहस्सं छच्च अडयाले जोयणसते बावण्णं च एगट्ठिभागे जोयणस्स आयाम-विक्खंभेणं तिण्णि जोयणसयसहस्साइं अट्ठारस सहस्साइं दोण्णि य [२]अउणासीते जोयणसते परिक्खेवेणं। तता णं अट्ठारसमुहुत्ता राती भवति चउ(हिं एगट्ठिभागमुहुत्तेहिं) ऊणा दुवालसमुहुत्ते दिवसे भवति चउ(हिं एगट्ठिभागमुहुत्तेहिं) अहिए। एवं खलु एतेणं उवाएणं पविसमाणे सूरिए ततणंतरातो ततणंतरं मंडलातो मंडलं संकममाणे २ पंच जोयणाइं पणतीसं च एगट्ठिभागे जोयणस्स एगमेगे[णं] मंडले विक्खंभवु(ड्ढी)(ड्ढिं) निव्वेड्ढेमाणे २ अट्ठारसजोयणाइं परिरय-वुड्ढिं निव्वेड्ढेमाणे २ सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति। ता जया णं सूरिए सव्वब्भंतरं जाव चारं चरति तता णं सा मंडलवता अडयालीसं [३]एगट्ठिभागे जाव बाहल्लेणं नवनउतिं जोयणसहस्साइं छच्च चत्ताले जोयणसए आयामविक्खंभेणं तिण्णि जोयणसयसहस्साइं

१. बाहिरतच्चं - R। २. उणातीते - O, R। ३. एगट्ठि जाव - P।

पण्णरस य सहस्साइं अउणाणउतिं च जोयणे परिक्खेवेणं। तता णं उत्तम(कट्ठपत्ते) उक्कोसे दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। एस णं दोच्चे छम्मासे जाव एस णं आइच्चस्स संवच्छरस्स पज्जवसाणे। ता सव्वावि णं मंडलवता अडयालीसं एगट्ठिभागे जोयणस्स बाहल्लेणं। सव्वावि णं मंडलंतरिया दो जोयणाइं विक्खंभेणं। एस णं अद्धा तेसीतसतपडिपुण्णा पंच दसुत्तरे जोयणसते आहिय त्ति वदेज्जा। ता अब्भंतराए मंडलवयाते बाहिरा मंडलबाहा बाहिरा(ए) मंडलवयाए अब्भंतरा मंडलबाहा एस णं अद्धा पंच दसुत्तरे जोयणसते आहिया ति वदेज्जा। ता अब्भंतराए मंडलवयाए अब्भंतरा मंडलबाहा बाहिराए मंडलवयाए (बाहिरा मंडलबाहा) एस णं अद्धा पंच दसुत्तरे जोयणसते अडयालीसं च एगट्ठिभाए जोयणस्स आहिया (त्ति वदेज्जा)। ता अब्भंतराए मंडलवताए [बाहिरा](अब्भंतरा) मंडलबाहा बाहिराए मंडलवताए [अब्भंतर](बाहिरा) मंडलबाहा एस णं अद्धा पंच नवुत्तरे जोयणसते तेरस य एगट्ठिभागे जोयणस्स आहिता (ति वदेज्जा)। ता अब्भिंतराए मंडलवयाए अब्भिंतरा मंडलबाहा बाहिराए मंडलवयाए (बाहिरा मंडलबाहा) एस णं अद्धा पंच दसुत्तरे जोयणसते आहिता ति वदेज्जा।

अट्ठमं पाहुडपाहुडं समत्तं।

पढमं पाहुडं समत्तं।

टी० '**ता अयण्ण**'मित्यादि। इदं जम्बूद्वीपवाक्यं पूर्ववत् परिपूर्णं स्वयं पठनीयं व्याख्यानीयञ्च। '**ता जया ण**'मित्यादि। **तत्र यदा** '**ण**'मिति वाक्यालङ्कारे **सूर्यः**

[१]**सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य चारं चरति तदा तन्मण्डलपदं** सूत्रे स्त्रीत्वनिर्देशः प्राकृतत्वात् **बाहल्येनाष्टाचत्वारिंशदेकषष्टिभागा योजनस्य** ज्ञातव्यम्। **आयामविष्कम्भाभ्यां नवनवतियोजनसहस्राणि षट्शतानि चत्वारिंशदधिकानि** ९९,६४०, तथाह्येकतोऽपि [२]सर्वाभ्यन्तरं मण्डलमशीत्यधिकं योजनशतं जम्बूद्वीपमवगाह्य स्थितमप[रो](रतो)ऽपि, ततोऽशीत्यधिकं योजनशतं द्वाभ्यां गुण्यते, जातानि त्रीणि शतानि षष्ट्यधिकानि ३६०, एतानि जम्बूद्वीपविष्कम्भपरिमाणरूपात् शोध्यन्ते, ततो यथोक्तमायामविष्कम्भपरिमाणं भवति। **त्रीणि योजनशतसहस्राणि पञ्चदशसहस्राणि एकोननवत्यधिकानि** ३,१५,०८९ [३]**परिक्षेपतस्तथाहि** तस्य सर्वाभ्यन्तरमण्डलस्य विष्कम्भो नवनवतियोजनसहस्राणि षट्शतानि चत्वारिंशदधिकानि ९९,६४०। एतेषां वर्गो विधीयते। जातो नवको नवको द्विकोऽष्टक एकको द्विको नवकः षट्को द्वे च शून्ये ९,९२,८१,२९,६००। ततो दशभिर्गुणने जातमेकमधिकं शून्यं ९९,२८,१२,९६,०००। [४]अस्य च वर्गमूलानयने लब्धं यथोक्तं परिरयपरिमाणम्। शेषं यत्तिष्ठति द्विकक एककोऽष्टकः शून्यं सप्तको नवकः २,१८,०७९ एतत्त्यक्तम्। **'[५]तया ण'**मित्यादिना रात्रिन्दिवपरिमाणं सुगमम्। **'से निक्खममाणे'** इत्यादि। **स सूर्यः** सर्वाभ्यन्तरान्मण्डलात्प्रागुक्तप्रकारेण **निष्क्रामन् नवं संवत्सरमाददानो** नवस्य संवत्सरस्य **प्रथमेऽहोरात्रे** सर्वाभ्यन्तरानन्तरं द्वितीय**मण्डलमुपसङ्क्रम्य चारं चरति। तत्र यदा** सर्वाभ्यन्तरानन्तरं द्वितीयं **मण्डलमुपसङ्क्रम्य सूर्यश्चारं चरति तदा तन्मण्डलपदमष्टाचत्वारिंशदेकषष्टिभागा योजनस्य बाहल्येन नवनवतियोजनसहस्राणि षट्शतानि पञ्चचत्वारिंशदधिकानि पञ्चत्रिंशच्चैकषष्टिभागा योजनस्यायामविष्कम्भाभ्यां,** तथाह्येकोऽपि सूर्यः सर्वाभ्यन्तरमण्डलगतान् अष्टाचत्वारिंशतमेकषष्टिभागान् योजनस्यापरे च द्वे

---

१. सर्वाभ्यन्तरमण्डल..... - D। २. सर्वाभ्यन्तरमण्डल - A, G, T। ३. परिक्खेवेणं - मूले।
४. अस्य वर्गमूलानयने - G, N, T। ५. तता उत्तमकट्ठपत्ते.... मूले।

योजने बहिरवष्व(ष्)क्य द्वितीये मण्डले चारं चरति, द्वितीयोऽपि, ततो द्वयोर्योजनयोरष्टाचत्वारिंशतश्च एकषष्टिभागानां द्वाभ्यां गुणने पञ्च योजनानि पञ्चत्रिंशच्चैकषष्टिभागा योजनस्येति भवति। एतत्प्रथममण्डलविष्कम्भपरिमाणे अधिकत्वेन प्रक्षिप्यते। ततो भवति यथोक्तं द्वितीयमण्डलविष्कम्भायामपरिमाणमिति। तथा **त्रीणि योजनशतसहस्राणि पञ्चदशसहस्राणि एकञ्च सप्तोत्तरं योजनशतं** किञ्चिद्विशेषोनं **परिरयेण**[१] प्रज्ञप्तम्, तथाहि - पूर्वमण्डलविष्कम्भपरिमाणादस्य मण्डलस्य विष्कम्भपरिमाणे पञ्च योजनानि पञ्चत्रिंशच्चैकषष्टिभागा योजनस्याधिकत्वेन प्राप्यन्ते। ततोऽस्य राशेः पृथक्परिरयपरिमाणमानेतव्यम्[२]। तत्र पञ्च योजनान्येकषष्टिभागकरणार्थमेकषष्ट्या गुण्यन्ते जातानि त्रीणि शतानि पञ्चोत्तराणि ३०५। एतेषां मध्ये उपरितनाः पञ्चत्रिंशदेकषष्टिभागाः प्रक्षिप्यन्ते, जातानि त्रीणि शतानि चत्वारिंशदधिकानि ३४०। एतेषां वर्गो विधीयते, वर्गयित्वा च दशभिर्गुणनाज्जात एकक एककः पञ्चकः षट्कः त्रीणि शून्यानि ११,५६,०००। तदेतेषां वर्गमूलानयने लब्धानि दश शतानि पञ्चसप्तत्यधिकानि १,०७५। एतेषां योजनानयनार्थं एकषष्ट्या भागे हृते लब्धानि सप्तदशयोजनानि अष्टत्रिंशच्चैकषष्टिभागा योजनस्य १७ यो.३८/६१ भा.। एतत्पूर्वमण्डलपरिरयपरिमाणे[३] अधिकत्वेन प्रक्षिप्यते। ततो यथोक्तमधिकृतमण्डलपरिरयपरिमाणं भवति, किञ्चिद्विशेषोनता च किञ्चिदूनत्रयोविंशत्या एकषष्टिभागैरूनता द्रष्टव्या। **'तया ण'**मित्यादि दिवसरात्रिप्रमाणं सुगमम्। **'से निक्खममाणे'** इत्यादि। ततः **स सूर्यो** द्वितीयस्मान्मण्डलादुक्तप्रकारेण **निष्क्रामन्** नवसंवत्सरसत्के **द्वितीयेऽहोरात्रे 'अब्भिंतरतच्चं'**[४]ति सर्वाभ्यन्तरान्मण्डलात् **तृतीयं मण्डलमुपसङ्क्रम्य चारं चरति। 'ता जया ण'**मित्यादि। **तत्र यदा सूर्यः** सर्वाभ्यन्तरान्मण्डलात्तृतीयमण्डलमुपसङ्क्रम्य चारं चरति तदा तृतीयमण्डलपद-

---

१. परिक्खेवेणं - मूले। २. पृथक्परिरयमानमानेतव्यम् - T। ३. ...परिरयमाने... - T। ४. अब्भंतरं तच्चं - मूले।

मष्टाचत्वारिंशदेकषष्टिभागा योजनस्य बाहल्येन नवनवतियोजनसहस्राणि षट्योजनशतान्येकपञ्चाशदधिकानि नव चैकषष्टिभागा योजनस्य ९९,६५१ ९/६१ **'आयामविक्खंभेणं' आयामविष्कम्भाभ्यां,** तथाहि - प्रागिवात्रापि पूर्वमण्डलविष्कम्भायामपरिमाणा(त्) पञ्च योजनानि पञ्चत्रिंशच्चैकष्टिभागा योजनस्याधिकत्वेन प्राप्यन्ते, ततो यथोक्तमत्रायामविष्कम्भपरिमाणं भवति। **त्रीणि योजनशतसहस्राणि पञ्चदशसहस्राणि एकं पञ्चविंशत्यधिकं योजनशतं परिक्षेपेण** प्रज्ञप्तम्, तथाहि - पूर्वमण्डलादस्य मण्डलस्य विष्कम्भे पञ्चयोजनानि पञ्चत्रिंशच्चैकषष्टिभागा योजनस्याधिकत्वेन प्राप्यन्ते। तस्य च पृथक् परिरयपरिमाणं सप्तदशयोजनानि [१]अष्टत्रिंशत्त्वैकषष्टिभागा योजनस्य। एतन्निश्चयनयमतेन। परं सूत्रकृता व्यवहारनयमतमवलम्ब्य परिपूर्णान्यष्टादशयोजनानि विवक्षितानि। व्यवहारनयमतेन हि लोके किञ्चिदूनमपि परिपूर्णं विवक्ष्यते। तथा यदपि पूर्वमण्डलपरिरयपरिमाणे किञ्चिदूनत्वमुक्तं तदपि व्यवहारनयमतेन परिपूर्णमेव विवक्ष्यते। ततः पूर्वमण्डलपरिरयपरिमाणे अष्टादशयोजनानि अधिकत्वेन प्रक्षिप्यन्ते इति भवति यथोक्तमधिकृतमण्डलपरिरयपरिमाणम्। **'तया [२]ण'**मित्यादि दिव[३]सरात्रिपरिमाणं सुगमम्। **'एवं खल्वि'**त्यादि। **एव**मुक्तेन प्रकारेण **खलु** निश्चित**मेतेनोपायेन** प्रत्यहोरात्रमेकैकमण्डलमोचनरूपेण **निष्क्रामन् (२) सूर्यस्तदनन्तरान्मण्डलात् तदनन्तरं मण्डलं सङ्क्रामन् २ एकैकस्मिन्मण्डले पञ्च पञ्च योजनानि पञ्चत्रिंशच्चैकषष्टिभागा योजन**स्येत्येवंपरिमा[णं](णां) **विष्कम्भवृद्धिमभिवर्द्धयन् (२) एकैकस्मिन्नेव** च **मण्डले[४]ऽष्टादश २ योजनानि परिरयवृद्धिमभिवर्द्धयन् (२)**। अष्टादशेति व्यवहारत उक्तं निश्चयनयमतेन तु सप्तदश २ योजनानि अष्टत्रिंश[च्](तं) चैकषष्टिभागान् योजनस्येति द्रष्टव्यम्। एतच्च प्रागेव भावितम्।

---

१. अष्टात्रिंश.... - G, I, T। २. तया अट्ठारसमुहुत्ते - मूले। ३. दिवसरात्रिपरिपूर्णपरिमाणं - G, J। ४. अट्ठारसजोयणाइं - मूले।

न चैतत्स्वमनीषिकाविजृम्भितं यत उक्तमेतद्विचारप्रक्रम एव **करणविभावनायां 'सत्तरसजोयणाणि अट्ठतीसं एगट्ठिया भागा १७ ३८/६१ एयं निच्छएणं, संववहारेण अट्ठारसजोयणाइं**'ति। प्रथमषण्मासपर्यवसानभूते त्र्यशीत्यधिकशततमेऽहोरात्रे [१]**सर्वबाह्यमण्डलमुपसङ्क्रम्य चारं चरति**। **'ता जया ण'**मित्यादि। **तत्र यदा 'ण'**मिति वाक्यालङ्कारे **सूर्यः सर्वबाह्यमण्डलमुपसङ्क्रम्य चारं चरति तदा तत् सर्वबाह्यमण्डलपदं अष्टाचत्वारिंशदेकषष्टिभागा योजनस्य (बाहल्येन) एकं योजनशतसहस्रं षट्शतानि षष्ट्यधिकानि** १,००,६६० **आयामविष्कम्भेन** आयामविष्कम्भाभ्यां, तथाहि - सर्वाभ्यन्तरान्मण्डलात्परतः [२]सर्वबाह्यमण्डलं पर्यवसानीकृत्य त्र्यशीत्यधिकं मण्डलशतं भवति, मण्डले(२) च विष्कम्भे[च] परिवर्द्धते पञ्च पञ्च योजनानि पञ्चत्रिंशच्च एकषष्टिभागा योजनस्य, ततः पञ्च योजनानि त्र्यशीत्यधिकेन शतेन गुण्यन्ते जातानि नवशतानि पञ्चदशोत्तराणि ९१५, येऽपि च पञ्चत्रिंशदेकषष्टिभागा योजनस्य तेऽपि त्र्यशीत्यधिकेन शतेन गुण्यन्ते, जातानि चतुःषष्टिशतानि पञ्चोत्तराणि ६,४०५, तेषामेकषष्ट्या भागो ह्रियते लब्धं पञ्चोत्तरं योजनशतं १०५, तत् [३]पूर्वराशौ प्रक्षिप्यते जातानि दशशतानि विंशत्यधिकानि १,०२०, एतानि सर्वाभ्यन्तरमण्डलविष्कम्भपरिमाणे अधिकत्वेन प्रक्षिप्यन्ते, ततो यथोक्तं सर्वबाह्यमण्डलगतविष्कम्भपरिमाणं भवति। तथा **त्रीणि योजनशतसहस्राणि अष्टादश सहस्राणि त्रीणि शतानि पञ्[चो](चदशो)त्तराणि** ३,१८,३१५ [४]**परिक्षेपतो** नवरं पञ्चदशोत्तराणि किञ्चिन्न्यूनानि द्रष्टव्यानि, तथाह्यस्य मण्डलस्य विष्कम्भो योजनलक्षं षट् योजनशतानि षष्ट्यधिकानि १,००,६६०, अस्य वर्गो विधीयते, जातः एककः शून्यमेककस्त्रिको द्विकश्चतुष्कस्त्रिकः पञ्चकः षट्को द्वे शून्ये १०,१३,२४,३५,६००, ततो दशभिर्गुणने

---

१. सर्वबाह्यं मण्डल.... - G। २. सर्वबाह्यं मण्डलं - G। ३. पूर्वस्मिन् राशौ - I, K। ४. परिक्खेवेणं - मूले।

जातमेकमधिकं शून्यं १,०१,३२,४३,५६,०००, अस्य वर्गमूलानयने लब्धानि त्रीणि योजनशतसहस्राणि अष्टादशसहस्राणि त्रीणि शतानि चतुर्दशोत्तराणि ३,१८,३१४, शेषमुद्धरति पञ्चकः पञ्चकस्त्रिकश्चतुष्कः शून्यश्चतुष्कः ५,५३,४०४, छेदराशिः षट्कस्त्रिकः षट्कः षट्को द्विकोऽष्टकः ६,३६,६२८, तत एतेन पञ्चदशयोजनं किञ्चिदूनं किल लभ्यते इति। व्यवहारनयमतेन सूत्रकृता परिपूर्णं विवक्षित्वा पञ्चदशोत्तराणीत्युक्तम्। अथवा मण्डले (२) [१]पूर्वपूर्वमण्डलात्परिरयवृद्धौ सप्तदशयोजनानि अष्टात्रिंशच्चैकषष्टिभागा योजनस्य लभ्यन्ते। ततः सप्तदशयोजनानि त्र्यशीत्यधिकेन शतेन गुण्यन्ते, जात्यान्येकत्रिंशत् शतान्येकादशोत्तराणि ३,१११। येऽपि चाष्टात्रिंशदेकषष्टिभागास्तेऽपि त्र्यशीत्यधिकेन शतेन गुण्यन्ते जातान्येकोनसप्ततिशतानि चतुष्पञ्चाशदधिकानि ६,९५४, [२]एतेषां योजनानयनार्थमेकषष्ट्या भागो ह्रियते, लब्धं चतुर्दशोत्तरं योजनशतं ११४, तत् पूर्वराशौ प्रक्षिप्यते, (जातानि) द्वात्रिंशच्छतानि पञ्चविंशत्यधिकानि ३,२२५, [३]एतानि सर्वाभ्यन्तरमण्डलपरिरय-(परि)माणे त्रीणि लक्षाणि पञ्चदशसहस्राणि नवाशीत्यधिकानि ३,१५,०८९ इत्येवंरूपे अधिकत्वेन प्रक्षिप्यन्ते, जातानि त्रीणि लक्षाणि अष्टादशसहस्राणि त्रीणि शतानि चतुर्दशोत्तराणि ३,१८,३१४, तथा सप्तदशानां योजनानामष्टात्रिंशतश्चैकषष्टिभागानामुपरि यानि त्रीणि शतानि पञ्चसप्तत्यधिकानि ३७५ शेषाण्युद्धरन्ति तानि त्र्यशीत्यधिकेन शतेन गुण्यन्ते जातान्यष्टषष्टिसहस्राणि षट्शतानि पञ्चविंशत्यधिकानि ६८,६२५, तेषां च्छेदराशिना पञ्चाशदधिकैकविंशतिशतरूपेण २,१५० भागो ह्रियते, लब्धा एकत्रिंशदेकषष्टिभागा योजनस्य शेषं स्तोकत्वात्त्यक्तं परं व्यवहारतः परिपूर्णं योजनं विवक्षितमिति पञ्चदशोत्तराणीत्युक्तम्। **'तया ण'**मित्यादिना रात्रिन्दिवपरिमाणं षण्मासोपसंहरणं च सुगमम्। **'से पविसमाणे सूरिए'** इत्यादि। ततः **स सूर्यः** सर्वबाह्यान्मण्डलात्प्रागुक्तप्रकारेणाभ्यन्तरं **प्रविशन् द्वितीयं षण्मासमाददानो**

१. पूर्वमण्डला..... - K। २. तेषां - A, E,। ३. एतानि च - H,T।

द्वितीयस्य षण्मासस्य [१]**प्रथमेऽहोरात्रे** सर्व**बाह्यानन्तर**मर्वाक्तनं [२]द्वितीय**मण्डल-मुपसङ्क्रम्य चारं चरति। 'ता जया ण'**मित्यादि। **तदा यदा 'ण'**मिति वाक्यालङ्कारे सर्व**बाह्यानन्तर**मर्वाक्तनं द्वितीय**मण्डलमुपसङ्क्रम्य चारं चरति तदा तन्मण्डलपदमष्टा**[३]**चत्वारिंशदेकषष्टिभागा योजनस्य बाहल्येन एकं योजनशतसहस्रं षट् च योजनशतानि चतुष्पञ्चाशदधिकानि षड्विंशति-श्चैकषष्टिभागा योजनस्य** [४]१,००,६५४ २६/६१ **आयामविष्कम्भेन** आयाम-विष्कम्भाभ्यां, तथाह्येकतोऽपि तन्मण्डलं सर्वबाह्यमण्डलगतानष्टा[५]चत्वारिंशदेकषष्टि-भागान् योजनस्यापरे च द्वे योजने विमुच्याभ्यन्तरमवस्थितमपरतोऽपि, ततो योजनद्वयस्याष्टचत्वारिंश[च्](त[ऽ])चैकषष्टिभागानां द्वाभ्यां गुणने पञ्चयोजनानि पञ्च-त्रिंशच्चैकषष्टिभागा योजनस्येति भवति। एतत्सर्वबाह्यमण्डलगतविष्कम्भायाम-परिमाणात्शोध्यते, ततो यथोक्तमधिकृतमण्डलविष्कम्भायामपरिमाणं भवति। तथा **त्रीणि योजनशतसहस्राणि अष्टादशसहस्राणि द्वे योजनशते सप्तनवत्यधिके** ३,१८,२९७ [६]**परिक्षेपतः** प्रज्ञप्तम्, तथाहि - पूर्वमण्डलादस्य मण्डलस्य विष्क-म्भायामपरि[७]माणे पञ्चयोजनानि पञ्चत्रिंशच्चैकषष्टिभागा योजनस्येति त्रुट्यति, पञ्चानां योजनानां पञ्चत्रिंशतश्चैकषष्टिभागानां परिरये सप्तदश योजनानि अष्टात्रिंशच्चैकषष्टिभागा योजनस्य भवन्ति, परं सूत्रकृता व्यवहारनयमतेन परिपूर्णान्यष्टादशयोजनानि विवक्षितानि, तानि प्रागुक्तात्सर्वबाह्यमण्डलगतपरिरयपरिमाणात्त्रीणि लक्षाणि अष्टादशसहस्राणि त्रीणि शतानि पञ्चदशोत्तराणि इत्येवंरूपादष्टादशयोजनानि शोध्यन्ते। ततो यथोक्तमधिकृतमण्डलपरिरयपरिमाणं भवति। **'तया ण'**मित्यादिना रात्रि-न्दिवपरिमाणं सुगमम्। **'से पविसमाणे'** इत्यादि। ततः **सूर्य**स्तस्मादपि द्वितीयस्मात् मण्डलात्प्रागुक्तप्रकारेणाभ्यन्तरं **प्रविशन्** [८]द्वितीयस्य षण्मासस्य **द्वितीयेऽहोरात्रे**

---

१. प्रथमाऽहोरात्रे - D, E, F। २. द्वितीयं मण्डल.... - B। ३. ...ष्टचत्वारिं... B। ४. योजनस्य १,००,६५४ २६/६१ आयामविष्कम्भाभ्यां - C। ५. ....नष्टचत्वा - T। ६. परिक्खेवेणं - मूले। ७. परिमाणं - D, C, F, M। ८. द्वितीयषण्मासस्य - B, F, M, N।

सर्वबाह्यान्मण्डलादर्वाक्तनं **तृतीयं मण्डलमुपसङ्क्रम्य चारं चरति। 'ता जया ण'**मित्यादि। **तत्र यदा स सूर्यः** सर्वबाह्यान्मण्डलादर्वाक्तनं **तृतीयं मण्डलमुपसङ्क्रम्य चारं चरति तदा (तन्)मण्डलपदमष्टाचत्वारिंशदेकषष्टि-भागा योजनस्य बाहल्येन एकं योजनशतसहस्रं षड्योजनशतानि [१]अष्टाचत्वारिंशदधिकानि द्विपञ्चाशच्चैकषष्टिभागा योजनस्य** १,००,६४८ ५२/६१ **आयामविष्कम्भेना**ऽऽयामविष्कम्भाभ्यां, तथाहि - पूर्वस्मान्मण्डलादिदं मण्डलमा[२]यामविष्कम्भे(न) पञ्चभिर्योजनैः पञ्चत्रिंशता चैकषष्टिभागैर्योजनस्य हीनं, ततः पूर्वमण्डलविष्कम्भायामपरिमाणादेकं योजनशतसहस्रं षट्शतानि चतुष्पञ्चाशद-धिकानि षड्विंशतिश्चैकषष्टिभागा योजनस्येत्येवंरूपात् पञ्च योजनानि पंचत्रिंशच्चैक-षष्टिभागा योजनस्य शोध्यन्ते। ततो यथोक्तमधिकृतमण्डलविष्कम्भायामपरिमाणं भवति। तथा **त्रीणि योजनशतसहस्राणि अष्टादशसहस्राणि द्वे शते एकोनाशीत्यधिके** ३,१८,२७९ **[३]परिक्षेपतः** प्रज्ञप्तम्, तथाहि प्राक्तनमण्डलादिदं मण्डलं पञ्चभिर्योजनैः पञ्चत्रिंशता चैकषष्टिभागैर्योजनस्य विष्कम्भतो हीनं, पञ्चानां योजनानां पञ्चत्रिंशतश्चैकषष्टिभागानां परिरयपरिमाणं व्यवहारतोऽष्टादशयोजनानि, ततस्तानि पूर्वमण्डलपरिरयपरिमाणात्शोध्यन्ते, ततो यथोक्तमधिकृतमण्डलपरि-रयपरिमाणं भवति। **'तया ण'**मित्यादिना दिवसरात्रिपरिमाणं सुगमम्। **'एवं खलु'** इत्यादि। एतत्सूत्रं प्रागुक्तसूत्रव्याख्यानुसारतः स्वयं परिभावनीयम्, नवरं **'निव्वेढ्ढेमाणे'** इति **निर्वेष्टयन्** हापयन् इत्यर्थः। **'(ता)जया ण'**मित्यादि सुगमम्। सम्प्रति प्रस्तुतवक्तव्यतोपसंहारमाह—**'ता सव्वावि ण'**मित्यादि। **ततः सर्वाण्यपि मण्डलपदानि** प्रत्येकं **बाहल्येनाऽष्टाचत्वारिंशदेकषष्टिभागा योजनस्य** उप-लक्षणमेतत् अनियतानि चायामविष्कम्भपरिधिभिः। तथा **सर्वाण्यपि** च **मण्ड-लान्तरकाणि** मण्डलान्तराणि सूत्रे स्त्रीत्वनिर्देशः प्राकृतत्वात् [४]**द्वे द्वे योजने**

१. अष्टचत्वा...-T। २. ...मायामे विष्कम्भे पञ्च...-N, T। ३. परिक्खेवेणं - मूले। ४. दो जोयणाइं - मूले।

विष्कम्भेन भवतः। तत **एष** द्वे योजने अष्टचत्वारिंशच्चैकषष्टिभागा योजनस्येत्येवंरूपो **'ण'**मिति वाक्यालङ्कारे **अध्वा** पन्थास्त्र्यशीत्यधिकशतप्रत्युत्पन्नस्त्र्यशीत्यधिकेन शतेन गुणितः सन् **दशोत्तराणि पञ्चयोजनशतानि आख्यात इति वदेत्**। तथाहि द्वे योजने त्र्यशीत्यधिकेन शतेन गुण्यन्ते जातानि त्रीणि शतानि षट्षष्ट्यधिकानि येऽपि चाष्टाचत्वारिंशदेकषष्टिभागाः तेऽपि त्र्यशीत्यधिकेन शतेन गुण्यन्ते, जातानि सप्ताशीतिशतानि चतुरशीत्यधिकानि ८,७८४, तेषां योजनानयनार्थमेकषष्ट्या भागो ह्रियते लब्धं चतुश्चत्वारिंशं योजनशतं १४४, त[तः](त्)पूर्वराशौ प्रक्षिप्यते, जातानि पञ्चशतानि दशोत्तराणि ५१०। अस्यैवार्थस्य व्यक्तीकरणार्थं भूयः सूत्रमाह – **'ता [१]अब्भिंतराए मंडलवयाए बाहिरा मंडलबाहा बाहिराए मंडलवयाए [२]अब्भिंतरा मंडलबाहा'** इत्यादि। **'ता'** इति पूर्व्ववत् **अभ्यन्तरात्** सर्वाभ्यन्तरान्**मण्डलपदात्**परतः सूत्रे स्त्रीत्वनिर्देशः प्राकृतत्वात् या **बाह्या मण्डलबाहा** सर्वबाह्यमण्डलपर्यवसाना मण्डलश्रेणिः यदि वा **बाह्यात्** सर्वबाह्यान्**मण्डलपदादर्वाक्** याऽ**भ्यन्तरा मण्डलबाहा** सर्वाभ्यन्तरमण्डलपर्यवसाना मण्डलश्रेणि**रेष अध्वा पञ्च दशोत्तराणि योजनशतान्याख्यात इति वदेत्**। **'ता अब्भंतराए मंडलवयाए [३]अब्भंतरमंडलबाहा बाहिरयाए'** इत्यादि। **'ता'** इति पूर्व्ववत् **अभ्यन्तरेण मण्डलपदेन** सह याऽ**भ्यन्तरा मण्डलबाहा** (यदि वा) **बाह्येन मण्डलपदेन** सह (या **बाह्या मण्डलबाहा**) **एष अध्वा पञ्च योजनशतानि दशोत्तराणि अष्टचत्वारिंशच्चैकषष्टिभागा योजनस्य [४]व्याख्यात इति वदेत्**, पूर्वस्मादध्वपरिमाणादेतस्याध्वपरिमाणस्य (सर्वाभ्यन्तरमण्डलगतेन) सर्वबाह्यमण्डलगतेन (वा) बाहल्यपरिमाणेनाऽधिकत्वात्। **'ता [५]अब्भिंतराए मंडलवयाए [६]अब्भंतरमंडलबाहा बाहिराए मंडलवयाए बाहिरा मंडलबाहा'** इत्यादि। **अभ्यन्तरान्मण्डलपदात्**परतो या **अ[ब्भिं](भ्यन्)तरा मण्डलबाहा**

---

१. अब्भंतराए - मूले। २. अब्भंतरा - मूले। ३. अब्भंतरा मंडलबाहा बाहिराए - मूले। ४. आहिया - मूले। ५. अब्भिंतराए - मूले। ६. अब्भंतरा मंडलबाहा - मूले।

सर्वबाह्यान्मण्डलादर्वाक्तनी मण्डलश्रेणिर्यदि(वा) **बाह्यान्मण्डलपदादर्वाक्** या **बाह्या मण्डलबाहा** सर्वाभ्यन्तरात् मण्डलात्परतो मण्डलश्रेणि**रेष अध्वा पञ्च नवोत्तराणि योजनशतानि त्रयोदश च एकषष्टिभागा योजनस्याख्यात इति वदेत्**, पूर्वस्मादध्वपरिमाणादस्याध्वपरिमाणस्य सर्वाभ्यन्तरमण्डलगतसर्वबाह्यमण्डलगतबाहल्यपरिमाणेन पञ्चत्रिंश[द](देकषष्टिभागा)धिकैकयोजनरूपेण हीनत्वात्। तदेवमभ्यन्तरात् मण्डलात्परतो यावत्सर्वबाह्यं[१] मण्डलं सर्वबाह्यमण्डलादर्वाक् यावत्सर्वाभ्यन्तरमण्डलं (तथा सर्वाभ्यन्तरसर्वबाह्यमण्डलाभ्यां सह) तथा सर्वाभ्यन्तर[ात्]सर्वबाह्यमण्डलाभ्यां (विना) यावदध्वपरिमाणं भवति तावन्निरूपितम्। सम्प्रति सर्वाभ्यन्तरेण मण्डलेन सह सर्वाभ्यन्तरान्मण्डलात्परतो बाह्यमण्डलादर्वाक् यदि वा सर्वबाह्येन मण्डलेन सह सर्वबाह्यान्मण्डलादर्वाक् सर्वाभ्यन्तरान्मण्डलात्परतो यावदध्वपरिमाणं भवति तावन्निरूपयति – '**(ता) अब्भंतराए[२] मंडलवयाए अब्भिंतरा मंडलबाहा बाहिराए मंडलवयाए (बाहिरा मंडलबाहा) एस ण**'मित्यादि। **अभ्यन्तरेण मण्डलपदेन** सह याऽ**भ्यन्तरा मण्डलबाहा** सर्वबाह्यान्मण्डलादर्वाक्तनं मण्डलक्षेत्रं यदि वा **बाह्या[३] मण्डलबाहा** सर्वाभ्यन्तरान्मण्डलात्परो मण्डलक्षेत्रं **बाह्येन मण्डलपदेन** सह **एष अध्वा पञ्च दशोत्तराणि योजनशतानि व्याख्यात इति वदेत्**। भावना सुगमत्वात्स्वयं विधेया।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्याऽष्टमं प्राभृतप्राभृतं समाप्तम्।

समाप्तं प्रथमं प्राभृतम्।

* * * * *

१. ...सर्वबाह्यमण्डलं - T। २. अब्भिंतराए - मूले। ३. बाह्यमण्डलबाहा - H।

द्वितीयं प्राभृतम्

प्रथमं प्राभृतप्राभृतम्

तदेवमुक्तं प्रथमं प्राभृतम्। सम्प्रति द्वितीयं वक्तव्यम्। तस्य चाऽयमर्थाधिकारः कथं सूर्यस्तिर्यक्परिभ्रमति ? इति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता कहं ते तिरिच्छगती आहिया ति वदेज्जा ?

टी० 'ता कहं ते तिरिच्छ[गा](ग)' इत्यादि। अस्त्यन्यदपि प्रभूतं प्रष्टव्यम्, परमेतावदेव **तावत्पृच्छामि कथं 'ते' त्वया** भगवन् ! सूर्यस्य **तिर्यग्गति**-स्तिर्यक्परिभ्रमणमा**ख्याता इति वदेत्** ?

एवमुक्ते भगवानेतद्विषयपरतीर्थिकप्रतिपत्तिमिथ्याभावोपदर्शनाय प्रथमतस्ता एव प्रतिपत्तीरुपन्यस्यति –

मू० तत्थ खलु इमातो अट्ठ पडिवत्तीओ पण्णत्ताओ। तत्थ एगे एवमाहंसु ता पुरच्छिमिल्लातो लोगंतातो पातो मिरीई आगासाओ उ(त्ति)ट्ठति। से णं इमं लोगं तिरियं करेति तिरितं करित्ता पच्चच्छिमिल्लंसि लोगंतंसि सातं[1] मिरीती आगासंसि विद्धंसति। एगे एवमाहंसु (१)। एगे पुण एव(माहंसु) ता पुरच्छिमिल्लातो लोगंतातो पादो सूरिए आगासातो उत्तिट्ठति। से णं इमं लोगं तिरियं करेइ करित्ता पच्चच्छिमिल्लंसि लोगंतंसि सायं सूरिए आगासंसि विद्धंसति। एगे एव(माहंसु २)। एगे पुण एवमाहंसु ता पुरच्छिमिल्लाओ लोगंतातो पादो सूरिए आगासाओ उत्तिट्ठइ। से णं इमं लोगं तिरियं करेइ करित्ता पच्चच्छिमंसि लोगंतंसि सायं सूरिए आगासं अणुपविसति आ० २ अहे पडियागच्छति अहे० २ पुणरवि अवरभूपुरच्छिमिल्लातो लोगंतातो पातो सूरिए आगासातो उत्तिट्ठति। एगे एवमाहंसु (३)।

१. सागं - U।

एगे पुण (एवमाहंसु) ता पुरिच्छिमिल्लातो लोगंतातो पादो सूरिए पुढविकायंसि[१] उत्तिट्ठति। से णं इमं लोगं तिरितं करेति करेत्ता प(च्च)च्छिमिल्लंसि लोगंतंसि सायं[२] सूरिए पुढवीकायंसि विद्धंसति। एगे एवमाहंसु (४)। एगे पुण एव(माहंसु) ता पुरच्छिमिल्लातो लोगंतातो पादो सूरिए पुढविआतो उत्तिट्ठति। से णं इमं लोगं तिरितं करोति करित्ता पच्चच्छिमिल्लंसि लोगं(तं)सि सातं[३] सूरिए पुढविकायं अणुपविसति पुढवि० २ अहे पडिआगच्छति अहे० (२) पुनरवि अवरभूपुरच्छिमिल्लातो लोगंतातो पादो सूरिए पुढवियातो उत्तिट्ठति, एगे एव(माहंसु ५)। एगे पुण एवमाहंसु ता पुरच्छिमिल्लातो लोगंतातो पादो सूरिए आउयाए उत्तिट्ठति से णं इमं लोगं तिरियं करोति २ (त्ता) पच्चच्छिमिल्लंसि लोगंतंसि सातं[४] सूरिए आउकायं(सि) [अणुपविसति] (विद्धंसति)। एगे एव(माहंसु ६)। एगे पुण (एवमाहंसु) ता पुरच्छिमिल्लातो लोगंतातो पादो सूरिए आउयातो[५] उत्तिट्ठति। से णं इमं लोगं तिरियं करोति २ (त्ता) पच्चच्छिमिल्लंसि लोगंतंसि सातं[६] सूरिए आउकायं अणुपविसति अ० २ अहे पडिआगच्छति अहे० २ पुणरवि अवरभूपुरच्छिमिल्लातो लोगंतातो पातो सूरिए आउ(यातो) उत्तिट्ठति। एगे एव(माहंसु ७)। एगे पुण (एवमाहंसु) ता पुरच्छिमिल्लातो लोगंतातो (बहूइं जोयणाइं) बहूइं जोयणसताइं बहूइं जोयणसहस्साइं उड्ढं दूरं उप्पतित्ता एत्थ णं पादो सूरिए आयासातो उत्तिट्ठति से णं इमं दाहिणड्ढं लोगं तिरियं करोति

---

१. पुढवियातो - A, B, C, D, E, F, G, I, J, K। २. सागं - U। ३. सागं - U। ४. सागं - U। ५. आउकायंसि - U। ६. सागं - U।

२ उत्तरड्ढलोगं तामेव रातो। से णं इमं [१]उत्तरड्ढलोगं तिरितं करेति २ दाहिणड्ढलोगं तामेव रातो। से णं इमाइं दाहिणुत्तरड्ढलोगाइं तिरितं करोति २ (त्ता) पुरच्छिमिल्लाओ लोगंतातो बहूइं जोयणाइं तं चेव जाव उड्ढं उप्पतित्ता दूरं एत्थ णं पातो सूरिए आगासातो उत्तिट्ठति। एगे एवमाहंसु (८)।

टी० '**तत्थ खलु**' इत्यादि। **तत्र** तस्यां सूर्यस्य तिर्यग्गतौ विषये **खल्विमा** वक्ष्यमाणस्वरूपा **अष्टौ प्रतिपत्तयः** परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्ताः। ता एव क्रमेणाह - '**तत्थेगे**' इत्यादि। **तत्र** तेषां परतीर्थिकानामष्टानां मध्ये **एके** परतीर्थिका **एवमाहुः** '**ता**' इति पूर्ववत् **पौरस्त्यात् लोकान्तादूर्द्ध्वमिति** गम्यते पूर्वस्यां दिशीति भावार्थः **प्रातः**-प्रभातसमये (**मरीचिः**-)मरीचिसङ्घातः किरणसङ्घात इत्यर्थः **आकाशे** [२]**उत्तिष्ठति**-आकाशे उत्पद्यते। एतेन एतदुक्तं भवति नैतद्विमानं नाऽपि रथो नाऽपि कोऽपि देवतारूपः सूर्यो यथा परे वदन्ति, किन्तु किरणसङ्घात एवैष वर्त्तुलगोलाकारो लोकानुभावात्प्रतिदिवसं पूर्वस्यां दिशि प्रातराकाशे समुत्पद्यते यतः सर्वत्र प्रकाशप्रसरमधिरोहति। **स** इत्थम्भूतो मरीचिसङ्घात उपजातः सन् '**ण**'मिति वाक्यालङ्कारे **इमं** प्रत्यक्षत उपलभ्यमानं तिर्यग्**लोकं तिर्यक्करोति,** किमुक्तं भवति ? तिर्यक् परिभ्रमन् इमं तिर्यग्लोकं प्रकाशयतीति। **तिर्यक्कृत्वा पश्चिमे लोकान्ते सायं** सान्ध्ये समये तथा जगत्स्वाभाव्यात्स **मरीचि**सङ्घात **आकाशे विध्वंसते** ध्वंसमुपयाति। एवं सकलकालमपि। अत्रैवोपसंहारः '**एगे एवमाहंसु १।**' **एके पुनरेवमाहुः पौरस्त्यात् लोकान्तादूर्द्ध्वं प्रातः सूर्यो** लोकप्रसिद्धो देवतारूपो भास्करस्तथाजगत्स्वाभाव्या**दाकाश** उत्पद्यते, **स** च चोत्पन्नः सन् **इमं** प्रत्यक्षत उपलभ्यमानं मनुष्य**लोकं तिर्यक्करोति** तिर्यक् परिभ्रमन्निमं लोकं प्रकाशयतीत्यर्थः। **तिर्यक्कृत्वा पश्चिमे लोकान्ते सायं** सान्ध्ये समये

१. उत्तरड्ढं लोगं - U। २. उत्तिष्ठति - उत्पद्यते - D।

आकाशे विध्वंसते। अत्रौवोपसंहारः **एगे एवमाहंसु २। एके पुनरेवमाहुः पौरस्त्याल्लोकान्तादूर्द्ध्वं प्रातः सूर्यो** देवतारूपः सदावस्थायी तथाविधपुराण-शास्त्रप्रसिद्ध **आकाशे उत्तिष्ठति** उद्गच्छति **स** चोद्गतः सन् **इमं** प्रत्यक्षत उपलभ्यमानं मनुष्य**लोकं तिर्यक्करोति तिर्यक्कृत्वा पश्चिमलोकान्ते सायं** सन्ध्यासमये अध **आकाशमनुप्रविशति (अनु)प्रविश्य** च **अधः प्रत्यागच्छति** अधोलोकं प्रकाशयन् प्रतिनिवर्त्तते इत्यर्थः। तन्मतेन हि भूरियं गोलाकारा लोकोऽपि च गोलाकारतया व्यवस्थितः। इदं च सम्प्रति तीर्थान्तरीयेषु विजृम्भते ततस्तद्गत-पुराणशास्त्रादेतत्सम्यगवसेयम्। अस्य च त्रयो भेदाः। एके एवमाहुः प्रातः सूर्य आकाशे उद्गच्छति, अपरे आहुः पर्वतशिरसि, [१]अन्ये तु आहुः समुद्रे इति। तत्र प्रथमानामिदं मतमुपन्यस्तम्, **अधः प्रत्यागत्य** च **पुनरप्यपरभुवो** - अधोभुवः पृथिव्या अधोभागेन विनिर्गत्येत्यर्थः **पौरस्त्याल्लोकान्तादूर्द्ध्वमाकाशे प्रातः सूर्य** उद्गच्छति। एवं सर्वदाऽपि द्रष्टव्यम्। अत्रोपसंहारः **'एगे एवमाहंसु ३'। एके पुनरेवमाहुः पौरस्त्याल्लोकान्तादूर्द्ध्वं प्रातः सूर्यो** [२]देवतारूपः तथाविधपुराणप्रसिद्धः **पृथ्वीकायमध्ये** उदयभूधरशिरसि **उत्तिष्ठति** उत्पद्यते। **स** चोत्पन्नः **सन्निमं** प्रत्यक्षत उपलभ्यमानं मनुष्य**लोकं (तिर्यक्करोति,** तिर्यक् परिभ्रमन्निमं मनुष्यलोकं) प्रकाशयतीत्यर्थः। **तिर्यक्कृत्वा पश्चिमे लोकान्ते सायं** [३]सान्ध्ये समये **सूर्यः पृथ्वीकाये** अस्तमयभूधरशिरसि **विध्वंसते** विध्वंसमुपयाति। एवं प्रतिदिवसं सकलकालं जगत्स्थितिः परिभावनीया। अत्रोपसंहारः **'एगे एवमाहंसु'** (४)। **एके पुनरेवमाहुः पौरस्त्याल्लोकान्तादूर्द्ध्वं प्रातः सूर्यो** देवतारूपः सदावस्थायी **पृथ्वीकाये** उदयभूधरशिरसि **उत्तिष्ठति** उद्गच्छति, **स** चोद्गतः सन् **इमं** प्रत्यक्षत उपलभ्यमानं तिर्यग्**लोकं तिर्यक्करोति तिर्यक्कृत्वा** [४]**पश्चिमे लोकान्ते सायं** सन्ध्या-समये [५]**पृथ्वीकायमस्तमयभूधरमनुप्रविशति (अनु)प्रविश्य चाधः** [६]**प्र**[ति](त्या)-

१. अन्ये आहुः - I। २. देवरूपः - M,T। ३. सन्ध्यासमये - T। ४. पश्चिमलोकान्ते - D, E, I, M। ५. पृथिवी... - L। ६. प्रत्यवगच्छति इति पाठान्तरम् - H।

गच्छति अधोभागवर्त्तिनं लोकं प्रकाशयन् प्रतिनिवर्त्तते। ततः [१]पुनरवरभुवोऽधोभुवः पृथिव्या अधोभागाद्[२]विनिर्गत्येत्यर्थः **पौरस्त्याल्लोकान्तादूर्द्ध्वं प्रातः सूर्यः पृथिवीकाये** उदयभूधरशिरसि **उत्तिष्ठति** उद्गच्छति। एते भूगोलवादिनः। परं पूर्वे आकाशे उत्तिष्ठतीति प्रतिपन्ना एते तु पर्वतशिरसीति विशेषः। अत्रैवोपसंहारः **'एगे एवमाहंसु ५।' एके पुनरेवमाहुः पौरस्त्याल्लोकान्तादूर्द्ध्वं प्रातः सूर्योऽप्काये** पूर्वसमुद्रे **उत्तिष्ठति** उत्पद्यते। **स** चोत्पन्नः **सन्निमं** प्रत्यक्षत उपलभ्यमानं तिर्यग्लोकं **तिर्यक्करोति तिर्यक्कृत्वा पश्चिमे लोकान्ते सायं** [३]सान्ध्ये समये **सूर्योऽप्काये** [४]पश्चिमसमुद्रे **विध्वंसते** विध्वंसमायाति। एवं सर्वदापि। अत्रोपसंहारः **'एगे एवमाहंसु ६।' एके पुनरेवमाहुः पौरस्त्याल्लोकान्तादूर्द्ध्वं प्रातः सूर्यः** सदावस्थायी पुराणशास्त्रप्रसिद्धोऽप्काये पूर्वसमुद्रे **उत्तिष्ठति** उद्गच्छति, **स** चोद्गतः **सन्निमं** तिर्यग्लोकं **तिर्यक्करोति** तिर्यक्परिभ्रमन्निमं तिर्यग्लोकं प्रकाशयतीत्यर्थः। **तिर्यक्कृत्वा पश्चिमे लोकान्ते सायं** सान्ध्ये समये **सूर्योऽप्कायं** पश्चिम-समुद्रमनुप्रविशति **(अनु)प्रविश्य चाधः प्रत्यागच्छति** अधोभागवर्त्तिनं लोकं प्रकाशयन् प्रतिनिवर्त्तते। (**अधः प्रत्यागत्य चावरभुवः** - अधःपृथिव्या अधोभागाद्विनिर्गत्येत्यर्थः **पौरस्त्याल्लोकान्तादूर्द्ध्वं प्रातः सूर्योऽप्काये** पूर्वसमुद्रे **उत्तिष्ठति** उद्गच्छति। एवं सकलकालमपि। अत्रैवोपसंहारः **'एगे एवमाहंसु ७।' एके पुनरेवमाहुः पौरस्त्याल्लोकान्तादूर्द्ध्वं** प्रथमतो **बहूनि योजनानि**) ततः क्रमेण **बहूनि योजनशतानि** तदनन्तरं क्रमेण **बहूनि योजनसहस्राणि दूरमूर्द्ध्व-मुत्प्लुत्य** बुद्ध्या गत्वा **अत्रा**ऽस्मिन्नव**काशे प्रातः सूर्यो** देवतारूपः सदावस्थायी **उत्तिष्ठति** उद्गच्छति **स** चोद्गतः सन् **इमं दक्षिणार्द्धलोकं** दक्षिणदिग्भावि-नमर्द्धलोकं दक्षिणं लोकस्यार्द्धमित्यर्थः **तिर्यक्करोति** तिर्यक्परिभ्रमन्नीदं दक्षिणं लोकार्द्धं

१. पुनरप्यवर - E, M। २. विनिवृत्य इति पाठान्तरम् H। ३. सन्ध्यासमये - N। ४. पश्चिमसमुद्रे विध्वंसमायाति- M।

प्रकाशयतीत्यर्थः दक्षिणं चार्द्धलोकं (तिर्यक्कुर्वन् **तदैवोत्तरमर्द्धलोकं रात्रौ** करोति। ततः **स** सूर्यः क्रमेणेम**मर्द्धलोकमुत्तरं तिर्यक्करोति**। तत्रापि तिर्यक् परिभ्रमन् उत्तरमर्द्धलोकं प्रकाशयतीत्यर्थः, उत्तरं चार्द्धलोकं तिर्यक्भ्रमणेन प्रकाशयन् **तदैव दक्षिणमर्द्धलोकं रात्रौ** करोति। ततः **स सूर्य** इमौ **दक्षिणोत्तरार्द्धलोकौ**) **तिर्यक्कृत्वा** भूयोऽपि **पौरस्त्याल्लोकान्तादूर्द्ध्वं** प्रथमतो **बहूनि योजनानि** गत्वा ततः क्रमेण **बहूनि योजनशतानि**[१] तदनन्तरं **बहूनि योजनसहस्राणि दूरमूर्द्ध्व-मुत्प्लुत्यात्रास्मिन्नवकाशे प्रातः सूर्य आकाशे उत्तिष्ठति** उद्गच्छति। एवं सकलकालम्। अत्रोपसंहारमाह **'एगे एवमाहंसु ८।'**

तदेवं परप्रतिपत्तीरुपदर्श्य सम्प्रति स्वमतमुपदर्शयति –

मू० वयं पुण एवं वदामो ता जंबुद्दीवस्स दीवस्स पाईण-पडिणायतउदीणदाहिणायताए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता दाहिणपुरच्छिमंसि उत्तरपच्चच्छिमंसि य चउब्भागमंडलंसि इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जातो भूमिभागातो अट्ठजोयण-सताइं उड्ढं उप्पतित्ता एत्थ णं पादो दुवे सूरिया आगासातो उत्तिट्ठंति। ते णं इमाइं दाहिणुत्तराइं जंबुद्दीवभागाइं तिरितं करेंति २ त्ता पुरच्छिमपच्चच्छिमाइं जंबुद्दीवभागाइं तामेव रातो। ते णं इमाइं पुरच्छिमपच्चच्छिमाइं जंबुद्दीवभागाइं तिरितं करेंति २ त्ता दाहिणुत्तराइं जंबुद्दीवभागाइं तामेव रातो। ते णं इमाइं दाहिणुत्तराइं पुरच्छिम-पच्चच्छिमाइं[२] जंबुद्दीवभागाइं तिरितं करेंति २ त्ता जंबुद्दीवस्स दीवस्स पाईणपडीणायत तं चेव जाव एत्थ णं पादो दुवे सूरिया आगासातो उत्तिट्ठंति।

---

१. योजनसहस्राणि दूरमूर्द्ध्व... - C, D, I, K। २. ...च्छिमाणि य जंबु... - U।

बीए पढमं पाहुडपाहुडं सम्मत्तं।

टी० '**वयं पुण**' इत्यादि। **वयं पुनः**उत्पन्नकेवलज्ञानाः केवलज्ञानेन यथावस्थितं वस्तूपलभ्य **एवं** वक्ष्यमाणप्रकारेण **वदामः**। तमेव प्रकारमाह – '**ता**' इत्यादि। '**ता**' इति पूर्ववत् **जम्बूद्वीपस्य द्वीपस्यो**परि यद्वा तद्वा [१]**मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा** चतुर्विंशत्यधिकशतसङ्ख्यान् (भागान्) मण्ड[लान्](लं) परिकल्प्येत्यर्थः, भूयश्च **प्राचीनापाचीनायतया उदीच्यदक्षिणायतया जीवया** प्रत्यञ्चया दवरिकया इत्यर्थः तत्तन्मण्डलं चतुर्भिर्भागैर्विभज्य **दक्षिणपौरस्त्ये उत्तरपश्चिमे च चतुर्भागमण्डले** मण्डलचतुर्भागे एकत्रिंशद्भागप्रमाणे, एतावति किल चतुरशीत्यधिकमपि मण्डलशतं सूर्यस्योदये प्राप्यते इति '**चउव्विसेणं सएण छित्ता चउब्भागमंडलंसी**'त्युक्तम्। **अस्याः** प्रत्यक्षत उपलभ्यमानाया **रत्नप्रभायाः** पृथिव्या बहुसमरमणियाद्भूमिभागादूर्द्ध्वं अष्टौ योजनशतान्युत्प्लुत्य बुद्ध्या गत्वा **अत्रान्तरे प्रातर्द्वौ सूर्यौ उत्तिष्ठत** उद्गच्छतः, दक्षिणपौरस्त्ये मण्डलचतुर्भागे भारतः सूर्य उद्गच्छति अपरोत्तरस्मिन्मण्डलचतुर्भागे ऐरावतः सूर्यः, **तौ** चैवमुद्गतौ भारतैरावतसूर्यौ यथाक्रम**मिमौ दक्षिणोत्तरौ जम्बूद्वीपभागौ तिर्यक् कुरुतः**, किमुक्तं भवति ? भारतः सूर्यो दक्षिणपौरस्त्यमण्डलचतुर्भागे उद्गतः [२]सन् तिर्यक्परिभ्रमति तिर्यक्परिभ्रमन्मेरोर्दक्षिणभागं प्रकाशयति, ऐरावतः पुनः सूर्यो अपरोत्तरदिग्विभागे उद्गच्छति स चोद्गतः सन् तिर्यक्परिभ्रमति तिर्यक्परिभ्रमन् मेरोरुत्तरभागं प्रकाशयतीति। इत्थञ्च भारतैरावतौ सूर्यौ यदा मेरोर्दक्षिणोत्तरौ जम्बूद्वीपभागौ तिर्यक्कुरुतस्तदैव **पूर्वपश्चिमौ जम्बूद्वीपभागौ रात्रौ** कुरुतः एकोऽपि सूर्यस्तदा पूर्वभागं पश्चिमभागं वा न प्रकाशयतीत्यर्थः, दक्षिणोत्तरौ च भागौ तिर्यक् कृत्वा **ता**विमौ **पूर्वपश्चिमौ जम्बूद्वीपभागौ तिर्यक्कुरुतः**। इयमत्र भावना- ऐरावतः सूर्यो

---

१. पाईणपडिणायतउदीणदाहिणायताए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता - मूले।

२. सन् तिर्यक्परिभ्रमन्मेरो... - F।

मेरोरुत्तरभागे तिर्यक्परिभ्रम्य तदनन्तरं मेरोरेव पूर्वस्यां दिशि तिर्यक्परिभ्रमति भारतः सूर्यो मेरोर्दक्षिणतस्तिर्यक्परिभ्रम्य तदनन्तरं मेरोः पश्चिमभागे तिर्यक्परिभ्रमतीति। इत्थञ्च यदा ऐरावतभारतसूर्यौ यथाक्रमं पूर्वपश्चिमभागौ तिर्यक्कुरुतस्तदैव **दक्षिणोत्तरौ जम्बूद्वीपभागौ रात्रौ कुरुतः**, एकोऽपि सूर्यस्तदा [१]दक्षिणदिग्भागं उत्तरदिग्भागं वा न प्रकाशयतीति भावः। तत इत्थं यथाक्रममैरावतभारतसूर्यौ पूर्वपश्चिमभागौ तिर्यक्कृत्वा यो भारतः सूर्यः (स) उत्तरपश्चिमे मण्डलचतुर्भागे उदयमासादयति यश्चैरावतः (स) दक्षिणपौरस्त्ये मण्डलचतुर्भागे इति एतदेवोपदर्शयितुमुपसंहारमाह – **'ते ण'**मित्यादि। **तौ** भारतैरावतौ सूर्यौ प्रथमतो यथाक्रममिमौ **दक्षिणोत्तरौ** जम्बूद्वीपभागौ ततो यथायोगं **पूर्वपश्चिमौ जम्बूद्वीपभागौ** भारतः पश्चिमभागं ऐरावतः पूर्वभागमित्यर्थः, **तिर्यक्कृत्वा जम्बूद्वीपस्य द्वीपस्यो**परि यद्वा तद्वा मण्डलं [२]**चतुर्विंशत्यधिकेन शतेन छित्त्वा** भूयश्च **प्राचीनापाचीनायतया उदीच्य-दक्षिणायतया जीवया** प्रत्यञ्चया दवरिकया इत्यर्थः चतुर्भिर्विभज्य यथायोगं **दक्षिणपौरस्त्ये उत्तर[पौरस्त्ये](पश्चिमे) च मण्डलचतुर्भागे अस्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद्भूमिभागादूर्द्ध्वं अष्टौ योजनशतानि उत्प्लुत्यात्रा-स्मिन्नवकाशे प्रातर्द्वौ सूर्यावाकाशे उत्तिष्ठतः** उद्गच्छतः, य उत्तरभागं पूर्वस्मिन्नहोरात्रे प्रकाशितवान् स दक्षिणपौरस्त्ये मण्डलचतुर्भागे उद्गच्छति यस्तु दक्षिणभागं प्रकाशयति स्म स उत्तरपश्चिमे मण्डलचतुर्भागे। एवं सकलकालं जगतः स्थितिः परिभावनीया।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्टिीकायां द्वितीयस्य प्राभृतस्य प्रथमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

---

१. दक्षिणभागं उत्तरभागं - G। २. पाईणपडीणायत तं चेव जाव एत्थ णं पादो.... - मूले।

द्वितीयं प्राभृतप्राभृतम्

तदेवमुक्तं द्वितीयस्य प्राभृतस्य प्रथमं प्राभृतप्राभृतम्। सम्प्रति द्वितीयमारभ्यते। तस्य चायमर्थाधिकारो यथा मण्डलात् मण्डलान्तरे सङ्क्रमणं वक्तव्यमिति। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते मंडलातो मंडलं संकममाणे २ सूरिए चारं चरति आहिते ति वदेज्जा?

टी० 'ता कह'मित्यादि। **'ता'** इति पूर्ववत्, **कथं** भगवन् ! **मण्डलान्मण्डलं सङ्क्रामन्[१] सूर्यश्चारं चरति** चारं चरन् **आख्यात इति वदेत्** ? किमुक्तं भवति ? कथं भगवन्नेष सूर्यश्चारं चरन् मण्डलान्मण्डलं सङ्क्रामन् आख्यात ? इति वदेत्। अत्र हि मण्डलान्मण्डलान्तरसङ्क्रमणमेव वक्तव्यमतस्तदेव प्रधानीकृत्य वाक्यस्य भावार्थो भावनीयः।

एवमुक्ते भगवानाह –

मू० तत्थ खलु इमातो दो पडिवत्तीओ पण्णत्तातो। तत्थेगे एवमाहंसु ता मंडलातो मंडलं संकममाणे २ सूरिए भेदघाते(ण) संकमति आहिते ति वदेज्जा। एगे एव(माहंसु १)। एगे पुण (एवमाहंसु) ता मंडलातो मंडलं संकममाणे २ सूरिए कण्णकलं निव्वेढेति। तत्थ जे ते एवमाहंसु ता मंडलातो मंडलं संकममाणे २ सूरिए भेदघाते(ण) संकमति तेसि णं अयं दोसे जेणंतरेणं मंडलातो मंडलं संकममाणे २ सूरिए भेदघाए(ण) संकमति एवतियं च णं अद्धं पुरतो ण गच्छति पुरतो अगच्छमाणे मंडलकालं परिहवेइ। तेसि णं अयं दोसे। तत्थ जे ते एवमाहंसु ता मंडलातो मंडलं संकममाणे २ सूरिए कण्णकलं णिव्वेढेति ते[णं एवमाहंसु ता](सि

१. संकममाणे २ - मूले।

णं अयं विसेसो) जेणंतरेणं मंडलातो मंडलं संकममाणे २ सूरिए कण्णकलं णिव्वेट्ठेति एवतियं च णं अद्धं पुरतो गच्छति पुरतो गच्छमाणे २ मंडलकालं ण परिहवेति। तेसि णं अयं विसेसो। तत्थ जे ते एवमाहंसु ता मंडलातो मंडलं संकममाणे २ सूरिए कण्णकलं णिव्वेट्ठेति एएण नएणं णेयव्वं। णो चेव णं इतरेणं णेयव्वं।

बितिये बितियं पाहुडपाहुडं २।

टी० 'तत्थ खलु' इत्यादि। **तत्र** मण्डलान्मण्डलान्तरसङ्क्रमणविषये **खल्विमे द्वे प्रतिपत्ती प्रज्ञप्ते**। तद्यथा **तत्रैके एवमाहुः 'ता'** इति पूर्ववत् स्वयं भावनीयं, **मण्डलादपरं मण्डलं सङ्क्रामन्**[१] सङ्क्रमितुमिच्छन् **सूर्यो भेदघातेन सङ्क्रामति,** भेदो-मण्डलस्य मण्डलस्यापान्तरालं तत्र घातो-गमनं, एतच्च प्रागेवोक्तं तेन सङ्क्रामति, किमुक्तं भवति ? विवक्षिते मण्डले[२] सूर्येणाऽपूरिते सति तदनन्तर-मपान्तरालगमनेन द्वितीयं मण्डलं सङ्क्रामति सङ्क्रम्य च तस्मिन्मण्डले चारं चरतीति। अत्रोपसंहारः **'एगे एवमाहंसु।' ए[गे](के) पुनरेवमाहुः 'ता'** इति पूर्ववत् **मण्डलान्मण्डलं सङ्क्रामन्**[३] सङ्क्रमितुमिच्छन् **सूर्य**स्तदधिकृतं मण्डलं प्रथम-क्षणादूर्द्ध्वमारभ्य **कर्ण्णकलं निर्वेष्टयति** मुञ्चति। इयमत्र भावना- भारत ऐरावतो वा सूर्यः स्वस्थाने उद्गतः सन्नपरमण्डलगतं कर्ण्णं प्रथमकोटिभागरूपं लक्षीकृत्य शनैः शनैरधिकृ[त](तं) मण्ड[ल](लं) तया कयाचनाऽपि कलया चारं चरति येन तस्मिन्नहोरात्रेऽतिक्रान्ते सति अपरानन्तरमण्डलस्यादौ वर्त्तते इति। कर्ण्णकलमिति च क्रियाविशेषणं द्रष्टव्यम्। तच्चैवं भावनीयम्- कर्ण्णमपरमण्डलगतप्रथमकोटी-भागरूपं लक्षीकृत्याधिकृतमण्डलं प्रथमक्षणादूर्द्ध्वं क्षणे क्षणे कलया२तिक्रान्तं यथा भवति तथा निर्वेष्टयतीति। तदेवं प्रतिपत्तिद्वयमुपन्यस्य यद्वस्तुतत्त्वं तदुपदर्शयति-

१. संकममाणे २ - मूले। २. सूर्येण पूरिते - T। ३. संकममाणे २ - मूले।

'तत्थ' इत्यादि। **तत्र** तेषां द्वयानां मध्ये **ये एवमाहुः मण्डलान्मण्डलं सङ्क्रामन्[१] भेदघातेन सङ्क्रामति तेषामय**मनन्तरमुच्यमानो **दोषः**। तमेवाह **येन** यावता कालेन **अन्तरेण** अपान्तराले(न) **मण्डलान्मण्डलं सङ्क्रामन्[२] सूर्यः भेदघातेन सङ्क्रामती**त्युच्यते **एतावतीमद्धां पुरतो** द्वितीये मण्डले **न गच्छति**। किमुक्तं भवति ? मण्डलान्मण्डलं सङ्क्रामन्यावता कालेनापान्तरालं गच्छति तावत्कालोऽनन्तरं परिभ्रमितुमिष्टः द्वितीयमण्डलसत्काहोरात्रमध्यान्मुट्यति। ततो द्वितीये मण्डले परिभ्रमन् पर्यन्ते तावन्तं कालं न परिभ्रमेत्। तद्गताहोरात्रस्य परिपूर्णीभूतत्वात्। एवमपि को दोषः ? इत्याह **पुरतो** द्वितीयमण्डलपर्यन्ते [आ](**अ**)**गच्छन् मण्डलकालं परिभवति** यावता कालेन मण्डलं परिपूर्णं परिभ्रम्यते तस्य हानिरुपजायते, तथा च सति सकलजगद्विदितप्रतिनियतदिवसरात्रिपरिमाणव्याघातप्रसङ्गः। **'तेसि णमयं दोसे' तेषामयं दोषः**। **'तत्थ'** इत्यादि। **तत्र ये ते** वादिन **एवमाहुः मण्डलान्मण्डलं सङ्क्रामन्[३] सूर्यो**ऽधिकृतं मण्डलं **कर्ण्णकलं निर्व्वेष्टयति** मुञ्चति **तेषामयं विशेषो** गुण[४]स्तमेव गुणमाह – **'जेणे'**त्यादि। **येन** यावता कालेनापान्तरालेन **मण्डलान्मण्डलं सङ्क्रामन्[५] सूर्यः कर्ण्णकल**मधिकृतं मण्डलं **निर्वेष्टयति एतावतीमद्धां पुरतो**ऽपि द्वितीयमण्डलपर्यन्तेऽपि **गच्छति**। इयमत्र भावना – अधिकृतं मण्डलं किल कर्ण्णकलं निर्वेष्टिमतोऽपान्तरालगमनकालोऽधिकृतमण्डलसत्के एवाहोरात्रेऽन्तर्भूतस्तथा च सति द्वितीये मण्डले सङ्क्रान्तः सन् तद्गतकालस्य मनागप्यहीनत्वात् यावता कालेनाऽपान्तरालं गम्यते तावता कालेन पु[न]र[ग]तो गच्छति। ततः किम् ? इत्याह **पुरतो गच्छन् मण्डलकालं (न) परिभवति** यावता कालेन प्रसिद्धेन तत् मण्डलं परिसमाप्यते तावता कालेन तन्मण्डलं परिपूर्णं समापयति न पुनर्मनागपि मण्डलकालपरिहाणिस्ततो न कश्चित्सकलजगत्प्रसिद्धप्रतिनियतदिवसरात्रिपरिमाणव्याघातप्रसङ्गः। तत एष **तेषा**मेवंवादिनां **विशेषो** गुणः। तत इदमेव मतं समीचीनं नेतरदित्यावेदयन्नाह–

१,२,३,५. संकममाणे २ - मूले। ४. गुणस्तमेवाह - B, K, M।

'तत्थे'त्यादि। **तत्र ये ते वादिन एवमाहुः मण्डलान्मण्डलं सङ्क्रामन्सूर्यो**[१]-ऽधिकृतं[२] मण्डलं **कर्ण्णकलं निर्वेष्टयति एतेन नयेनाभिप्रायेणास्मन्मतेऽपि**[३] मण्डलान्मण्डलान्तरसङ्क्रमणं ज्ञातव्यम्, **न चैव इतरेण** नयेन, तत्र दोषस्योक्तत्वात्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां द्वितीयस्य प्राभृतस्य द्वितीयं प्राभृतप्राभृतं समाप्तम्।

* * * * *

जो रोगो जो सोगो, खेओ भेओ य जो य जीवाणं।
जं कारुन्नं रुन्नं च, कारणं तत्थ विसयविसं।।

जं णारगाण दुक्खं, जं च तिरिक्खाण जं च मणुयाणं।
देवाण जं च तं पि य, विसयपिवासुब्भवं सव्वं।।

विसया विसं व विसमा, विसया वडिसामिसं व मरणकरा।
विसया सेविज्जंता, छलबहुला तह मसाणं व।।

संतोसो करणजुओ, पसन्नचित्तं दयालुभावो अ।
सच्चं सोअं दुज्जण-परिहारो इअ सुहा सत्त।।

---

१. संकममाणे २ - मूले। २. ...कृतमण्डलं - M। ३. ...मतेन - H।

तृतीयं प्राभृतप्राभृतम्

तदेवमुक्तं द्वितीयस्य प्राभृतस्य द्वितीयं प्राभृतप्राभृतम्। सम्प्रति तृतीयमुच्यते। तस्य चायमर्थाधिकारो यथा मण्डले मण्डले प्रतिमुहूर्त्तं गतिर्वक्तव्येति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता केवतियं ते खेत्तं एगमेगेणं मुहुत्तेणं सूरिए गच्छति आहितेति वदेज्जा ?

टी० 'ता केवइयं (ते) खेत्तं सूरिए एगमेगेणमित्यादि। **'ता'** इति पूर्ववत् **कियन्मात्रं क्षेत्रं** भगवन् ! **'ते' त्वया एकैकेन मुहूर्त्तेन (सूर्यो) गच्छति** गच्छन् **आख्यात इति वदेत्** ?

एवमुक्ते सति भगवान् एतद्विषयपरतीर्थिकप्रतिपत्तिमिथ्याभावोपदर्शनाय प्रथमतस्ता एव परप्रतिपत्तीरुपदर्शयति–

मू० तत्थ खलु इमातो चत्तारि पडिवत्तीओ पण्णत्ताओ। तं जहा- तत्थ एगे एवमाहंसु ता छ छ जोयणसहस्साइं सूरिए एगमेगेणं मुहुत्तेणं गच्छति आहिते ति वदेज्जा। एगे एव(माहंसु १)। एगे पुण (एवमाहंसु) ता पंच पंच जोयणसहस्साइं सूरिए एगमेगेणं मुहुत्तेणं गच्छति आहिते ति वदेज्जा। एगे (एवमाहंसु २)। एगे पुण (एवमाहंसु) ता चत्तारि चत्तारि जोयणसहस्साइं सूरिए एगमेगेणं मुहुत्तेणं गच्छति आहितेति वदेज्जा। एगे एव(माहंसु ३)। एगे पुण (एवमाहंसु) ता छावि पंचवि चत्तारि वि जोयणसहस्साइं सूरिए एगमेगेणं मुहुत्तेणं गच्छति आहिते ति वदेज्जा। (एगे एवमाहंसु ४।)

टी० 'तत्थ' इत्यादि। **तत्र** मुहूर्त्तगति[1]परिमाणचिन्तायां **खल्विमाश्चतस्रः प्रतिपत्तयः प्रज्ञप्तास्तद्यथा – तत्र** तेषां चतुर्णां प्रतिवादिनां मध्ये **एके एवमाहुः**

१. प्रतिमुहूर्त्तं गतिपरिमाण... - H, K, T।

षट्[१] षट् योजनसहस्राणि सूर्य एकैकेन मुहूर्त्तेन गच्छति। अत्रैवोपसंहारः **'एगे एवमाहंसु १।'** एवमग्रेतनान्यप्युपसंहारवाक्यानि भावनीयानि। **एके पुनर्द्वितीया एवमाहुः पञ्च पञ्च योजनसहस्राणि सूर्य एकैकेन मुहूर्त्तेन गच्छति २। एके पुनस्तृतीया एवमाहुश्चत्वारि चत्वारि योजनसहस्राणि सूर्य एकैकेन मुहूर्त्तेन गच्छति ३।** अपरे **पुनश्चतुर्था एवमाहुः षडपि पञ्चापि चत्वार्यपि योजन-सहस्राणि सूर्य एकैकेन मुहूर्त्तेन गच्छति ४।**

तदेवं चतस्रोऽपि प्रतिपत्तीः सङ्क्षेपत उपदर्श्य सम्प्रत्येतासां यथाक्रमं भावनिकामाह–

मू० तत्थ जे ते एव(माहंसु) ता छ छ जोयणसहस्साइं सूरिए एगमेगेणं मुहुत्तेणं[२] गच्छति ते णं एवमाहंसु ता जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं उत्तमकट्ठपत्ते जाव [तं] दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। तंसि च णं दिवसंसि एगं जोयणसयसहस्सं अट्ठजोयणसहस्साइं तावखेत्ते पण्णत्ते। ता जया णं सूरिए सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति तता णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता[३] राती भवति जहण्णिए[४] दुवालसमुहुत्ते दिवसे भवति। तंसि च णं दिवसंसि बावत्तरिजोयणसहस्साइं तावखेत्ते पण्णत्ते। तेसिं णं छ छ जोयणसहस्साइं एगमेगेणं मुहुत्तेणं गच्छइ।

टी० 'तत्थे'त्यादि। तत्र ये ते वादिन एवमाहुः षट् षट् योजनसहस्राणि सूर्य एकैकेन मुहूर्त्तेन गच्छति ते एवमाहुः यदा सूर्यः[५] सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्तः परमप्रकर्षप्राप्तो-

---

१. षट् योजन... - A। २. गच्छति आहिते ति - U। ३. ...मुहुत्तिया - R। ४. जहण्णए - U। ५. सर्वाभ्यन्तरमण्डलं - E।

ऽष्टादशमुहूर्त्तो दिवसो भवति [१]सर्वजघन्या च द्वादशमुहूर्त्ता रात्रिः, [२]तस्मिंश्च दिवसे तापक्षेत्रं प्रज्ञप्तं एकं योजनशतसहस्रमष्टौ च योजनसहस्राणि, तथाहि – सर्वस्मिन्नपि मण्डले उदयमानः सूर्यो दिवसस्यार्द्धेन यावन्मात्रं क्षेत्रं [३]व्याप्नोति तावति व्यवस्थितश्चक्षुर्गोचरमायाति। तत एतावत्किल पुरतस्तापक्षेत्रं, यावच्च पुरतस्तापक्षेत्रं तावत्पश्चादपि, यत उदयमान इवास्तमयमानोऽपि सूर्यो दिवसस्यार्द्धेन यावन्मात्रं क्षेत्रं [४]व्याप्नोति तावति व्यवस्थितश्चक्षुषोपलभ्यते। एतच्च प्रतिप्राणि सुप्रसिद्धम्। सर्वाभ्यन्तरे मण्डले दिवसस्यार्द्धं नवमुहुर्त्तास्ततोऽष्टादशभिर्मुहूर्त्तैर्यावन्मात्रं क्षेत्रं गम्यं तावत्प्रमाणं तापक्षेत्रं, [५]एकैकेन च मुहुर्त्तेन षट् षट् (योजनसहस्राणि गम्यन्ते, ततः षण्णां) योजनसहस्राणां अष्टादशभिर्गुणने भवत्येकं योजनशतसहस्रं अष्टौ योजनसहस्राणीति। एवमुत्तरत्रापि तत्तन्मण्डलगतदिवसपरिमाणं प्रतिमुहूर्त्तगतिपरिमाणं च परिभावयता तापक्षेत्रपरिमाणभावना भावनीया। [६]**यदा** च **सर्वबाह्यं मण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्ताऽष्टादशमुहूर्त्ता रात्रिर्भवति सर्वजघन्यश्च द्वादशमुहूर्त्तो दिवसः, तस्मिंश्च दिवसे तापक्षेत्रं** - तापक्षेत्रपरिमाणं **द्विसप्ततियोजनसहस्राणि** ७२,०००, [७]तथाहि – तापक्षेत्रं द्वादशमुहूर्त्तगम्य(परि)-माणमत्रार्थे च भावना प्रागुक्तानुसारेण स्वयं भावनीया, [८]मुहूर्त्तेन च षड्योजनसहस्राणि गच्छति, ततः षण्णां योजनसहस्राणां द्वादशभिर्गुणने भवन्ति द्वासप्ततिरेव योजनसहस्राणीति। इमामेवोपपत्तिं लेशत आह - **'तेसि ण'**मित्यादि। **तेषां** हि तीर्थान्तरीयाणां मतेन सूर्यः **षट् षट् योजनसहस्राण्येकैकेन मुहूर्त्तेन गच्छति,** ततः सर्वाभ्यन्तरे सर्वबाह्ये च मण्डले यथोक्तमेव तापक्षेत्रपरिमाणं भवतीति (१)।

मू० तत्थ जे ते एवमाहंसु ता पंच पंच जोयणसहस्साइं सूरिए एगमेगेणं मुहुत्तेणं गच्छति ते णं एवमाहंसु ता जया णं सूरिए

१. सर्वजघन्या द्वादश - ।। २. तस्मिन्दिवसे - D,।। ३. प्राप्नोति - E। ४. प्राप्नोति - E। ५. एकैकेन मुहूर्त्तेन - ।। ६. यदा सर्व.... - ।। ७. तदाहि - D, E, I, N। ८. मुहूर्त्तेन षट् षट् योजन... - ।।

सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं उत्तमकट्ठ जाव दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। तंसि च णं दिवसंसि णउतिं जोयणसहस्साइं तावखेत्ते पण्णत्ते। ता जया णं सूरिए सव्वबाहिरं जाव चारं चरति तता णं उत्तमकट्ठप(त्ता) उक्कोसिया अट्ठारसमुहुत्ता राती भवति जहण्णए दुवालस(मुहुत्ते) दिवसे भवति। तंसि च णं दिवसंसि सट्ठिजोयणसहस्साइं तावखेत्ते पण्णत्ते। तता णं पंच पंच जोयणसहस्साइं एगमेगेणं मुहुत्तेणं गच्छति।

टी० [१]तथा च '**तत्थे**'त्यादि। **तत्र** तेषां वादिनां मध्ये **ये ते** वादिन **एवमाहुः** [२]**पञ्च पञ्च योजनसहस्राणि सूर्य एकैकेन मुहूर्त्तेन गच्छति ते एवमाहुर्यदा सूर्यः** [३]**सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्तो-ऽष्टादशमुहूर्त्तो दिवसो भवति सर्वजघन्या च द्वादशमुहूर्त्ता रात्रिः। तस्मिंश्च** सर्वाभ्यन्तरमण्डलगते अष्टादशमुहूर्त्तप्रमाणे **दिवसे तापक्षेत्रं**-तापक्षेत्रपरिमाणं **प्रज्ञप्तं नवतियोंजनसहस्राणि,** [४]तथाहि प्रागुक्तयुक्तिवशादष्टादशमुहूर्त्तगम्यप्रमाणं तापक्षेत्रं, एकैकेन च मुहूर्त्तेन गच्छति सूर्यः पञ्च पञ्च योजनसहस्राणि। ततः पञ्चानां योजनसहस्राणां अष्टादशभिर्गुणने नवतिरेव योजनसहस्राणि भवन्ति। '**ता जया ण**'मित्यादि। **यदा सूर्यः सर्वबाह्यं मण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्ता अष्टादशमुहूर्त्ता रात्रिर्भवति जघन्यश्च द्वादशमुहूर्त्तो दिवसः।** '**[तस्सिं] (तंसि)च ण**'मित्यादि। **तस्मिन्** सर्वबाह्यमण्डलगते सर्वजघन्ये द्वादशमुहूर्त्तप्रमाणे **दिवसे तापक्षेत्रं प्रज्ञप्तं षष्टियोजनसहस्राणि** ६०,०००। [५]तथाह्यनन्तरोक्तयुक्तिवशात् द्वादशमुहूर्त्तगम्यप्रमाणं तापक्षेत्रमेकैकेन च मुहूर्त्तेन पञ्च पञ्च योजनसहस्राणि गच्छति। ततः पञ्चानां योजनसहस्राणां द्वादशभिर्गुणने भवन्ति

---

१. तथा 'तत्थे'त्यादि D, E, I। २. पञ्च योजन - D, E, N। ३. सर्वाभ्यन्तरमण्डल... - E। ४. तदाहि - E, F, I। ५. तदा... - E, F।

षष्टियोजनसहस्राणि ६०,०००। अत्रैवोपपत्तिलेशमाह **'तया ण'**मित्यादि। **तदा** सर्वाभ्यन्तरमण्डलचारचरणकाले सर्वबाह्यमण्डलचारचरणकाले च **पञ्च २ योजन-सहस्राणि** सूर्य **एकैकेन मुहूर्त्तेन गच्छति**। ततः [१]सर्वाभ्यन्तरे मण्डले सर्वबाह्ये च मण्डले यथोक्तमातपक्षेत्रपरिमाणं भवति २।

मू० तत्थ जे ते एवमाहंसु ता चत्तारि चत्तारि जोयणसहस्साइं सूरिए एगमेगेणं मुहुत्तेणं गच्छति ते णं एवमाहंसु ता जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता [२]णं उत्तम(कट्ठपत्ते) उक्कोसे अट्ठारस(मुहुत्ते) दिवसे भवति जहण्णिया दुवालस(मुहुत्ता) राई भवति। तंसि च णं दिवसंसि बावत्तरिं जोयणसहस्साइं तावखेत्ते पण्णत्ते। ता जया णं सूरिए सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति तता णं उत्तम(कट्ठपत्ता) उक्कोसिया अट्ठारस(मुहुत्ता) राती भवति जहण्णए दुवालस(मुहुत्ते) दिवसे भवति। तंसि च णं दिवसंसि अडयालीसं जोयणसहस्साइं तावखेत्ते पण्णत्ते। तता णं चत्तारि (२) जोयणसहस्साइं सूरिए एगमेगेणं मुहुत्तेणं गच्छति।

टी० 'तत्थे'त्यादि। **तत्र ये ते** वादिन **एवमाहुः चत्वारि २ योजनसहस्राणि सूर्य एकैकेन मुहूर्त्तेन गच्छति ते एवमाहुः** एवं सूर्यतापक्षेत्रप्ररूपणां कुर्वन्ति – **यदा सूर्यः सर्वाभ्यन्तरमण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्त उत्कृष्टोऽष्टादशमुहूर्त्तो दिवसो भवति सर्वजघन्या च द्वादशमुहूर्त्ता रात्रिः।** '**[तेसिं](तंसि) च ण**'मित्यादि। **तस्मिंश्च** [३]सर्वाभ्यन्तरमण्डलगतेऽष्टादशमुहूर्त्त[४]प्रमाणे **दिवसे तापक्षेत्रं प्रज्ञप्तं द्विसप्ततिर्योजनसहस्राणि** ७२,०००। तथाह्येतेषां मतेन सूर्य एकैकेन मुहूर्त्तेन गच्छति चत्वारि चत्वारि योजनसहस्राणि, सर्वाभ्यन्तरे च

---

१. सर्वाभ्यन्तरे सर्वबाह्ये च मण्डले - G, F। २. तया णं दिवसराई तहेव - P, U, V।
३. सर्वाभ्यन्तरं मण्डल.... - C, G, K। ४. .....प्रमाणदिवसे... - H।

मण्डले तापक्षेत्रपरिमाणं प्रागुक्तयुक्तिवशादष्टादशमुहूर्त्तगम्यं ततश्चतुर्णां योजनसहस्राणामष्टादशभिर्गुणने भवन्ति द्विसप्ततिर्योजनसहस्राणि। **'ता जया ण'**मित्यादि। ततो **यदा सूर्यः सर्वबाह्यं मण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्ता उत्कृष्टा अष्टादशमुहूर्त्ता रात्रिर्भवति जघन्यश्च द्वादशमुहूर्त्तप्रमाणो दिवसः**। **'[तस्सिं](तंसि) च ण'**मित्यादि। **तस्मिंश्च** सर्वबाह्यमण्डलगते द्वादशमुहूर्त्तप्रमाणे **दिवसे तापक्षेत्रं प्रज्ञप्तमष्टचत्वारिंशद्योजनसहस्राणि**[१] ४८,०००, तथाहि तापक्षेत्रं द्वादशमुहूर्त्तगम्यं, एकैकेन च मुहूर्त्तेन चत्वारि २ योजनसहस्राणि गच्छति, ततश्चतुर्णां योजनसहस्राणां द्वादशभिर्गुणने अष्टचत्वारिंशत्सहस्राणि भवन्ति। इमामेवोपपत्तिं लेशतो भावयति- **'तया ण'**मित्यादि। **तदा** सर्वाभ्यन्तरमण्डलचारकाले सर्वबाह्यमण्डलचारकाले च यतश्चत्वारि २ **योजनसहस्राण्येकैकेन मुहूर्त्तेन गच्छति** ततः सर्वाभ्यन्तरे सर्वबाह्ये च मण्डले यथोक्तं तापक्षेत्रं तापक्षेत्रपरिमाणं भवति ३।

मू० तत्थ जे ते एवमाहंसु ता छावि पंचवि चत्तारिवि जोयणसहस्साइं सूरिए एगमेगेणं मुहुत्तेणं गच्छति ते णं एवमाहंसु ता सूरिए णं उग्गमणमुहुत्तंसि अत्थमणमुहुत्तंसि य सिग्घगती भवति। तता णं छ छ जोयणसहस्साइं एगेमेगेणं मुहुत्तेणं गच्छति। मज्झिमं तावखेत्तं समासातेमाणे सूरिए मज्झिमगती भवति। तता णं पंच पंच जोयणसहस्साइं एगमेगेणं मुहुत्तेणं गच्छति। मज्झिमं तावखेत्तं संपत्ते सूरिए मंदगती भवति। तता णं चत्तारि जोयणसहस्साइं एगमेगेणं मुहुत्तेणं गच्छति। तत्थ णं के हेतू ति वदेज्जा? ता अयण्णं जंबुद्दीवे दीवे जाव परिक्खेवेणं। ता जता णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं उत्तम(कट्ठपत्ते)[२] उक्कोसे अट्ठारसमुहुत्ते दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति।

१. ....मष्टा... - C, T। २. उक्कोसए - U।

तंसि च णं दिवसंसि एक्काणउतिं जोयणसहस्साइं तावखेत्ते पण्णत्ते। ता जया णं सूरिए सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति तता णं उत्तम(कट्ठपत्ता) उक्कोसा अट्ठारस(मुहुत्ता) राती भवति जहण्णए दुवालस(मुहुत्ते) दिवसे भवति। तंसि च णं दिवसंसि एगट्ठि-जोयणसहस्साइं तावखेत्ते पण्णत्ते। तता णं छावि [चत्तारिवि] पंचवि (चत्तारिवि) जोयणसहस्साइं एगमेगेणं मुहुत्तेणं गच्छति। एगे एवमाहंसु।

टी० '**तत्थे**'त्यादि। **तत्र ये ते** वादिन **एवमाहुः षडपि पञ्चापि चत्वार्यपि योजनसहस्राणि सूर्य एकैकेन मुहूर्त्तेन गच्छति त एवमाहुः** – एवं सूर्य(चारं) प्ररूपयन्ति **सूर्य उद्गमनमुहूर्त्ते अस्तमनमुहूर्त्ते च शीघ्रगतिर्भवति**।[1] ततस्तदा उद्गमनकाले अस्तमयकाले च सूर्य **एकैकेन मुहूर्त्तेन गच्छति षट् षट् योजन-सहस्राणि**। तदनन्तरं सर्वाभ्यन्तरगतं मुहूर्त्तमात्रगम्यं तापक्षेत्रं मुक्त्वा शेषं **मध्यमं तापक्षेत्रं** परिभ्रमेणा**सादयन्मध्यमगतिर्भवति**। ततस्तदा **पञ्च पञ्च योजन-सहस्राणि एकैकेन मुहूर्त्तेन गच्छति**। सर्वाभ्यन्तरगतं मुहूर्त्तमात्रगम्यं **तापक्षेत्रं सम्प्राप्तः सन् सूर्यो मन्दगतिर्भवति**। ततस्तदा यत्र तत्र वा मण्डले **चत्वारि चत्वारि योजनसहस्राणि एकैकेन मुहूर्त्तेन गच्छति**। अत्रैव भावार्थं पिपृच्छिषुराह- '**तत्थे**'त्यादि। **तत्र** एवंविधवस्तुतत्त्वव्यवस्थायां **को हेतुः** का उपपत्ति**रिति वदेत्**? एवं स्वशिष्येण प्रश्ने कृते सति ते एवमाहुः- '**ता अयण्ण**'मित्यादि। इदं जम्बूद्वीपवाक्यं पूर्ववत् स्वयं पूर्णं पठनीयं व्याख्यानीयं च। '**ता जया ण**'मित्यादि। **तत्र यदा सूर्यः सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तम-काष्ठाप्राप्त उत्कृष्टोऽष्टादशमुहूर्त्तो दिवसो भवति जघन्या च द्वादशमुहुर्त्ता रात्रिः**

---

१. अस्तगमनमुहूर्त्ते - H। अस्तमयनमुहूर्त्ते - G, K।

भवति। '**[तस्सिं](तंसि) च ण**'मित्यादि। **तस्मिंश्च** सर्वाभ्यन्तरमण्डलगते अष्टादशमुहूर्त्तप्रमाणे **दिवसे तापक्षेत्रं प्रज्ञप्तमेकनवतियोजनसहस्राणि** ९१,०००। एतानि चैवमुपपद्यन्ते उद्गमनमुहूर्त्ते अस्तमनमुहूर्त्ते च प्रत्येकं षड्योजनसहस्राणि गच्छति ६,०००। तत उभयमीलने द्वादशयोजनसहस्राणि १२,०००। सर्वाभ्यन्तरं मुहूर्त्तमात्रगम्यं तापक्षेत्रं मुक्त्वा शेषे मध्यमे तापक्षेत्रे पञ्चदशमुहूर्त्तगम्यप्रमाणे [१]पञ्च पञ्च योजनसहस्राणि गच्छतीति पञ्चानां योजनसहस्राणां पञ्चदशभिर्गुणने पञ्चसप्तति-योजनसहस्राणि ७५,०००। सर्वाभ्यन्तरे मुहूर्त्तमात्रगम्ये तापक्षेत्रे चत्वारि योजन-सहस्राणि ४,००० गच्छतीति। सर्वमीलने एकनवतियोजनसहस्राणि भवन्ति। न चैतान्यन्यथा घटन्ते। तथा '**ता जया ण**'मित्यादि। **तत्र यदा [२]सर्वबाह्यमण्डल-मुपसङ्क्रम्य चारं चरति सूर्यस्तदा उत्तमकाष्ठाप्राप्ताऽष्टादशमुहूर्त्ता रात्रिर्भवति जघन्यश्च द्वादशमुहूर्त्तो दिवसः**। '**[तस्सिं](तंसि) च ण**'मित्यादि। **तस्मिंश्च** सर्वबाह्यमण्डलगते द्वादशमुहूर्त्तप्रमाणे **दिवसे तापक्षेत्रं प्रज्ञप्तमेकषष्टियोजन-सहस्राणि** ६१,०००। तानि चैवं घटां प्राञ्चति – उद्गमनमुहूर्त्ते [३]अस्तमयमुहूर्त्ते च प्रत्येकं षड्योजनसहस्राणि गच्छति। तत उभयमीलने द्वादशयोजनसहस्राणि १२,०००। [४]सर्वाभ्यन्तरं तु मुहूर्त्तमात्रगम्यं तापक्षेत्रं मुक्त्वा शेषे मध्यमे तापक्षेत्रे नवमुहूर्त्तगम्यप्रमाणे पञ्चयोजनसहस्राणि एकैकेन मुहूर्त्तेन गच्छतीति पञ्चानां योजनसहस्राणां नवभिर्गुणने पञ्चचत्वारिंशद्योजनसहस्राणि ४५,०००। सर्वाभ्यन्तरे मुहूर्त्तमात्रगम्यतापक्षेत्रे चत्वारि योजनसहस्राणि ४,००० गच्छतीति सर्वमीलने एकषष्टियोजनसहस्राणि ६१,०००। न चैतान्यप्यन्यथोपपद्यन्ते। ततः [**'सूर्याणा'**] (**'तया ण'**)मित्यादि। **तदा** सर्वाभ्यन्तरमण्डलचारकाले सर्वबाह्यमण्डलचारकाले च उक्तप्रकारेण **षडपि पञ्चापि चत्वार्यपि योजनसहस्राणि सूर्य एकैकेन मुहूर्त्तेन**

---

१. पञ्च योजनसहस्राणि - M। २. सर्वबाह्यं मण्डल.... - A। ३. अस्तमनमुहूर्त्ते - T। ४. सर्वाभ्यन्तरं मुहूर्त्तमात्र... - A।

गच्छति। [१]अत्र चोपसंहारः **'एगे एवमाहंसु'** एके [२]चतुर्थवादिन एवमनन्तरोक्तेन प्रकारेणाऽऽहुः।

तदेवं परतीर्थिकप्रतिपत्तीरुपदर्श्य सम्प्रति स्वमतमाविश्चिकीर्षुराह –

मू० वयं पुण एवं वदामो ता सातिरेगाइं पंच जोयणसहस्साइं सूरिए एगमेगेणं मुहुत्तेणं गच्छति आहितेति वदेज्जा।

टी० **'वयं पुण'**[मि](इ)त्यादि। **वयं पुन**रुत्पन्नकेवलज्ञानाः केवलज्ञानेन यथावस्थितं वस्तूपलभ्य **एवं** वक्ष्यमाणप्रकारेण **वदाम**स्तमेव प्रकारमाह – **'ता साइरेगाइं'** इत्यादि। **'ता'** इति पूर्ववत् **सातिरेकाणि** समधिकानि [३]पञ्च **पञ्च योजनसहस्राणि सूर्य एकैकेन मुहूर्त्तेन गच्छति**। इह क्वापि मण्डले कियता (अधिकेन) कालेन पञ्च पञ्च योजनसहस्राणि गच्छति। ततः सर्वमण्डलव्याप्तिमपेक्ष्य सामान्यत उक्तं सातिरेकाणीति।

एवमुक्ते भगवान् गौतमस्वामी स्वशिष्य[४]स्पष्टबोधनाय भूयः पृच्छति –

मू० तत्थ णं के हेतू त्ति वदेज्जा?

टी० **'तत्थे'**त्यादि। **तत्र** एवंविधायामनन्तरोदितायां वस्तुव्यवस्थायां **को हेतुः** का उपपत्तिः **इति वदेत्**?

भगवान्वर्द्धमानस्वाम्याह –

मू० ता अयण्णं जंबुद्दीवे २ जाव परिक्खेवेणं। ता जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं पंच जोयणसहस्साइं दोण्णि य एक्कापण्णे जोयणसते [५]अगुणतीसे सट्ठिभागे जोयणस्स एगमेगेणं मुहुत्तेणं गच्छति। तता णं इहगतस्स [६]मणूसस्स सीतालीसाए जोयणसहस्सेहिं दोहि य तेवट्ठेहिं जोयणसतेहिं

---

१. तत्र - J। २. चतुर्था वादिन - T। ३. पंच जोयणसहस्साइं - मूले। ४. ....स्पष्टावबोधनाय - J। ५. अगुणतीसं च सट्ठि... - O। ६. मणूसस्स य सीता.... O।

एक्कावीसाए य सट्ठिभागे(हिं) जोयणस्स सूरिए चक्खुप्फासं हव्वमागच्छति। तता णं उत्तम(कट्ठपत्ते) उक्कोसे अट्ठा(रसमुहुत्ते) दिवसे भवति जहण्णिया दुवालसमुहुत्ता राती भवति। से निक्खममाणे सूरिए णवं संवच्छरं अयमाणे पढमंसि अहोरत्तंसि अब्भंतराणंतरं मंडलं उवसंकमित्ता चारं चरति। ता जदा णं सूरिए अब्भिंतराणंतरं मंडलं उवसंकमित्ता चारं चरति तता णं पंच जोयणसहस्साइं दोण्णि य एक्कापण्णे जोयणसते [१]सीतालीसं च सट्ठिभागे जोयणस्स एगमेगेणं मुहुत्तेणं गच्छति। तता णं इहगतस्स मणूसस्स सीतालीसाते जोयणसहस्सेहिं अगुणासीते य जोयणसते सत्तावण्णए य सट्ठिभागे जोयणस्स सट्ठिभागं च एकट्ठिहा छेत्ता अउणवीसाए चुण्णियाभागेहिं चक्खुप्फासं हव्वमागच्छति। तता णं अट्ठारस(मुहुत्ते) दिवसे दोहिं (एगट्ठिभागमुहुत्तेहिं) ऊणे दुवालस-(मुहुत्ता) राती दोहिं (एगट्ठिभागमुहुत्तेहिं) अहिता। से णिक्खममाणे सूरिए दोच्चंसि अहोरत्तंसि [२]अब्भिंतरं तच्चं मंडलं उवसंकमित्ता चारं चरति। ता जया णं सूरिए [३]अब्भिंतरं तच्चं मंडलं उवसंकमित्ता चारं चरति तता णं पंच जोयणसहस्साइं दोण्णि य बावण्णे जोयणसते [४]पंच य सट्ठिभागे जोयणस्स एगमेगेणं मुहुत्तेणं गच्छति। तता णं इहगतस्स मणूसस्स सीयालीसाए जोयणसहस्सेहिं छाणउइए जोयणेहिं तेत्तीसाए य सट्ठिभागेहिं जोयणस्स सट्ठिभागं च [५]एगट्ठिहा छेत्ता दोहिं चुण्णियाभागेहिं सूरिए चक्खुप्फासं हव्वमागच्छति। तता णं अट्ठा(रसमुहुत्ते) दिवसे चउहिं (एगट्ठिभागमुहुत्तेहिं) ऊणे दुवालस-

१. सीतालीसं सट्ठिभागे - H। २. अब्भंतरं - U। ३. अब्भंतरं - U। ४. पंच सट्ठिभागे - H। ५. एगट्ठिधा - P, U।

(मुहुत्ता) राती चउ(हिं एगट्ठिभागमुहुत्तेहिं) अहिया। एवं खलु एएणं उवाएणं णिक्खममाणे सूरिए ततणंतरातो ततणंतरं मंडलाओ मंडलं संकममाणे सं० अट्ठारस २ सट्ठिभागे जोयणस्स एगमेगे मंडले मुहुत्तगतिं अभिवड्ढेमाणे २ चुलसी चुलसी जोयणाइं (सीयाइ) पुरिसच्छायं निवुड्ढेमाणे २ सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति। ता जया णं सूरिए सव्वबाहिरं जाव चारं चरति तता णं पंच पंच जोयणसहस्साइं तिण्णि य पंचुत्तरे जोयणसते पण्णरस य सट्ठिभागे जोयणस्स एगमेगेणं मुहुत्तेणं गच्छति। तता णं इहगतस्स मणूसस्स [१]एक्कतीसाए जोयणसहस्सेहिं अट्ठहि य [२]एक्कतीसेहिं जोयणसएहिं तीसाए य सट्ठिभागेहिं जोयणस्स सूरिए चक्खुप्फासं हव्वमागच्छति। तता णं उत्तम(कट्ठपत्ता) उक्कोसा अट्ठा(रसमुहुत्ता) राती भवति दुवालस(मुहुत्ते) जहण्णए दिवसे भवति। एस णं पढमे छम्मासे। एस णं पढमस्स छम्मासस्स पज्जवसाणे। से पविसमाणे सूरिए दोच्चं छम्मासं अयमाणे पढमंसि अहोरत्तंसि बाहिराणंतरं मंडलं उवसंकमित्ता चारं चरति। (ता) जया णं सूरिए बाहिराणंतरं मंडलं जाव चारं चरति तता णं पंच जोयणसहस्साइं तिण्णि य [३]चउरुत्तरे जोयणसते सत्तावण्णं च सट्ठिभागे जोयणस्स एगमेगेणं मुहुत्तेणं गच्छति। तया णं इहगयस्स मणूसस्स एक्कतीसाए जोयणसहस्सेहिं णवहिं य सोलेहिं जोयणसतेहिं एगूणचत्तालीसाए य सट्ठिभागेहिं जोयणस्स सट्ठिभागं च एगट्ठिहा छेत्ता सट्ठीए चुण्णियाभागेहिं चक्खुप्फासं हव्वमागच्छति। तता णं अट्ठा(रसमुहुत्ता) राती भवति

---

१. इक्कतीसाए - P। २. इक्कतीसेहिं - P। ३. चउत्तरे - H।

दोहिं (एगट्ठिभागमुहुत्तेहिं) ऊणा दुवालस(मुहुत्ते) दिवसे दोहिं (एगट्ठिभागमुहुत्तेहिं) अहिए। से पविसमाणे (सूरिए) दोच्चंसि अहोरत्तंसि बाहिरं तच्चं मंडलं उवसंकमित्ता चारं चरति। ता जया णं सूरिए बाहिरं तच्चं जाव चारं चरति तता णं पंच जोयणसहस्साइं तिण्णि य चउरुत्तरे जोयणसते उणतालीसं च सट्ठिभागे जोयणस्स एगमेगेणं मुहुत्तेणं गच्छति। तता णं इहगतस्स मणूसस्स एगाहिएहिं बत्तीसाए जोयणसहस्सेहिं अगुणपण्णाए य सट्ठिभागेहिं जोयण(स्स) सट्ठिभागं च एगट्ठिहा छेत्ता तेवीसाए य चुण्णियाभागेहिं चक्खुप्फासं हव्वमागच्छति। तता णं अट्ठारस(मुहुत्ता) राती चउ(हिं एगट्ठिभाग-मुहुत्तेहिं) ऊणा दुवालस(मुहुत्ते) दिवसे चउहिं (एगट्ठिभागमुहुत्तेहिं) अहिए। एवं खलु एएणं उवाएणं पविसमाणे सूरिए ततणंतराउ तयणंतरं मंडलाउ मंडलं संकममाणे २ अट्ठारस २ सट्ठिभागे जोयणस्स एगमेगे मंडले मुहुत्तगतिं णिवुड्ढेमाणे २ साइरेगाइं पंचासीतिं २ जोयणाइं पुरिसच्छायं अभिवड्ढेमाणे अ० २ सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति। ता जता णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं पंच जोयणसहस्साइं दोण्णि य एक्कावण्णे जोयणसते अगुणतीसं च सट्ठिभागे जोयणस्स एगमेगेणं मुहुत्तेणं गच्छति। तता णं इहगतस्स मणूसस्स सीतालीसाए जोयणसहस्सेहिं दोहिं य तेवट्ठेहिं जोयणसतेहिं एक्कवीसाए य सट्ठिभागेहिं जोयणस्स चक्खुप्फासं हव्वमागच्छति। तता णं उत्तम(कट्ठपत्ते) उक्कोसे अट्ठारस(मुहुत्ते) दिवसे भवति जहण्णिया दुवालसमुहुत्तिया राती भवति। एस णं दोच्चे छम्मासे। एस णं दो०

जाव पज्जवसाणे। एस णं आतिच्चे संवच्छरे। एस णं जाव पज्जवसाणे।

बिति[यया](ए) [1]ततियं (पाहुड)पाहुडं। बितियं पाहुडं।

टी० '**ता अयण्ण**'मित्यादि। इदं जम्बूद्वीपवाक्यं पूर्ववत्। '**ता जया ण**'मित्यादि। **तत्र यदा सूर्यः सर्वाभ्यन्तरमण्डलमुपसङ्क्रम्य चारं चरति तदा पञ्च योजनसहस्राणि द्वे योजनशते एकपञ्चाशदधिके एकोनत्रिंशतं च षष्टिभागान् योजनस्य** ५,२५१ २९/६० **एकैकेन मुहूर्त्तेन गच्छति**। कथमेतदवसीयते इति चेद्? उच्यते, इह द्वाभ्यां सूर्याभ्यामेकमण्डलं परिसमाप्यते एकेनाहोरात्रेण, अहोरात्रश्च त्रिंशन्मुहूर्त्तप्रमाणः, प्रतिसूर्यं चाहोरात्रगणने परमार्थतो द्वाभ्यामहोरात्राभ्यां मण्डलं परिभ्रमणतः परिसमाप्यते, द्वयोश्चाहोरात्रयोर्मुहूर्त्ताः षष्टिर्भवन्ति ततो मण्डलपरिरयस्य षष्ट्या भागं हारयेत्, (यत्) भागलब्धं भवति तन्मुहूर्त्तगतिपरिमाणम्। तत्र सर्वाभ्यन्तरे मण्डले परिरयपरिमाणं त्रीणि लक्षाणि पञ्चदशसहस्राणि नवाशीत्यधिकानि ३,१५,०८९। अस्य षष्ट्या भागे हृते लब्धं यथोक्तं मुहूर्त्तगतिपरिमाणमिति। अथ तस्मिन् सर्वाभ्यन्तरे मण्डले कियति क्षेत्रे व्यवस्थित उदयमान सूर्य इहगतानां मनुष्याणां चक्षुर्गोचरमायातीति प्रश्नावकाशमाशङ्क्याह - '**तया ण**'मित्यादि। **तदा** सर्वाभ्यन्तरमण्डलचारचरणकाले उदयमानः **सूर्य इहगतस्य मनुष्यस्य**, अत्र जातावेकवचनं, ततोऽयमर्थः इहगतानां भरतक्षेत्रगतानां मनुष्याणां **सप्तचत्वारिंशता योजनसहस्रैर्द्वाभ्यां त्रिषष्ट्यधिकाभ्यां योजनशताभ्यामेकविंशत्या च षष्टिभागैर्योजनस्य चक्षुःस्पर्शं 'हव्वं ति' शीघ्रमागच्छति**। का अत्रोपपत्तिरिति चेत्? उच्यते, इह हि दिवसस्यार्द्धेन यावन्मात्रं क्षेत्रं व्याप्यते तावति व्यवस्थित उदयमानः सू[यं](र्य) उपलभ्यते, सर्वाभ्यन्तरे च मण्डले दिवसोऽष्टादशमुहूर्त्तप्रमाणस्तेषामर्द्धे नव मुहूर्त्ताः, एकैकस्मिंश्च मुहूर्त्ते

१. ततियं, बितीयं पाहुडं - R।

सर्वाभ्यन्तरे मण्डले चारं चरन् पञ्च पञ्च योजनसहस्राणि द्वे च योजनशते एकपञ्चाशदधिके एकोनत्रिंशतं षष्टिभागान् योजनस्य गच्छति। तत एतावत् मुहूर्त्तगतिपरिमाणं नवभिर्मुहूर्त्तैर्गुण्यते। ततो भवति यथोक्तं दृष्टिपथप्राप्ततविषये परिमाणमिति। **'तया ण'**मित्यादि। **तदा** सर्वाभ्यन्तरमण्डलचारकाले **उत्तमकाष्ठाप्राप्तः उत्कर्षकोऽष्टादशमुहूर्त्तप्रमाणो दिवसो भवति जघन्या च द्वादशमुहूर्त्ता रात्रिः। 'से निक्खममाणे'** इत्यादि। ततः सर्वाभ्यन्तरान्मण्डलात्प्रागुक्तप्रकारेण **निष्क्रामन् सूर्यो नवं संवत्सरमाददानः** नवस्य संवत्सरस्य **प्रथमेऽहोरात्रे 'अब्भंतरानंतरं'**ति सर्वाभ्यन्तरस्य मण्डलस्यानन्तरं द्वितीय**मण्डलमुपसङ्क्रम्य चारं चरति। 'ता जया ण'**मित्यादि। **तत्र यदा 'ण'**मिति वाक्यालङ्कारे सर्वाभ्यन्तरानन्तरं द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरति तदा [१]पञ्च योजनसहस्राणि द्वे योजनशते एकपञ्चचाशदधिके सप्तचत्वारिंशतं च षष्टिभागान् योजनस्य** ५,२५१ ४७/६० **एकैकेन मुहूर्त्तेन गच्छति**। तथाह्यस्मिन् सर्वाभ्यन्तरा[२]नन्तरे द्वितीये मण्डले परिरयपरिमाणं त्रीणि योजनलक्षाणि पञ्चदशयोजनसहस्राणि शतमेकं व्यवहारतः परिपूर्णं सप्तोत्तरं निश्चयमतेन तु किञ्चिदूनं ३,१५,१०७। ततोऽस्य प्रागुक्तयुक्तिवशात् षष्ट्या भागो ह्रियते। [३]तच्च [४]यथोक्तमत्र मण्डले मुहूर्त्तगतिपरिमाणम्। अथ पूर्वमण्डलपरिरयपरिमाणादस्य मण्डलस्य परिरयपरिमाणं व्यवहारतः परिपूर्णान्यष्टादशयोजनानि वर्द्धन्ते निश्चयतः किञ्चिदूनानि। अष्टादशानाञ्च योजनानां षष्ट्या भागे हृते लब[धे](धा) अष्टादश षष्टिभागा योजनस्य, ते प्राक्तनमण्डलमुहूर्त्तगतिपरिमाणे अधिकत्वेन प्रक्षिप्यन्ते। ततो भवति यथोक्तमत्र मण्डले मुहूर्त्तगतिपरिमाणमिति। अत्रापि दृष्टिपथप्राप्ततविषयं परिमाणमाह — **'तया ण'**मित्यादि। **तदा** सर्वाभ्यन्तरानन्तरद्वितीयमण्डलचारकाले **इहगतस्य मनुष्यस्य**

---

१. पञ्च पञ्च - K, T। २. ... नन्तरे मण्डले - D, K। ३. लब्धं यथोक्तमण्डले - T। ४. यथोक्तवशात्तत्र मण्डले - N।

जातावेकवचनं इहगतानां मनुष्याणां [१]**सप्तचत्वारिंशता योजनसहस्रैरेकोनाशीत्यधिकेन योजनशतेन** [२]**सप्तपञ्चाशता षष्टिभागैरेकं च षष्टिभागमेकषष्टिधा छित्त्वा** तस्य सत्कैरेकोन[त्रिं](विं)शत्या **चूर्णिकाभागैः सूर्यश्चक्षुःस्पर्शमागच्छति।** तथाह्यस्मिन्मण्डले मुहूर्त्तगतिपरिमाणं पञ्च योजनसहस्राणि द्वे शते एकपञ्चाशदधिके [३]सप्तचत्वारिंशच्च षष्टिभागा योजनस्य ५,२५१ ४७/६०। दिवसोऽष्टादशमुहूर्त्तप्रमाणो द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामूनस्तस्यार्द्धं नवमुहूर्त्ता एकैकेन मुहूर्त्तैकषष्टिभागेन हीनाः। ततः सकलैकषष्टिभागकरणार्थं नवमुहूर्त्ता एकषष्ट्या गुण्यन्ते गुणयित्वा च तत एकं रूपमपनीयते, जातानि पञ्चशतान्यष्टचत्वारिंशदधिकानि ५४८। ततोऽस्य द्वितीस्य मण्डलस्य यत् परिरयपरिमाणं त्रीणि लक्षाणि पञ्चदश सहस्राणि शतमेकं सप्तोत्तरमिति ३,१५,१०७, तत् पञ्चभिः शतैरष्टचत्वारिंशदधिकैर्गुण्यते, ततो जात एककः सप्तको द्विकः षट्कः सप्तकोऽष्टकः षट्कस्त्रिकः षट्कः १७,२६,७८,६३६। ततो योजनानयनार्थं एकषष्टेः षष्ट्या गुणितया यावान् राशिर्भवति तेन भागो ह्रियते। एकषष्ट्यां च षष्टिगुणितायां षट्त्रिंशच्छतानि षष्ट्यधिकानि भवन्ति ३,६६०। तैर्भागे ह्रते लब्धं सप्तचत्वारिंशत्सहस्राणि शतमेकमेकोनाशीत्यधिकं योजनानां, शेषमुद्धरति चतुस्त्रिंशच्छतानि षण्णवत्यधिकानि ३,४९६। ततोऽस्माद्योजनानि नाऽऽयान्तीति षष्टिभागानयनार्थं छेदराशिरेकषष्टिः [हि](ध्रि)यते। तेन भागे ह्रते लब्धाः सप्तपञ्चाशत् षष्टिभागाः ५७/६० एकस्य च षष्टिभागस्य सत्का एकोनविंशतिरेकषष्टिभागा इति। **'तया ण'**मित्यादि। **तदा** सर्वाभ्यन्तरानन्तरद्वितीयमण्डलचारचरणकालेऽ**ष्टादशमुहूर्त्तो दिवसो भवति द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामूनो द्वादशमुहूर्त्ता रात्रिः द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामधिका। 'से निक्खममाणे'** इत्यादि। द्वितीयस्मादपि मण्डलात्**स सूर्यः** प्रागुक्तप्रकारेण **निष्क्रामन्नवस्य** संवत्सरस्य सत्के द्वितीयेऽहोरात्रे

---

१. सप्तचत्वारिंशद्योजन.... - N,T। २. सप्तपञ्चाशत्षष्टिभागैरेकं - B, D, E, I, K। ३. सप्तचत्वारिंशत् षष्टिभागा - N।

'[१]**अब्भंन्तरतच्चं**' ति सर्वाभ्यन्तरान्मण्डला[२]त्तृतीयं **मण्डलमुपसङ्क्रम्य चारं चरति**। **'ता जया ण**'मित्यादि। **तत्र यदा** सर्वाभ्यन्तरान्मण्डला[३]त्तृतीयं **मण्डलमुपसङ्क्रम्य चारं चरति तदा [४]पञ्च योजनसहस्राणि द्वे योजनशते द्विपञ्चाशदधिके पञ्च षष्टिभागान् योजनस्य** ५,२५२ ५/६० **एकैकेन मुहूर्त्तेन गच्छति**। तथाह्यस्मिन् मण्डले परिरयपरिमाणं त्रीणि योजनलक्षाणि पञ्चदशसहस्राणि शतमेकं पञ्चविंशत्यधिकं ३,१५,१२५। ततोऽस्य प्रागुक्तयुक्तिवशात्षष्ट्या भागो ह्रियते। लब्धं यथोक्तमत्र मण्डले मुहूर्त्तगतिपरिमाणम्। अथवा पूर्वमण्डलमुहूर्त्तगतिपरिमाणादस्मिन्मण्डले मुहूर्त्तगतिपरिमाणचिन्तायां प्रागुक्तयुक्तिवशादष्टादश षष्टिभागा योजनस्याधिकाः प्राप्यन्ते। ततस्तत्प्रक्षेपे भवति यथोक्तमत्र मण्डले मुहूर्त्तगतिपरिमाणम्। अत्रापि दृष्टिपथप्राप्ततविषयपरिमाणमाह — **'तया ण**'मित्यादि। **तदा** सर्वाभ्यन्तरानन्तरतृतीयमण्डलचारकाले **इहगतस्य मनुष्यस्य** जातावेकवचनं इहगतानां मनुष्याणां **सप्तचत्वारिंशद्योजनसहस्रैः षण्णवत्या योजनैस्त्रयस्त्रिंशता च षष्टिभागैर्योजनस्य** एकं **च षष्टिभागमेकषष्टिधा छित्त्वा तस्य सत्काभ्यां द्वाभ्यां चूर्णिकाभागाभ्यां** ४७,०९६ ३३/६० २/६१ **सूर्यश्चक्षुःस्पर्शमागच्छति**। तथाह्यस्मिन्मण्डले दिवसोऽष्टादशमुहूर्त्तप्रमाणश्चतुर्मुहूर्त्तैकषष्टिभागैरूनः, तस्यार्द्धं नव मुहूर्त्ता द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यां हीनास्ततः सामस्त्येन एकषष्टिभागकरणार्थं नवाऽपि मुहूर्त्ता एकषष्ट्या गुण्यन्ते गुणयित्वा च द्वावेकषष्टिभागौ तेभ्योऽपनी[य](ये)ते। ततो जाता एकषष्टिभागा पञ्चशतानि सप्तचत्वारिंशदधिकानि ५४७। ततोऽस्य तृतीय(मण्डल)स्य यत्परिरयपरिमाणं त्रीणि योजनलक्षाणि पञ्चदशसहस्राणि शतमेकं पञ्चविंशत्यधिकमिति ३,१५,१२५ त[तः](त्) पञ्चभिः शतैः सप्तचत्वारिंशदधिकैर्गुण्यते। जाताः सप्तदश कोट्यः त्रयोविंशतिशतसहस्राणि त्रिसप्ततिसहस्राणि त्रीणि शतानि पञ्चसप्तत्यधिकानि १७,२३,७३,३७५। एतेषामेकषष्ट्या

१. अब्भिंतरं तच्चं - मूले। २. ...त्तृतीयमण्डल.... - T। ३. .....त्तृतीयमण्डल... - T। ४. पञ्च पञ्च - A,M,T।

(षष्ट्या) गुणितया ३,६६० भागो ह्रियते। लब्धानि सप्तचत्वारिंशत्सहस्राणि षण्णवत्यधिकानि ४७,०९६। शेषमुद्धरति विंशतिशतानि पञ्चदशोत्तराणि २,०१५। ततोऽस्माद्योजनानि नाऽऽयान्तीति षष्टिभागानयनार्थं छेदराशिरेकषष्टिः ध्रियते। तेन भागे हृते लब्धास्त्रयस्त्रिंशत्षष्टिभागाः ३३/६० एकस्य षष्टिभागस्य सत्कौ द्वावेकषष्टिभागौ २/६१। **'तया ण'**मित्यादि। **तदा** सर्वाभ्यन्तरतृतीयमण्डलचारचरणकाले[1]**ऽष्टादशमुहूर्त्तप्रमाणश्चतुर्भिर्मुहूर्त्तैकषष्टिभागैरूनो दिवसः द्वादशमुहूर्त्ता रात्रिश्चतुर्भिर्मुहूर्त्तैकषष्टिभागैरधिका**। सम्प्रति चतुर्थादिषु मण्डलेष्वतिदेशमाह – **'एवं खल्वि'**त्यादि। **एवमुक्तेन** प्रकारेण **खलु** निश्चित**मेतेनानन्तरोदितेनोपायेन** शनैः शनैस्तत्तद्बहिर्मण्डलाभिमुखगमनरूपेण **निष्क्रामन् सूर्यस्तदनन्तरान्मण्डलात्तदनन्तरं मण्डलं** प्रागुक्तप्रकारेण **सङ्क्रामन् २ एकैकस्मिन् मण्डले मुहूर्त्तगतिमि**त्यत्र सूत्रे द्वितीया सप्तम्यर्थे प्राकृतत्वात्, भवति च प्राकृतलक्षणवशात्सप्तम्यर्थे द्वितीया यथा – **'कत्तो (रत्तिं) मुद्धे ! पाणियसद्धा सउणयाणं।'** (कुतः रात्रौ मुग्धे ! पानीयश्रद्धा शकुनकानाम्।) इत्यत्र। ततोऽयमर्थः मुहूर्त्तगतौ **अष्टादश (२) षष्टिभागान् योजनस्य** व्यवहारतः परिपूर्णान् निश्चयतः किञ्चिदूनान् **अभिवर्द्धयमानो अभिवर्द्धयमानः 'पुरिसच्छाय'**मिति पुरुषस्य छाया यतो भवति सा पुरुषछाया सा चेह प्रस्तावात् सू(र्यो)(र्यस्यो)दयमानस्य दृष्टिपथप्राप्तता, अत्राऽपि द्वितीया सप्तम्यर्था, ततोऽयमर्थस्तस्यामेकैकस्मिन्मण्डले **चतुरशीतिः चतुरशीतिः 'सीयाइ'**त्ति किञ्चित् न्यूनानि **योजनानि निर्वेष्टयन्** २ हापयन्नित्यर्थः। इदं च स्थूलत उक्तं परमार्थतः पुनरिदं द्रष्टव्यं त्र्यशीतिर्योजनानि त्रयोविंशतिश्च षष्टिभागा योजनस्य एकस्य षष्टिभागस्य एकषष्टिधा छिन्नस्य सत्का द्विचत्वारिंशद्भागाश्चेति दृष्टिपथप्राप्ततविषये हानौ ध्रुवम्। ततः सर्वाभ्यन्तरान्मण्डलात्तृतीयं[2] यन्मण्डलं तत आरभ्य यस्मिन्यस्मिन्मण्डले दृष्टिपथप्राप्तता ज्ञातुमिष्यते तत्तन्मण्ड[लं](ल)-

१. चतुर्मुहूर्त्तै... C, L। २. मण्डलं - G।

सङ्ख[या](य)या षट्त्रिंशद्गुण्यते, तद्यथा सर्वाभ्यन्तरान्मण्डलात्तृतीये मण्डले एकेन चतुर्थे द्वाभ्यां पञ्चमे त्रिभिर्यावत्सर्वबाह्ये मण्डले द्व्यशीत्यधिकेन शतेन, गुणयित्वा च ध्रुवराशिमध्ये प्रक्षिप्यते, प्रक्षिप्ते सति यद्भवति तेन हीना पूर्वमण्डलगता दृष्टिपथप्राप्तता तस्मिन्विवक्षिते मण्डले दृष्टिपथप्राप्तता द्रष्टव्या। अथ त्र्यशीति-योजनादिकस्य ध्रुवराशेः कथमुत्पत्तिः ? उच्यते, इह सर्वाभ्यन्तरे मण्डले दृष्टिपथ-प्राप्तापरिमाणं सप्तचत्वारिंशत्सहस्राणि द्वे शते त्रिषष्ट्यधिके योजनानामेकविंशतिश्च षष्टिभागा योजनस्य ४७,२६३ २१/६०। एतच्च नवमुहूर्त्तगम्यम्, तत एकस्मिन्मुहूर्त्तै-कषष्टिभागे किमागच्छतीति चिन्तायां नव मुहूर्त्ता एकषष्ट्या गुण्यन्ते, जातानि पञ्चशतानि एकोनपञ्चाशदधिकानि ५४९, तैर्भागो ह्रियते, लब्धानि षडशीतिः योजनानि पञ्च षष्टिभागा योजनस्य एकस्य च षष्टिभागस्य एकषष्टिधा छिन्नस्य सत्काश्चतुर्विंशतिभागाः ८६ ५/६० २४/६१। पूर्वस्मात्पूर्वस्माच्च मण्डलादनन्त-रानन्तरे मण्डले परिरयपरिमाणचिन्तायामष्टादश अष्टादश योजनानि व्यवहारतः परिपूर्णानि वर्द्धन्ते। ततः पूर्वपूर्वमण्डलगतमुहूर्त्तगतिपरिमाणादनन्तरानन्तरे मण्डले मुहूर्त्तगतिपरिमाणचिन्तायां प्रतिमुहूर्त्तमष्टादश षष्टिभागा योजनस्य प्रवर्द्धमाना द्रष्टव्याः, प्रतिमुहूर्त्तैकषष्टिभागं चाष्टादश एकस्य षष्टिभागस्य सत्का एकषष्टिभागाः। सर्वा-भ्यन्तरमण्डलानन्तरे द्वितीये च मण्डले सूर्यो दृष्टिपथप्राप्तो भवति नवभिर्मुहूर्त्तै-रेकषष्टिभागेन हीनैर्यावन्मात्रं क्षेत्रं व्याप्यते तावति स्थितस्ततो नव मुहूर्त्ता एकषष्ट्या गुण्यन्ते गुणयित्वा च तेभ्य एकं रूपमपनीयते, जातानि पञ्च शतानि अष्टचत्वारिंशदधिकानि, तैरष्टादश गुण्यन्ते, जातान्यष्टनवतिशतानि चतुःषष्टिसहितानि ९,८६४, तेषां षष्टिभागानयनार्थं ऐकषष्ट्या भागो ह्रियते, लब्धमेकषष्ट्यधिकं शतं षष्टिभागानां त्रिचत्वारिंशदेकस्य षष्टिभागस्य सत्का एकषष्टिभागाः १६१/(६०) (४३/६१)। तत्र विंशत्यधिकेन षष्टिभागशतेन द्वे योजने लब्धे पश्चादेकचत्वारिंशत् षष्टिभागा अवतिष्ठन्ते। एतच्च द्वे योजने एकचत्वारिंशत् षष्टिभागा योजनस्य एकस्य

षष्टिभागस्य सत्कास्त्रिचत्वारिंशदेकषष्टिभागा इत्येवंरूपं प्रागुक्तात् षडशीतियोजनानि पञ्च षष्टिभागा योजनस्य एकस्य षष्टिभागस्य सत्काश्चतुर्विंशतिरेकषष्टिभागा इत्येतस्मात् शोध्यते, शोधिते च तस्मिन् स्थितानि पश्चात् त्र्यशीतिर्योजनानि त्रयोविंशतिः षष्टिभागा योजनस्य एकस्य षष्टिभागस्य सत्का द्विचत्वारिंशदेकषष्टिभागा ८३ २३/६० ४२/६१। एतावत् द्वितीये मण्डले दृष्टिपथप्राप्ततविषये सर्वाभ्यन्तर-मण्डलगतात् दृष्टिपथप्राप्ततापरिमाणात् हानौ प्राप्यते, किमुक्तं भवति ? सर्वाभ्यन्तर-मण्डलगतात् दृष्टिपथप्राप्ततापरिमाणात् द्वितीये दृष्टिपथप्राप्ततापरिमाणमेतावता हीनं भवति इति। एतच्चोत्तरोत्तरमण्डलदृष्टिपथप्राप्तिचिन्तायां हानौ ध्रुवमत एव ध्रुव-राशिरिति ध्रुवराशेरुत्पत्तिः। ततो द्वितीयस्मान्मण्डलादनन्तरे तृतीये मण्डले एष एव ध्रुवराशिरेकस्य षष्टिभागस्य सत्कैः षट्त्रिंशत्सङ्ख्यैरेकषष्टिभागैः सहितः सन् यावान् राशिर्भवति तद्यथा त्र्यशीतिर्योजनानि चतुर्विंशतिः षष्टिभागा योजनस्य सप्तदश एकस्य षष्टिभागस्य सत्का एकषष्टिभागा इति, एतावान् द्वितीयमण्डलगतात् दृष्टिपथ-प्राप्ततापरिमाणात् शोध्यते। ततो भवति यथोक्तं तस्मिन्तृतीयमण्डले दृष्टिपथ-प्राप्ततविषयं परिमाणम्। चतुर्थे मण्डले स एव ध्रुवराशिः द्वासप्तत्या सहितः क्रियते। चतुर्थं हि मण्डलं तृतीयमण्डलापेक्षया द्वितीयं, ततः षट्त्रिंशत् द्वाभ्यां गुण्यते, गुणिता च सती द्विसप्ततिर्भवति, तया च सहितः सन् एवंरूपो जातस्त्र्यशीतिर्योजनानि चतुर्विंशतिः षष्टिभागा योजनस्य त्रिपञ्चाशदेकस्य षष्टिभागस्य सत्का एकषष्टिभागाः ८३ २४/६० ५३/६१। एतावान् (तृतीयमण्डलगतात्) दृष्टिपथप्राप्ततापरिमाणात् शोध्यते, ततो यथावस्थितं चतुर्थे मण्डले दृष्टिपथप्राप्ततापरिमाणं भवति। तच्चेदं सप्तचत्वारिंशद्योजनसहस्राणि त्रयोदशोत्तराणि अष्टौ च षष्टिभागा योजनस्य एकस्य च षष्टिभागस्य सत्का दशैकषष्टिभागाः ४७,०१३ ८/६० १०/६१। सर्वान्तिमे तु मण्डले तृतीयमण्डलापेक्षया द्व्यशीत्यधिकशततमे यदा दृष्टिपथप्राप्ततापरिमाणं सञ्ज्ञातुमिष्यते तदा सा षट्त्रिंशत् द्व्यशीत्यधिकेन शतेन गुण्यते, जातानि

पञ्चषष्टिशतानि द्विपञ्चाशदधिकानि ६,५५२। ततः षष्टिभागानयनार्थमेकषष्ट्या भागो ह्रियते लब्धं सप्तोत्तरं शतं षष्टिभागानां १०७, शेषाः पञ्चविंशतिरेकषष्टिभागा उद्धरन्ति २५। एतत् ध्रुवराशौ प्रक्षिप्यते। ततो जातमिदं पञ्चाशीतिर्योजनानि एकादश षष्टिभागा योजनस्य एकषष्टिभागस्य सत्काः षडेकषष्टिभागाः ८५ ११/६० ६/६१। इह षट्त्रिंशत एवमुत्पत्तिः - पूर्वस्मान्मण्डलादनन्तरे अनन्तरे मण्डले दिवसो द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यां (हीनो भवति, प्रतिमुहूर्त्तैकषष्टिभागं) चाष्टादश एकस्य षष्टिभागस्य सत्का एकषष्टिभागा हीयन्ते, तत उभयमीलने षट्त्रिंशद्भवति। ते चाष्टादश एकषष्टिभागा[भ्यां हीनो भवति प्रतिमुहूर्त्ते] (: कलया न्यूना लभ्यन्ते) न परिपूर्णाः, परं व्यवहारतः (पूर्वं) परिपूर्णा विवक्षितास्तच्च कलया न्यूनत्वं प्रतिमण्डलं (भवत्) यदा द्व्यशीत्यधिकशततममण्डले एकत्र पिण्डितं सत् चिन्त्यते तदा अष्टषष्टिरेकषष्टिभागास्त्रुट्यन्ति। एतदपि व्यवहारत उच्यते परमार्थतः पुनः किञ्चिदधिकमपि त्रुट्यदवसेयम्। ततोऽमी अष्टषष्टिरेकषष्टिभागा अपसार्यन्ते, तदपसारणे पञ्चाशीतिर्योजनानि नव षष्टिभागा योजनस्य एकस्य षष्टिभागस्य सत्काः षष्टिरेकषष्टिभागाः ८५ ९/६० ६०/६१ इति जातम्। ततः सर्वबाह्यमण्डलानन्तरावर्त्तिनद्वितीयमण्डलगता[ततः](त्) दृष्टिपथप्राप्ततापरिमाणादेकत्रिंशत्सहस्राणि नव शतानि षोडशोत्तराणि योजनानामेकोनचत्वारिंशत्षष्टिभागा योजनस्य एकस्य च षष्टिभागस्य सत्काः षष्टिरेकषष्टिभागाः ३१,९१६ ३९/६० ६०/६१ इत्येवंरूपात् शोध्यते। ततो यथोक्तं सर्वबाह्यमण्डले दृष्टिपथप्राप्ततापरिमाणं भवति। तच्चाग्रे स्वयमेव सूत्रकृद्वक्ष्यति। तत एवं पुरुषच्छायायां दृष्टिपथप्राप्ततारूपायां द्वितीयादिषु केषुचिन्मण्डलेषु चतुरशीतिं चतुरशीतिं किञ्चिन्न्यूनानि योजनानि उपरितनेषु तु मण्डलेष्वधिकान्यधिकतराणि उक्तप्रकारेण निर्वेष्टयन् २ [१]तावदवसेयो यावत्**सर्वबाह्यमण्डलमुपसङ्क्रम्य चारं चरति। 'ता जया ण**'मित्यादि। **तत्र यदा 'ण**'मिति पूर्ववत् [२]**सर्वबाह्यमण्डलमुपसङ्क्रम्य चारं चरति तदा एकैकेन मुहूर्त्तेन**

१. तावदवसेयं - S। २. सर्वबाह्यं मण्डल... - E, K।

पञ्च पञ्च योजनसहस्राणि त्रीणि शतानि पञ्चोत्तराणि [१]पञ्चदश च षष्टिभागा योजनस्य ५,३०५ १५/६० **गच्छति**। तथाह्यस्मिन्मण्डले परिरयपरिमाणं त्रीणि योजनशतसहस्राणि अष्टादश सहस्राणि त्रीणि शतानि पञ्चदशोत्तराणि ३,१८,३१५। तत एतस्य प्रागुक्तयुक्तिवशात् षष्ट्या भागो ह्रियते। ततो लब्धं यथोक्तमत्र मुहूर्त्तगतिपरिमाणमिति। अत्रैव दृष्टिपथप्राप्ततापरिमाणमाह – **'तया ण'**मित्यादि। **तदा** सर्वबाह्यमण्डलचारकाले **इहगतस्य मनुष्यस्य** जातावेकवचनं इहगतानां मनुष्याणामे**कत्रिंशता योजनसहस्रै(रष्टभि)रेकत्रिंशदधिकयोजनशतैः त्रिंशता च षष्टिभागैर्योजनस्य** ३१,८३१ ३०/६० **सूर्यः** शीघ्रं **चक्षुःस्पर्शमागच्छति**। तथाह्यस्मिन्मण्डले चारं चरति सू[र्यो](र्ये) द्वादशमुहूर्त्तप्रमाणो दिवसो भवति, दिवसस्यार्द्धेन च यावन्मात्रं क्षेत्रं व्याप्यते तावति व्यवस्थित उदयमानः सूर्य उपलभ्यते, द्वादशानां च मुहूर्त्तानां अर्द्धे षण्मुहूर्त्तास्ततो यदत्र मण्डले मुहूर्त्तगति-परिमाणं पञ्चयोजनसहस्राणि त्रीणि शतानि पञ्चोत्तराणि पञ्चदश षष्टिभागा योजनस्य ५,३०५ १५/६०, तत् षड्भिर्गुण्यते। ततो यथोक्तमत्र दृष्टिपथप्राप्ततापरिमाणं भवति। अत्रापि दिवसरात्रिप्रमाणमाह – **'तया ण'**मित्यादि सुगमम्। **'से पविसमाणे'** इत्यादि। **स सूर्यः** सर्वबाह्यान्मण्डलादुक्तप्रकारेणाभ्यन्तरं **प्रविश-न्द्वितीयं षण्मासमाददानो** द्वितीयस्य षण्मासस्य **प्रथमेऽहोरात्रे 'बाहिरानंतरं'**ति सर्व**बाह्या**न्मण्डलाद**नन्तरम**र्वाक्तनं द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरति। 'ता जया ण'**मित्यादि। **तत्र यदा** सर्व**बाह्यानन्तर**मर्वाक्तनं [२]द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरति तदा एकैकेन मुहूर्त्तेन [३]पञ्च पञ्च योजनसहस्राणि चतुरुत्तराणि त्रीणि योजनशतानि सप्तपञ्चाशतञ्च षष्टिभागान्योजनस्य गच्छति** ५,३०४ ५७/६०। तथाह्यस्मिन्मण्डले परिरयपरिमाणं तिस्रो लक्षा अष्टादशसहस्राणि द्वे शते सप्तनवत्यधिके योजनानां ३,१८,२९७। ततोऽस्य प्रागुक्तयुक्तिवशात् षष्ट्या भागो

---

१. पञ्चदश षष्टिभागा - M, T। २. द्वितीयमण्डल... - J,K। ३. पञ्चयोजन... - H।

ह्रियते, हृते च भागे लब्धं यथोक्तमत्र मण्डले मुहूर्त्तगतिपरिमाणम्। अत्रापि दृष्टिपथप्राप्ततापरिमाणमाह – **'तया ण'**मित्यादि। **तदा इहगतस्य मनुष्यस्य** जातावेकवचनं, इहगतानां मनुष्याणामे**कत्रिंशता योजनसहस्रैर्नवभिः षोडशैः षोडशोत्तरैर्योजनशतैरेकोनचत्वारिंशता षष्टिभागैर्योजनस्य** एकं **च षष्टिभाग-मेकषष्टिधा छित्त्वा** तस्य सत्कैः **षष्ट्या चूर्णिकाभागैः सूर्यश्चक्षुःस्पर्श-मागच्छति**। तथाह्यस्मिन्मण्डले सूर्ये चारं चरति दिवसो द्वादशमुहूर्त्तप्रमाणो द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामधिकः, तेषां चार्द्धे[न] षण्मुहूर्त्ता एकेन मुहूर्त्तैकषष्टि-भागेनाभ्यधिकास्ततः सामस्त्येनैकषष्टिभागकरणार्थं षडपि मुहूर्त्ता एकषष्ट्या गुण्यन्ते, गुणयित्वा च एकषष्टिभागस्तत्राधिकः प्रक्षिप्यते, ततो जातानि त्रीणि शतानि सप्तषष्ट्यधिकानि एकषष्टिभागानां ३६७। ततः सर्वबाह्यान्मण्डलादर्वाक्तने तस्मि-न्द्वितीये मण्डले यत्परिरयपरिमाणं त्रीणि लक्षाणि अष्टादशसहस्राणि द्वे शते सप्तनवत्यधिके ३,१८,२९७, एतत् एभिस्त्रिभिः शतैः सप्तषष्ट्यधिकैर्गुण्यते, जाता एकादशकोटयोऽष्टषष्टिलक्षाश्चतुर्दशसहस्राणि नव शतानि नवनवत्यधिकानि ११,६८,१४,९९९, एतस्य एकषष्ट्या गुणितया षष्ट्या ३६६० भागो ह्रियते, लब्धान्येकत्रिंशत्सहस्राणि नव शतानि षोडशोत्तराणि ३१,९१६, शेषमुद्धरति चतुर्विंशतिशतानि एकोनचत्वारिंशदधिकानि २,४३९, न चातो योजनान्यायान्ति, ततः षष्टिभागानयनार्थमेकषष्ट्या भागो ह्रियते, लब्धा एकोनचत्वारिंशत् ३९ (षष्टिभागा) एक(स्य) षष्टिभागस्य सत्काः षष्टिरेकषष्टिभागाः ६०/६१। **'तया ण'**मित्यादि। **तदा** सर्वबाह्यानन्तरावर्त्तनद्वितीयमण्डलचारकाले **अष्टादशमुहूर्त्ता रात्रिर्भवति द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामूना द्वादशमुहूर्त्तो दिवसो द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामधिक** इति। **'से पविसमाणे'**इत्यादि। ततः सर्वबाह्यानन्त-रावर्त्तनद्वितीयस्मादपि मण्डलादुक्तप्रकारेण **प्रविशन् सूर्यो** द्वितीयस्य षण्मासस्य **द्वितीयेऽहोरात्रे 'बाहिरं तच्चं'** ति सर्व**बाह्यान्मण्डलादर्वाक्तनं** [१]**तृतीयं मण्डल-**

१. तृतीयमण्डल... - C।

मुपसङ्क्रम्य चारं चरति। 'ता जया ण'मित्यादि। **तत्र यदा 'ण**'मिति पूर्ववत् सर्वबाह्यान्मण्डलादर्वाक्तनं **तृतीयं मण्डलमुपसङ्क्रम्य चारं चरति तदा**[१] **पञ्च योजनसहस्राणि त्रीणि चतुरुत्तराणि योजनशतानि एकोनचत्वारिंशतं षष्टिभागान् योजनस्य** ५,३०४ ३९/६० **एकैकेन मुहूर्त्तेन गच्छति**।[२] तस्मिन् हि मण्डले परिरयपरिमाणं तिस्रो लक्षा अष्टादशसहस्राणि द्वे शते एकोनाशीत्यधिके ३,१८,२७९, अस्य षष्ट्या भागो ह्रियते, ह्रते च भागे लब्धं यथोक्तमत्र मण्डले मुहूर्त्तगतिपरिमाणम्। अत्रापि दृष्टिपथप्राप्ततविषयं परिमाणमाह – **'तया ण**'मित्यादि। **तदा इहगतस्य मनुष्यस्य** जातावेकवचनस्य भावादिहगतानां मनुष्याणा- **मेकाधिकैर्द्वात्रिंशता सहस्रैरेकोनपञ्चाशत्षष्टिभागैरेकं**[३] **च षष्टिभागमेकषष्टिधा छित्त्वा** तस्य सत्कैस्त्रयोविंशत्या **चूर्णिकाभागैः सूर्यश्चक्षुःस्पर्शमागच्छति**। तथाह्यस्मिन्मण्डले दिवसो द्वादशमुहूर्त्तप्रमाणश्चतुर्भिर्मुहूर्त्तैकषष्टिभागैरभ्यधिकः तस्यार्द्धं षण्मुहूर्त्ता द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामधिकाः। ततः सामस्त्येनैकषष्टिभागकरणार्थं षडपि मुहूर्त्ता एकषष्ट्या गुण्यन्ते,[४] गुणयित्वा तत्र द्वावेकषष्टिभागौ प्रक्षिप्येते। ततो जातानि त्रीणि शतानि अष्टषष्ट्यधिकानि एकषष्टिभागानां ३६८। ततोऽस्मिन्मण्डले यत्परिरयपरिमाणं त्रीणि लक्षाणि अष्टादशसहस्राणि द्वे शते एकोनाशीत्यधिके ३,१८,२७९ इति तत् एभिस्त्रिभिः शतैरष्टषष्ट्यधिकैर्गुण्यते, जाता एकादशकोटय एकसप्ततिशतसहस्राणि षड्विंशतिसहस्राणि षट्शतानि द्विसप्त्यधिकानि ११,७१, २६,६७२। एतस्य षष्ट्या[५] एकषष्ट्या गुणितया ३,६६० भागो ह्रियते, ह्रते च भागे लब्धानि द्वात्रिंशत्सहस्राणि एकोत्तराणि ३२,००१, शेषमुद्धरति त्रीणि सहस्राणि द्वादशोत्तराणि ३,०१२, तेषां षष्टिभागानयनार्थमेकषष्ट्या भागो ह्रियते, लब्धा एकोनपञ्चाशत्षष्टिभागा ४९/६० त्रयोविंशतिश्च एकस्य षष्टिभागस्य सत्का एक-

---

१. पञ्च पञ्च योजन... - A,B,G। २. तस्मिन्मण्डले.. - H। ३. ...रेकं षष्टि... - A, D, E, F, G, H, I, J। ४. गुणयित्वा च तत्र - C। ५. गुणितया एकषष्ट्या - T।

षष्टिभागाः २३/६१ इति। **'तया ण'**मित्यादि [१]रात्रिदिवसपरिमाणं सुगमम्। सम्प्रति सर्वबाह्यान्मण्डलादर्वाक्तनेषु चतु[रा](र्था)दिषु (मण्डलेषु) अतिदेशमाह – **'एवं खल्वि'**त्यादि। **एव**मुक्तेन प्रकारेण **खलु** निश्चित**मेतेनोपायेन** शनैः शनैस्तत्तदनन्तराभ्यन्तरमण्डलाभिमुखगमनरूपेणाभ्यन्तरं **प्रविशन् सूर्यस्तदनन्तरान्मण्डलात्तदनन्तरं मण्डलं सङ्क्रामन् (२) एकैकस्मिन्मण्डले मुहूर्त्तगति**मित्यत्र द्वितीया सप्तम्यर्थे मुहूर्त्तगतिपरिमा[णं](णे) **[२]अष्टादश अष्टादश षष्टिभागान् योजनस्य** व्यवहारतः परिपूर्णान्निश्चयतः किञ्चिदून**न्निर्वेष्टयन्**हापयन्नित्यर्थः, पूर्वमण्डलापेक्षया अभ्यन्ताराभ्यन्तरमण्डलस्य परिरयमधिकृत्याष्टादशभिर्योजनैर्हीनत्वात्। **पुरुषछाया**मित्यत्रापि द्वितीया सप्तम्यर्थे, ततोऽयमर्थः पुरुषछायायां दृष्टिपथप्राप्ततारूपायां **सातिरेकाणि पञ्चाशीतिं २ योजनान्यभिवर्द्धयन् अभिवर्द्धयन्,** इदं सर्वबाह्यान्मण्डलादर्वाक्तनानि कतिपयानि प्रथमद्वितीया[नि](दि)मण्डलान्यपेक्ष्य स्थूलत उक्तं, परमार्थतः पुनरेवं द्रष्टव्यं – इह येनैव क्रमेण सर्वाभ्यन्तरान्मण्डलात्परतो दृष्टिपथप्राप्ततां हापयन्विनिर्गतस्तेनैव क्रमेण सर्वबाह्यान्मण्डलादर्वाक्तनेषु मण्डलेषु दृष्टिपथप्राप्ततामभिवर्द्धयन्प्रविशति। तत्र सर्वबाह्यान्मण्डलादर्वाक्तनद्वितीयमण्डलगतात् दृष्टिपथप्राप्ततापरिमाणात्सर्वबाह्यमण्डले पञ्चाशीतियोजनानि नव षष्टिभागान्योजनस्य एकं च षष्टिभागमेकषष्टिधा छित्त्वा तस्य सत्कान् षष्टिभागान् हापयति। एतच्च प्रागेव भावितम्। तस्मात्सर्वबाह्यान्मण्डलादर्वाक्तने द्वितीये मण्डले प्रविशन् तावत् भूयोऽपि दृष्टिपथप्राप्ततापरिमाणेऽभिवर्द्धयति, तच्च ध्रुवम्। ततोऽर्वाक्तनेषु मण्डलेषु यस्मिन्मण्डले दृष्टिपथप्राप्ततापरिमाणं ज्ञातुमिष्यते तृतीयमण्डलादारभ्य तत्तन्मण्डलसङ्ख्यया षट्त्रिंशत् गुण्यते, तद्यथा तृतीयमण्डलचिन्तायामेकेन चतुर्थमण्डलचिन्तायां द्वाभ्यामेवं यावत् सर्वाभ्यन्तरमण्डलचिन्तायां द्व्यशीत्यधिकेन शतेन, इत्थञ्च गुणयित्वा यल्लभ्यते तत् ध्रुवराशेरपनीय शेषेण ध्रुवराशिना सहितं पूर्वमण्डलगतं दृष्टिगतपथप्राप्ततापरिमाणं तत्र मण्डले द्रष्टव्यम्। यथा तृतीये मण्डले षट्त्रिंशदेकेन

१. रात्रिदिवसस्य परिमाणं - T। २. अष्टादश षष्टिभागान् - T।

गुण्यते, एकेन च गुणितं तदेव भवति, इति जाता षट्त्रिंशदेव, सा ध्रुवराशेरपनीयते, जातं शेषमिदं पञ्चाशीतिर्योजनानि नव षष्टिभागा योजनस्य एकस्य षष्टिभागस्य सत्काश्चतुर्विंशतिरेकषष्टिभागाः ८५ ९/६० २४/६१। एतेन सहितं पूर्वमण्डलगतं दृष्टिपथप्राप्ततापरिमाणमेकत्रिंशत्सहस्राणि नव शतानि षोडशोत्तराणि योजनानामेकोनचत्वारिंश[दिक](त्)षष्टिभागा योजनस्य एकस्य षष्टिभागस्य सत्काः षष्टिरेकषष्टिभागाः ३१,९१६ ३९/६० ६०/६१ इत्येवंरूपं क्रियते। ततोऽधिकृते तृतीये मण्डले यथोक्तं दृष्टिपथप्राप्ततापरिमाणं भवति, तच्च प्रागेवोपदर्शितम्। चतुर्थे मण्डले षट्त्रिंशत् द्वाभ्यां गुण्यते, गुणयित्वा ध्रुवराशेरपनीय शेषेण ध्रुवराशिना तृतीयमण्डलगतं दृष्टिपथप्राप्ततापरिमाणसहितं क्रियते, तत इदं तत्र मण्डले दृष्टिपथप्राप्ततापरिमाणं भवति द्वात्रिंशत्सहस्राणि षडशीत्यधिकानि योजनानां [1]अष्टापञ्चाशच्च षष्टिभागा योजनस्य (एकस्य च) षष्टिभागस्य सत्का एकादशैकषष्टिभागाः ३२,०८६ ५८/६० ११/६१। एवं शेषेष्वपि मण्डलेषु भावनीयम्। यदा तु सर्वाभ्यन्तरे मण्डले दृष्टिपथप्राप्ततापरिमाणं ज्ञातुमिष्यते तदा षट्त्रिंशत् द्व्यशीत्यधिकेन शतेन गुण्यते, तृतीयमण्डलादारभ्य सर्वाभ्यन्तरस्य मण्डलस्य द्व्यशीत्यधिकशततमत्वात्। ततो जातानि पञ्चषष्टिशतानि द्विपञ्चाशदधिकानि ६,५५२। तेषामेकषष्ट्या भागे हृते लब्धं सप्तोत्तरं शतं षष्टिभागानां पञ्चविंशतिरुद्धरति १०७/(६०) २५/६१। एतत्पञ्चाशीतियोजनानि नव षष्टिभागा योजनस्य (एकस्य षष्टिभागस्य) सत्काः षष्टिरेकषष्टिभागाः ८५ ९/६० ६०/६१ इत्येवंरूपा(द्) ध्रुवरा[शिः](शेः) शोध्यते, जातानि पश्चात् [2]त्र्यशीतिर्योजनानि द्वाविंशतिः षष्टिभागा योजनस्य एकस्य षष्टिभागस्य सत्काः पञ्चत्रिंशदेकषष्टिभागाः। इह षट्त्रिंशत् २ एकषष्टिभागा कलया न्यूनाः परमार्थतो लभ्यन्ते, एतच्च प्रागेवोक्तं, तच्च कलया न्यूनत्वं प्रतिमण्डलं भव[ति](त्) यदा द्व्यशीत्यधिकशततमे मण्डले एकत्र पिण्डितं सत् चिन्त्यते तदा अष्टषष्टिरेकषष्टिभागा लभ्यन्ते, ततस्ते भूयः प्रक्षिप्यन्ते, ततो जातमिदं [3]त्र्यशीति-

---

१. अष्टपञ्चाशच्च - T। २. त्र्यशीतियोजनानि - M, T। ३. त्र्यशीतियोजनानि - H, T।

र्योजनानि त्रयोविंशतिः षष्टिभागा योजनस्य एकस्य षष्टिभागस्य सत्का द्विचत्वारिंशदेकषष्टिभागाः ८३ २३/६० ४२/६१। एतेन सर्वाभ्यन्तरानन्तरद्वितीय-मण्डलगतं दृष्टिपथप्राप्ततापरिमाणं सप्तचत्वारिंशत्सहस्राणि शतमेकमेकोनाशीत्यधिकं योजनानां सप्तपञ्चाशत्षष्टिभागा योजनस्य एकस्य षष्टिभागस्य सत्का एकोन-विंशतिरेकषष्टिभागाः ४७,१७९ ५७/६० १९/६१ इत्येवंरूपं सहितं क्रियते, ततो यथोक्तं सर्वाभ्यन्तरमण्डले दृष्टिपथप्राप्ततापरिमाणं भवति। तच्च सप्तचत्वारिंश-त्सहस्राणि द्वे शते त्रिषष्ट्यधिके योजनानामेकविंशतिश्च षष्टिभागा योजनस्य ४७,२६३ २१/६०। एवं दृष्टिपथप्राप्तायां कतिपयेषु मण्डलेषु सातिरेकाणि पञ्चाशीतियोजनानि अग्रेतनेषु चतुरशीतिं पर्यन्ते यथोक्ताधिकसहितानि त्र्यशीतिं योजनान्यभिवर्द्धयन् २ तावद्वक्तव्यो यावत्[१]**सर्वाभ्यन्तरमण्डलमुपसङ्क्रम्य चारं चरति। 'ता जया ण'**मित्यादि। **तत्र यदा सूर्यः [२]सर्वाभ्यन्तरं मण्डल-मुपसङ्क्रम्य चारं चरति तदा [३]पञ्च योजनसहस्राणि द्वे एकपञ्चाशदधिके योजनशते एकोनत्रिंशतं च षष्टिभागान्योजनस्य** ५,२५१ २९/६० **एकैकेन मुहूर्त्तेन गच्छति। तदा च इहगतस्य मनुष्यस्य** जातावेकवचनं इहगतानां मनुष्याणां [४]**सप्तचत्वारिंशता योजनसहस्रैर्द्वाभ्यां त्रिषष्टाभ्यां** त्रिषष्ट्यधिकाभ्यां **योजन-शताभ्यामेकविंशत्या षष्टिभागैर्योजनस्य** ४७,२६३ २१/६१ **सूर्यश्चक्षुःस्पर्श-मागच्छति**। एतच्च मुहूर्त्तगतिपरिमाणं दृष्टिपथप्राप्ततापरिमाणं (च) प्रागेव भावितं सूत्रकृताऽपि च प्रस्तावाद्भूय उक्तं, ततो न पुनरुक्तादोषः। **'तया णं उत्तमकट्ठपत्ते'** [मि](इ)त्यादि सुगमं यावत्प्राभृतपरिसमाप्तिः।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां द्वितीयस्य प्राभृतस्य तृतीयं प्राभृतप्राभृतं समाप्तम्। द्वितीयं प्राभृतं समाप्तम्।

* * * * *

१. सव्वब्भंतरं मंडलं - मूले। २. सर्वाभ्यन्तरमण्डल - E। ३. पञ्च पञ्च योजन... - H।
४. सप्तचत्वारिंशद्योजनसहस्रै ... - A, E।

तृतीयं प्राभृतम्

तदेवमुक्तं द्वितीयं प्राभृतम्। सम्प्रति तृतीयमारभ्यते। तस्य चायमर्थाधिकारः कियत् क्षेत्रं चन्द्रः सूर्यो वा प्रकाशयति ? इति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता केवतितं ते चंदिमसूरिया तोभासंति उज्जोविंति तविंति पगासंति[1] आहिता ति वदेज्जा ?

टी० 'ता केवइय'मित्यादि। **'ता'** इति पूर्ववत् **कियत्क्षेत्रं चन्द्रसूर्या,** बहुवचनं जम्बूद्वीपे चन्द्रद्वयस्य सूर्यद्वयस्य च भावात्, **अवभासयन्ति,** तत्राऽवभासो ज्ञानस्यापि प्रतिभा(सो) व्यवह्रियते ततस्तद्व्यवच्छेदार्थमाह **उद्योतयन्ति,** स चोद्योतो यद्यपि लोके भेदेन प्रसिद्धो यथा सूर्यगतः आतपः चन्द्रगतः प्रकाश इति, तथाप्यातपशब्दः चन्द्रप्रभायामपि वर्त्तते, तदुक्तं **'चन्द्रिका कौमुदी ज्योत्स्ना तथा चन्द्रातपः स्मृतः'** ( ) इति, प्रकाशशब्दः सूर्यप्रभायामपि, एतच्च प्रायो बहूनां सुप्रतीतम्, तत एतदर्थप्रतिपत्त्यर्थमुभयसाधारणं भूयोप्येकार्थिकद्वयमाह **तापयन्ति प्रकाशयन्ति आख्याता इति,** आर्षत्वात् तिबाद्यन्तपदेनापि सह नामपदस्य समन्वयो भवति। एवमर्थयोजना द्रष्टव्या-कियत्क्षेत्रं चन्द्रसूर्या [आ](अव)भासयन्त उद्योतयन्तः तापयन्त (प्रकाशयन्त) आख्याता भगवता **इति** भगवान् **वदेत्** ?

एवं गौतमेनोक्ते भगवानेतद्विषयपरतीर्थिकप्रतिपत्तीनां मिथ्याभावोपदर्शनाय प्रथमतस्ता एवोपन्यस्यति–

मू० तत्थ खलु इमातो दुवालस पडिवत्तितो पण्णत्तातो। तत्थ एगे एवमाहंसु ता एगं दीवं एगं समुद्दं चंदिमसूरिया ओभासंति (उज्जोवेंति तवेंति पगासेंति) आहिया ति वदेज्जा। एगे एव(माहंसु)। एगे पुण एव(माहंसु) तिण्णि दीवे तिण्णि समुद्दे चंदिम जाव आहिते

---

१. भासंति - H, Q, R।

ति वदेज्जा। एगे एव(माहंसु)। एगे पुण (एवमाहंसु) ता [१]अद्धुट्ठे दीवे [२]अद्धुट्ठे समुद्दे चंदिमसूरिया ओभासंति [३]जाव वदेज्जा। एगे एव(माहंसु)। एगे पुण (एवमाहंसु) ता सत्त दीवे सत्त समुद्दे चंदिमसूरिया तोभासंति जाव वदेज्जा। एगे (एवमाहंसु)। एगे पुण (एवमाहंसु) ता दस दीवे दस समुद्दे चंदिमसूरिया तोभासंति जाव वदेज्जा। एगे (एवमाहंसु)। एगे पुण (एवमाहंसु) ता दुवालस दीवे दुवालस समुद्दे चंदिमसूरिया तोभासंति जाव वदेज्जा। एगे एव-(माहंसु)। एगे पुण (एवमाहंसु) बायालीसं दीवे बायालीसं समुद्दे चंदिमसूरिता तोभासंति जाव वदेज्जा। एगे (एवमाहंसु)। एगे पुण (एवमाहंसु) बावत्तरिं दीवे बावत्तरिं समुद्दे चंदिमसूरिया तोभासंति जाव वदेज्जा। एगे एव(माहंसु)। एगे पुण (एवमाहंसु) ता बायालीसं दीवसयं बायालीसं समुद्दसतं चंदिम जाव वदेज्जा। एगे एव(माहंसु)। एगे पुण(एवमाहंसु) बावत्तरं दीवसयं बावत्तरं समुद्दसयं जाव वदेज्जा। एगे एवमाहंसु। एगे पुण एवमाहंसु बायालीसं दीवसहस्सं बायालीसं समुद्दसहस्सं चंदिमसूरिया तोभासंति जाव वदेज्जा। एगे एव(माहंसु)। एगे पुण (एवमाहंसु) बावत्तरं दीवसहस्सं बावत्तरं समुद्दसहस्सं चंदिमसूरिया ओभासंति जाव वदेज्जा। एगे एवमाहंसु।

टी० **'तत्थे'**त्यादि। **तत्र** चन्द्रसूर्याणां क्षेत्रावभासनविषये **इमा खलु द्वादश प्रतिपत्तयः** परतीर्थिकाभ्युपगमरूपाः **प्रज्ञप्तास्तद्यथा 'तत्थे'**ति **तत्र** तेषां द्वादशानां परतीर्थिकानां मध्ये **एके** प्रथमास्तीर्थान्तरीया **एवमाहुः एकं द्वीपं एकं समुद्रं चन्द्रसूर्यौ अवभासयन्तौ उद्योतयन्तौ तापयन्तौ प्रकाशयन्तौ** सूत्रे द्वित्वेऽपि बहुवचनं प्राकृतत्वात्, उक्तश्च **'बहुवयणेण दुवयणं'** ( ) इति द्वित्वं चेह

१. आउद्धे - H। २. आउद्धे - H। ३. जाव भासंति जाव वदेज्जा - Q।

तत्त्विकमवसेयम्, परतीर्थिकैरेकस्य चन्द्रमस एकस्य च सूर्यस्याभ्युपग[म](त)त्वात्, **आख्याता इति वदेत्**। सम्प्रत्यस्यैव प्रथममतस्योपसंहारमाह **'एगे एवमाहंसु'**। एवं सर्वाण्युपसंहारवाक्यानि भावनीयानि १। **एके** पुनर्द्वितीया **एवमाहुः त्रीन् द्वीपान् त्रीन् समुद्रान् चन्द्रसूर्यौ** यावच्छब्दोपादानात् **अवभासयन्तौ (उद्योतयन्तौ) तापयन्तौ प्रकाशयन्ता**विति द्रष्टव्यं **आख्यातावि**ति **वदेत्** २। **एके पुनस्तृतीया एवमाहुः** [**आउद्धे**] (**अद्धुट्ठे**) त्ति अर्द्धं चतुर्थं येषां ते अर्द्धचतुर्थाः, त्रयः परिपूर्णाश्चतुर्थस्य चार्द्धमित्यर्थः **अर्द्धचतुर्थान् द्वीपान् अद्धचतुर्थान्समुद्रांश्चन्द्रसूर्यौ अवभासयन्तौ** इत्यादि प्राग्वत् ३। **एके** चतुर्था **पुनरेवमाहुः सप्त द्वीपान् सप्त समुद्रान् चन्द्रसूर्यावभासयन्तौ (४) आख्यातावि**ति **वदेत्(४)**। **एके पुनः** पञ्चमा **एवमाहुः दश द्वीपान् दश समुद्रान् चन्द्रसूर्यावभासयन्तौ (४) आख्यातावि**ति **वदेत्(५)**। **एके पुनः** षष्ठा **एव**मभिदधति **द्वादश द्वीपान् द्वादश समुद्रान् चन्द्रसूर्यावभासयन्तौ (४) आख्याता इति वदेत्(६)**। **एके पुनः** सप्तमा **एवं** [ब्रू](ब्रुव)ते **द्विचत्वारिंशतं द्वीपान् द्विचत्वारिंशतं समुद्रान् चन्द्रसूर्यावभासयन्तौ (४) आख्याता इति वदेत्(७)**। **एके पुनरष्टमा एवमाहुः** [1]**द्वासप्ततिद्वीपान् द्वासप्ततिसमुद्रान् चन्द्रसूर्यावभासयन्तौ (४) आख्यातावि**ति **वदेत्** ८। **एके पुनर्नवमा एवं** भाषन्ते **द्विचत्वारिंशं** द्वाचत्वारिंशदधिकं **द्वीपशतं** (**द्विचत्वारिंशं**) द्वाचत्वारिंशदधिकं **समुद्रशतं चन्द्रसूर्यावभासयन्तौ ४** [2]**आख्यातावि**ति **वदेत्** ९। **एके पुनर्दशमा एवं** जल्पन्ति **द्वासप्तत्यधिकं द्वीप**[समुद्रसहस्रं](**शतं**) (**द्वासप्तत्यधिकं समुद्रशतं**) **चन्द्रसूर्यावभासयन्तौ ४ आख्यातावि**ति **वदेत्** १०। **एके पुनरेकादशा एवमाहुः द्वाचत्वारिंशं** द्वाचत्वारिंशदधिकं **द्वीपसहस्रं** (द्वाचत्वारिंशं) द्वाचत्वारिंशदधिकं **समुद्रसहस्रं चन्द्रसूर्यावभासयन्तौ ४ आख्यातावि**ति **वदेत्** ११। **एके**

१. द्विसप्तति ... - H, बावत्तरिं दीवे बावत्तरिं समुद्दे - मूले। २. आख्याता इति - H, I, T।

पुनर्द्वादशा [१]**एवमाहुः द्वासप्तत्यधिकं द्वीपसहस्रं द्वासप्तत्यधिकं समुद्रसहस्रं चन्द्रसूर्याववभासयन्तौ ४ आख्यातावि**ति **वदेत्** १२।

एताश्च सर्वा अपि प्रतिपत्तयो मिथ्यारूपास्तथा च भगवान् एता व्युदस्य स्वमतं भिन्नमेव कथयति–

मू० वयं पुण एवं वदामो ता अयण्णं जंबुद्दीवे २ जाव परिक्खेवेणं। से णं एगाते जगतीए सव्वतो समंता संपरिखित्ते। सा णं जगती अट्ठ जोयणाइं उड्ढं उच्चत्तेणं एवं जहा जंबुद्दीवपन्नत्तीए तहेव णिरवसेसं जाव चोद्दससलिलासयसहस्सा छप्पण्णं च सलिलासहस्सा भवंति त्ति मक्खाता। जंबुद्दीवे २ पंचचक्कभागसंठिते आहिते ति वदेज्जा।

टी० '**वयं पुण**' इत्यादि। **वयं पुन**रुत्पन्नकेवलचक्षुषः केवलज्ञानचक्षुषा यथावस्थितं जगदुपलभ्य **एवं** वक्ष्यमाणप्रकारेण **वदाम**स्तमेव प्रकारमाह – '**ता अयण्ण**'मित्यादि। अत्र '**जहा जंबुद्दीवपण्णत्तिए**'त्ति यथा जम्बूद्वीपप्रज्ञप्तौ '**अयण्णं जंबुद्दीवे दीवे**' (**जम्बूद्वीपप्रज्ञप्तिः, सूत्र ३**) इत्यारभ्य यावत् '**एवमेव सपुव्वावरेण जंबुद्दीवे चोद्दससलिलासयसहस्सा छप्पन्नं च सहस्सा भवंति ति मक्खाय**'मित्युक्तं तथा एतावत् ग्रन्थसहस्रचतुष्टयप्रमाणमत्रापि वक्तव्यं, परं ग्रन्थगौरवभयान्न लिख्यते, केवलं जम्बूद्वीपप्रज्ञप्तिपुस्तकमेव निरीक्षणीयमिति। अयमेवंरूपो **जम्बूद्वीपः पञ्चभिः** पञ्चसङ्ख्योपेतै**श्चक्रवालभागैः** [२]**संस्थित आख्यात इति वदेत्** स्वशिष्याणां पुरतः।

एवमुक्ते भगवान् गौतमः [३]स्वशिष्यस्पष्टाऽवबोधाऽऽधानाय भूयः पृच्छति –

मू० ता कहं ते जंबुद्दीवे दीवे पंचचक्कभागसंठिते आहिते ति वदेज्जा ?

---

१. एवमभिदधति - I, N, T। २. स्थित - H। ३. शिष्यस्पष्टाऽवबोधनाय - D, G।

टी० 'ता कह'मित्यादि। 'ता' इति पूर्ववत् **कथं** भगवन् ! **त्वया जम्बूद्वीपो द्वीपः पञ्चचक्रवालभागसंस्थित आख्यात इति वदेत्** ?

भगवानाह –

मू० ता जया णं एए दुवे सूरिया सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरंति तता णं जंबुद्दीवस्स दीवस्स तिण्णि पंचचक्कभागे ओभासेंति उज्जोवेंति (तवंति) प[भा](गा)संति तं जहा एगे वि एगं दिवड्ढं पंचचक्कभागं ओभासेति एगे वि एगं दिवड्ढं पंचचक्कभागं ओभासति। तता णं उत्तम(कट्ठपत्ते) उक्कोसे अट्ठारस(मुहुत्ते) दिवसे भवति जहण्णिया दुवा(लसमुहुत्ता) राती। ता जता णं एए दुवे सूरिया सव्वबाहिरं मंडलं उवसंकमित्ता चार चरंति तता णं जंबुद्दीवस्स दीवस्स दुण्णि पंचचक्कभागे ओभासंति जाव प[भा](गा)संति। तं जहा एगेवि एगं पंचचक्कभागं ओभासति जाव प[भा](गा)सति एगेवि एगं पंचचक्कभागं ओभासेति उज्जोवेति (तवेति) प[भा](गा)सति। तता णं उत्तमकट्ठ(पत्ता) उक्कोसा अट्ठा(रसमुहुत्ता) राती भवति जहण्णए दुवालसमुहुत्ते दिवसे भवति।

ततीयं पाहुडं समत्तं ३।

टी० 'ता जया ण'मित्यादि। 'ता' इति प्राग्वत् **यदा** 'ण'मिति वाक्यालङ्कारे **एतौ** प्रवचनवेदिनां प्रसिद्धौ **द्वौ सूर्यौ सर्वाभ्यन्तरमण्डलमुपसङ्क्रम्य चारं चर[ति]तः, तदा** [१]**तौ** समुदितौ द्वावपि सूर्यौ [२]**जम्बूद्वीपस्य द्वीपस्य त्रीन् पञ्चचक्रवालभागान् अवभासयतः उद्योतयतः तापयतः प्रकाशयतः**। कथं प्रकाशयत इति परप्रश्नावकाशमाशङ्क्य एतदेव विभागत आह – 'ए[गो](गे)वी'त्यादि। **एकोपि** सूर्यो जम्बूद्वीपस्य द्वीपस्य **एकं पञ्चचक्रवालभागं**

१. तौ द्वावपि - A, B, C, D, E, F, G, I, J, K, L, M, N। २. जम्बूद्वीपस्य त्रीन् - I।

पञ्चमं चक्रवालभागं **द्व्यर्द्धमिति** द्वितीमर्द्धं यस्य स द्व्यर्द्धः पुरणार्थो वृत्तावन्तर्भूतो यथा तृतीयो भाग(स्त्रिभाग) इत्यत्र। [१]अयं च भावार्थः [२]एकं च पञ्चमं चक्रवालभागं द्वितीयस्य पञ्चमस्य चक्रवालभागस्यार्द्धेन सहितं **प्रकाशयति** तथा [३]**एको**ऽपरोऽ**पि** द्वितीयोऽपीत्यर्थः **एकं पञ्चमं चक्रवालभागं द्व्यर्द्धं प्रकाशयति**। अत [४]उभयप्रकाशितभागमीलने परिपूर्णं भागत्रयं प्रकाश्यं भवति। इयमत्र भावना – इह जम्बूद्वीपगतं प्रकाश्यं चक्रवालं षष्ट्यधिकषट्त्रिंशच्छतभागं कल्प्यते ३,६६०, तस्य पञ्चमो भागो द्वात्रिंशदधिकसप्तशतप्रमाणः ७३२ सार्द्धः सन् अष्टनवत्यधिक-सहस्रभागमानः १,०९८। ततः सर्वाभ्यन्तरे मण्डले वर्तमान एकोऽपि सूर्यः षष्ट्यधिकषट्त्रिंशच्छतसङ्ख्यानां भागानामष्टानवत्यधिकं सहस्रं प्रकाशयति, द्वितीयोऽप्यष्टानवत्यधिकं सहस्रं, उभयमीलने एकविंशतिशतानि षण्णवत्यधिकानि २,१९६ प्रकाशमानानि लभ्यन्ते। तदा च द्वौ पञ्चचक्रवालभागौ रात्रिस्तद्यथा एकतोऽपि पञ्चमो भागो द्वात्रिंशदधिकसप्तशतभागसङ्ख्यो रात्रिरपरतोऽपि एकः पञ्चमो भागो द्वात्रिंशदधिकसप्तशतभागसङ्ख्यो रात्रिः, उभयमीलने चतुर्दशशतानि चतुः-षष्ट्यधिकानि १,४६४ षष्ट्यधिकषट्त्रिंशच्छतभागानां रात्रिः। सर्वभागमीलने षट्त्रिंशच्छतानि षष्ट्यधिकानि भवन्ति। सम्प्रति तत्र दिवसरात्रिप्रमाणमाह **'तया ण'**मित्यादि। **तदा** सर्वाभ्यन्तरमण्डलचारकाले **उत्तमकाष्ठाप्राप्तः** परमप्रकर्षप्राप्त **उत्कृष्टोऽष्टादशमुहूर्त्तो दिवसो भवति जघन्या द्वादशमुहूर्त्ता रात्रिः**। ततो द्वितीयेऽहोरात्रे द्वितीयमण्डले वर्त्तमान एकोऽपि सूर्यो जम्बूद्वीपस्यैकं [५]पञ्चम-चक्रवालभागं सार्द्धं षष्ट्यधिकषट्त्रिंशच्छतभागसत्कभागद्वयहीनं प्रकाशयत्यपरोऽपि सूर्य एकं पञ्चमं चक्रवालभागं सार्द्धं षष्ट्यधिकषट्त्रिंशच्छतभागसत्कभागद्वयहीनं प्रकाशयति। तृतीयेऽहोरात्रे तृतीयमण्डले वर्त्तमान एकोऽपि सूर्यो एकं पञ्चमं

---

१. अयं भावार्थः - ।। २. एकं पञ्चमं - C, D, G। ३. एकोऽपि अपरो - N। ४. उभयमीलने - C, G । ५. पञ्चमं चक्रवालभागं - E, J, T।

चक्रवालभागं सार्द्धं षष्ट्यधिकषट्त्रिंशच्छतभागसत्कभागचतुष्टयन्यूनं प्रकाशयति अपरोप्येकं पञ्चमं चक्रवालभागं सार्द्धं षष्ट्यधिकषट्त्रिंशच्छतभागसत्कभाग-चतुष्टयन्यूनं प्रकाशयति। एवं प्रत्यहोरात्रमेकैकः सूर्यः षष्ट्यधिकषट्त्रिंशच्छत-भागसत्कभागद्वयमोचनेन प्रकाशयन् तावदवसेयो यावत्सर्वबाह्यं मण्डलं सर्वाभ्य-न्तरान्मण्डलात् परतः त्र्यशीत्यधिकशततमम्। ततः प्रतिमण्डलं भागद्वयमोचनेन यदा (सर्वबाह्ये मण्डले चरति तदा) त्रीणि शतानि षट्षष्ट्यधिकानि भागानां त्रुट्यन्ति, त्र्यशीत्यधिकस्य शतस्य द्वाभ्यां गुणने एतावत्याः सङ्ख्याया भावात्, त्रीणि शतानि षट्षष्ट्यधिकानि पञ्चमचक्रवालभागस्य द्वात्रिंशदधिकसप्तशतभागप्रमाणस्यार्द्धम्। ततः पञ्चमचक्रवालभागस्यार्द्धं परिपूर्णं तत्र मण्डले त्रुट्यतीति [१]एक एव परिपूर्णः [२]पञ्चमचक्रवालभागस्तत्र प्रकाशस्तथा चाह- **'ता जया ण'**मित्यादि। **तत्र यदा 'ण'**मिति पूर्ववत्, **एतौ** प्रवचनप्रसिद्धौ **द्वावपि सूर्यौ [३]सर्वबाह्यमण्डलमुपसङ्क्रम्य चारं चरतः तदा** तौ समुदितौ **जम्बूद्वीपस्य द्वीपस्य द्वौ चक्रवालपञ्चमभागौ अवभासयत उद्योतयतस्तापयतः प्रकाशयतस्तद्यथा एकोऽपि** सूर्य **एकं पञ्चमं चक्रवालभागं प्रकाशय[त्येकोपि](ति)** अपरोऽपि द्वितीयोऽपीत्यर्थ **एकं पञ्चमं चक्रवालभागं प्रकाशयति। 'तया ण'**मित्यादि। **तदा** सर्वबाह्यमण्डलचारकाले **उत्तमकाष्ठाप्राप्ता उत्कर्षिका अष्टादशमुहूर्त्तप्रमाणा रात्रिर्जघन्यो द्वादशमुहूर्त्त-प्रमाणो दिवसः**। इह यथा निष्क्रामतोः सूर्ययोः जम्बूद्वीपविषयप्रकाशविधिः क्रमेण हीयमान उक्तस्तथा सर्वबाह्यान्मण्डलादभ्यन्तरं प्रविशतोः क्रमेण वर्द्धमानो वेदितव्यः, तद्यथा द्वितीयस्य षण्मासस्य प्रथमे अहोरात्रे सर्वबाह्यान्मण्डलादर्वाक्तने अनन्तरे द्वितीये मण्डले वर्त्तमान एकोऽपि सूर्य एकं जम्बूद्वीपस्य पञ्चमं चक्रवालभागं षष्ट्यधिकषट्त्रिंशच्छतसङ्ख्यभागसत्कभागद्वयाधिकं प्रकाशयत्यपरोऽपि सूर्य एकं पञ्चमं चक्रवालभागं षष्ट्यधिकषट्त्रिंशच्छतसङ्ख्यभागद्वयाधिकं प्रकाशयति।

---

१. एकः परिपूर्णः - H। २. पञ्चमः चक्रवाल.... - J। ३. सर्वबाह्यं मण्डल.... - J।

द्वितीयस्य षण्मासस्य द्वितीयेऽहोरात्रे सर्वबाह्यान्मण्डलादर्वाक्तने [१]तृतीये मण्डले वर्त्तमान (एकोऽपि सूर्य) एकं पञ्चमं चक्रवालभागं षष्ट्यधिकषट्त्रिंशच्छतसङ्ख्य-भागसत्कभागचतुष्टयाधिकं प्रकाशयति अपरोऽपि सूर्यः परत एकं पञ्चमं चक्र-वालभागं यथोक्तभागचतुष्टयाधिकं प्रकाशयति। एवं प्रतिमण्डलमेकैकः सूर्यः षष्ट्यधिकषट्त्रिंशच्छतभागसत्कभागद्वयवर्द्धनेन प्रकाशयन् तावदवसेयो यावत्स-र्वाभ्यन्तरं मण्डलम्। तस्मिंश्च सर्वाभ्यन्तरे मण्डले द्वितीयस्य पञ्चमचक्रवालभागस्यार्द्धं परिपूर्णं भवति। तत एकोऽपि सूर्यस्तत्र मण्डले एकं पञ्चमं चक्रवालभागं सार्द्धं जम्बूद्वीपस्य प्रकाशयति, अपरोप्येकं पञ्चमं चक्रवालभागं सार्द्धं, तथा च एतदेव जम्बूद्वीपचक्रवालस्य दशभागान् परिकल्प्य अन्यत्राप्युक्तम् – **'छच्चेव उ दसभागे, जंबुद्दीवस्स दोवि दिवसयरा। ताविंति दित्तलेसा, [२]अब्भंतरमंडले संता ॥३१३॥ चत्तारि य दसभागे, जंबुद्दीवस्स दोवि दिवसयरा। ताविंति दित्तलेसा, बाहिरए मंडले संता॥३१४॥ छत्तीसे भागसए सट्ठे, काऊण जंबुद्दीवस्स। तिरियं तत्तो दो दो भागे, [३]वड्ढइ व हायइ वा॥३१६॥' (जो.प.)**

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां तृतीयं प्राभृतं समाप्तम्।

* * * * *

सावयघरम्मि वर हुञ्ज, चेडओ नाणदंसणसमेओ।
मिच्छत्तमोहिअमई, मा राया चक्कवट्टी वि॥

भोगे अभुंजिऊणं नरगं, वच्चतिं मूढ किवणु व्व।
भोत्तुण जंति सिद्धिं धुय-कम्मा के वि भरहो व्व॥

१. तृतीयमण्डले - D। २. अब्भिंतरमंडले - B, G, K, T।
३. मुद्रितसटीकज्योतिष्करण्डकप्रकीर्णकप्रतौ त्वयं पाठ इत्थं दृश्यते- 'परिवड्ढति हायते वा वि'।

चतुर्थं प्राभृतम्

तदेवमुक्तं तृतीयं प्राभृतम्। सम्प्रति चतुर्थमारभ्यते। तस्य चायमर्थाधिकारः – कथं श्वेततायाः संस्थितिराख्यातेति[१] वदेत्? ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते सेयताते संठिती आहितेति वदेज्जा?

टी० 'ता कहं ते सेय[इ](ताते) संठिई आहियत्ति[२] वएज्जा?' इत्यादि। **'ता'** इति पूर्ववत् **कथं** भगवन्! **'ते' त्वया श्वेततायाः संस्थितिराख्याता इति** भगवान्**वदेत्** ?

एवं भगवता गौतमेनोक्ते[३] वर्द्धमानस्वामी भगवान् आह –

मू० तत्थ खलु इमा दुविहा संठिती पण्णत्ता। तं जहा चंदिमसूरियसंठिती[४] तावखेत्तसंठिती य।

टी० 'तत्थे'त्यादि। **तत्र** श्वेतताया विषये **खल्वियं** वक्ष्यमाणस्वरूपा **द्विविधा संस्थितिः प्रज्ञप्ता**। तामेव तद्यथेत्यादिनोपदर्शयति – **तद्यथे**त्यत्र तच्छब्दोऽव्ययं, ततोऽयमर्थः **सा** श्वेतता **यथा** येन प्रकारेण[५] द्विविधा भवति तथोपदर्श्यते – **चन्द्र-सूर्यसंस्थितिस्तापक्षेत्रसंस्थितिश्च**। इह श्वेतता चन्द्रसूर्यविमानानामपि विद्यते तत्कृततापक्षेत्रस्य च। ततः श्वेततायोगादुभयमपि श्वेताशब्देनोच्यते। तेनोक्तप्रकारेण श्वेतता द्विविधा भवति।

तत्र चन्द्रसूर्यसंस्थितिविषये प्रश्नयति –

मू० ता कहं ते चंदिमसूरियसंठिती आहितेति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत् **कथं 'ते' त्वया** भगवन् **चन्द्रसूर्यसंस्थितिराख्याता इति वदेत्**? इह चन्द्रसूर्यविमानानां संस्थानरूपा संस्थितिः प्रागेवाभिहिता। तत[६] इह चन्द्रसूर्यविमानसंस्थितिश्चतुर्णामप्यवस्थानरूपा पृष्टा द्रष्टव्या।

---

१. ...ख्यातेति, तत... - B, T। २. वएज्जा, ता - E, T। ३. वर्द्धमानस्वामी आह- H। ४. ...संठिइ य ताव - U। ५. द्विविधीभवति - H। ६. इह च चन्द्र - E।

एवमुक्ते भग[वता](वाने)तद्विषये यावत्यः परतीर्थिकानां प्रतिपत्तयस्तावतीरुपदर्शयति –

मू० तत्थ खलु इमातो सोलस पडिवत्तितो पण्णत्तातो तत्थेगे एवमाहंसु ता समचउरंससंठिता णं चंदिमसूरियसंठिती आहिता। एगे एव(माहंसु)। एगे पुण (एवमाहंसु) ता विसमचउरंससंठिया णं चंदिमसूरियसंठिती आहिता ति वदेज्जा। एवं एएणं अभिलावेणं। समचउक्कोणसंठिता णं चंदिम०। ता विसमचउक्कोणसंठिता णं चंदिम०। ता समचक्कवालसंठिया णं चंदिम०। ता विसमचक्कवालसंठिता णं चंदिम०। ता चक्कद्धचक्कवालसंठिया णं चंदिम०। ता छत्तागारसंठिया णं चंदिम०। ता गेहागारसंठिया णं चंदिम०। ता गेहावणसंठिता णं चंदिमसूरियसंठिती आहिता। तत्थ एगे एवमाहंसु ता पासायसंठिता णं चंदिम०। ता[१] गोपुरसंठिता णं चंदिम०। ता पेच्छाघरसंठिता णं चंदिम०। ता वलभीसंठिता णं चंदिम०। ता हंमिततलसंठिता णं चंदिम०। एगे एव(माहंसु)। एगे पुण (एवमाहंसु) वालग्गपोत्तितासंठिता णं चंदिमसूरियसंठिती आहिता।

टी० **'तत्थे'**त्यादि। **तत्र** चन्द्रसूर्यसंस्थितौ विचार्यमाणायां **खल्विमा षोडश प्रतिपत्तयः प्रज्ञप्तास्तद्यथा एके** वादिन **एवमाहुः समचतुरस्रसंस्थिता चन्द्रसूर्यसंस्थितिराख्याता इति वदेत्**। समचतुरस्रं संस्थितं संस्थानं यस्याश्चन्द्रसूर्यसंस्थितेः सा तथा। अत्रैवोपसंहारवाक्यमाह – **'एगे एवमाहंसु'**। एवं सर्वत्रापि प्रत्येकमुपसंहारवाक्यं द्रष्टव्यम् १। **एके पुनरेवामाहुः विषमचतुरस्रसंस्थिता चन्द्रसूर्यसंस्थितिराख्याता इति वदेत्**। विग्रहः पूर्ववद्भावनीयः २। **'एवमित्यादि'**। **एव**मुपदर्शितेन प्रकारेण **एतेनानन्तरोदितेनाभिलापेन** समचतुःकोण-

१. ता पेच्छाघरसंठिता णं चंदिम०, ता गोपुरसंठिता णं चंदिम० - U।

संस्थितादयोऽपि चन्द्रसूर्यसंस्थितयो वक्तव्याः। ताश्चैवं **'एगे (पुण) एवमाहंसु समचउकोणसंठिया चंदिमसूरियसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।'** अत्र **'समचउकोणसंठिय'**त्ति समाश्चत्वारः कोणा यत्र तत् समचतुःकोणं[1] संस्थितं संस्थानं यस्याः सा तथेति विग्रहः ३। **'एगे पुण एवमाहंसु विसमचउकोणसंठिया चंदिमसूरियसंठिई आहिय त्ति वएज्जा। एगे एवमाहंसु।'** अत्र विषमाश्चत्वारः कोणा यत्र तत् विषमचतुष्कोणं तत्संस्थितं संस्थानं यस्याश्चन्द्रसूर्यसंस्थितेः सा तथेति विग्रहः ४। **'एगे पुण एवमाहंसु समचक्कवालसंठिया चंदिमसूरियसंठिई आहिय त्ति वएज्जा। एगे एवमाहंसु।' 'समचक्कवालं'** समचक्रवालरूपं संस्थितं यस्याः सा तथेति विग्रहः ५। **'एगे पुण एवमाहंसु विसमचक्कवालसंठिया चंदिमसूरियसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।'** अत्र **'विसमचक्कवालं'** विषमचक्रवालरूपं संस्थितं संस्थानं यस्याः सा तथेति विग्रहः ६। **'एगे पुण एवमाहंसु चक्कद्धचक्कवालसंठिया चंदिमसूरियसंठिई आहियत्ति वदेज्जा।'** अत्र चक्रस्य रथाङ्गस्य यद[र्द्धं](र्द्धचक्रवालं) चक्रवालस्यार्द्धं तद्रूपं संस्थितं संस्थानं यस्याः सा तथेति वाक्यम् ७। **'एगे पुण एवमाहंसु छत्तागारसंठिया चंदिमसूरियसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु। एगे पुण एवमाहंसु गेहसंठिया[2] चंदिमसूरियसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।'** अत्र [गृ](गे)हस्य वास्तुविद्यो[पेत](पनि)बद्धस्य [गे](गृ)हस्येव संस्थितं संस्थानं यस्याः सा तथेति विग्रहः ८,९। अत्र छत्राकारसंस्थितगृहाकारसंस्थितरूपे द्वे मते प्रतिपुस्तकेऽपि छर्दिते स्तः। **'एगे पुण एवमाहंसु गेहावणसंठिया चंदिमसूरियसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।'** अत्र गृहयुक्त आपणो गृहापणो वास्तुविद्यादिप्रसिद्धस्तस्येव (संस्थितं) संस्थानं यस्याः सा तथेति विग्रहः १०। **'एगे पुण एवमाहंसु पासायसंठिया चंदिमसूरियसंठिई आहियत्ति वएज्जा।**

---

१. संस्थानं संस्थितिर्यस्याः - H,T। २. मूले तु 'गेहागारसंठिया' इति पाठो दृश्यते।

एगे एवमाहंसु।' अत्र विग्रहः पूर्ववद्भावनीयः ११। '**एगे पुण एवमाहंसु गोपुरसंठिया चंदिमसूरियसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।**' अत्र विग्रहभावना सुगमा, नवरं गोपुरं पुरद्वारम् १२। '**एगे पुण एवमाहंसु पेच्छाघरसंठिया चंदिमसूरिसंठिई आहियाति वएज्जा। एगे एवमाहंसु।**' अत्र प्रेक्षागृहस्येव वास्तुविद्याप्रसिद्धस्य संस्थितं संस्थानं यस्याः सा तथेति विग्रहः १३। '**एगे पुण एवमाहंसु वलभीसंठिया चंदिमसूरियसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।**' अत्र वलभ्या इव गृहाणामाच्छादनस्येव संस्थितं संस्थानं यस्याः सा तथेति विग्रहः १४। '**एगे पुण एवमाहंसु हम्मियतलसंठिया चंदिम-सूरियसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।**' अत्र हर्म्यं धनवतां गृहं, तस्य तलमुपरितनो भागः, तस्येव संस्थितं संस्थानं यस्याः सा तथेति विग्रहः १५। '**एगे पुण एवमाहंसु वालग्गपोत्तियसंठिया चंदिमसूरियसंठिई आहिय त्ति वएज्जा। एगे एवमाहंसु।**' अत्रेयं विग्रहभावना '**वालग्गपोत्तिय**'त्ति देशी-शब्दोऽयमाकाशतडागमध्यस्थितं क्रीडास्थानं लघु[प्र](प्रा)सादमाह, तस्येव संस्थितं संस्थानं यस्याः सा तथेति १६।

तदेवमुक्ताः परतीर्थिकानां प्रतिपत्तय एतासां च मध्ये या प्रतिपत्तिः समीचीना तामुपदर्शयति–

मू० तत्थ जे ते एवमाहंसु ता समचउरंससंठिता णं चंदिमसूरियसंठिती आहितेति वदेज्जा, एएणं णएणं णेयव्वं, णो चेव णं इतरेहिं।

टी० '**तत्थे**'त्यादि। **तत्र** तेषां षोडशानां परतीर्थिकानां मध्ये **ये ते** वादिन **एवमाहुः समचतुरस्रसंस्थिता चन्दसूर्यसंस्थितिराख्याता इति वदेत्** इति **एतेन नयेन नेतव्यं** एतेनाभिप्रायेणास्मन्मतेऽपि चन्द्रसूर्यसंस्थितिरवधार्येति भावः। तथाहि इह सर्वेऽपि कालविशेषाः सुषमसुषमादयो युगमूला, युगस्य [१]चादौ [२]श्रावणे मासे

१. त्वादौ - H। २. श्रावणमासि - T।

बहुलपक्षप्रतिपदि प्रातरुदयसमये एकः सूर्यो दक्षिणपूर्वस्यां दिशि वर्त्तते द्वितीयस्त्वपरोत्तरस्यां, चन्द्रमा अपि तत्समये एको दक्षिणापरस्यां दिशि वर्त्तते द्वितीय उत्तरपूर्वस्यामत एते युगस्यादौ चन्द्रसूर्या समचतुरस्रसंस्थिता वर्त्तन्ते, यस्त्वत्र मण्ड[ले](ल)मात्रकृतं वैषम्यं यथा सूर्यौ सर्वाभ्यन्तरे मण्डले वर्त्तेते चन्द्रमसौ सर्वबाह्ये इति तदल्पमिति कृत्वा न विवक्ष्यते। तदेवं यतः सकलकालविशेषाणां सुषम-सुषमादिरूपाणामादिभूतस्य युगस्यादौ समचतुरस्रसंस्थिताः सूर्यचन्द्रमसो भवन्ति, ततस्तेषां संस्थितिः समचतुरस्रसंस्थानोपवर्णिता, अन्यथा वा यथासम्प्रदायं समचतुरस्रसंस्थितिः परिभावनीयेति, **'नो चेव णं इयरेहिं'**ति **न चैव** नैव **इतरैः** शेषैर्नयैश्चन्द्रसूर्यसंस्थितिर्ज्ञातव्या, तेषां (मिथ्या)रूपत्वात्।

तदेवमुक्ता चन्द्रसूर्यसंस्थितिः। सम्प्रति तापक्षेत्रसंस्थितिमभिधातुकामः प्रथमतस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते ताव(खेत्त)संठिती आहिता ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत् **कथं** भगवन् ! **त्वया तापक्षेत्रसंस्थितिराख्याता इति** भगवान् वदेत्?

एवमुक्ते भगवानेतद्विषये यावत्यः परतीर्थिकानां प्रतिपत्तयस्तावतीरुपदर्शयति –

मू० तत्थ खलु इमातो सोलस पडिवत्तीतो पण्णत्तातो। तत्थ एगे एवमाहंसु ता गेहागारसंठिता णं तावखेत्तसंठिती आहिता ति वदेज्जा। एवं तातो चेव अट्ठ पडिवत्तीओ णेयव्वातो जाव ता वालग्गपोत्तितासंठिता णं तावखेत्तसंठिती आहिया। एगे एव-(माहंसु)। एगे पुण (एवमाहंसु) ता ज(स्)संठिए णं जंबुद्दीवे दीवे त(स्)संठिता णं तावखेत्तसंठिती आहिता। एवं एएणं अभिलावेणं। ता ज(स्)संठिए णं भरहवासे त(स्)संठिआ णं तावखेत्तसंठिती०। (ता) उज्जाणसंठिता णं तावखेत्त०। ता णिज्जाणसंठिता णं तावखेत्त०। ता एगतो णिसहसंठिता णं तावखेत्त०। दुहतो

निसहसंठिया णं तावखेत्तसं०। ता सेयणगसंठिया णं तावखेत्तसंठिती। एगे एव(माहंसु)। एगे पुण (एवमाहंसु) सेयण(ग)पट्ठसंठिया णं तावखेत्तसंठिती आहिता ति वदेज्जा। एगे एवमाहंसु।

टी० '**तत्थे**'त्यादि। **तत्र** तस्यां तापक्षेत्रसंस्थितौ विषये **खल्विमाः षोडश प्रतिपत्तयः** परतीर्थिकाभ्युपगमरूपाः **प्रज्ञप्तास्तद्यथा** – **तत्र** तेषां षोडशानां परतीर्थिकानां मध्ये **एके** वादिन **एवमाहुः** [1]'**गेहसंठिय**'त्ति गेहस्येव वास्तुविद्याप्रसिद्धस्य गृहस्येव संस्थितं संस्थानं यस्याः सा तथा **तापक्षेत्रसंस्थितिराख्याता इति वदेत्**। अत्रैवोपसंहारमाह – '**एगे एवमाहंसु**।' '**एवं ताउ**' इत्यादि। **एवमुक्तेन** प्रकारेण चन्द्रसूर्यसंस्थितिगतेन प्रकारेणेत्यर्थः (**ता**) **एवा**नन्तरोदितचन्द्रसूर्यसंस्थितिगता गेहसंस्थितया सहाऽ**ष्टौ प्रतिपत्तयो नेतव्या यावदियमष्टमी** '**वालग्गपोत्तियसंठिया तावखित्तसंठिई आहियत्ति वएज्जा, एगे एवमाहंसु**।' तत्रैता एव विनेयानां सुखप्रतिपत्तये पाठतः उपदर्श्यन्ते – '**एगे पुण एवमाहंसु गेहावणसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु २। एगे पुण एवमाहंसु पासायसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु ३। एगे पुण एवमाहंसु गोपुरसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु ४। एगे पुण एवमाहंसु पेच्छाघरसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु ५। एगे पुण एवमाहंसु वलभीसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु ६। एगे पुण एवमाहंसु हम्मियतलसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु ७। एगे पुण एवमाहंसु वालग्गपोत्तियसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु ८।**' अत्र सर्वेष्वपि पदेषु विग्रहभावना प्रागिव कर्त्तव्या। '**एगे पुण एवमाहंसु**' इत्यादि। **एके पुनरेवमाहुः** '**ज(स)संठिए णं**' ति यत् संस्थितं संस्थानं

१. मूले तु 'गेहागारसंठिया' इति पाठो दृश्यते।

यस्य स **यत्संस्थितो 'ण'**मिति वाक्यालङ्कारे **जम्बूद्वीपो द्वीपस्तत्संस्थिता** तदेव जम्बूद्वीपगतं संस्थितं संस्थानं यस्याः सा तथा **तापक्षेत्रसंस्थितिराख्याता इति वदेत्**। अत्रोपसंहारमाह **'एगे एवमाहंसु ९'**। **'एवमेएणं अभिलावेण'**मित्यादि, एवमुक्तेन प्रकारेण **एतेनानन्तरोदितेनाऽभिलापेन यत्संस्थितं भारतं वर्षं तत्संस्थिता तापक्षेत्रसंस्थिति**[१]ः परेषां मतेन वक्तव्या, अन्येषां मतेन **उद्यानसंस्थिता तापक्षेत्रसंस्थिति**रभिधातव्या। एवं सर्वा अपि प्रतिपत्तयो भावनीयाः। पाठश्चैतासामेवं **'एगे पुण एवमाहंसु जस्संठिए भारहे वासे तस्संठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु १०। एगे पुण एवमाहंसु उज्जाणसंठिया तावखेत्तसंठिई आहिय त्ति वएज्जा। एगे एवमाहंसु।'** (ग्रन्थाग्रं २०००)। अत्र उद्यानस्येव संस्थितं संस्थानं यस्याः सा तथेति विग्रहः। एवमुत्तरत्रापि विग्रहभावना कार्या ११। **'एगे पुण एवमाहंसु निज्जाणसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।'** अत्र निर्याणं पुरस्य निर्गमनमार्गः १२। **'एगे पुण एवमाहंसु एगतो निसहसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।'** एकतो रथस्य एकस्मिन्पार्श्वे यो नितरां सहते स्कन्धे पृष्ठे वा समारोपितं भारमिति नि[षे](ष)धो बलीवर्दः, तस्येव संस्थितं संस्थानं यस्याः सा तथेति विग्रहः १३। **'एगे पुण एवमाहंसु दुहतो निसहसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।'** अत्र उभयतो रथस्य उभयोः पार्श्वयोर्निषधौ बलीवर्दौ तयोरिव संस्थितं संस्थानं यस्याः सा उभयतो नि[षे](ष)धसंस्थितेति विग्रहः १४। **'एगे पुण एवमाहंसु सेयणगसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।'** श्येनस्येव संस्थितं संस्थानं यस्याः सा तथेति विग्रहः १५। **'एगे पुण एवमाहंसु सेयणगपट्ठसंठिया तावखेत्तसंठिई आहियत्ति वएज्जा। एगे एवमाहंसु।'** श्येनपृष्ठस्येव संस्थितं संस्थानं यस्याः सा तथेति विग्रहः १६।

---

१. ... संस्थितिरपरेषां मतेन - C, G, I, K, L, T।

तदेवमुक्ताः षोडशापि प्रतिपत्तयः।

एताश्च सर्वा अपि मिथ्यारूपा [य](अ)त ता व्युदस्य स्वमतं भगवान् भिन्नमुपदर्शयति–

मू० वयं पुण एवं वदामो ता उद्धीमुहकलंबुयासंठिता णं तावखेत्तसंठिती आहिता ति वदेज्जा। अंतो संकुडा बाहिं विच्छिण्णा अंतो वट्टा बाहिं पिहुला अंतो अंकमुहसंठिया बाहिं सत्थियमुहसंठिता। उभतो पा[सं](सेणं) तीसे दुवे बाहातो अवट्ठितातो भवंति पणयालीसं पणयालीसं जोयणसहस्साइं आयामेणं, तीसे णं दुवे बाहातो अणवट्ठितातो भवंति तं० सव्वब्भंतरिया चेव बाहा (सव्व)बाहिरिया चेव बाहा।

टी० '**वयं पुण**' इत्यादि। **वयं पुनरुत्पन्नकेवलज्ञानाः** केवलज्ञानेन यथावस्थितं वस्तूपलभ्य **एवं** वक्ष्यमाणप्रकारेण **वदामः**। तमेव प्रकारमाह – '**उद्धीमुहे**'त्यादि। **ऊर्द्ध्वमुखकलम्बुकापुष्पसंस्थिता** ऊर्द्ध्वमुखस्य कलम्बुकापुष्पस्येव संस्थितं संस्थानं यस्याः सा तथा **तापक्षेत्रसंस्थितिराख्याता** मया शेषैश्च तीर्थकृद्भिः। सा च कथम्भूतेत्यत आह- **अन्तर्मेरुदिशि सङ्कुचिता बहिर्लवणदिशि विस्तृता,** तथा **अन्तर्मेरुदिशि वृत्तार्द्धवलयाकारा** सर्वतो वृत्तमेरुगतान् त्रीन् द्वौ वा दशभागानभिव्याप्य तस्या व्यवस्थितत्वात् **बहिर्लवणदिशि पृथुला** मुत्कलभावेन विस्तारमुपगता। एतदेव संस्थानस्य कथनेन[१] स्पष्टं स्पष्टयति '**अंतो अंकमुहसंठिया बहिं सत्थियमुहसंठिय**'त्ति **अन्तर्मेरुदिशि** अङ्कः पद्मासनोपविष्टस्योत्सङ्गरूप आसनबन्धस्तस्य मुखमग्रभागोऽर्द्धवलयाकारस्तस्येव संस्थितं संस्थानं यस्याः सा, तथा **बहिर्लवणदिशि स्वस्तिकमुखसंस्थिता** स्वस्तिकः सुप्रतीतस्तस्य मुखमग्र-भागस्तस्येवातिविस्तीर्णतया संस्थितं संस्थानं यस्याः सा, तथा '**उभओ पासेणं**'ति

१. कथनेन स्पष्टयति - F, T।

उभयपार्श्वेन मेरुपर्वतस्योभयोः पार्श्वयोः **तस्यास्तापक्षेत्रसंस्थितेः** सूर्यभेदेन द्विधा व्यव[स्था](स्थिता)याः प्रत्येकमेकैकेन भावेन ये **द्वे बाहे** ते आयामेन जम्बूद्वीपगत-मायाममाश्रित्य**वस्थिते भवतः**, सा चैकैका **आयामतः** किम्प्रमाणा ? इत्याह **पञ्चचत्वारिंशत् २ योजनसहस्राणि** ४५,०००, **तस्याः** तापक्षेत्रसंस्थितेरेकैकस्या **द्वे** च **बाहे अनवस्थिते भवतस्तद्यथा सर्वाभ्यन्तरा**[१] **सर्वबाह्या** च। तत्र या मेरुसमीपे विष्कम्भमधिकृत्य बाहा सा सर्वाभ्यन्तरा या[२] तु लवणदिशि जम्बूद्वीपपर्यन्ते विष्कम्भमधिकृत्य बाहा सा सर्वबाह्या। आयामश्च दक्षिणोत्तरायततया प्रतिपत्तव्यो विष्कम्भस्तु पूर्वापरायतया।

एवमुक्ते सति भगवान्गौतमस्वामी स्वशिष्याणां स्पष्टावबोधनार्थं भूयः पृच्छति—

मू० तत्थ णं के हेतू त्ति वदेज्जा ?

टी० '**तत्थे**'त्यादि। **तत्र** तस्यामेवंविधायां समनन्तरोदितायां वस्तुव्यवस्थायां **को हेतुः** का उपपत्तिः **(इति)** भगवान्**वदेत्**?

एवमुक्ते भगवानाह —

मू० ता अयण्णं जंबुद्दीवे२ जाव परिक्खेवेणं। ता जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं उद्धीमुहकलंबुयापुप्फसंठिता तावखेत्तसंठिती आहिता ति वदेज्जा अंतो संकुडा जाव सव्वबाहिरिता चेव बाहा। तीसे णं सव्वब्भंतरिया बाहा मंदरपव्वयंते णं णव जोयणसहस्साइं चत्तारि य छलसीए जोयणसते णव य दसभागे जोयणस्स परिक्खेवेणं।

टी० '**ता अयण्ण**'मित्यादि। इदं जम्बूद्वीपवाक्यं पूर्ववत् परिपूर्णं स्वयं पठनीयं व्याख्यानीयं च। '**ता जया ण**'मित्यादि। **तत्र यदा सूर्यः सर्वाभ्यन्तर-मण्डलमुपसङ्क्रम्य चारं चरति तदा** '**उद्धीमुहकलंबुयापुप्फे**'त्यादि प्राग्वत्

१. सव्वब्भंतरिया चेव बाहा सव्वबाहिरिया चेव बाहा - मूले। २. या लवणदिशि - E।

व्याख्येयं **यावत्सर्वाभ्यन्तरा** बाहा **सर्वबाह्या च बाहा**। **'तीसे ण'**मित्यादि। **तस्याः** तापक्षेत्रसंस्थितेः **सर्वाभ्यन्तरा बाहा**[१] **मेरुपर्वतान्ते** मेरुपर्वतसमीपे, सा च **परिक्षेपेण** मन्दरपरिक्षेपगततया **नव योजनसहस्राणि चत्वारि योजनशतानि षडशीतानि** षडशीत्यधिकानि **नव दशभागा(न् यावद्) योजनस्य** ९,४८६ ९/१० आख्याता मया इति वदेत्।

एवमुक्ते भगवान्गौतमः प्रश्नयति –

मू० ता से णं परिक्खेवविसेसे कत्तो आहिते ति वदेज्जा?

टी० 'ता से ण'मित्यादि। **'ता'** इति प्राग्वत् **स** तापक्षेत्रसंस्थितेः **परिक्षेपविशेषो** मन्दरपरिरयपरिक्षेपणविशेषः[२] **कुतः** कस्मात्कारणादेवम्प्रमाण **आख्यातो** नोनोऽधिको **वेति वदेत्**?

भगवानाह –

मू० ता जे णं मंदरस्स पव्वयस्स परिक्खेवे तं परिक्खे(वे)(वं) तिहिं गुणित्ता दसहिं भागे हीरमाणे २ एस णं परिक्खेवविसेसे आहिते ति वदेज्जा। तीसे णं सव्वबाहिरिता बाहा लवणसमुद्दंते णं चउणवतिं जोयणसहस्साइं अट्ठ य अट्ठसट्ठे जोयणसते चत्तारि य दसभागे जोयणस्स परिक्खेवेणं आहिए त्ति वदेज्जा। ता से णं परिक्खेवविसेसे कत्तो आहिते ? ता जे णं जंबुद्दीवस्स परिक्खेवे तं परिक्खेवं तिहिं गुणित्ता दसहिं भागे हीरमाणे २ एस णं परिक्खेवविसेसे आहितेति वदेज्जा।

टी० 'ता [जया](जे) ण'मित्यादि। **'ता'** इति पूर्ववत् **यो 'ण'**मिति वाक्यालङ्कारे **मन्दरस्य** मेरोः **पर्वतस्य परिक्षेपः** परिरयगणितप्रसिद्धस्तं **परिक्षेपं त्रिभिर्गुणयित्वा** तदनन्तरं च **दशभिश्छित्त्वा** विभज्य, अथ कस्मादेवं क्रियते इति

१. बाहा मेरुपर्वतसमीपे - F। २. .....परिक्षेपेण विशेषः..... H।

चेत् ? उच्यते, इह सर्वाभ्यन्तरे मण्डले वर्त्तमानः सूर्यो जम्बूद्वीपगतस्य चक्रवालस्य यत्र तत्र प्रदेशे तत्तच्चक्रवालक्षेत्रप्रमाणानुसारेण त्रीन् दशभागान् प्रकाशयति। एतच्च प्रागेवोक्तम्। [१]सम्प्रति च मन्दरसमीपे तापक्षेत्रचिन्ता क्रियमाणा वर्त्तते। ततो मन्दरपरिरयः सुखावबोधानार्थं प्रथमं त्रिभिर्गुण्यते गुणयित्वा च दशभिर्विभज्यते इति, दशभिश्च भागे ह्रियमाणे यथोक्तं मन्दरसमीपे तापक्षेत्रपरिमाणमागच्छति, तथाहि – मन्दरपर्वतस्य विष्कम्भो दशसहस्राणि १०,०००, [२]तेषां च वर्गो दशकोट्यः १०,००,००,०००, तासां दशभिर्गुणने जातं कोटीशतं १,००,००,००,०००, अस्य वर्गमूलाऽऽनयने लब्धान्येकत्रिंशत्सहस्राणि षट्शतानि किञ्चिन्न्यूनानि त्रयोविंशत्यधिकानि परं व्यवहारतः परिपूर्णत्रयोविंशत्यधिकानि विवक्ष्यन्ते ३१,६२३। ए[षा](ष) राशिस्त्रिभिर्गुण्यते, जातानि चतुर्नवतिसहस्राणि अष्टौ शतानि एकोनसप्तत्यधिकानि ९४,८६९। एतेषां दशभिर्भागहारे लब्धानि नवयोजनसहस्राणि चत्वारि शतानि षडशीत्यधिकानि नव च दशभागा योजनस्य। तत **एष** एतावान् अनन्तरोदितप्रमाणो परिक्षेपविशेषो मन्दरपरिरय[३]परिक्षेपणविशेषस्तापक्षेत्रसंस्थिते-**राख्यात इति वदेत्** स्वशिष्येभ्यः। अयं चार्थो अन्यत्राप्युक्तः **'मंदरपरिरयरासी, तिगुणे दसभाइयंमि। जं लद्धं तं होइ तावखेत्तं, अब्भिंतरमंडले रविणो ॥'**() तदेवं [४]सर्वाभ्यन्तरमण्डले वर्त्तमाने सूर्ये मन्दरसमीपे तापक्षेत्रसंस्थितेः सर्वाभ्यन्तरबाहाविष्कम्भपरिमाणमुक्तम्। इदानीं लवणसमुद्रदिशि जम्बूद्वीपपर्यन्ते [५]या च सर्वबाह्या बाहा तस्या विष्कम्भपरिमाणमाह – **'तीसे ण'**मित्यादि। **तस्या**स्तापक्षेत्रसंस्थितेर्लवणसमुद्रान्ते लवणसमुद्रसमीपे **सर्वबाह्या बाहा** सा **परिक्षेपेण** जम्बूद्वीपपरिरयपरिक्षेपेण **चतुर्नवतियोजनसहस्राणि अष्टौ च अष्टषष्ट्यधिकानि योजनशतानि चतुरश्च दशभागान् योजनस्य** ९४,८६८ ४/१० यावत् **आख्याता**

---

१. सम्प्रति मन्दर... - E। २. तेषां वर्गो - E। ३. ...परिक्षेपेण विशेष.... - H। ४. सर्वाभ्यन्तरे मण्डले - B, J, T। ५. या सर्वबाह्या - B।

इति वदेत्। अत्रैव स्पष्टावबोधनाय प्रश्नं करोति। '**[ती](ता) से ण**'मित्यादि। '**ता**' इति पूर्ववत् **स** एतावान्**परिक्षेपविशेषो** जम्बूद्वीपपरिरयपरिक्षेपणविशेषस्तापक्षेत्रसंस्थितेः **कुतः** कस्मात्कारणा**दाख्यातो** नोनोऽधिको वेति वदेत्? भगवानाह- '**ता जे ण**'मित्यादि। '**ता**' इति पूर्ववत् यो जम्बूद्वीपस्य **परिक्षेपः** परिरयगणितप्रसिद्धस्**तं परिक्षेपं त्रिभिर्गुणयित्वा** [१]तदनन्तरं च [२]दशाभिश्छित्त्वा दशभिर्विभज्य, अत्रार्थे च कारणं प्रागुक्तमेवानुसरणीयं, **दशभिर्भागे ह्रियमाणे** यथोक्तं जम्बूद्वीपपर्यन्ते तापक्षेत्रपरिमाणमागच्छति। तथाहि जम्बूद्वीपस्य परिक्षेपस्त्रीणि लक्षाणि षोडशसहस्राणि द्वे शते सप्तविंशत्यधिके ३,१६,२२७ त्रीणि गव्यूतानि ३ अष्टाविंशं च धनुःशतं १२८ त्रयोदश अङ्गुलानि १३ एकमर्द्धाङ्गुलं १। एतावता च योजनमेकं किल किञ्चिन्न्यूनमिति व्यवहारतः परिपूर्णं (वि)वक्ष्यते। ततो द्वे शते अष्टाविंशत्यधिके वेदितव्ये ३,१६,२२८। एतत् त्रिभिर्गुण्यते, जातानि नव लक्षाणि अष्टचत्वारिंशत्सहस्राणि षट् शतानि चतुरशीत्यधिकानि ९,४८,६८४। एतेषां दशभिर्भागो ह्रियते, लब्धं यथोक्तं जम्बूद्वीपपर्यन्ते सर्वबाह्यबाहाविष्कम्भपरिमाणम्। ततः '**एस ण**'मित्यादि। **एष** एतावान् अनन्तरोदितप्रमाणः **परिक्षेपविशेषो** जम्बूद्वीपपरिरय[३]परिक्षेपणविशेषस्तापक्षेत्रसंस्थितेरा**ख्यात इति वदेत्**, उक्तश्चैतदन्यत्रापि '**जंबुद्दीवपरिरये, तिगुणे दसभाइयंमि। जं लद्धं तं होइ तावखेत्तं, [४]अब्भंतरमंडले रविणो॥**' ( )

तदेवं जम्बूद्वीपे तापक्षेत्रसंस्थितेः सर्वाभ्यन्तरायाः सर्वबाह्यायाश्च बाहाया विष्कम्भपरिमाणमुक्तम्। सम्प्रति सामस्त्येनायामतस्तापक्षेत्रपरिमाणं जिज्ञासुस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता से णं तावखेत्ते केवतिआ आतामेणं आहितेति वदेज्जा?

---

१. तदनन्तरं दशभिः - M, N। २. दशभिश्छित्त्वा विभज्य - N। ३. ....परिक्षेपेण विशेष.... - H। ४. अब्भिंतर... G, M, N।

टी० 'ता से ण'मित्यादि। **'ता'** इति पूर्ववत् **तापक्षेत्रमायामतः** सामस्त्येन दक्षिणोत्तरायततया **कियत्प्रमाणमाख्यातमिति वदेत्**?

भगवानाह–

मू० ता अट्ठत्तरिं जोयणसहस्साइं तिण्णि य तेत्तीसे जोयणसते जोयणस्स तिभागं आयामेणं आहिते ति वदेज्जा।

टी० 'ता अट्ठ'[मि](इ)त्यादि। **'ता'** इति प्राग्वत् **[1]अष्टसप्ततियोजनसहस्राणि त्रीणि [2]योजनशतानि त्रयस्त्रिंशानि** त्रयस्त्रिंशदधिकानि **[3]योजनत्रिभागं च** यावदायामेन दक्षिणोत्तरायततया आख्यातमिति वदेत्। तथाहि – [4]सर्वाभ्यन्तरे मण्डले वर्त्तमानस्य सूर्यस्य तापक्षेत्रं दक्षिणोत्तरायततया मेरोरारभ्य तावद्वर्द्धते यावल्लवण-समुद्रस्य षष्ठो भागः, उक्तश्च **'मेरुस्स मज्झभागा, जाव य लवणस्स रुंद छब्भागा। तावायामो एसो, सगडुद्धीसंठिओ नियमा॥'** ( ) अत्र **'एसो'** इत्यादि। **एष तापो नियमात् शकटोद्धिसंस्थितः** शेषं सुगमम्। तत्र मेरोरा(र)भ्य जम्बूद्वीपपर्यन्तं यावत्पञ्चचत्वारिंशद्योजन[शतानि](सहस्राणि)। लवणविस्तारो द्वे योजनलक्षे तयोः षष्ठो भागस्त्रयस्त्रिंशत्योजनसहस्राणि त्रीणि योजनशतानि त्रयस्त्रिंशदधिकानि योजनस्य त्रिभागः। तत उभयमीलने यथोक्तमायामप्रमाणं भवति। इ[ति](ह) सर्वाभ्यन्तरे मण्डले वर्त्तमानस्य सूर्यस्य लेश्याभ्यन्तरं प्रविशन्ती मेरुणा प्रतिस्खल्यते। यदि पुनर्मेरुणा न स्खल्यते ततोऽसौ मेरोः सर्वमध्यभागगतं प्रदेशम-वधी[गता]कृत्यायामतो जम्बूद्वीपस्य पञ्चाशत् योजनसहस्राणि प्रकाशयेत्। अत एवेत्थं जम्बूद्वीपस्य पञ्चाशतं योजनसहस्राणि प्रकाश्यानि सम्भाव्य सर्वाभ्यन्तरे मण्डले वर्त्तमाने सूर्ये तापक्षेत्रस्यायामप्रमाणं **ज्योतिष्करण्डकमूलटीकायां श्रीपादलिप्त-सूरिभिः** त्र्यशीतियोजनसहस्राणि त्रीणि शतानि त्रयस्त्रिंशदधिकानि योजनस्य च त्रिभाग

---

१. अट्ठत्तरिं जोयणसहस्साइं - मूले। २. योजनशतानि त्रयस्त्रिंशदधिकानि H, I, K। ३. जोयणस्स तिभागं - मूले। ४. सर्वाभ्यन्तरमण्डले - G।

इत्युक्तम्। युक्तं चैतत्सम्भावनया तापक्षेत्रायामपरिमाणमन्यथा जम्बूद्वीपसमीपे तापक्षेत्रस्य पञ्चचत्वारिंशद्योजनसहस्रमात्रपरिमाणाभ्युपगमे यथा सूर्यो बहिर्निष्क्रामति तथा तत्प्रतिबद्धं तापक्षेत्रमपि, ततो यदा सूर्यः सर्वबाह्यमण्डलमुपसङ्क्रम्य चारं चरति तदा सर्वथा मन्दरसमीपे प्रका[शं](शो) न प्राप्नोति। अथ च तदापि तत्र मन्दरपरिरयपरिक्षेपणविशेषपरिमाणमग्रे[१] वक्ष्यते तस्मात्**पादलिप्तसूरि**[णा]व्याख्यानमभ्युपगन्तव्यमिति।

तदेवं सर्वाभ्यन्तरं मण्डलमधिकृत्य तापक्षेत्रसंस्थितिरुक्ता। सम्प्रति तदेव सर्वाभ्यन्तरं मण्डलमधिकृत्यान्धकारसंस्थितिं प्रतिपिपादयिषुस्तद्विषयं प्रश्नसूत्रमाह–

मू० तता णं किंसंठिता अंधकारसंठिती आहिता ति वदेज्जा?

टी० 'तया ण'मित्यादि। **तदा** सर्वाभ्यन्तरमण्डलचारकाले **'किंसंठिय'** त्ति किं संस्थितं संस्थानं यस्या यदि वा कस्येव सं[स्थानं](स्थितं) संस्थितिः यस्याः सा **किंसंस्थिता अन्धकारसंस्थितिराख्याता इति वदेत्**?

भगवानाह–

मू० ता उद्धीमुहकलंबुयापुप्फसंठिता अंधकारसंठिई आहिते ति वदेज्जा। अंतो संकुडा बाहिं वित्थडा तं चेव जाव तीसे णं दुवे बाहातो अणवट्ठितातो भवंति, तं० सव्वब्भंतरिता चेव बाहा सव्वबाहिरिया चेव बाहा। तीसे णं सव्वब्भंतरिता[२] बाहा मंदरपव्वयंते णं छ जोयणसहस्साइं तिण्णि य चउवीसे जोयणसते छच्च दसभागे जोयणस्स परिक्खेवेणं।

टी० 'ता' इत्यादि। **'ता'** इति पूर्ववत्, **ऊर्द्ध्वमुखीकृतकलम्बुकापुष्पसंस्थिता अन्धकारसंस्थितिराख्याता इति वदेत्**। सा च **अन्तर्मेरुदिशि** विष्कम्भमधिकृत्य[३] **सङ्कुचिता बहिर्लवणदिशि विस्तृता,** तथा **अन्तर्मेरुदिशि** च **वृत्ता**

१. ...परिक्षेपेण ...- H। २. सव्वब्भंतरिता चेव बाहा - H। ३. ...कृत्य 'संकुडा' सङ्कुचिता -C।

अर्द्धवलयाकारा सर्वतो वृत्तमेरुगतौ द्वौ दशभागौ व्या(पृ)य [म](त)स्या व्यवस्थितत्वात् **बहिर्लवणदिशि पृथुला** विस्तीर्णा। एतदेव संस्थानकथनेन स्पष्टयति- **'अंतो अंकमुहसंठिया बाहिं सत्थियमुहसंठिया'** अनयोः पदयोर्व्याख्यानं प्राग्वद्वेदितव्यम्। **'उभयो पासेण'**मित्यादि। **तस्या** अन्धकारसंस्थितेः तापक्षेत्र-संस्थितिद्वैविध्यवशात् द्विधा व्यवस्थिताया मेरुपर्वतस्योभयपार्श्वेन **उभयोः पार्श्वयोः** प्रत्येकमेकैकभावेन ये जम्बूद्वीपगते **बाहे** ते **आयामेन** आयामप्रमाणधिकृत्या**वस्थिते भवतस्तद्यथा पञ्चचत्वारिंशद्योजनसहस्राणि** ४५,०००। **द्वे** च **बाहे** विष्क-म्भमधिकृत्य एकैकस्या अन्धकारसंस्थिते[१]**र्भवतस्तद्यथा सर्वाभ्यन्तरा सर्वबाह्या च**। एतयोश्च व्याख्यानं प्रागिव द्रष्टव्यम्। तत्र सर्वाभ्यन्तराया (बाहाया) विष्कम्भ-मधिकृत्य प्रमाणमभिधित्सुराह– **'तीसे ण'**मित्यादि। **तस्या** अन्धकारसंस्थितेः **सर्वाभ्यन्तरबाहा**[२] **मन्दरपर्वतान्ते** मन्दरपर्वतसमीपे, सा च **षड्योजनसहस्राणि त्रीणि शतानि चतुर्विंशत्यधिकानि** ६,३२४ **षट् च दशभागान्** ६/१० **योजनस्य** यावत् **परिक्षेपेण** मन्दरपरिरयपरिक्षेपणेनाख्याता इति वदेत्।

[३]अमुमेवार्थं शिष्यस्य स्पष्टावबोधनाय पृच्छति –

मू० ता से णं परिक्खेवविसेसे कत्तो आहिते ति वदेज्जा?

टी० 'ता से ण'मित्यादि। **'ता'** इति पूर्ववत् तस्या अन्धकारसंस्थितेः **स** यथोक्तपरिमाणः **परिक्षेपविशेषो** मन्दरपरिरयपरिक्षेपणविशेषः **कुतः** कस्मात्कारणा-**दाख्यातो** नोनाधिको वे**ति** भगवान् वदेत्?

एवं प्रश्ने कृते भगवानाह –

मू० ता जे णं मंदरस्स पव्वयस्स परिक्खेवे तं परिक्खेवं दोहिं गुणेत्ता दसहिं छेत्ता दसहिं भागे हीरमाणे एस णं परिक्खेवविसेसे आहिते ति वदेज्जा। तीसे णं सव्वबाहिरिता बाहा लवणसमुद्दंते णं

---

१. सव्वब्भंतरिता चेव बाहा सव्वबाहिरिया चेव बाहा - मूले। २. सव्वब्भंतरिता बाहा - मूले। ३. अमुमेवार्थं स्पष्टावबोधनाय - A, D, अमुमेवार्थं शिष्यस्पष्टावबोधनाय - H, K।

तेवट्ठिं जोयणसहस्साइं दोण्णि य पणताले जोयणसते छच्च दसभागे जोयणस्स परिक्खेवेणं।

टी० '**ता** [**जया**](**जे**) **ण**'मित्यादि। '**ता**' इति प्राग्वत् **यो** '**ण**'मिति वाक्यालङ्कारे **मन्दरस्य**[१] **पर्वतस्य परिक्षेपः** प्रागुक्तप्रमाणस्तं **परिक्षेपं द्वाभ्यां गुणयित्वा,** कस्मात् द्वाभ्यां गुणनमिति चेत् ? उच्यते, इह सर्वाभ्यन्तरे मण्डले चारं चरतोः सूर्ययोः एकस्यापि सूर्यस्य जम्बूद्वीपगत[२]स्य चक्रवालस्य यत्र तत्र वा प्रदेशे तत्तच्चक्रवालक्षेत्राऽनुसारेण दशभागास्त्रयः प्रकाश्या भवन्ति अपरस्यापि सूर्यस्य त्रयः प्रकाश्या दशभागास्तत उभयमीलने षड् दशभागा भवन्ति। तेषां[३] त्रयाणां दशभागानामपान्तराले द्वौ द्वौ दशभागौ रजनी। ततो द्वाभ्यां गुणितम्। तौ च द्वौ दशभागाविति दशभिर्भागहरणं, दशभिश्च भागहरणे यथोक्तं मन्दरसमीपे अन्धकार-संस्थितिपरिमाणमागच्छति, तथाहि – मेरुपर्वतपरिरयपरिमाणमेकत्रिंशद्योजनसहस्राणि षट्शतानि त्रयोविंशत्यधिकानि ३१,६२३। एतत् द्वाभ्यां गुण्यते, जातानि त्रिषष्टिसहस्राणि द्वे शते षट्चत्वारिंशदधिकानि ६३,२४६। एतेषां दशभिर्भागे हृते लब्धानि षड्योजनसहस्राणि त्रीणि शतानि चतुर्विंशत्यधिकानि षड् दशभागा योजनस्य ६,३२४ ६/१०। तत **एष** एतावान् अनन्तरोदितप्रमाणो अन्धकारसंस्थितेः परिक्षे[पे](पविशेषो) मन्दरपरिरय**परिक्षेपणविशेष आख्यात इति वदेत्**। तदेवमुक्त-मन्धकारसंस्थितेः सर्वाभ्यन्तराया बाहाया विष्कम्भपरिमाणम्। अधुना सर्वबाह्याया बाहाया आह– '**तीसे ण**'मित्यादि। **तस्या** अन्धकारसंस्थितेः[४] **सर्वबाह्या बाहा** या **लवणसमुद्रान्ते** लवणसमुद्रसमीपे जम्बूद्वीप[समीपे](पर्यन्ते) सा च **परिक्षेपेण** जम्बूद्वीपपरिरयपरिक्षेपणेनाख्याता **त्रिषष्टियोजनसहस्राणि द्वे पञ्चचत्वारिंशद्-योजनशते षट् च दशभागान् योजनस्य** यावत् ६३,२४५ ६/१०।

---

१. मन्दरपर्वतस्य - C, D। २. जम्बूद्वीपस्य चक्रवालस्य - D, K। ३. तेषां च त्रयाणां - D। ४. सव्वबाहिरिता बाहा - मूले।

एतदेव स्पष्टं स्वशिष्यानवबोधयितुं भगवान् गौतमः पृच्छति–

मू० ता से णं परिक्खेववविसेसे कत्तो आहिते ति वएज्जा? ता जे णं जंबुद्दीवस्स दीवस्स परिक्खेवे तं परिक्खेवं दोहिं गुणित्ता दसहिं छेत्ता दसहिं भागे हीरमाणे, एस णं परिक्खेववविसेसे आहिते ति वदेज्जा। ता से णं अंधकारे केवतियं आयामेणं आहिते? ता अट्ठत्तरिं जोयणसहस्साइं [१]तिण्णि तेत्तीसे जोयणसए जोयणतिभागं च आयामेणं आहिते ति। तता णं उत्तमकट्ठ(पत्ते) उक्को(सए) अट्ठारसमुहुत्ते दिवसे भवति जहन्निआ दुवालस(मुहुत्ता) राई भवइ।

टी० '[ती](ता) से ण'मित्यादि। **'ता'** इति पूर्ववत्। तस्या अन्धकारसंस्थितेः **स** एतावान् **परिक्षेपविशेषो** जम्बूद्वीपपरिरयपरिक्षेपणविशेषः **कुतः** कस्मात्कारणात् **आख्यातो** नोनोऽधिको वे**ति वदेत्**। भगवान् वर्द्धमानस्वामी आह – **'ता जे ण'**मित्यादि। **'ता'** इति पूर्ववत् **यो 'ण'**मिति वाक्यालङ्कारे **जम्बूद्वीपस्य परिक्षेपः** प्रागुक्तप्रमाण**स्तं परिक्षेपं द्वाभ्यां गुणयित्वा दशभिः छित्त्वा** दशभिर्विभज्य, अत्र कारणं प्रागेवोक्तं, **दशभिर्भागे ह्रियमाणे** यथोक्तमन्धकारसंस्थितेर्जम्बूद्वीपपरिरयपरिक्षेपणमागच्छति। तथाहि जम्बूद्वीपस्य परिक्षेपपरिमाणं त्रीणि लक्षाणि षोडशसहस्राणि द्वे शते अष्टाविंशत्यधिके ३,१६,२२८। [२]तत् द्वाभ्यां गुण्यते, जातानि षड् लक्षाणि द्वात्रिंशत्सहस्राणि चत्वा[रिंशत्](रि) शतानि षट्पञ्चाशदधिकानि ६,३२,४५६। तेषां दशभिर्भागे हृते लब्धानि त्रिषष्टियोजनसहस्राणि द्वे शते पञ्चचत्वारिंशदधिके [३]षट् च दशभागा योजनस्य ६३,२४५ ६/१०। तत **एष** एतावाननन्तरोदितप्रमाणोऽन्धकारसंस्थितेः **परिक्षेपविशेषो** जम्बूद्वीपपरिरयपरिक्षेपणविशेष **आख्यात इति वदेत्**। तदेवमुक्तं सर्वबाह्याया अपि बाहाया विष्कम्भपरिमाणम्। सम्प्रति सामस्त्येनान्धकारसंस्थितेरायामप्रमाणमाह – **'ता से**

१. तिण्णि य तेत्तीसे - V। २. एतत् - T। ३. षट् दशभागा - H, I, K, T।

ण'मित्यादि। इदं चायामपरिमाणं तापक्षेत्रसंस्थितिगतायामपरिमाणवत् भावनीयं समानभावनिकत्वात्। अत्रैव सर्वाभ्यन्तरे मण्डले वर्त्तमानयोः सूर्ययोः दिवसरात्रि-मुहूर्त्तप्रमाणमाह – **'तया ण'**मित्यादि सुगमम्।

तदेवं सर्वाभ्यन्तरे मण्डले तापक्षेत्रसंस्थितिं (अन्धकारसंस्थितिं) चाभिधाय सम्प्रति सर्वबाह्यमण्डले तामभिधित्सुराह–

मू० ता जता णं सूरिए सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति तता णं किंसंठिता तावखेत्तसंठिती आहिताति वदेज्जा? ता उद्धीमुहकलंबुतापुप्फसंठिता तावखेत्तसंठिती अंतो संकुडा [१]बाहिं वित्थडा जाव सव्वब्भंतरिता चेव बाहा सव्वबाहिरिता चेव बाहा। तीसे णं सव्वब्भंतरिता बाहा मंदरपव्वतंते णं छ जोयणसहस्साइं तिण्णि य चउव्वीसे जोयणसते छच्च दसभागे जोयणस्स। एवं जं पमाणं अब्भंतरमंडले अंधकारसंठिईते तं इमाए वि तावखेत्तसंठितीए णेयव्वं। बाहिरमंडले आयामो सव्वत्थवि एक्को।

टी० **'ता जया ण'**मित्यादि। **'ता'** इति पूर्ववदेव **यदा सूर्यः सर्वबाह्यं मण्डलमुपसङ्क्रम्य चारं चरति तदा किंसंस्थि[ति](ता) तापक्षेत्रसंस्थिति-राख्याता इति** भगवान्वदेत्? भगवानाह – **'ता उद्धीमुहे'**त्यादि पूर्ववद्व्याख्येयम्। **'तीसे ण'**मित्यादि। **तस्याश्च** तापक्षेत्रसंस्थितेः [२]**सर्वाभ्यन्तरबाहा** मेरुसमीपे, सा च [३]परिक्षेपेण मन्दरपरिरयपरिक्षेपणेन [४]**षड्योजनसहस्राणि त्रीणि शतानि चतु-र्विंशत्यधिकानि षट् च दशभागान् योजनस्य** ६,३२४ ६/१० (यावद्) आख्याता मया इति वदेत् स्वशिष्येभ्यः। **'एव'**मित्यादि, **एवमुक्तेन** प्रकारेण **यत् अभ्यन्तरमण्डले** अभ्यन्तरमण्डलगते सूर्ये **अन्धकारसंस्थितेः प्रमाणमुक्तं तत्**

---

१. बाहिं च वित्थडा - H। २. सव्वब्भंतरिता बाहा - मूले। ३. परिक्षेपेण षड्योजनसहस्राणि - F । ४. ...परिक्षेपेण - । ।

बाह्यमण्डले बाह्यमण्डलगते सूर्ये (**अस्या अपि**) तापक्षेत्रसंस्थितेः परिमाणं भणितव्यम्। तच्चैवं – **'ता[व] से णं परिक्खेववविसेसे कत्तो आहियत्ति वएज्जा? ता जे णं मंदरस्स पव्वयस्स परिक्खेवे तं दोहिं गुणित्ता दसहिं छित्ता दसहिं भागे हीरमाणे एस णं परिक्खेववविसेसे आहिय त्ति वएज्जा। तीसे णं सव्वबाहिरिया बाहा लवणसमुद्दंतेणं तेवट्ठिं जोयणसहस्साइं दोन्नि य पणयाले जोयणसए छच्च [१]दसभागे जोयणस्स परिक्खेवेणं आहियत्ति वएज्जा। [ती](ता) से णं परिक्खेववविसेसे कत्तो आहियत्ति वएज्जा? ता जे णं जंबुद्दीवस्स २ (परिक्खेवे तं) परिक्खेवं दोहिं गुणित्ता दसहिं छित्ता दसहिं भागे हीरमाणे एस णं परिक्खेववविसेसे आहियत्ति वएज्जा। [ती](ता) से णं तावखेत्ते केवइयं आयामेणं आहियत्ति वएज्जा? (ता) ते[ती]सीइजोयण-सहस्साइं तिण्णि तेत्तीसे जोयणसए जोयणतिभागं चायामेणं आहियत्ति वएज्जा।'** इदं सकलमपि सुगमं, नवरं मन्दरपरिरयादेर्यत् द्वाभ्यां गुणनं तत्रेदं कारणं- इह सर्वबाह्ये मण्डले चारं चरतोः सूर्ययोः जम्बूद्वीपगतस्य चक्रवालस्य यत्र तत्र वा प्रदेशे (तत्) तच्चक्रवालक्षेत्रानुसारेण द्वौ द्वौ दशभागौ तापक्षेत्रम्। एतच्च प्रागेव भावितम्। ततो मन्दरपरिरयादिर्द्वाभ्यां गुण्यते, गुणयित्वा च दशभिर्भागहरणम्। तथा सर्वबाह्ये मण्डले सूर्यस्य चारं चरतो लवणसमुद्रस्य मध्ये पञ्च योजनसहस्राणि तापक्षेत्रं वर्द्धते। ततस्त्र्यशीतियोजनसहस्राणीत्याद्युक्तम्[२]। शेषाक्षरयोजना प्राग्वद्-भावनीया।

तदेवं सर्वबाह्ये मण्डले वर्त्तमाने सूर्ये तापक्षेत्रसंस्थितिपरिमाणमभिधाय सम्प्रति तत्रैवान्धकारसंस्थितिपरिमाणमाह–

मू० तता णं किंसंठिता अंधकारसंठिती आहिते ति वदेज्जा? ता उद्धिमुहकलंबुयापुप्फसंठिता अंधकारसंठिई आहिय त्ति वदेज्जा।

१. दसभागा - G, E। २. बाहिरमंडले आयामो सव्वत्थवि एक्को - मूले।

अंतो संकुडा बाहिं वित्थडा तं चेव जाव सव्वब्भंतरिता बाहा सव्वबाहिरिता चेव बाहा। तीसे णं सव्वब्भंतरिता बाहा मंदरपव्वयंते णं णव जोयणसहस्साइं [1]चत्तारि य छलसीते जोयणसते नव दसभागे। एवं जं पमाणं [2]अब्भंतरमंडलठिइए सूरिए तावखेत्तसंठि(इ)ए तं चेव णेयव्वं जाव आयामो। तता णं उत्तम(कट्ठपत्ता) उक्कोसा अट्ठा(रसमुहुत्ता) राती भवति जहण्णिए दुवालसमुहुत्ते दिवसे भवति।

टी० **'तया णं किं संठिया'** इत्यादि। **तदा** सर्वबाह्यमण्डलचारकाले **'ण'**मिति वाक्यालङ्कारे **किंसंस्थिता अन्धकारसंस्थितिराख्याता इति वदेत्**? भगवानाह – **'ता उ[द्ध](द्धि)मुहे'**त्यादि, सुगमम्। **'तीसे ण'**मित्यादि। **तस्या** अन्धकारसंस्थितेः **[3]सर्वाभ्यन्तरबाहा मन्दरपर्वतान्ते** मन्दरपर्वतसमीपे, सा च परिक्षे[प](पेण) मन्दरपरिरयपरिक्षेपेण **नव योजनसहस्राणि चत्वारि योजनशतानि षडशीत्यधिकानि नव च दशभागान्** (यावद्) योजनस्याख्याता इति वदेत् ९,४८६ ९/१०। **'एव'**मित्यादि। **एवं** पूर्वोक्तेन प्रकारेण **यदभ्यन्तरमण्डलसंस्थिते सूर्ये तापक्षेत्रसंस्थितेः प्रमाणमुक्तं तदेव** सर्वबाह्ये मण्डलेऽन्धकारसंस्थितेः परिमाणमभिधातव्यम्। तच्च तावत् यावदायामप्रमाणम्, तच्चैवं– **'[ती](ता) से णं परिक्खे-[वेणं](व)विसेसे[ण] (कत्तो) आहियत्ति वएज्जा? ता जे णं मंदरपव्वयस्स (परिक्खेवे तं) परिक्खेवं तिहिं गुणित्ता दसहिं छित्ता दसहिं भागे हीरमाणे एस णं परिक्खेवविसेसे आहियत्ति वएज्जा। तीसे णं सव्वबाहिरिया बाहा लवणसमुद्दंते णं चउणवइं जोयणसहस्साइं अट्ठ य अट्ठ(स)ट्ठे जोयणसए चत्तारि य दसभागे जोयणस्स परिक्खेवेणं आहियत्ति वएज्जा? ता एस णं परिक्खेवविसेसे कत्तो आहियत्ति वएज्जा। ता जे णं जंबुद्दीवस्स परिक्खेवे (तं परिक्खेवं) तिहिं गुणित्ता दसहिं छित्ता दसहिं भागे हीरमाणे एस णं**

१. चत्तारि छलसीते - H। २. अब्भिंतर - P। ३. सव्वब्भंतरिता बाहा - मूले।

परिक्खेववविसेसे आहियत्ति वएज्जा। [ती](ता) से णं अंधकारे केवइए आयामेणं आहियत्ति वएज्जा? ता ते[त]सीइजोयणसहस्साइं तिण्णि य तेत्तीसए जोणसए जोयणतिभागं च आहियत्ति वएज्जा।' इह यन्मन्दर-परिरयादेस्त्रिभिर्गुणनं तत्रेदं कारणम्– इह सर्वबाह्ये मण्डले चारं चरतोः सूर्ययोः जम्बूद्वीपगतस्य चक्रवालस्य यत्र तत्र वा प्रदेशे तत्तच्चक्रवालक्षेत्राऽनुसारेण त्रयो दशभागा रजनी, ततः त्रिभिर्गुणनं दशभिर्भागहरणं च। शेषाक्षरयोजना तु प्राग्वत् कर्त्तव्या। तदेवं सर्वबाह्येऽपि मण्डले तापक्षेत्रसंस्थितिपरिमाणं (अन्धकारसंस्थिति-परिमाणं) चोक्तम्। अधुना सर्वबाह्ये मण्डले वर्त्तमानयोः सूर्ययोः रात्रिदिवस-मुहूर्त्तपरिमाणमाह –'[1]**ता जया ण**'मित्यादि। **तदा** सर्वबाह्यमण्डलचारकाले **उत्तम-काष्ठाप्राप्ता उत्कृष्टा अष्टादशमुहुर्त्ता रात्रिर्भवति जघन्यश्च द्वादशमुहूर्त्तो दिवसः**।

तदेवमुक्तं तापक्षेत्रसंस्थितिपरिमाणमन्धकारसंस्थितिपरिमाणञ्च। सम्प्रत्यूर्द्ध्वमधः पूर्वविभागे अपरविभागे च यावत्प्रकाशयतः सू[र्यात्](र्यौ) तन्निरूपणार्थं सूत्रमाह–

मू० ता जंबुद्दीवे णं दीवे सूरिता केवतितं खेत्तं उड्ढं तवयंति, केवतितं खेत्तं अहे तवयंति, केवतियं खेत्तं तिरियं तवयंति।

टी० '**ता जंबुद्दीवे ण**'मित्यादि। '**ता**' इति पूर्ववत् **जम्बूद्वीपे कियत्** किम्प्रमाणं **क्षेत्रं सूर्यावूर्ध्वं तापयतः** प्रकाशयतः **कियत् क्षेत्रमधः कियत् क्षेत्रं तिर्यग्** पूर्वभागे अपरभागे चेत्यर्थः।

भगवानाह–

मू० ता एगं जोयणसतं उड्ढं तवयंति अट्ठारसजोयणसताइं अहे तवयंति सीतालीसं जोयणसहस्साइं दोण्णि[2] य तेवट्ठे जोयणसते एक्कवीसं च सट्ठिभागे जोयणस्स तिरियं त[व](वयं)ति।

चउत्थं [पाहुड]पाहुडं ४।

---

१. तता णं - मूले। २. दोण्णि तेवट्ठे - R।

टी० '**ता**' इत्यादि। '**ता**' इति पूर्ववत् जम्बूद्वीपे द्वीपे सूर्यौ प्रत्येकं स्वविमानादूर्द्ध्वं **एकं योजनशतं तापयतः** प्रकाशयतः, **अधस्तापयतोऽष्टादश-योजनशतानि**, एतच्चाधोलौकिकग्रामापेक्षया द्रष्टव्यम्,ते ह्यधोलौकिकग्रामाः समतलं भूभागमवधीकृत्याधो योजनसहस्रेण व्यवस्थिताः, तत्रापि च सूर्यप्रकाशः प्रसरति, ततः समतलभूभागस्याधोयोजनसहस्रं तदूर्द्ध्वं चाष्टौ योजनशतानीत्युभयमीलने अष्टादशयोजनशतानि, **तिर्यग्**[१] स्वविमानतः पूर्वभागे अपरभागे च प्रत्येकं **तापयतः सप्तचत्वारिंशद्योजनसहस्राणि द्वे योजनशते त्रिषष्ट्यधिके**[२] **एकविंशतिं च षष्टिभागान्योजनस्य** ४७,२६३ २१/६०।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां चतुर्थं प्राभृतं समाप्तम्।

* * * * *

न शूलं न चापं न चक्रादि हस्ते,
न हास्यं न लास्यं न गीतादि यस्य।
न नेत्रे न गात्रे न वक्त्रे विकारः,
स एकः परात्मा गतिर्मे जिनेन्द्रः।।

न पक्षी न सिंहो वृषो नापि चापं,
न रोषप्रसादादिजन्मा विकारः।
न निन्द्यैश्चरित्रैर्जने यस्य कम्पः,
स एकः परात्मा गतिर्मे जिनेन्द्रः।।

---

१. स्वविमानात् - A, N, T। २. एकविंशतिं षष्टिभागा... - A।

पञ्चमं प्राभृतम्

तदेवमुक्तं चतुर्थं प्राभृतम्। सम्प्रति पञ्चममारभ्यते। तस्य चायमर्थाधिकारः कस्मिन् लेश्या प्रतिहता ? इति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता कस्सि णं सूरितस्स लेसा पडिहता आहिता(ति वदेज्जा) ?

टी० 'ता कस्सि ण'मित्यादि। **'ता'** इति पूर्ववत् अभ्यन्तरं [१]**सूर्यस्य लेश्या** प्रसरन्ती **कस्मिन्स्थाने प्रतिहता आख्याता इति वदेत्** ? अयमत्र भावार्थः- इहावश्यमभ्यन्तरं प्रविशन्ती सूर्यस्य लेश्या कस्मिन्(चित्)स्थाने प्रतिहतेत्यभ्युपगन्तव्यम्, यतः सर्वाभ्यन्तरे सर्वबाह्ये च मण्डले जम्बूद्वीपगतं तापक्षेत्रमायामतः पञ्चचत्वारिंशद्योजनसहस्रप्रमाणमेवाख्यातं, तच्च सर्वाभ्यन्तरमण्डलगते सूर्ये लेश्याप्रतिहतिमन्तरेण नोपपद्यते। अन्यथा निष्क्रामति सूर्ये तत्प्रतिबद्धस्य तापक्षेत्रस्यापि निष्क्रमणभावात् सर्वबाह्यमण्डले चारं चरति सूर्ये हीनमायामतो भवेत्, न च हीनमुक्तमतोऽवसीयते क्वापि लेश्या प्रतिघातमुपयातीति, ततस्तदवगमाय प्रश्नयति।

एवं प्रश्ने कृते सति भगवानेतद्विषये यावत्यः प्रतिपत्तयस्तावतीरुपदर्शयति–

मू० तत्थ खलु इमातो वीसं पडिवत्तीतो पण्णत्तातो- तत्थेगे एवमाहंसु ता मंदरंसि णं पव्वयंसि सूरितस्स लेसा पडिहता आहिता ति वदेज्जा। एगे एवं (आहंसु)। एगे पुण (एवमाहंसु) ता मेरुंसि णं पव्वतंसि सूरियस्स लेसा जाव वदेज्जा। एवं एएणं अभिलावेणं। ता मणोरमंसि णं पव्वतं०। (ता) सुदंसणंसि णं पव्व०। ता सयंपहंसि णं पव्वत०। ता गिरिरायंसि णं पव्वत०। ता रयणुच्चतंसि णं पव्व०। ता सिलुच्चतंसि णं पव्व०। ता लोगमज्झंसि णं पव्व०। (ता लोगनाभिंसि णं पव्व०। ता) [२]अच्छंसि णं पव्व०। ता

---

१. सूर्यलेश्या - H। २. अत्थंसि - O, P, Q, R।

सूरितावत्तंसि णं०। ता सूरियावरणंसि णं पव्व०। ता उत्तमंसि णं पव्व०। ता दिसादिंसि णं पव्व०। ता अवतंसंसि णं पव्व०। ता धरणिखीलंसि णं पव्व०। ता धरणिसिंगंसि णं पव्वतंसि०। ता पव्वतिंदंसि णं पव्वतं०। एगे एवमाहंसु। एगे पुण एवमाहंसु ता पव्वतरातंसि णं पव्वतंसि सूरितस्स लेसा पडिहता आहिता त्ति वदेज्जा। एगे एवमाहंसु।

टी० '**तत्थे**'त्यादि। **तत्र** सूर्यलेश्याप्रतिहतिविषये **खल्विमा विंशतिः प्रतिपत्तयः प्रज्ञप्तास्तद्यथा- तत्र** तेषां विंशतेः परतीर्थिकानां मध्ये **एके एवमाहुः - मन्दरे पर्वते सूर्यस्य लेश्या प्रतिहता आख्याता इति वदेदिति** तेषां मूलभूतः स्वशिष्यं प्रत्युपदेशः। अत्रैवोपसंहारः '**एगे एवमाहंसु १।**' **एके पुनरेवमाहुः - मेरौ पर्वते सूर्यलेश्या[१] प्रतिहता आख्याता इति वदेत्। एके एवमाहुः २। एवमुक्तेन** प्रकारेण **एतेन** वक्ष्यमाणेन प्रतिपत्तिविशेषभूतेनाऽऽलापकेन शेषप्रतिपत्तिजातं नेतव्यम्। तानेव विशेषप्रतिपत्तिभूतान् आलापकान्प्रदर्शयति- '**ता मणोरमंसि णं पव्वयंसी**'त्यादि। प्रत्यालापकश्च पूर्वोक्तानि पदानि योजनीयानि। तत एवं सूत्रपाठः- '**एगे पुण एवमाहंसु ता मणोरमंसि णं पव्वयंसि सूरियलेसा पडिहया आहिय[२] त्ति वएज्जा। एगे एवमाहंसु ३। एगे पुण एवमाहंसु ता सुदंसणंसि णं पव्वयंसि सूरियलेसा पडिहया आहिय[३] त्ति वएज्जा। एगे एवमाहंसु ४। एगे पुण एवमाहंसु ता सयंपहंसि णं पव्वयंसि सूरियलेसा पडिहया [४]आहिय त्ति वएज्जा। एगे एवमाहंसु ५। एगे पुण एवमाहंसु ता गिरिरायंसि णं पव्वयंसि सूरियलेसा [५]पडिहया [६]आहिय त्ति वएज्जा। एगे एवमाहंसु ६। एगे पुण एवमाहंसु ता रयणुच्चयंसि णं पव्वयंसि सूरियलेसा**

---

१. सूरियस्स लेसा - मूले। २. आहयत्ति - B, J,। ३. आहयत्ति - B, J। ४. आहयत्ति - J। ५. पडिहय त्ति वएज्जा - B। ६. आहय त्ति - C।

पडिहया [१]आहिय त्ति वएज्जा। एगे एवमाहंसु ७। एगे पुण एवमाहंसु ता सिलुच्चयंसि णं पव्वयंसि सूरियलेसा पडिहया [२]आहिय त्ति वएज्जा। एगे एवमाहंसु ८। एगे पुण एवमाहंसु ता लोगमज्झंसि णं पव्वयंसि सूरियलेसा पडिहया [३]आहिय त्ति वएज्जा। एगे एवमाहंसु ९। एगे पुण एवमाहंसु ता लोगनाभिंसि णं पव्वयंसि [४]सूरियलेसा पडिहया [५]आहिय त्ति वएज्जा। एगे एवमाहंसु १०। एगे पुण एवमाहंसु ता [६]अच्छंसि णं पव्वयंसि सूरियस्स [७]लेसा [८]पडिहया [९]आहिय त्ति वएज्जा। एगे एवमाहंसु ११। एगे पुण एवमाहंसु (ता) सूरियावत्तंसि णं पव्वयंसि सूरियस्स लेसा पडिहया [१०]आहिय त्ति वएज्जा। एगे एवमाहंसु १२। एगे पुण एवमाहंसु ता सूरियावरणंसि णं पव्वयंसि सूरियस्स लेसा पडिहया [११]आहिय त्ति वएज्जा। एगे एवमाहंसु १३। एगे पुण एवमाहंसु ता उत्तमंसि णं पव्वयंसि सूरियस्स लेसा पडिहया [१२]आहिय त्ति वएज्जा। एगे एवमाहंसु १४। एगे पुण एवमाहंसु ता दिसादिंसि णं पव्व[यस्स](यंसि) सूरियस्स लेसा पडिहया आहियत्ति वएज्जा। एगे एवमाहंसु १५। एगे पुण (एवमाहंसु) ता अवतंसंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वएज्जा। एगे एवमाहंसु १६। एगे पुण एवमाहंसु ता धरणिखीलंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वएज्जा। एगे एवमाहंसु १७। एगे पुण एवमाहंसु ता धरणिसिंगंसि णं पव्वयंसि [१३]सूरियलेसा पडिहया [१४]आहिय त्ति वएज्जा। एगे एवमाहंसु १८। एगे पुण एवमाहंसु ता पव्वतिंदंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहिय

---

१. आहय त्ति- B, C, J। २. आहय त्ति - B, C,। ३. आहय त्ति - B, C, J। ४. सूरियस्स लेस्सा - H। ५. आहय त्ति - B, C, J। ६. अत्थंसि - I, K, T। ७. लेस्सा - H। ८. पडिहयत्ति वएज्जा - K। ९. आहय त्ति - B, C। १०. आहय त्ति - B, C, K। ११. आहय त्ति - B, C, J, L। १२. आहयत्ति - B, C, J, L। १३. सूरियस्स लेस्सा - H। १४. आहय त्ति - B, C, D, K, L, J।

त्ति वएज्जा। एगे एवमाहंसु १९। एगे पुण एवमाहंसु ता पव्वयरायंसि णं पव्वयंसि सूरियस्स लेसा पडिहया [1]आहिय त्ति वएज्जा। एगे एवमाहंसु २०।'

तदेवं परतीर्थिकप्रतिपत्तीरुपदर्श्य सम्प्रति स्वमतमुपदर्शयति –

मू० वयं पुण एवं वदामो - ता जंसि णं पव्वयंसि सूरियस्स लेसा पडिहया से मंदरे वि पवुच्चइ मेरु वि पवुच्चइ जाव पव्वतरातावि वुच्चति। ता जे णं पोग्गला सूरियस्स लेसं फुसंति ते णं पोग्गला सूरितस्स लेसं पडिहणंति, अदिट्ठावि णं पोग्गला सूरियस्स लेसं पडिहणंति, चरमं लेसंतरगतावि णं पोग्गला सूरियस्स लेसं पडिहणंति आहिता ति वदेज्जा।

पंचमं पाहुडं समत्तं ५।

टी० '**वयं पुण**' इत्यादि। **वयं पुनरुत्पन्नकेवलज्योतिष एवं वदामो** यदुत '**ता**' इति पूर्ववत्। **यस्मिन्पर्वते** अभ्यन्तरं प्रविशन्ती [2]**सूर्यलेश्या प्रतिघातमुपगच्छति [3]स मन्दरोऽप्युच्यते [4]यावत्पर्वतराजोऽप्युच्यते,** सर्वेषामपि एतेषां शब्दानामेकार्थिकत्वात्, तथाहि मन्दरो नाम देवस्तत्र पल्योपमस्थितिको महर्द्धिकः परिवसति, तेन तद्योगान्मन्दर इत्युच्यते। सकलतिर्यग्लोकमध्यभागस्य मर्यादाकारित्वान्मेरुः। मनांसि देवानामपि [5]अतिसुरूपतया रमयतीति मनोरमः। शोभनं जाम्बूनदमयतया रत्नबहुलतया च मनोनिवृत्तिकरं दर्शनं यस्यासौ सुदर्शनः। स्वयमादित्यादिनिरपेक्षा रत्नबहुलतया प्रभा प्रकाशो यस्य स स्वयम्प्रभः। तथा सर्वेषामपि गिरीणामुच्चैस्त्वेन तीर्थकरजन्माभिषेकाश्रयतया च राजा गिरिराजः। तथा रत्नानां नानाविधानामुत्प्राबल्येन चय उपचयो यत्र स रत्नोच्चयः। शिलानां पाण्डुकम्बलशिलाप्रभृतीनामुत् - ऊर्द्धवं शिरस उपरि चयः सम्भवो यत्र स

१. आहय त्ति - C, D। २. सूरियस्स लेसा पडिहया - मूले। ३. से मंदरे वि पवुच्चइ मेरु वि पवुच्चइ जाव पव्वतरातावि वुच्चति। - मूले। ४. इति यावत्पर्वत... - C, D, L। ५. सुरूपतया - C, K।

शिलोच्चयः। तथा लोकस्य-तिर्यग्लोकस्य समस्तस्यापि मध्ये वर्त्तते इति लोकमध्यः। तथा लोकस्य-तिर्यग्लोकस्य स्थालप्रख्यस्य नाभिरिव स्थालमध्यगतः समुन्नतवृत्तचन्द्रक इव लोकनाभिः। तथा अच्छः स्वच्छः सुनिर्मलः जाम्बूनद-रत्नबहुलत्वात्। तथा सूर्या उपलक्षणमेतत् चन्द्रग्रहनक्षत्रतारकाश्च प्रदक्षिणमावर्त्तन्ते यस्य स सूर्यावर्त्तः। तथा सूर्यैरुपलक्षणमेतत् चन्द्रग्रहनक्षत्रतारकाभिश्च समन्ततः परिभ्रमणशीलैराव्रीयते आवेष्ट्यते इति सूर्यावरणः **'कृद्बहुलम्' (मलयगिरि-शब्दानुशासने कृदन्ते १/१२)** इति वचनात् कर्मण्यनट्प्रत्ययः। तथा गिरिषूत्तमत्वादुत्तमः। दिशामादिः प्रभवो दिगादिः, तथाहि रुचकात् दिशां विदिशां च प्रभवो रुचकश्चाष्टप्रदेशात्मको मेरुमध्यवर्त्ती, ततो मेरुरपि दिगादिरित्युच्यते। तथा गिरीणामवतंसक इवावतंसकः। अमीषां च षोडशानां नाम्नां सङ्ग्राहिके इमे **जम्बूद्वीपप्रज्ञप्ति**प्रसिद्धे द्वे गाथे – **'मंदर मेरु मणोरम सुंदसण सयंपभे य गिरिराया। रयणुच्चय सिलोच्चय मज्झे लोगस्स नाभी य॥६६॥ अच्छे य सूरियावत्ते सूरियावरणे इय। उत्तमे य दिसाई य वडंसे इय सोलसे॥६७॥ (सूत्र १०९)'** तथा धरण्याः पृथिव्याः कीलक इव धरणीकीलकः। तथा धरण्याः शृङ्गमिव धरणिशृङ्गः, पर्वतानामिन्द्रः पर्वतेन्द्रः। पर्वतानां रा[जः](जा) पर्वतराजः। तदेवं सर्वेऽपि मन्दरादयः शब्दाः परमार्थतः एकार्थिकास्ततो भिन्नाभि-प्रायतया प्रवृत्ताः [१]प्राक्तनाः प्रतिपत्तयः सर्वा अपि मिथ्यारूपा अवगन्तव्याः। यापि च लेश्याप्रतिहतिः सा मन्दरेऽप्यस्ति अन्यत्रापि च, [२]तथा चाह- **'ता जे णं'**मित्यादि। **'ता'** इति पूर्ववत् **ये 'ण'**मिति वाक्यालङ्कारे **पुद्गला** मेरुतटभि-त्तिसंस्थिताः **सूर्यस्य लेश्यां स्पृशन्ति ते पुद्गला सूर्यस्य लेश्यां प्रतिघ्नन्ति** अभ्यन्तरं प्रसरन्त्याः सूर्यलेश्यायास्तैः प्रतिस्खलितत्वात्। येऽपि पुद्गला मेरुतटभित्तिसंस्थिता अपि दृश्यमानपुद्गलान्तर्गताः सूक्ष्मत्वान्न [३]चक्षुःस्पर्शमायान्ति तेप्यदृष्टा **अपि 'ण'**मिति वाक्यालङ्कारे **सूर्यस्य लेश्यां प्रतिघ्नन्ति,** तैरभ्यन्तरं

१. प्राक्तन्यः - A, E, M। २. तथाह - M। ३. चक्षुःस्पर्शमुपयान्ति - A, E, L, M।

प्रविशन्त्याः सूर्यलेश्यायाः स्वशक्त्यनुरूपं प्रतिस्खल्यमानत्वात्। येऽपि मेरोरन्यत्रापि **चरमलेश्यान्तर्गता**श्चरमलेश्याविशेषसंस्पर्शिनः **पुद्गलास्ते-ऽपि सूर्यस्य लेश्यां प्रतिघ्नन्ति** तैरपि चरमलेश्यासंस्पर्शतया चरमलेश्यायाः प्रतिहन्यमानत्वात्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां पञ्चमं प्राभृतं समाप्तम्।

* * * * *

बालत्तणं खिड्डपरो गमेइ, तारुण्णए भोगसुहे रमेई।
थेरत्तणे कायबलं वमेई, मूढो मुहा कालमइक्कमेइ॥

दुल्लहा उ मुहादाई, मुहाजीवी वि दुल्लहा।
मुहादाई मुहाजीवी, दो वि गच्छंति सुगइं॥

तम्हा सव्वाणुन्ना, सव्वनिसेहो य पवयणे नत्थि।
आयं वयं तुलेज्ञा, लाहाकंखिव्व वाणियओ॥

वेयावच्चं निच्चं, करेह संजमगुणे धरंताणं।
सव्वं किर पडिवाई, वेयावच्चं अपडिवाई॥

एको भावः सर्वथा येन दृष्टः,
सर्वे भावाः सर्वथा तेन दृष्टाः।
सर्वे भावाः सर्वथा येन दृष्टा,
एको भावः सर्वथा तेन दृष्टः॥

षष्ठं प्राभृतम्

तदेवमुक्तं पञ्चमं प्राभृतम्। सम्प्रति षष्ठमारभ्यते। तस्य चायमर्थाधिकारः - कथमोजसः संस्थितिराख्याता इति वदेत्? ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते तोतसंठिती आहिता ति वदेज्जा?

टी० **'ता कहं ते [उ](ओ)यसंठिई'** इत्यादि। **'ता'** इति पूर्ववत् **कथं** केन प्रकारेण किं सर्वकालमेकरूपावस्थायितया उतान्यथा (**'ते' त्वया**) ओजसः प्रकाशस्य संस्थितिरवस्थान**माख्याता इति वदेत्**?

एवमुक्ते भगवानेतद्विषये यावत्यः प्रतिपत्तयः सम्भवन्ति तावतीः कथयति –

मू० तत्थ खलु इमातो पणवीसं पडिवत्तीओ पण्णत्तातो- तत्थ एगे एवमाहंसु - ता अणुसमयमेव सूरियस्स ओआ अण्णा उप्पज्जति अण्णा अवेइ आहिता ति वदेज्जा। (एगे०)। एगे पुण (एवमाहंसु) ता अणुमुहुत्तमेव सूरियस्स ओया अण्णा उप्पज्जति अण्णा अवेइ आहिता। (एगे०)। एवं एएणं अभिलावेणं- ता अणुराइंदितमेव सूरि०ओया०। ता अणुपक्खमेव सूरि०ओया०। ता अणुमासमेव सूरि०ओया०। ता अणुउडुमेव सूरि०ओया०। ता अणुअयणमेव सूरि०ओया०। ता अणुसंवच्छरमेव सूरि०ओया०। ता अणुजुगमेव सूरि०ओया०। ता अणुवाससयमेव सूरि०ओया०। ता अणुवास-सहस्समेव सूरि०ओया०। (ता) अणुवाससयसहस्समेव सूरि० ओया०। (ता) अणुपुव्वमेव सूरिओया०। ता अणुपुव्वसतमेव सूरि० ओया०। (ता) अणुपुव्वसहस्समेव सूरि०ओया०। ता अणुपुव्वसत-सहस्समेव सूरि०ओया०। ता अणुपलिओवममेव सूरि०ओया०। ता अणुपलिओवमसतमेव सूरि०ओया०। ता अणुपलिओवमसहस्समेव

सूरि०ओया०। (ता) अणुपलिओवमसतसहस्समेव सूरि०ओया०। (ता) अणुसागरोवममेव सूरि०ओया०। (ता) अणुसागरसतमेव सूरि० ओया०। (ता) अणुसागरोवमसहस्समेव सूरि०ओया०। अणुसागरो-वमसतसहस्समेव सूरि०ओया०। एगे एव(माहंसु)। एगे पुण (एवमाहंसु)। ता अणु-उस्सप्पिणी-ओसप्पिणिमेव सूरितस्स ओया अण्णा उप्पज्जति अण्णावेति आहितेति वदेज्जा। एगे एवमाहंसु।

टी० '**तत्थे**'त्यादि। **तत्र** ओजःसंस्थितौ विषये **खल्विमाः पञ्चविंशतिः प्रतिपत्तयः प्रज्ञप्तास्तद्यथा-** **तत्र** तेषां पञ्चविंशतिपरतीर्थिकानां मध्ये **एके** वादिन **एवमाहुः** '**ता**' इति पूर्ववत् **अनुसमयमेव** प्रतिक्षणमेव **सूर्यस्यौजोऽन्यदुत्पद्यते अन्यदपैति**। किमुक्तं भवति ? प्रतिक्षणं सूर्यस्यौजः प्राक्तनं भिन्नप्रमाणं विनश्यति अन्यदेव प्राक्तनाद्भिन्नप्रमाणमोज उत्पद्यते सूत्रे च ओजःशब्दस्य स्त्रीत्वे[1] निर्देशः प्राकृतत्वादार्षत्वाद्वा। अत्रोपसंहारः '**एगे एवमाहंसु १।**' **एके पुनरेवमाहुः** '**ता**' इति पूर्ववत् **अनुमुहूर्त्तमेव सूर्यस्य ओजोऽन्यदुत्पद्यते अन्यत्** प्राक्तनम**पैति इत्याख्यातमपि वदेत्।** अत्रोपसंहारः '**एगे एवमाहंसु २**'। '**एव**'मित्यादि। **एव**मुक्तेन प्रकारेण **एतेन** वक्ष्यमाणेन प्रतिपत्तिविशेषभूतेनाऽऽलापकेन शेषप्रति-पत्तिजातं नेतव्यम्। तानेवाभिलापविशेषान्दर्शयति – '**ता अणुराइंदियमेवे**'त्यादि सुगमम्, नवरं (रात्रिन्दिवं रात्रिन्दिवमनु अनु)रात्रिदिवसमित्येवं सर्वत्र विग्रहभावना करणीया। पाठः पुनरेवं सूत्रस्य वेदितव्यः - '**एगे एवमाहंसु अणुराइंदियमेव सूरियस्स ओया अण्णा उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु ३। एगे पुण एवमाहंसु ता अणुपक्खमेव सूरियस्स ओया अण्णा उप्पज्जइ अन्ना अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु ४। एगे पुण एवमाहंसु ता अणुमासमेव सूरियस्स ओया अण्णा उप्पज्जइ अन्ना अवेइ**

१. स्त्रीत्वेन - ।।

आहियत्ति वएज्जा। एगे एवमाहंसु ५। एगे पुण एवमाहंसु ता अणुउ[ज्ज](डु)मेव सूरियस्स ओजा अण्णा उप्पज्जइ अन्ना अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु ६। एगे पुण एवमाहंसु ता अणुअयणमेव सूरियस्स ओया अण्णा उप्पज्जइ अन्ना अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु ७। एगे पुण एवमाहंसु ता अणुसंवच्छरमेव सूरियस्स [1]ओया अन्ना उप्पज्जइ अन्ना अवेइ आहिय त्ति वएज्जा। एगे एवमाहंसु ८। एगे पुण एवमाहंसु ता अणुजुगमेव सूरियस्स अण्णा ओजा उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु ९। एगे पुण एवमाहंसु ता अणुवाससयमेव सूरियस्स अण्णा ओया उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु १०। एगे पुण एवमाहंसु ता अणुवाससहस्समेव सूरियस्स अण्णा ओया उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु ११। एगे पुण एवमाहंसु ता अणुवाससयसहस्समेव सूरियस्स अण्णा ओया उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु १२। एगे पुण एवमाहंसु ता अणुपुव्वमेव सूरियस्स अण्णा ओया उप्पज्जइ अण्णा अवेइ आहिय त्ति वएज्जा। एगे एवमाहंसु १३। एगे पुण एवमाहंसु ता अणुपुव्वसयमेव सूरियस्स अण्णा ओया उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु १४। एगे पुण एवमाहंसु ता अणुपुव्वसहस्समेव सूरियस्स ओया अण्णा उप्पज्जइ अण्णा अवेइ आहिय त्ति वएज्जा। एगे एवमाहंसु १५। एगे पुण एवमाहंसु ता अणुपुव्वसयसहस्समेव सूरियस्स ओया अण्णा उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु १६। एगे पुण एवमाहंसु ता अणुपलिओवममेव सूरियस्स [2]अण्णा ओया उप्पज्जइ अन्ना अवेइ आहिय त्ति वएज्जा। एगे एवमाहंसु १७। एगे पुण एवमाहंसु ता अणुपलि-

१. अन्ना ओजा - H, T। २. ओया अण्णा - F।

ओवमसयमेव सूरियस्स ओया अण्णा उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु १८। एगे पुण एवमाहंसु ता अणुपलिओवमसहस्समेव सूरियस्स अण्णा ओया उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु १९। एगे पुण एवमाहंसु ता अणुपलिओवमसयसहस्समेव सूरियस्स ओया अण्णा उप्पज्जइ अण्णा अवेइ आहिय त्ति वएज्जा। एगे एवमाहंसु २०। एगे पुण एवमाहंसु ता अणुसागरोवममेव सूरियस्स ओया अन्ना उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु २१। एगे पुण एवमाहंसु ता अणुसागरोवमसयमेव सूरियस्स अण्णा ओया उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु २२। एगे पुण एवमाहंसु ता अणुसागरो-वमसहस्समेव सूरियस्स ओया अण्णा उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु २३। एगे पुण एवमाहंसु ता अणुसागरोवमसय-सहस्समेव सूरियस्स ओआ अण्णा उप्पज्जइ अण्णा अवेइ आहियत्ति वएज्जा। एगे एवमाहंसु २४। एगे पुण एवमाहंसु ता [1]अणु-उस्सप्पिणी-ओसप्पिणिमेव सूरियस्स ओया अण्णा उप्पज्जइ अण्णा अवेइ आहिय त्ति वएज्जा। एगे एवमाहंसु २५।'

एताश्च प्रतिपत्तयः सर्वा अपि मिथ्यारूपाः। अत एतासामपोहेन भगवान् स्वमतमुपदर्शयति –

मू० वयं पुण एवं वदामो - ता तीसं तीसं मुहुत्ते सूरियस्स ओया अवट्ठिया भवइ। तेण परं अणवट्ठिया भवति। छम्मासे सूरिता ओयं णि[वु](व्वे)ड्ढेति छम्मासं सूरिए ओयं अभिवड्ढेइ। णिक्खममाणे सूरिए ओयं णिव्वेड्ढेति पविसमाणे सूरिए ओयं अभिवड्ढेइ।

टी० 'वयं पुण' इत्यादि। **वयं पुनरेवं** वक्ष्यमाणप्रकारेण **वदामस्तमेव**

१. अणुओसप्पिणिमेव - T।

प्रकारमाह – **'ता तीस'**मित्यादि। **'ता'** इति पूर्ववत् जम्बूद्वीपे प्रतिवर्षं परिपूर्णतया **त्रिंशतं त्रिंशतं मुहूर्त्तान्** यावत् **सूर्यस्य ओजः** प्रकाशोऽ**वस्थितं भवति**। किमुक्तं भवति ? सूर्यसंवत्सरपर्यन्ते यदा सूर्यः सर्वाभ्यन्तरे मण्डले चारं चरति तदा सूर्यस्य जम्बूद्वीपगतमोजः परिपूर्णप्रमाणं त्रिंशतं मुहूर्त्तान् यावद् भवति। **'तेण परं'** ति। **ततः परं** सर्वाभ्यन्तरान्मण्डलात्परमित्यर्थः सूर्यस्य ओजोऽ**नवस्थितं भवति**। कस्मादनवस्थितं भवतीति वदत ? आह – **'छम्मासे'** इत्यादि। यस्मात्कारणात्सर्वाभ्यन्तरान्मण्डलात्परतः प्रथमान् सूर्यसंवत्सरसत्कान् **षण्मासान्** यावत्**सूर्यो** जम्बूद्वीपगत**मोजः** प्रकाशं प्रत्यहोरात्रमेकैकस्य त्रिंशदधिकाष्टादशशतसङ्ख्यभागसत्कस्य भागस्य हापनेन **निर्वेष्टयति** हापयति, तदनन्तरं द्वितीयान्**षण्मासा**न्सूर्यसंवत्सरसत्कान्यावत्**सूर्यः** प्रत्यहोरात्रमेकैकत्रिंशदधिकाष्टादशशतसङ्ख्यभागसत्कभागवर्द्धनेन **ओजः** प्रकाश**मभिवर्द्धयति**। एतदेव व्यक्तं व्याचष्टे– **'निक्खममाणे'** इत्यादि सुगमम्। तेनोच्यते सर्वाभ्यन्तरे मण्डले परिपूर्णतया त्रिंशतं मुहूर्त्तान्यावत् अवस्थितं सूर्यस्य ओजः ततः परमनवस्थितमिति।

एतदेव वैतत्येन विभावयिषुः प्रश्नसूत्रमुपन्यस्यति–

मू० तत्थ णं के हेतू ति वदेज्जा ?

टी० **'तत्थे'**त्यादि। **तत्र** एवंविधायां वस्तुव्यवस्थायां **को हेतुः** का उपपत्ति**रिति वदेत्** ?

भगवानाह–

मू० ता अयण्णं जंबुद्दीवे २ जाव परिक्खेवेणं। ता जता णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं उत्तमकट्ठ(पत्ते उक्कोसे) अट्ठारसमुहुत्ते दिवसे भवति, जहण्णिया दुवालसमुहुत्ता राती भवति। से णिक्खममाणे सूरिए णवं संवच्छरं अयमाणे पढमंसि अहोरत्तंसि अब्भंतराणंतरं मंडलं जाव चारं चरति। ता जया

णं सूरिए अब्भिंतराणंतरं मंडलं उवसंकमित्ता चारं चरति तता णं एगं भागं ओताए एगेणं राइंदिएणं दिवसखेत्तस्स णिव्वेड्ढित्ता राइखेत्तस्स अभिवड्ढित्ता चारं चरति अट्ठारसहिं तीसेहिं सतेहिं मंडलं छेत्ता। तता णं अट्ठारसमुहुत्ते दिवसे भवति दोहिं एगट्ठिभाग(मुहुत्तेहिं) ऊणे दुवालसमुहुत्ता राती भवति दोहिं (एगट्ठिभागमुहुत्तेहिं) अहिया। से णिक्खममाणे सूरिए दोच्चंसि अहोरत्तंसि अब्भंतरं तच्चं मंडलं जाव चारं चरति। ता जदा णं सूरिए अब्भंतरं तच्चं जाव चारं चरति तता णं दो भागा ओयाए दोहिं राइंदिएहिं दिवसखेत्तस्स निव्वेड्ढित्ता राइखित्तस्स अभिवड्ढित्ता चारं चरति अट्ठारसहिं तीसेहिं सतेहिं मंडलं छेत्ता। तता णं अट्ठारस(मुहुत्ते) दिवसे चउहिं (एगट्ठिभागमुहुत्तेहिं) ऊणे दुवालस(मुहुत्ता) राती चउहिं (एगट्ठि-भागमुहुत्तेहिं) अहिता। एवं खलु एएण उवाएणं णिक्खममाणे सूरिए ततणंतरातो तयणंतरं मंडलाओ मंडलं संकममाणे २ एगमेगं भागं ओयाए एगमेगे मंडले एगमेगेणं रातिंदिएणं दिवसखेत्तस्स णिव्वेड्ढेमाणे राइखेत्तस्स अभिवड्ढेमाणे सव्वबाहिरं मंडलं उव-संकमित्ता चारं चरति। ता जता णं सूरिए सव्वब्भंतरातो मंडलातो सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरति तता णं सव्वब्भंतरं मंडलं पणिहाए एगेण तेसीतेणं रातिंदियसतेणं एगं तेसीतं भागसतं ओयाए दिवसखेत्तस्स निव्वेड्ढेत्ता रातिखित्तस्स अभिवड्ढेत्ता चारं चरति अट्ठारसहिं तीसेहिं सतेहिं मंडलं छेत्ता। तता णं उत्तम(कट्ठपत्ता) उक्कोसा अट्ठा(रसमुहुत्ता) राती भवति [१]जहण्णए दुवालस(मुहुत्ते) दिवसे भवति। एस णं पढमे छम्मासे। एस णं जाव पज्जवसाणे।

१. जहण्णिए - U।

से पविसमाणे सूरिए दोच्चं छम्मासं अयमाणे पढमंसि अहोरत्तंसि बाहिराणंतरं मंडलं[१] उवसंकमित्ता चारं चरति। ता जता णं सूरिए बाहिराणंतरं मंडलं जाव चारं चरति तया णं एगं भागं ओयाए एगेणं रातिंदियेणं रातिखेत्तस्स णिव्वेट्ठेत्ता दिवसखेत्तस्स अभिवड्ढेत्ता चारं चरति अट्ठारसहिं तीसेहिं सएहिं मंडलं छेत्ता। तता णं अट्ठारस(मुहुत्ता) राती दोहिं (एगट्ठिभागमुहुत्तेहिं) ऊणा दुवालस(मुहुत्ते) दिवसे दोहिं (एगट्ठिभागमुहुत्तेहिं) अहिए। से पविसमाणे सूरिए दोच्चंसि अहोरत्तंसि बाहिरं तच्चं मंडलं उवसंकमित्ता चारं चरति। ता जता णं सूरिए बाहिरं तच्चं मंडलं[२] उवसं० जाव चारं चरति [३]तता णं दो भाए ओताए दोहिं रातिंदिएहिं रातिखेत्तस्स णिव्वेट्ठित्ता दिवसखेत्तस्स अभिवड्ढेत्ता चारं चरति अट्ठारसहिं तीसेहिं सएहिं मंडलं छेत्ता। तता णं अट्ठारस(मुहुत्ता) राती चउ(हिं एगट्ठिभागमुहुत्तेहिं) ऊणा दुवालस(मुहुत्ते) दिवसे चउ(हिं एगट्ठिभागमुहुत्तेहिं) अहिते। एवं खलु एएणं उवाएणं पविसमाणे सूरिए ततणंतराउ तयणंतरं मंडलातो मंडलं संकममाणे २ एगमेगं भागं ओयाए एगमेगेणं रातिंदिएणं रातिखेत्तस्स णिव्वेट्ठेमाणे २ दिवसखेत्तस्स अभिवड्ढेमाणे(२) सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति। ता जता णं सूरिए सव्वबाहिरातो मंडलातो सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं सव्वबाहिरं मंडलं पणिहाय एगमेगेणं तेसीतेणं रातिंदियसतेणं एगं तेसीतं भागसतं ओताए रातिखेत्तस्स णिव्वेट्ठेत्ता दिवसखेत्तस्स अभिवड्ढित्ता चारं चरति अट्ठारसहिं तीसेहिं सएहिं मंडलं छेत्ता। तता णं उत्तम(कट्ठपत्ते) उक्कोसे दिवसे भवति

१. मंडलं जाव चारं - H। २. मंडलं जाव चारं - U। ३. तदा दो - U।

जहण्णिया दुवालसमुहुत्ता राती भवति। एस णं दोच्चे छम्मासे। एस णं जाव पज्जवसाणे। एस णं आइच्चे संवच्छरे। एस णं आइच्चसंव० जाव पज्जवसाणे।

छट्ठं पाहुडं समत्तं ६।

टी० 'ता अयण्ण'मित्यादि। इदं जम्बूद्वीपवाक्यं पूर्ववत्परिपूर्णं पठनीयं व्याख्यानीयं च। **'ता जया ण'**मित्यादि। **तत्र यदा सूर्यः सर्वाभ्यन्तरमण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्त उत्कर्षकोऽष्टादशमुहूर्त्तो दिवसो भवति, जघन्या च द्वादशमुहूर्त्ता रात्रिः**। ततः सर्वाभ्यन्तरान्मण्डलादुक्तप्रकारेण **निष्क्रामन्सूर्यो नवं[1] संवत्सरमाददानो** नवस्य संवत्सरस्य **प्रथमेऽहोरात्रेऽभ्यन्तरानन्तरं** द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरति। 'ता जया ण'**मित्यादि। **तत्र यदा** सर्वाभ्यन्तरानन्तरं द्वितीयं **मण्डलमुपसङ्क्रम्य चारं चरति तदा एकेन रात्रिन्दिवेन** सर्व्वाभ्यन्तरमण्डलगतेन प्रथमक्षणादूर्द्ध्वं शनैः शनैः कलामात्रहापनेनाहोरात्रपर्यन्ते **एकं (भाग)मोजसः** प्रकाशस्य **दिवसक्षेत्रगतस्य निर्वेष्ट्य** हापयित्वा तमेव चैकं भागं **रजनिक्षेत्रस्याभिवर्द्धयित्वा चारं चरति**। कियत्प्रमाणं पुनर्भागं दिवसक्षेत्रगतस्य प्रकाशस्य हापयित्वा रजनिक्षेत्रस्य वर्द्धयित्वा ? तत आह — **मण्डलमष्टादशभिस्त्रिंशदधिकैः शतैः छित्त्वा**। किमुक्तं भवति ? द्वितीयं मण्डलमष्टादशभिस्त्रिंशदधिकैर्भागशतैर्विभज्य तत्सत्कमेकं भागमिति। कस्मात्पुनर्मण्डलस्याष्टादशशतानि त्रिंशदधिकानि भागानां परिकल्प्यन्ते ? उच्यते, इह एकैकं मण्डलं द्वाभ्यां सूर्याभ्यामेकेनाहोरात्रेण परिभ्रम्यापूर्यते, अहोरात्रश्च त्रिंशन्मुहूर्त्तप्रमाणः प्रतिसूर्यं चाहोरात्रगणने परमार्थतो द्वौ अहोरात्रौ भवतः द्वयोश्चाहोरात्रयोर्षष्टिर्मुहूर्त्तास्ततो मण्डलं प्रथमतः षष्ट्या भागैर्विभज्यते, निष्क्रामन्तौ च सूर्यौ प्रत्यहोरात्रं प्रत्येकं द्वौ द्वौ मुहूर्त्तैकषष्टिभागौ हापयतः प्रविशन्तौ

१. नवसंवत्सर... D।

चाभिवर्द्धय[न्तौ](तः)। (यौ) द्वौ मुहूर्त्तैकषटिभागौ तौ समुदितौ एकः सार्द्धत्रिंशत्तमो भागस्ततः षष्टिरपि भागाः सार्द्धया त्रिंशता गुण्यन्ते, जातान्यष्टादशशतानि त्रिंशदधिकानि भागानाम्। एवं निष्क्रामन् सूर्यः प्रतिमण्डलं त्रिंशदधिकाष्टादशशतसङ्ख्यानां भागानां सत्कमेकैकं भागं दिवसक्षेत्रगतस्य प्रकाशस्य हापयन् रजनिक्षेत्रस्याऽभिवर्द्धयन् तावद्वक्तव्यो यावत्सर्वबाह्ये मण्डले त्र्यशीत्यधिकं भागशतं दिवसक्षेत्रगतस्य प्रकाशस्य हाप[य](यि)ता रजनिक्षेत्रस्य चाभिवर्द्ध[य](यि)ता भवति। [१]त्र्यशीत्यधिकं च भागशतमष्टादशशतानां त्रिंशदधिकानां दशमो भागस्ततः सर्वाभ्यन्तरान्मण्डलात् सर्वबाह्ये मण्डले (दिवसक्षेत्रस्य) जम्बूद्वीपचक्रवालदशभागस्त्रुट्यति रजनिक्षेत्रस्याभिवर्द्धते इति यत् प्रागभिहितं तदपि समीचीनं जातमिति। एवमभ्यन्तरं प्रविशन् प्रतिमण्डलमष्टादशशतभागानां त्रिंशदधिकानां सत्कमेकैकं भागमभिवर्द्धयन् तावद्वक्तव्यो यावत्सर्वाभ्यन्तरे मण्डले त्र्यशीत्यधिकं भागशतं दिवसक्षेत्रगतस्य प्रकाशस्याभिवर्द्धयति रजनिक्षेत्रस्य च हापयति, [२]त्र्यशीत्यधिकं च भागशतं जम्बूद्वीपचक्रवालस्य [३]दशमो भागस्तत सर्वबाह्यान्मण्डलात् सर्वाभ्यन्तरे मण्डले दिवसक्षेत्रगतस्य प्रकाशस्यैको दशमश्चक्रवालभागोऽभिवर्द्धते [४]रजनिक्षेत्रस्य तु त्रुट्यतीति यत् प्रागवदि तदविरोधि इति। सूत्रं तु **'तया णं अट्ठारसमुहुत्ते दिवसे'** इत्यादिकं सकलमपि प्राभृतपरिसमाप्तिं यावत्सुगमं, नवरमेवमत्रोपसंहारो – यत एवं सूर्यचारस्ततः प्रतिसूर्यं सूर्यसंवत्सरपर्यन्ते सर्वाभ्यन्तरे मण्डले [५]त्रिंशतं मुहूर्त्तान्यावदवस्थितं परिपूर्णमोजस्ततः परमनवस्थितम्। सर्वाभ्यन्तरेऽपि च मण्डले त्रिंशतं मुहूर्त्तान्यावत्परिपूर्णमवस्थितमोज उच्यते व्यवहारतः, निश्चयतः पुनस्तत्रापि प्रथमक्षणादूर्द्ध्वं शनैः शनैः हीयमानमवसेयम्, प्रथमक्षणादूर्द्ध्वं सूर्यस्य सर्वाभ्यन्तरानन्तरद्वितीयमण्डलाभिमुखं चारचरणादिति।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां षष्ठं प्राभृतं [६]समाप्तम्।

* * * * *

१. त्र्यशीत्यधिकं भाग... T। २. त्र्यशीत्यधिकं भागशतं - T। ३. दशमभाग.. - B। ४. रजनिक्षेत्रस्य त्रुट्यतीति- A, B, C, K, T। ५. त्रिंशतं त्रिंशतं - B, G, K। ६. परिसमाप्तम् - B।

सप्तमं प्राभृतम्

तदेवमुक्तं षष्ठं प्राभृतम्। सम्प्रति सप्तममारभ्यते। तस्य चायमर्थाधिकारः - कस्ते तव मते भगवन् ! सूर्यं वरयति ? इति। तत एतद्विषयं प्रश्नसूत्रमाह –

मू० ता के ते सूरितं वरयति आहिते ति वदेज्जा?

टी० '**ता के**' इत्यादि। '**ता**' इति पूर्ववत् **कस्ते** तव मते भगवन् ! **सूर्यं वरयति** वरयन् '**वर ईप्सायां**' (**पाणिनीयधातुपाठः, चुरादि ३२०**) आप्तुमिच्छन्स्वप्रकाशकत्वेन स्वीकुर्वन् **आख्यात इति वदेत्**?

एवमुक्ते भगवानेतद्विषये यावत्यः परतीर्थिकानां प्रतिपत्तयस्तावतीः कथयति –

मू० तत्थ खलु इमातो वीसं पडिवत्तीओ पण्णत्तातो। तत्थेगे एवमाहंसु - ता मंदरे णं पव्वते सूरितं वरयति आहिते ति वदेज्जा। एगे एव(माहंसु)। एगे पुण (एवमाहंसु) ता मेरू णं पव्वते सूरितं वरयति आहिते त्ति। एवं एतेणं अभिलावेणं जाव वीसतिमा पडिवत्ती जाव ता पव्वयराया णं पव्वते सूरियं वरयति आहिते त्ति। एगे एवमाहंसु।

टी० '**तत्थे**'त्यादि। **तत्र** सूर्यं प्रति [च](व)रणविषये **खल्विमा विंशतिः प्रतिपत्तयः प्रज्ञप्तास्तद्यथा तत्र** तेषां विंशतेः परतीर्थिकानां मध्ये **एके** प्रथमा **एवमाहुः** [१]**मन्दरपर्वतः सूर्यं [च](व)रयति,** मन्दरपर्वतो हि सूर्येण मण्डलपरिभ्रम्या सर्वतः प्रकाश्यते, ततः सूर्यं (स्व)प्रकाश[यन्](कत्वेन) [च](व)रयतीत्युच्यते। अत्रोपसंहारः '**एगे एवमाहंसु १।**', **एके पुनरेवमाहुः मेरु**[२]**पर्वतः सूर्यं** [३]**वरयन् आख्यात इति** वदेत्। अत्राप्युपसंहारः '**एगे एवमाहंसु २।**' '**एव**'मित्यादि। **एवमुक्तेन** प्रकारेण लेश्याप्रतिहतिविषयप्रतिपत्तिवत्तावन्नेतव्यं **यावद्विंशतितमा**

---

१. मंदरे णं पव्वते - मूले। २. मेरू णं पव्वते - मूले। ३. वरयति - मूले।

प्रतिपत्तिः। सा चैवं '**पव्वयराये ण**'मित्यादि पूर्ववत्। **पर्वतराजः सूर्यं [च](वं)[1]रयन् आख्यात इति** वदेत्। **एके एवमाहुरिति**। किमुक्तं भवति ? यथा प्राक्लेश्याप्रतिहतिविषये विंशतिप्रतिपत्तयो येन क्रमेणोक्तास्तेन क्रमेणाऽत्राऽपि वक्तव्याः। सूत्रपाठोऽपि प्रथमप्रतिपत्तिगतपाठानुसारेण स्वयमन्यूनातिरिक्तः परिभावनीयो ग्रन्थगौरवभयात्तु न लिख्यते।

तदेवमुक्ताः परतीर्थिकप्रतिपत्तयः। सम्प्रति भगवान्स्वमतमुपदर्शयति–

मू० वयं पुण एवं वदामो- ता मंदरे वि पवुच्चति मेरू वि पवुच्चति एवं जाव पव्वतराया वि पवुच्चति। ता जे णं पोग्गला सूरियस्स लेसं फुसंति ते णं पोग्गला सूरियं वरयंति। अदिट्ठावि णं पोग्गला सूरियं वरयंति। चरिमलेसंतरगतावि य णं पोग्गला सूरियं वरयंति आहिता ति वदेज्जा।

सत्तमं पाहुडं समत्तं।

टी० '**वयं पुण**' इत्यादि। **वयं पुनरेवं** वक्ष्यमाणप्रकारेण **वदामस्तमेव** प्रकारमाह – '**ता मंदरे वी**'त्यादि। '**ता**' इति पूर्ववत् योऽसौ पर्वतः सूर्यं वरयन् आख्यातः स **मन्दरोऽप्युच्यते यावत्पर्वतराजोऽप्युच्यते**। एतच्च प्रागेव भावितम्। ततो भिन्नभिन्नविषय(तया) प्रवृत्ताः प्राक्तन्यः प्रतिपत्तयः सर्वा अपि मिथ्यारूपा अवगन्तव्याः। अपि च न केवलं मेरुरेव सूर्यं वरयति किन्त्वन्येऽपि पुद्गलास्तथा चाह – '**ता जे ण**'मित्यादि। '**ता**' इति पूर्ववत् **ये** '**ण**'मिति वाक्यालङ्कारे **पुद्गला** मेरुगता अमेरुगता वा **सूर्यस्य लेश्यां स्पृशन्ति ते पुद्गलाः** स्वप्रकाशकत्वेन **सूर्यं वरयन्ति**। इप्सितं [ते] हि सूर्येण प्रकाश्यते। ततो लेश्यापुद्गलैः सह सम्बन्धात्परम्परया ते सूर्यं स्वीकुर्वन्तीत्युच्यते। ये च प्रकाश्यमानपुद्गलस्कन्धान्तर्गता मेरुगता (अमेरुगता) वा सूर्येण प्रकाशिता अपि सूक्ष्मत्वान्न

---

१. वरयति - मूले।

चक्षुःस्पर्शमुपगच्छन्ति तेऽपि प्रागुक्तयुक्त्या **सूर्यं वरयन्ति**। [१]येऽपि **चरम-लेश्यान्तर्गताः** चरमलेश्याविशेषसंस्पर्शिनः **पुद्गलास्तेऽपि सूर्यं वरयन्ति**। तेषामपि सूर्येण प्रकाश्यमानत्वात्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां सप्तमं प्राभृतं [२]समाप्तम्।

* * * * *

आया चेव अहिंसा, आया हिंसत्ति निच्छओ एस।
जो होइ अप्पमत्तो अहिंसओ, हिंसओ इयरो॥

अणुमित्तो वि न कस्सइ, बन्धो परवत्थुपच्चया भणिओ।
तहवि हु जयन्ति जइणो, परिणामविसोहिमिच्छंता॥

ध्यानाम्भसा तु जीवस्य, सदा यच्छुद्धिकारणं।
मलं कर्म समाश्रित्य, भावस्नानं तदुच्यते॥

यन्मयोपार्जितं पुण्यं, जिनशासनसेवया।
जिनशासनसेवैव, तेन मेऽस्तु भवे भवे॥

सुप्रभातं सुदिवसं, कल्याणं मेऽद्य मङ्गलम्।
यद् वीतराग ! दृष्टोऽसि, त्वं त्रैलोक्यदिवाकरः॥

---

१. येऽपि च चरम... - T। २. परिसमाप्तम् - E।

अष्टमं प्राभृतम्

तदेवमुक्तं सप्तमं प्राभृतम्। साम्प्रतमष्टममारभ्यते। तस्य चायमर्थाधिकारः - कथं [१]भगवन् त्वया उदयसंस्थितिराख्याता इति वदेत्? तत इत्थम्भूतमेव प्रश्नसूत्रमाह –

मू० ता कहं ते उदयसंठिती आहिता ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत् **कथं** केन प्रकारेण सूर्यस्य **उदयसंस्थितिः 'ते' त्वया** भगवन्! **आख्याता इति वदेत्?**

एवमुक्ते भगवानेतद्विषये यावत्यः परतीर्थिकानां प्रतिपत्तयस्तावतीरुपदर्शयति –

मू० तत्थ खलु इमातो तिण्णि पडिवत्तीओ पण्णत्ताओ। तत्थेगे एवमाहंसु- ता जता णं जंबुद्दीवे २ दाहिणड्ढे अट्ठारसमुहुत्ते दिवसे (भवति) तया णं उत्तरड्ढेवि अट्ठारसमुहुत्ते दिवसे भवति। ता जता णं उत्तरड्ढे अट्ठारसमुहुत्ते दिवसे भवति तता णं दाहिणड्ढे वि अट्ठारसमुहुत्ते दिवसे (भवति)। ता जता णं दाहिणड्ढे सत्तरसमुहुत्ते दिवसे भवति तता णं उत्तरड्ढेवि सत्तरसमुहुत्ते दिवसे भवति। ता जया णं उत्तरड्ढे सत्तरसमुहुत्ते दिवसे भवति तया णं दाहिणड्ढेवि सत्तरसमुहुत्ते दिवसे भवति। एवं एएणं अभिलावेणं सोलसमुहुत्ते पण्णरसमुहुत्ते चोद्दसमुहुत्ते तेरस०। ता जता णं दाहिणड्ढे बारसमुहुत्ते दिवसे भवति तया णं उत्तरड्ढेवि बारसमुहुत्ते दिवसे भवति। ता जया णं उत्तरड्ढे बारसमुहुत्ते दिवसे भवति तता णं दाहिणड्ढेवि बारसमुहुत्ते दिवसे भवइ। तया णं जंबुद्दीवे २ [२]मंदरस्स पव्वतस्स [३]पुरच्छिमेणं पच्चच्छिमेणं सता पण्णरसमुहुत्ते दिवसे भवति सता पण्णरसमुहुत्ता

---

१. त्वया भगवन् - E, N। २. मंदरपव्वतस्स - Q, R। ३. पुरच्छिमपच्चच्छिमेणं - U।

राती भवति। अवट्ठिता णं तत्थ रातिंदिया पण्णत्ता समणाउसो। एगे एव०। एगे पुण० ता जता णं जंबुद्दीवे २ दाहिणड्ढे अट्ठारसमुहुत्ताणंतरे दिवसे भवति तता णं उत्तरड्ढे वि अट्ठारसमुहुत्ताणंतरे दिवसे भवति। जता णं उत्तरड्ढे अट्ठारसमुहुत्ताणंतरे दिवसे भवति तया णं दाहिणड्ढेवि अट्ठारसमुहुत्ताणंतरे दिवसे भवति। एवं परिहाएयव्वं सत्तरसमुहुत्ताणंतरे० सोलसमुहुत्ताणंतरे० पण्णरसमुहुत्ताणंतरे० चोद्दसमुहुत्ताणंतरे० तेरसमुहुत्ताणंतरे०। ता जता णं दाहिणड्ढे बारसमुहुत्ताणंतरे दिवसे भवति तता णं उत्तरड्ढेवि बारसमुहुत्ताणंतरे दिवसे भवइ। जता णं उत्तरड्ढे बारसमुहुत्ताणंतरे दिवसे भवति तता णं दाहिणड्ढेवि बारसमुहुत्ताणंतरे दिवसे भवति। तता णं जंबुद्दीवे २ मंदरस्स पव्वतस्स पुरच्छिमपच्चच्छिमेणं[1] णो सया पण्णरसमुहुत्ते दिवसे भवति णो सता पण्णरसमुहुत्ता राती भवति। अणवट्ठिता णं तत्थ रातिंदिया पण्णत्ता समणाउसो। एगे एवं०। एगे पुण० ता जता णं जंबुद्दीवे २ दाहिणड्ढे अट्ठारसमुहुत्ते दिवसे भवति तता णं उत्तरड्ढे दुवालसमुहुत्ता राती भवति। जता णं उत्तरड्ढे अट्ठारसमुहुत्ते दिवसे भवति तता णं दाहिणड्ढे दुवालसमुहुत्ता राती भवति। ता जता णं दाहिणड्ढे अट्ठारसमुहुत्ताणंतरे दिवसे भवति तता णं उत्तरड्ढे दुवालसमुहुत्ता राती भवति। जता णं उत्तरड्ढे अट्ठारसमुहुत्ताणंतरे दिवसे भवति तता णं दाहिणड्ढे दुवालसमुहुत्ता राती भवति। एवं सत्तरसमुहुत्ते दिवसे सत्तरसमुहुत्ताणंतरे सोलसमुहुत्ते सोलसमुहुत्ताणंतरे पण्णरसमुहुत्ते पण्णरसमुहुत्ताणंतरे चोद्दसमुहुत्ते चोद्दसमुहुत्ताणंतरे तेरसमुहुत्ते तेरसमुहुत्ताणंतरे बारसमुहुत्ते। ता जता णं दाहिणड्ढे

१. पुरत्थिमपच्चत्थिमेणं - R।

बारसमुहुत्ताणंतरे दिवसे भवति तता णं उत्तरड्ढे बारसमुहुत्ता राती भवति। जता णं उत्तरड्ढे बारसमुहुत्ताणंतरे दिवसे भवति तया णं दाहिणड्ढे बारसमुहुत्ता राई भवति। तता णं जंबुद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्चच्छिमेणं णेवत्थि पण्णरसमुहुत्ते दिवसे णेवत्थि पण्णरसमुहुत्ता राती भवति। वोच्छिण्णा णं तत्थ रातिंदिया पण्णत्ता समणाउसो। एगे एवमाहंसु।

टी० '**तत्थे**'त्यादि। **तत्र** तस्यामुदयसंस्थितौ विषये **तिस्रः प्रतिपत्तयः** परतीर्थिकाऽभ्युपगमरूपाः **प्रज्ञप्तास्तद्यथा तत्र** तेषां त्रयाणां परतीर्थिकानां मध्ये **एके** परतीर्थिका **एवमाहुः** – '**ता जया ण**'मित्यादि। **तत्र यदा** '**ण**'मिति वाक्यालङ्कारेऽस्मिन्**जम्बूद्वीपे दक्षिणार्द्धे अष्टादशमुहूर्त्तो दिवसो भवति तदा उत्तरार्द्धेऽपि अष्टादशमुहूर्त्तो दिवसः (भवति)**। तदेवं दक्षिणार्द्धनियमेनोत्तरार्द्धनियम उक्तः। सम्प्रत्युत्तरार्द्धनियमेन दक्षिणार्द्धनियममाह – '**ता जया ण**'मित्यादि। **तत्र यदा उत्तरार्द्धे अष्टादशमुहूर्त्तो दिवसो भवति तदा दक्षिणार्द्धेऽप्यष्टादशमुहूर्त्तो दिवसः (भवति)**। '**ता जया ण**'मित्यादि। **तत्र यदा जम्बूद्वीपे दक्षिणार्द्धे सप्तदशमुहूर्त्तो दिवसो भवति, तदा उत्तरार्द्धेऽपि सप्तदशमुहूर्त्तो दिवसो भवति। यदा उत्तरार्द्धे सप्तदशमुहूर्त्तो दिवसस्तदा दक्षिणार्द्धेऽपि सप्तदशमुहूर्त्तो दिवसो भवति**। '[1]**एव**'मित्यादि। **एवमु**क्तेन प्रकारेण एकैकमुहूर्त्तहान्या परिहातव्यम्। परिहानिमेव क्रमेण दर्शयति – प्रथमतः उक्तप्रकारेण **षोडशमुहुर्त्तो** दिवसो वक्तव्यः, तदनन्तरं च **पञ्चदशमुहूर्त्तस्ततश्चतुर्दशमुहूर्त्तस्ततस्त्रयोदशमुहूर्त्तः**। सूत्रपाठोऽपि प्रागुक्तसूत्रानुसारेण स्वयं परिभावनीयः। स चैवं – '**(ता) जया णं [2]जंबुद्दीवे दीवे दाहिणड्ढे सोलसमुहुत्ते दिवसे भवइ तया णं उत्तरड्ढेवि सोलसमुहुत्ते दिवसे भवइ। जया णं उत्तरड्ढे सोलसमुहुत्ते दिवसे भवइ तया**

१. 'एवं एएणं अभिलावेणं सोलसमुहुत्ते....' - इति मूले पाठः। २. जंबुद्दीवे दाहिणड्ढे - G, H।

णं दाहिणड्ढेवि सोलसमुहुत्ते दिवसे भवइ।' इत्यादि। द्वादशमुहूर्त्तप्रतिपादकं सूत्रं साक्षादाह '**ता जया ण**'मित्यादि। '**ता**' इति **तत्र यदा** [१]जम्बूद्वीपे द्वीपे **दक्षिणार्द्धे द्वादशमुहूर्त्तो दिवसो भवति तदा उत्तरार्द्धेऽपि द्वादशमुहूर्त्तो दिवसः, यदा उत्तरार्द्धे द्वादशमुहूर्त्तो दिवसः तदा दक्षिणार्द्धेऽपि द्वादशमुहूर्त्तो दिवसस्तदा** चाष्टादशमुहूर्त्तादिदिवसकाले **जम्बूद्वीपे मन्दरस्य पर्वतस्य पूर्वस्यामपरस्यां** च दिशि **सदा** सर्वकालं **पञ्चदशमुहूर्त्तो दिवसो भवति सदैव पञ्चदशमुहूर्त्ता रात्रिः**। कुत इत्याह – **अवस्थितानि** सकलकालमेकप्रमाणानि '**ण**'मिति वाक्यालङ्कारे **तत्र** मन्दरस्य पर्वतस्य पूर्वस्यामपरस्यां च दिशि **रात्रिन्दिवानि प्रज्ञप्तानि** हे **श्रमण** ! हे **आयुष्मन्** ! एतच्च प्रथमानां परतीर्थिकानां मूलभूतं स्वशिष्यं प्रत्यामन्त्रणवाक्यम्। अत्रैवोपसंहारमाह – '**एगे एवमाहंसु १।**' **एके पुनरेवमाहुः यदा जम्बूद्वीपे द्वीपे दक्षिणार्द्धे अष्टादशमुहूर्त्तानन्तरो**ऽष्टादशभ्यो मुहूर्त्तेभ्योऽनन्तरो मनाक् हीनो हीनतरो वा यावत् सप्तदशभ्यो मुहूर्त्तेभ्यः किञ्चित्समधिक एवम्प्रमाणो **दिवसो भवति तदा उत्तरार्द्धेऽप्यष्टादशमुहूर्त्तानन्तरो दिवसो भवति, यदा चोत्तरार्द्धेऽष्टादशमुहूर्त्तानन्तरो दिवसो भवति तदा दक्षिणार्द्धेऽष्टादशमुहूर्त्तानन्तरो दिवसः**। [२]तथा जम्बूद्वीपे द्वीपे (यदा) दक्षिणार्द्धे सप्तदशमुहूर्त्तानन्तरो दिवसो भवति तदा उत्तरार्द्धेऽपि सप्तदशमुहूर्त्तानन्तरो दिवसो यदा चोत्तरार्द्धे सप्तदशमुहूर्त्तानन्तरो दिवसस्तदा दक्षिणार्द्धेऽपि सप्तदशमुहूर्त्तानन्तरो दिवसः। '**एव**'मित्यादि। एवमुक्तेन प्रकारेण एकैकमुहूर्त्तहान्या **परिहातव्यम्**। परिहानिप्रकारमाह – '**सोलस**' इत्यादि। प्रथमतः **षोडशमुहूर्त्तानन्तरो** दिवसो भवति, तदनन्तरं **पञ्चदशमुहूर्त्तानन्तरः**, तदनन्तरं **चतुर्दशमुहूर्त्तानन्तरः**, ततस्त्रयोदशमुहूर्त्तानन्तरः। एतेषां हि मतेन न कदाचनाऽपि परिपूर्णमुहूर्त्तप्रमाणो दिवसो भवति। ततः सर्वत्रानन्तरशब्दप्रयोगः। द्वादश-

---

१. जम्बूद्वीपे दक्षिणार्द्धे - G, H। २. मूले त्वेवं पाठः - 'एवं परिहाएयव्वं सत्तरसमुहुत्ताणंतरे० सोलसमुहुत्ताणंतरे०...।'

मुहूर्त्तानन्तरसूत्रं तु साक्षाद्दर्शयति – **'ता जया ण'**मित्यादि। **तत्र यदा** जम्बूद्वीपे द्वीपे **दक्षिणार्द्धे द्वादशमुहूर्त्तानन्तरो दिवसो भवति तदा उत्तरार्द्धेऽपि द्वादशमुहूर्त्तानन्तरो दिवसो भवति, यदा चोतरार्द्धे द्वादशमुहूर्त्तानन्तरो दिवसस्तदा दक्षिणार्द्धेऽपि द्वादशमुहूर्त्तानन्तरो दिवसः**। **तदा** चाष्टादशमुहूर्त्तानन्तरादिदिवसकाले **जम्बूद्वीपे मन्दरस्य पर्वतस्य पूर्वस्यामपरस्यां** च दिशि **नो** नैव **सदा** सर्वकालं **पञ्चदशमुहूर्त्तो दिवसो भवति नाऽपि सदा पञ्चदशमुहूर्त्ता रात्रिः**। कुत इत्याह – **'अणवट्ठिया ण'**मित्यादि। **अनवस्थितानि** अनियतप्रमाणानि **'ण'**मिति वाक्यालङ्कारे खलु **तत्र** मन्दरस्य पूर्वस्यामपरस्यां च दिशि **रात्रिन्दिवानि प्रज्ञप्तानि** हे **श्रमण** ! हे **आयुष्मन्** ! अत्रोपसंहारमाह- **'एगे एवमाहंसु२।' एके पुनरेवमाहुः 'ता'** इति पूर्ववत् [१]**जम्बूद्वीपे द्वीपे यदा दक्षिणार्द्धे अष्टादशमुहूर्त्तो दिवसो भवति तदा उत्तरार्द्धे द्वादशमुहूर्त्ता रात्रिः यदा चोतरार्द्धे अष्टादशमुहूर्त्तो दिवसो भवति, तदा दक्षिणार्द्धे द्वादशमुहूर्त्ता रात्रिः**। तथा **यदा दक्षिणार्द्धे 'अट्ठारसमुहुत्ताणंतरे'**त्ति अष्टादशभ्यो मुहूर्त्तेभ्यो अनन्तरो मनाक् हीनो हीनतरो यावत्सप्तदशभ्यो मुहूर्त्तेभ्यः किञ्चिदधिक एवम्प्रमाणो **दिवसो भवति तदा उत्तरार्द्धे द्वादशमुहूर्त्ता रात्रिः। यदा चोत्तरार्द्धे अष्टादशमुहूर्त्तानन्तरो दिवसस्तदा दक्षिणार्द्धे द्वादशमुहूर्त्ता रात्रिः**। **'एव'**मित्यादि। **एवमुक्तेन** प्रकारेण तावद्वक्तव्यं यावत्त्रयोदशमुहूर्त्तानन्तरदिवसवक्तव्यता। एकैकस्मिंश्च सप्तदशादिके सङ्ख्याविशेषे सकलैर्मुहूर्त्तैरनन्तरै(श्च) किञ्चिदूनैः द्वौ द्वावालापकौ वक्तव्यौ। सर्वत्र द्वादशमुहूर्त्ता रात्रिः, तद्यथा –**'(ता) जया ण जंबुद्दीवे दीवे (दाहिणड्ढे) सत्तरसमुहुत्ते दिवसे हवइ तया णं उत्तरड्ढे दुवालसमुहुत्ता राई भवति। जया णं उत्तरड्ढे सत्तरसमुहुत्ते दिवसे हवइ तया णं दाहिणड्ढे दुवालसमुहुत्ता राई भवइ। (ता) जया णं जंबुद्दीवे दीवे सत्तरसमुहुत्ताणंतरे**

१. जता णं जंबुद्दीवे २ - मूले।

दिवसे भवइ तया णं उत्तरड्ढे दुवालसमुहुत्ता राई भवति। जया णं उत्तरड्ढे सत्तरसमुहुत्ताणंतरे दिवसे भवति तया णं दाहिणड्ढे दुवालसमुहुत्ता राई भवइ।' एवं **षोडशमुहूर्त्त-षोडशमुहूर्त्तानन्तरं-पञ्चदशमुहूर्त्त-पञ्चदशमुहूर्त्तानन्तरं-चतुर्दशमुहूर्त्त-चतुर्दशमुहूर्त्तानन्तरं-त्रयोदशमुहूर्त्त-त्रयोदशमुहूर्त्तानन्तरं-द्वादशमुहूर्त्तगता** अपि नव आलापका कर्त्तव्याः। द्वादशमुहूर्त्तानन्तरं त्वालापकं साक्षादाह – **'जया ण'**मित्यादि। **यदा** जम्बूद्वीपे द्वीपे दक्षिणार्द्धे **द्वादशमुहूर्त्तानन्तरो दिवसो भवति तदा उत्तरार्द्धे द्वादशमुहूर्त्ता रात्रिर्भवति। यदा चोतरार्द्धे द्वादशमुहूर्त्तानन्तरो दिवसो भवति तदा दक्षिणार्द्धे द्वादशमुहूर्त्ता रात्रिः। तदा** चाष्टादशमुहूर्त्तानन्तरादिदिवसकाले **जम्बूद्वीपे मन्दरस्य पर्वतस्य 'पुरच्छिम-पच्चच्छिमेणं'** ति पूर्वस्यामपरस्यां च दिशि **नैवास्त्येतत्** यदुत **पञ्चदशमुहूर्त्तो दिवसो** भवति, **नाप्यस्त्येतत्** यथा **पञ्चदशमुहूर्त्ता रात्रिर्भवती**[१]ति। कुत इत्याह – **'वोच्छिन्ना ण'**मित्यादि। **व्यवच्छिन्नानि 'ण'**मिति वाक्यालङ्कारे खलु **तत्र** मन्दरस्य पर्वतस्य पूर्वस्यामपरस्यां च दिशि **रात्रिन्दिवानि प्रज्ञप्तानि** हे **श्रमण** ! हे **आयुष्मन्** ! अत्रोपसंहारमाह – **'एगे एवमाहंसु ३'**।

एताश्च तिस्रोऽपि प्रतिपत्तयो मिथ्यारूपा भगव[ता तन्](तोऽननु)मतत्वात्। अपि च ये तृतीया वादिनः सदैव रात्रिं द्वादशमुहूर्त्तप्रमाणामिच्छन्ति तेषां प्रत्यक्षविरोधः, प्रत्यक्षत एव हीनाधिकरूपाया रात्रेरुपलभ्यमानत्वात्। एवं सति[२] साम्प्रतं स्वमतं भगवान् उपदर्शयति–

मू० वयं पुण एवं वदामो- ता जंबुद्दीवे २ सूरिया उदीणपाईण-मुग्गच्छंति पाईणदाहिणं आगच्छंति पाईणदाहिणमुग्गच्छंति दाहिण-पाडिणमागच्छंति दाहिणपाडीणमुग्गच्छंति पाडिणउदीणमागच्छंति पाडीणउदीणमुग्गच्छंति उदीणपाईणमागच्छंति। ता जया णं जंबुद्दीवे

१. रात्रिर्भवति- A, H, I, K।

२ दाहिणड्ढे दिवसे भवइ तया णं उत्तरड्ढे वि दिवसे भवइ। जया णं उत्तरड्ढे दिवसे भवति तया णं जंबुद्दीवे २ मंदरपव्वयस्स पुरच्छिमपच्चच्छिमेणं राई भवइ। ता जता णं जंबुद्दीवे २ मंदरस्स पव्वतस्स पुरच्छिमेणं दिवसे भवति तया णं पच्चच्छिमेणं दिवसे भवति। जया णं पच्चच्छिमेणं दिवसे भवति तया णं जंबुद्दीवे २ मंदरस्स पव्वयस्स उत्तरदाहिणेणं राई भवति। ता जया णं जंबुद्दीवे दीवे दाहिणड्ढे उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति तता णं उत्तरड्ढे वि उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति, तता णं जंबुद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्चच्छिमेणं जहण्णिया दुवालसमुहुत्ता राती भवति। (ता) जता णं जंबुद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमेणं उक्कोसते अट्ठारसमुहुत्ते दिवसे भवति तता णं पच्चच्छिमेणवि उक्कोस० जाव दिवसे०। जया णं पच्चच्छिमेणवि उक्को० जाव दिवसे भवति तता णं जंबुद्दीवे २ मंदरस्स पव्वतस्स उत्तरदाहिणेणं जहण्णिया दुवालसमुहुत्ता राती भवति। एवं अट्ठारसमुहुत्ताणंतरे दिवसे साइरेगा दुवालसमुहुत्ता राई भवति, सत्तरसमुहुत्ते दिवसे तेरसमुहुत्ता राती भवति, सत्तरसमुहुत्ताणंतरे दिवसे सातिरेगा तेरसमुहुत्ता राती भवति, सोलसमुहुत्ते दिवसे चोद्दसमुहुत्ता राती भवति, सोलसमुहत्ताणंतरे दिवसे सातिरेगचोद्दसमुहुत्ता राती भवति, पण्णरसमुहुत्ते दिवसे भवति पण्णरसमुहुत्ता राती, पण्णरसमुहुत्ताणंतरे दिवसे सातिरेगा पन्नरसमुहुत्ता राती, चोद्दसमुहुत्ते दिवसे भवति सोलसमुहुत्ता राती, चोद्दसमुहुत्ताणंतरे दिवसे सातिरेगा सोलसमुहुत्ता राती, तेरसमुहुत्ते दिवसे सत्तरसमुहुत्ता राती, तेरसमुहुत्ताणंतरे दिवसे सातिरेगा सत्तर-

समुहुत्ता राती भवति। ता जया णं जंबुद्दीवे दाहिणड्ढे जहण्णए दुवालसमुहुत्ते दिवसे भवति तता णं जंबुद्दीवे उत्तरड्ढे जहण्ण(ए) दुवालस(मुहुत्ते) दिवसे भवति, जता णं उत्तरड्ढे जहण्ण(ए) दुवालस० दिवसे तता णं [१]जंबुद्दीवमंदरस्स पुरच्छिमपच्चच्छिमेणं उक्कोसिया अट्ठारस० राती भवति। ता जता णं [२]जंबुद्दीवमंदरस्स पुरच्छिमेणं जहण्ण(ए) दुवालस० दिवसे भवति तता णं पच्चच्छिमेणं जहण्णए दुवालस० दिवसे भवति। जता णं पच्चच्छिमेणं जहण्णए दुवालस० दिवसे तता णं जंबुद्दीवे २ मंदरस्स उत्तरदाहिणेणं उक्कोसा अट्ठा० राती भवति। ता जता णं जंबुद्दीवे दाहिणड्ढे वासाणं पढमे समए पडिवज्जति तता णं उत्तरड्ढेवि वासाणं पढमे समए पडिवज्जति। जता णं उत्तरड्ढे वासाणं पढमे समए पडिवज्जति तता णं जंबुद्दीवे मंदरस्स पव्वयस्स पुरच्छिमपच्चच्छिमेणं अणंतरपुरक्खडे कालसमयंसि वासाणं पढमे समए पडिवज्जइ। ता जता णं जंबुद्दीवे २ मंदरस्स पुरच्छिमेणं वासाणं पढमे समए पडिवज्जति तया णं पच्चच्छिमेणं वि वासाणं पढमे समए पडि०। जया णं पच्चच्छिमेण वि वासाणं पढमे समए पडि० तया णं जंबुद्दीवे मंदरस्स पव्वयस्स उत्तरदाहिणेणं अणंतरपच्छाकडे कालसमयंसि वासाणं पढमे समए पडिवन्ने भवइ। [३]एवं आवलिता आणापाणू थोवे लवे मुहुत्ते अहोरत्ते पक्खे मासे उऊ एए दस आलावगा वासाणं भाणियव्वा। ता जया णं जंबु० दाहिणड्ढे हेमंताणं पढमे समए पडिवज्जति तता णं उत्तरड्ढेवि हेमंताणं पढमे समए पडिवज्जति। [४]एतस्स वि दस आलावगा जाव उडूतो

१. जंबुमंदरस्स - U। २. जंबुमंदरस्स - U। ३. जहा समए एवं - P, V। ४. तस्स - U, V।

पडिवज्जति। ता जता णं जंबुद्दीवे दीवे दाहिणड्ढे गिम्हाणं पढमे समए पडिवज्जति तता णं उत्तरड्ढेवि गिम्हाणं पढमे समए पडिवज्जति। एतस्स वि वासागमो भाणियव्वो जाव उडू पडिवज्जति। ता जया णं जंबुद्दीवे २ दाहिणड्ढे पढमे अयणे पडिवज्जति तया णं उत्तरड्ढेवि पढमे अयणे पडिवज्जति। जया णं उत्तरड्ढे पढमे अयणे पडिवज्जइ तया णं जंबुद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्च-च्छिमेणं [1]अणंतरपुरक्खडकालसमयंसि पढमे अयणे पडिवज्जति। ता जता णं जंबु० मंदरस्स पुरच्छिमेणं पढमे अयणे पडिवज्जति तता णं पच्चच्छिमेणवि पढमे अयणे पडिवज्जति। जता णं पच्चच्छिमेणं पढमे अयणे पडिवज्जति तता णं जंबु० मंदर० उत्तरदाहिणेणं अणंतरपच्छाकडकालसमयंसि पढमे अयणे पडिवण्णे भवति। एवं संवच्छरे जुगे वाससए वाससहस्से वाससतसहस्से पुव्वंगे पुव्वे तुडियंगे तुडिए अडडंगे अडडे अववंगे अववे हूहूयंगे हूहूए उप्पलंगे उप्पले पउमंगे पउमे णलिणंगे णलिणे अत्थणिपुरंगे अत्थणिपुरे अउयंगे अउए तउयंगे तउए नउयंगे णउए चूलियंगे चूलिया सीसपहेलियंगे सीसपहेलिया पलिउवमे सागरोवमे। ता जता णं जंबुद्दीवे २ दाहिणड्ढे पढमा तोसप्पिणी पडिवज्जति तता णं उत्तरड्ढेवि पढमा तोसप्पिणी पडिवज्जति। ता जता णं उत्तरड्ढेवि पढमा तोसप्पिणी जाव पडिवज्जति तता णं जंबुद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्चच्छिमेणं णेव अत्थि ओसप्पिणी णेव अत्थि उस्सप्पिणी। अवट्ठिए णं तत्थ काले पण्णत्ते समणाउसो। (एवं उस्सप्पिणी वि।) एवं लवणे धातीसंडे कालोए। ता अब्भंतरपुक्खरद्धे

१. अणंतरपुरक्खडे कालसमयंसि - U।

णं सूरिया उदीणपाईणमुग्गच्छंति पातिणदाहिणं आगच्छंति। एवं जंबुद्दीववत्तव्वया णिरवसेसा भाणियव्वा जाव ओसप्पिणी उस्सप्पिणी वि।

अट्ठमं पाहुडं समत्तं।

टी० '**वयं पुण**' इत्यादि। **वयं पुनरेवं** वक्ष्यमाणेन प्रकारेण **वदाम**स्तमेव प्रकारमाह '**ता जंबुद्दीवे दीवे**' इत्यादि। '**ता**' इति पूर्ववत्, **जम्बूद्वीपे सूर्यौ** यथायोगं मण्डलपरिभ्रम्या भ्रमन्तौ मेरोरु**दक्प्राच्यां** उत्तरपूर्वस्यां दिशि **उद्ग(च्छ)त**-स्तत्र चोद्गत्य **प्राग्(दक्षिणस्यां)** दक्षिणपूर्वस्या**मागच्छत**स्ततो भरतादिक्षेत्रापेक्षया **प्राग्दक्षिणस्यां** दक्षिणपूर्वस्यां उद्गत्य **दक्षिणापाच्यां** दक्षिणापरस्या**मागच्छत**स्त-त्रापि च **दक्षिणापरस्याम**परविदेहक्षेत्रापेक्षया उद्गत्या**पागुदीच्यां** अपरोत्तरस्या-**मागच्छत**स्तत्रापि **चापरोत्तरस्या**मैरावतादिक्षेत्रापेक्षया उद्गत्य **उदग्प्राच्यां** उत्तर-पूर्वस्या**मागच्छतः**। एवं तावत्सामान्यतो द्वयोरपि सूर्ययोरुदयविधिरुपदर्शितो विशेषतः पुनरयंयदैकः सूर्यः प्राग्दक्षिणस्यामुद्गच्छति तदा अपरो(ऽपरो)त्तरस्यां दिशि समुद्गच्छति। दक्षिणपूर्वोद्गतश्च सूर्यो भरतादीनि क्षेत्राणि मेरुदक्षिणदिग्वर्त्तीनि मण्डलपरिभ्रम्या परिभ्रमन् प्रकाशयति। अपरोऽपरोत्तरस्यामुद्गतः सन् तत ऊर्द्ध्वं मण्डलपरिभ्रम्या परिभ्रमन् ऐरावतादीनि क्षेत्राणि मेरोरुत्तरदिग्भावीनि प्रकाशयति। भारतश्च सूर्यो दक्षिणापरस्यामागतः सन्नपरविदेहक्षेत्रापेक्षया उदयमासादयति। ऐरावतः सूर्यः पुनरुत्तरपूर्वस्यामागतः पूर्वविदेहापेक्षया समुद्गच्छति। ततो दक्षिणापरस्या-मुद्गतः सन् तत ऊर्द्ध्वं मण्डलपरिभ्रम्या परिभ्रमन् अपरविदेहान् प्रकाशयति, उत्तरपूर्वस्यामुद्गतस्तु तत ऊर्द्ध्वं मण्डलगत्या चरन् पूर्वविदेहानव[साद](भास)यति। तत एष पूर्वविदेहप्रकाशको सूर्यो दक्षिणपूर्वस्यां भरतादिक्षेत्रापेक्षया उदयमासादयति, अपरविदेहप्रकाशकस्त्वपरोत्तरस्यामिति। तदेवं जम्बूद्वीपसूर्ययोरुदयविधिरुक्तः। सम्प्रति क्षेत्रविभागेन दिवसरात्रिविभागमाह – '**ता जया ण**'मित्यादि। **तत्र यदा**

'ण'मिति वाक्यालङ्कारे **जम्बूद्वीपे द्वीपे दक्षिणार्द्धे दिवसो भवति तदा उत्तरार्द्धेऽपि दिवसो भवति,** एकस्य सूर्यस्य दक्षिणदिशि परिभ्रमणसम्भवे अपरस्य सूर्यस्यावश्यमुत्तरदिशि परिभ्रमणसम्भवात्। **यदा चोत्तरार्द्धे दिवसस्तदा जम्बूद्वीपे मन्दरपर्वतस्य[१] 'पुरच्छिमपच्चच्छिमेणं'[२]** ति **पूर्वस्यामपरस्यां** च दिशि **रात्रिर्भवति,** तदानीमेकस्यापि सूर्यस्य तत्राभावात्। **'ता जता ण'**मित्यादि। **तत्र यदा 'ण'**मिति वाक्यालङ्कारे **जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य पूर्वस्यां** दिशि **दिवसो भवति, तदा पश्चिमायामपि** दिशि **दिवसो भवति,** एकस्य सूर्यस्य पूर्वदिग्भावसम्भवे अपरस्य सूर्यस्यावश्यमपरस्यां दिशि भावात्, तच्च प्रागेव भावितम्। **यदा** च **पश्चिमायामपि** दिशि **दिवसो भवति तदा जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य** उत्तरतो दक्षिणतश्च **रात्रिर्भवति। 'ता जया ण'**मित्यादि। **तत्र यदा 'ण'**मिति प्राग्वत् **जम्बूद्वीपे द्वीपे दक्षिणार्द्धे उत्कर्षक** उत्कृष्टो **अष्टादश-मुहूर्त्त**प्रमाणो **दिवसो भवति तदा उत्तरार्द्धेऽप्युत्कर्षक** उत्कृष्टोऽष्टादशमुहूर्त्त-प्रमाणो **दिवसो भवति,** (उत्कृष्टोऽष्टादशमुहूर्तप्रमाणो दिवसो भवति) सर्वाभ्यन्तर-मण्डलचारित्वे। तत्र यदैकः सूर्यः सर्वाभ्यन्तरमण्डलचारी भवति तदाऽपरोप्यवश्यं तत्समानया श्रेण्या सर्वाभ्यन्तरमण्डलचारी भव(ती)ति दक्षिणार्द्धे उत्कृष्टदिवससम्भवे उत्तरार्द्धेऽप्युत्कृष्टदिवससम्भवः। यदा उत्तरार्द्धे उत्कृष्टोऽष्टादशमुहूर्त्तप्रमाणो दिवसो भवति **तदा जम्बूद्वीपे द्वीपे मन्दरस्य[३] पर्वतस्य 'पुरच्छिमपच्चच्छिमेणं'[४]** ति **पूर्वस्यामपरस्यां** च दिशि **जघन्या द्वादशमुहूर्त्ता रात्रिर्भवति** सर्वाभ्यन्तरे मण्डले चारं चरतोः सूर्ययोः सर्वत्रापि रात्रेर्द्वादशमुहूर्त्तप्रमाणाया एव भावात्। **'ता जया ण'**मित्यादि। **तत्र यदा जम्बूद्वीपे द्वीपे मन्दरस्य[५] पर्वतस्य पूर्वस्यां** दिशि **उत्कर्षक** उत्कृष्टोऽष्टादशमुहूर्त्तप्रमाणो **दिवसो भवति तदा** मन्दरस्य पर्वतस्य

---

१. मन्दरस्य पर्वतस्य - H। २. पुरत्थिमपच्चत्थिमेणं - T। ३. मन्दरपर्वतस्य - C, M।
४. पुरत्थिमपच्चत्थिमेणं - T। ५. मन्दरपर्वतस्य - H।

पश्चिमायामपि दिशि **उत्कृष्टोऽष्टादशमुहूर्त्तो दिवसः**। कारणं दक्षिणोत्तरार्द्धगतं प्रागुक्तमनुसरणीयम्। **यदा** च मन्दरस्य पर्वतस्य **पश्चिमायामपि** दिशि **उत्कृष्टो-ऽष्टादशमुहूर्त्तो दिवसो भवति तदा जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य 'उत्तरदाहिणेणं'**ति **उत्तरतो दक्षिणतश्च जघन्या द्वादशमुहूर्त्ता रात्रिः**। अत्रापि कारणं पूर्वपश्चिमार्द्धरात्रिगतं प्रागुक्तमनुसरणीयम्। **'एव'**मित्यादि। **एव**मुक्तेन प्रकारेण एतेनानन्तरोदितेन गमेनालापकगमेन वक्ष्यमाणमपि नेतव्यम्। किं तदित्याह – **'अट्ठारसमुहुत्ताणंतरे'** इत्यादि। यदा मन्दरस्य पर्वतस्य दक्षिणोत्तरार्द्धयोः पूर्व-पश्चिमयोर्वा अष्टादशमुहूर्त्तानन्तरं सप्तदशभ्यो मुहूर्त्तेभ्य ऊर्द्ध्वं किञ्चिन्न्यूनाष्टा-दशमुहूर्त्तप्रमाणो (दिवसस्)तदा पूर्वपश्चिमयोर्दक्षिणोत्तरार्द्धयोर्वा **सातिरेकद्वादशमुहूर्त्ता रात्रिर्भवति**। एवं शेषाण्यपि पदानि भावनीयानि। सूत्रपाठोऽपि प्रागुक्तालापक-गमानुसारेण स्वयं भावनीयः। स चैवं – **'ता जया णं जंबुद्दीवे दीवे दाहिणड्ढे अट्ठारसमुहुत्ताणंतरे दिवसे भवइ तया णं उत्तरड्ढेवि अट्ठार-समुहुत्ताणंतरे दिवसे भवइ। जया णं उत्तरड्ढे अट्ठारसमुहुताणंतरे दिवसे भवइ तया णं जंबुद्दीवे दीवे मंदरस्स पव्वयस्स [उत्तरदाहिणेणं](पुरच्छिमपच्च-च्छिमेणं) साइरेगदुवालसमुहुत्ता राई भवइ।'** एवं सप्तदशमुहूर्त्तदिवसादि-प्रतिपादका अपि आलापका भावनीयाः। **'ता जया ण'**मित्यादि। **तत्र यदा जम्बुद्वीपे द्वीपे दक्षिणार्द्धे वर्षाणां** वर्षाकालस्य **प्रथमः समयः प्रतिपद्यते** भवति **तदा उत्तरार्द्धेऽपि वर्षाणां** वर्षाकालस्य **प्रथमसमयो**[1] **प्रतिपद्यते** भवति, समकालनैयत्येन दक्षिणार्द्धे उत्तरार्द्धे च सूर्ययोश्चारभावात्, **यदा चोत्तरार्द्धे वर्षाकालस्य प्रथमः समयो** भवति **तदा जम्बूद्वीपे** द्वीपे **मन्दरपर्वतस्य**[2] **'पुरच्छिमपच्चच्छिमेणं'**ति **पूर्वस्यामपरस्यां** च दिशि **'अणंतरपुरक्खडे'**त्ति अनन्तरमव्यवधानेन पुरःकृतोऽग्रेकृतो यः **सोऽनन्तरपुरस्कृतः** अनन्तरद्वितीय इत्यर्थः

१. पढमे समए - मूले। २. मंदरस्स पव्वयस्स - मूले।

तस्मिन् '**कालसमयंसि**'त्ति समयः सङ्केतादिरपि भवति, ततस्तद्व्यवच्छेदार्थं कालग्रहणं, कालश्चासौ समयश्च कालसमयस्तत्र **वर्षाकालस्य प्रथमसमयः**[१] **प्रतिपद्यते**। किमुक्तं भवति ? यस्मिन्समये दक्षिणार्द्धोत्तरार्द्धयो**र्वर्षाकालस्य** प्रथमसमयो भवति तस्मादूर्द्ध्वमनन्तरे द्वितीये समये पूर्वपश्चिमयोर्वर्षाकालस्य प्रथमः समयो भवति। '**ता जया ण**'मित्यादि। **तत्र यदा** '**ण**'मिति प्राग्वत् **जम्बूद्वीपे** द्वीपे **मन्दरस्य** पर्वतस्य **पूर्वस्यां** दिशि **वर्षाकालस्य प्रथमः समयो** भवति **तदा** मन्दरस्य पर्वतस्य **पश्चिमायामपि** दिशि **वर्षाकालस्य प्रथमः समयो** भवति, समकालनैयत्येन पूर्वपश्चिमयोरपि सूर्ययोश्चारचरणाद्। **यदा पश्चिमायामपि** दिशि **वर्षाकालस्य प्रथमः समयो** भवति **तदा जम्बूद्वीपे** द्वीपे **मन्दरस्य पर्वतस्य** '**उत्तरदाहिणेणं**' ति उत्तरतो दक्षिणतश्च अनन्तरमव्यवधानेन पश्चात्कृतोऽनन्तर-पश्चात्कृतस्तस्मिन् **कालसमये वर्षाकालस्य प्रथमसमयः प्रतिपन्नो भवति** भूत इत्यर्थः। इह यस्मिन्समये दक्षिणार्द्धे उत्तरार्द्धे वा वर्षाकालस्य प्रथमः समयो भवति तदनन्तरेऽग्रेतने द्वितीये समये पूर्वपश्चिमयोर्वर्षाणां प्रथमसमयो भवतीत्येतावन्मात्रो-क्तावपि यस्मिन्समये पूर्वपश्चिमयोर्वर्षाकालस्य प्रथमः[२] समयो भवति ततोऽनन्तरे पश्चाद्भाविनि समये दक्षिणोत्तरार्द्धयोर्वर्षाकालस्य प्रथमः समयो भूत इति गम्यते, तत्किमर्थमस्योपादानम् ? उच्यते, इह क्रमोत्क्रमाभ्यामभिहितोऽर्थः प्रपञ्चितज्ञानां शिष्याणामतिसुनिश्चितो भवति, ततस्तेषामनुग्रहाय तदुक्तमित्यदोषः। '**एव**'मित्यादि। **एवं** समयगतेन प्रकारेण **आवलिका प्राणापानो स्तोको लवो मुहूर्त्तोऽहोरात्रः पक्षो मास ऋतुश्च** प्रावृडादिरूपो वक्तव्यः। [३]एवं च समयगतमालापकमादिं कृत्वा दश आलापका एते भवन्ति, ते च समयगतालापकरीत्या स्वयं परिभावनीयाः, तद्यथा – '**जया णं जंबुद्दीवे दीवे वासाणं पढमा आवलिया पडिवज्जइ तया णं उत्तरड्ढेवि वासाणं पढमा आवलिया पडिवज्जइ। जया णं**

१. पढमे समये - मूले। २. समयः प्रतिपन्नो भवति - B। ३. एवं समय.... - B, L।

उत्तरद्धेवि वासाणं पढमा आवलिया पडिवज्जइ तया णं जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरच्छिमपच्चच्छिमेणं अणंतरपुरक्खडे कालसमयंसि वासाणं पढमा आवलिया पडिवज्जइ। ता जया णं जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरच्छिमेणं वासाणं पढमा आवलिया पडिवज्जइ तया णं पच्चच्छिमेणंवि (वासाणं) पढमा आवलिया पडिवज्जइ। जया णं पच्चच्छिमेणं वासाणं पढमा आवलिया पडिवज्जइ तया णं जंबुद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरदाहिणेणं [1]अणंतरपच्छाकडे कालसमयंसि वासाणं पढमा आवलिया पडिवन्ना भवइ।' इदं च सकलमपि प्रागुक्तव्याख्यानानुसारेण स्वयं व्याख्येयं, नवर**'मावलिया पडिवज्जइ'**त्ति आवलिका परिपूर्णा भवति। एवं प्राणापानादिगता [2]अप्यालापका भणनीयाः। **'ता जया ण'**मित्यादि। **'ता'** इति पूर्ववत् **यदा जम्बूद्वीपे** द्वीपे [3]**दक्षिणार्द्धे हेमन्तानां** हेमन्तकालस्य मासचतुष्टयप्रमाणस्य **प्रथमः समयः प्रतिपद्यते तदा उत्तरार्द्धेऽपि हेमन्तानां प्रथमः समयः प्रतिपद्यते** भवति। **'एयस्सवि दस आलावगा जाव उउत्ति' एतस्यापि** हेमन्तकालस्य समयादिगत-**दशआलापकाः** क्रमेण तावद्वक्तव्या **यावत्पर्यन्ते ऋत्वा**लापकः। **'ता जया ण'**मित्यादि, सुगमम्। **'एतस्सवि वासागमो भाणियव्वो जाव उडुत्ति', एतस्यापि** ग्रीष्मकालस्य मासचतुष्टयप्रमाणस्य [4]**वर्षागमो** वर्षाकालगमो **भणितव्यो यावत् ऋत्वा**लापकः। किमुक्तं भवति ? यथा वर्षाकालस्य समयादिगता ऋतुपर्यन्ता दश आलापका उक्तास्तथा ग्रीष्मकालस्यापि वक्तव्या इति। अयनगतं [5]चालापकं परिपूर्णं साक्षात्पठति **'ता जया ण'**मित्यादि, सुगमम्। **'एव'**मित्यादि। **एवं** यथा अयने आलापको भणितस्तथा **संवत्सरे युगे** वक्ष्यमाणस्वरूपे चन्द्रादिसंवत्सर-

---

१. अणंतरपच्छाकडकालसमयंसि - B, G, I, अणंतरे पच्छाकडे कालसमयंसि - T। २. आलापका - G, H, M। ३. दक्षिणार्द्धे हेमन्तकालस्य - G। ४. वर्षागमो भणितव्यो - E, G, I। ५. आलापकं - I।

पञ्चकात्मके **वर्षशते** च **वर्षसहस्रे वर्षलक्षे पूर्वाङ्गे पूर्व्वे** एवं यावत् शीर्षप्रहेलिकायामिति। इह चतुरशीतिवर्षलक्षाणि एकं पूर्वाङ्गं, चतुरशीतिपूर्वाङ्गलक्षाणि एकं पूर्वं, पूर्वपूर्वो राशिश्चतुरशीतिलक्षैर्गुणित उत्तरोत्तरो राशिर्भवति, यावत् चतुरशीतिशीर्षप्रहेलिकाङ्गलक्षाणि एका शीर्षप्रहेलिका। एतावान्राशिर्गणितविषयो[१] तदूर्द्ध्वं गणनातीतः, स च पल्योपमादिः '**पलिओवमसागरोवमे**'[२] इति, अनयोः स्वरूपं **सङ्ग्रहणिटीका**यामुक्तम्। आलापकास्तु स्वयमत्र वक्तव्याः। अवसर्प्पिण्युत्सर्पिणीविषयमालापकं साक्षादाह – '**ता जया ण**'मित्यादि। **तत्र यदा जम्बूद्वीपे**[३] **द्वीपे** मन्दरपर्वतस्य **दक्षिणार्द्धे अवसर्पिणी प्रतिपद्यते** परिपूर्णा भवति **तदा उत्तरार्द्धेऽपि अवसर्पिणी प्रतिपद्यते। यदा उत्तरार्द्धेऽपि अवसर्पिणी प्रतिपद्यते तदा जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य पूर्वस्यामपरस्यां** च दिशि **नैवमस्त्यवसर्पिणी नाप्युत्सर्पिणी**। कुत इत्याह– **अवस्थितो** '**ण**'मिति पूर्ववत् खलु पूर्वस्यामपरस्यां च दिशि **कालः प्रज्ञप्तो** मया शेषैश्च तीर्थकरैः हे **श्रमण**! **आयुष्मन्**! ततस्तत्र अवसर्प्पिण्युत्सर्प्पिण्यभावः। '**एवमुस्सप्पिणीवि**' त्ति। **एवमुक्तेन** प्रकारेण **उत्सर्प्पिण्य(पि)**– उत्सर्प्पिण्यालापकोऽपि वक्तव्यः। स चैवं – '**ता जया णं जंबुद्दीवे दीवे दाहिणड्ढे पढमा उस्सप्पिणी पडिवज्जइ तया णं उत्तरड्ढेवि पढमा उस्सप्पिणी पडिवज्जइ। जया णं उत्तरड्ढेवि पढमा उस्सप्पिणी पडिवज्जइ तया णं जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरच्छिमपच्चच्छिमेणं नेव अत्थि उस्सप्पिणी नेव अत्थि ओसप्पिणी, अवट्ठिए णं तत्थ काले पण्णत्ते समणाउसो।**' तदेवं जम्बूद्वीपवक्तव्यतोक्ता। सम्प्रति लवणसमुद्रवक्तव्यतामाह – '**एवं समुद्दे**'[४] इत्यादि। एवं यथा जम्बूद्वीपे उद्गमविषय आलापक उक्तस्तथा लवणसमुद्रेऽपि वक्तव्यः। स चैवं – '**लवणे णं सूरिया**

---

१. ...विषयोऽत ऊर्द्ध्वं - E। २. पलिओवमे सागरोवमे - मूले। ३. जम्बूद्वीपे मन्दर.. - E। ४. मूले तु '**लवणे**' इति पाठो दृश्यते।

उदीणपाईण[मा](मुग्)गच्छंति (पाईणदाहिणमागच्छंति) पाईणदाहिणमुग्गच्छं(ति) दाहिणपा[ई](डी)णमागच्छं(ति) दाहिणपाडीणमुग्गच्छंति पा(ई)-(डी)णउईणमागच्छंति, (पाडीणउईणमुग्गच्छंति उदीणपाईणमागच्छंति।)' इदं च सूत्रं जम्बूद्वीपगतोद्गमसूत्रवत् स्वयं परिभावनीयम्, नवरमत्र सूर्याश्चत्वारो वेदिव्याः **'चत्तारि य सागरे लवणतोये'** ( ) इति वचनात्। ते च जम्बूद्वीपगतसूर्याभ्यां सह समश्रेण्या प्रतिबद्धास्तद्यथा द्वौ सूर्यावेकस्य जम्बूद्वीपगतस्य सूर्यस्य समश्रेण्या प्रतिबद्धौ द्वौ द्वितीयस्य जम्बूद्वीपगतस्य सूर्यस्य। तत्र यदा चैकः सूर्यो जम्बूद्वीपे दक्षिणपूर्वस्यामुद्गच्छति तदा तत्समश्रेण्या प्रतिबद्धौ द्वौ सूर्यौ लवणसमुद्रे तस्यामेव दक्षिणपूर्वस्यामुदयमागच्छ[ति](तः)। तदैव जम्बूद्वीपगतेन सूर्येण तत्समश्रेण्या प्रतिबद्धौ द्वावपरौ लवणसमुद्रे अपरोत्तरस्यां दिशि उदयमासादयतः। त[त्र](त) उदयविधिरपि द्वयोर्द्वयोः सूर्ययोः जम्बूद्वीपसूर्ययोरिव भावनीयः। तेन दिवसरात्रिविभागोऽपि क्षेत्रविभागेन तथैव द्रष्टव्यः। स चैवं – **'ता जया णं लवणसमुद्दे दाहिणड्ढे दिवसे भवइ तया णं उत्तरड्ढे दिवसे हवइ। जया णं उत्तरड्ढे दिवसे भवइ तया णं लवणसमुद्दे पुरच्छिमपच्चच्छिमेणं राई भवइ। ता जया णं लवणसमुद्दे पुरच्छिमेणं दिवसे भवइ तया णं पच्चच्छिमेणं दिवसे भवइ। जया णं पच्चच्छिमेणं दिवसे भवइ तया णं लवणसमुद्दे उत्तरदाहिणेणं राई भवइ।'** एवं यथा जम्बूद्वीपे दिवसरात्रिपरिमाणादिप्रतिपादका आलापका उक्ता यावदुत्सर्पिण्यवसर्पिण्यालापकस्तथा लवणसमुद्रेऽप्यन्यूनातिरिक्ताः समस्ता अपि वक्तव्याः, नवरं **'जंबुद्दीवे दीवे'** इत्यस्य स्थाने **'लवणसमुद्दे'** इति वक्तव्यम्। (**'धातीसंडे'** इति,) यथा लवणसमुद्रगता वक्तव्यतोक्ता तथा धातकीखण्डेऽपि वक्तव्या, नवरमत्र सूर्या द्वादश प्रतिपत्तव्याः **'धायइसंडे दीवे बारस चंदा य सूराय य'** ( ) इति वचनप्रामाण्यात्। ततः षट् सूर्या दक्षिणदिग्चारिभिः जम्बूद्वीपगतलवणसमुद्रगतैः सूर्यैः सह समश्रेण्या प्रतिबद्धाः षट् उत्तरदिग्चारिभि-

स्तेनोद्गमादिविधिः समस्तोऽपि जम्बूद्वीप इव अत्रापि वक्तव्यः, क्षेत्रविभागेन दिवस-रात्रिविभागादिकमपि। तच्चैवं – **'ता जया णं धायइसंडे दीवे दाहिणड्ढे दिवसे हवइ तया णं उत्तरड्ढेवि दिवसे हवइ। जया णं उत्तरड्ढेवि दिवसे भवइ तया णं धायइसंडे दीवे मंदराणं पव्वयाणं पुरच्छिमपच्चच्छिमेणं राई भवइ।'** इत्यादि यावदुत्सर्पिण्यवसर्पिण्यालापकः। **'कालोद'** इति, यथा लवणसमुद्रे वक्तव्यता तथा कालोदधेरपि वेदितव्या, नवरं कालोदे सूर्या द्वाचत्वारिंशत्। तत्रैकविंशतिः दक्षिणदिग्चारिभिः जम्बूद्वीपलवणसमुद्रधातकीखण्डगतैः सह समश्रेण्या सम्बद्धा एकविंशतिरुत्तरदिग्चारिभिः। तत उदयविधिर्दिवसरात्रिविभागादिश्च क्षेत्र-विभागेन तथैव वक्तव्यः। साम्प्रतमभ्यन्तरपुष्करवरार्द्धवक्तव्यतामाह – **'ता अब्भंतरपुक्खरद्धे'**[1] इत्यादि। इदमपि सूत्रं सुगमम्। **'एव'**मित्यादि। **एव**मुक्तेन प्रकारेण **जम्बूद्वीपवक्तव्यता निरवशेषा भणितव्या**। किमुक्तं भवति ? यथा जम्बूद्वीपे उद्गमविधिः क्षेत्रविभागेन दिवसरात्रिविभागो दिवसरात्रिपरिमाणादिकं चोक्तं तथाऽत्रापि वक्तव्यम्, नवरमत्र सूर्या द्वासप्ततिस्तत्र षट्त्रिंशद् दक्षिणदिग्चारि-भिर्जम्बूद्वीपादिगतैः समश्रेण्या प्रतिबद्धाः षट्त्रिंशदुत्तरदिग्चारिभिरिति।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायामष्टमं प्राभृतं समाप्तम्।

* * * * *

आगमं आयरंतेण, अत्तणो हियकंखिणा।
तित्थणाहो गुरू धम्मो, ते सव्वे बहुमण्णिया।।
तणसंथारनिसन्नो वि, मुणिवरो भट्ठरागमयमोहो।
जं पावइ मुत्तिसुहं, कत्तो तं चक्कवट्टीवि।।

---

१. .....पुक्खरवरद्धे - H, T।

नवमं प्राभृतम्

तदेवमुक्तमष्टमं प्राभृतम्। सम्प्रति नवममारभ्यते। तस्य चायमर्थाधिकारः- कतिकाष्ठा पौरुषीच्छाया ? इति। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कतिकट्ठं ते सूरिए पोरिसिच्छायं णिव्वत्तेति आहितेति वदेज्जा ?

टी० 'ता कइकट्ठं ते' इत्यादि। **'ता'** इति पूर्ववत्, कति किम्प्रमाणा काष्ठा प्रकर्षो यस्याः सा कतिकाष्ठा, तां **कतिकाष्ठां** किम्प्रमाणां **ते** तव मते **सूर्यः** पौरुषी पुरुषे भवा पौरुषी तां **पौरुषीछायां निर्वर्त्तयति** निर्वर्त्तयन् **आख्यात इति वदेत्**। किम्प्रमाणां पौरुषीच्छायामुत्पादयन्सूर्यो भगवन् ! त्वया आख्यात इति वदेत् ? इति सङ्क्षेपार्थः।

एवं प्रश्ने कृते भगवानेतद्विषये यावत्यः प्रतिपत्तयः तावतीरुपदर्शयति –

मू० तत्थ खलु इमातो तिण्णि पडिवत्तीओ पण्णत्ताओ, तं० तत्थ एगे एवमाहंसु ता जे णं पोग्गला सूरितस्स लेसं फुसंति ते णं पोग्गला संतप्पंति, ते णं पोग्गला संतप्पमाणा ततणंतराइं बाहिराइं पोग्गलाइं संतावंतीति। एस णं से समिए तावखेत्ते। एगे एवमाहंसु। एगे पुण० ता जे णं पोग्गला सूरियस्स लेसं फुसंति ते णं पोग्गला णो संतप्पंति, ते णं पोग्गला असंतप्पमाणा ततणंतराइं बाहिराइं पोग्गलाइं णो संतावेंतीति। एस णं से समिते तावखेत्ते। एगे एव०। एगे पुण० ता जे णं पोग्गला सूरितस्स लेसं फुसंति ते णं पोग्गला अत्थेगतिता संतप्पंति, अत्थेगतिता णो संतप्पंति। अत्थेगतिया संतप्पमाणा ततणंतराइं बाहिराइं पोग्गलाइं संतावेंति अत्थेगतियाइं णो संतावेंतीति। एस णं से समिते तावखेत्ते। एगे एवमाहंसु।

टी० '**तत्थे**'त्यादि। **तत्र** तस्याः पौरुष्याः छायायाः प्रमाणचिन्तायां प्रथमतस्तापक्षेत्रस्वरूपविषयाः **खलु तिस्रः प्रतिपत्तयः प्रज्ञप्तास्तद्यथा तत्र** तेषां त्रयाणां परतीर्थिकानां मध्ये **एके** प्रथमा **एवमाहुः** '**ता जे ण**'मित्यादि। '**ता**' इति पूर्ववत् **ये** '**ण**'मिति वाक्यालङ्कारे **पुद्गला सूर्यस्य लेश्यां स्पृशन्ति ते पुद्गला** सूर्यलेश्यासंस्पर्शतः **संतप्यन्ते** सन्तापमनुभवन्ति सन्तप्यन्ते इति कर्मकर्त्तरिप्रयोगः, **ते** च **पुद्गलाः सन्तप्यमानास्तदनन्तरान्** तेषां सन्तप्यमानानां पुद्गलानामव्यवधानेन ये स्थिताः पुद्गलास्ते तदनन्तरास्तान्**बाह्यान् पुद्गलान्** सूत्रे च नपुंसकत्वनिर्देशः प्राकृतत्वात्, **सन्तापयन्ति**, इति शब्दः प्रस्तुतवक्तव्यता-परिसमाप्तिसूचकः। '**एस ण**'मित्यादि। **एतत्** एवंस्वरूपं '**से**' **तस्य** सूर्यस्य **सम्मितमु**पपन्नं **तापक्षेत्रम्।** अत्रोपसंहारमाह – '**एगे एवमाहंसु १**'। **एके पुनरेवमाहुः** '**ता**' इति पूर्ववत् **ये** '**ण**'मिति वाक्यालङ्कारे **पुद्गलाः सूर्यस्य लेश्यां स्पृशन्ति ते पुद्गला न सन्तप्यन्ते** न सन्तापमनुभवन्ति, यश्च पीठ-फलकादीनां सूर्यलेश्यासंस्पृष्टानां सन्ताप उपलभ्यते स तदाश्रितानां सूर्यलेश्या-पुद्गलानामेव स्वरूपेण (न) पीठफलकादिगतानां पुद्गलानामिति न प्रत्यक्षविरोधः, **ते** '**ण**'मिति प्राग्वत् **पुद्गला असन्तप्यमानास्तदनन्तरान्बाह्यान्पुद्गलान्** (**न**) **सन्तापयन्ति** नोष्णीकुवन्ति, स्वतस्तेषामसन्तप्तत्वात्, इति शब्दः प्राग्वत्। '**एस ण**'मित्यादि। **एतत्** एवंस्वरूपं '**से**' **तस्य** सूर्यस्य **तापक्षेत्रं सम्मित**मुपपन्नमिति। उपसंहारमाह – '**एगे एवमाहंसु २**'। **एके पुनरेवमाहुः** '**ता**' इति पूर्ववत् **ये पुद्गलाः सूर्यस्य लेश्यां स्पृशन्ति ते पुद्गला** अस्तीति प्राकृतत्वात् निपातत्वात् वा **सन्ति एककाः** केचन ये लेश्यासंस्पर्शतः **सन्पप्यन्ते** सन्तापमनुभवन्ति तथा **सन्त्येककाः** केचन पुद्गला ये **न सन्तप्यन्ते**। तत्र ये **सन्त्येककाः सन्तप्य-मानास्ते तदनन्तरान् बाह्यान् पुद्गलान्** अस्त्येतत् यत् एककान् कांश्चित्**सन्ता-पयन्ति अ[तो]स्त्ये**तत् (यत्) **एककान्** कांश्चिन्न **सन्तापयन्ति**, इति शब्दः पूर्ववत्।

'एस ण'मित्यादि। **एतत्** एवंस्वरूपं **'से' तस्य सम्मित**मुपपन्नं **तापक्षेत्रम्**। अत्रोपसंहारमाह – **'एगे एवमाहंसु'**।

एताश्च तिस्रोऽपि प्रतिपत्तयो मिथ्यारूपास्तथा च एता व्युदस्य भगवान् भिन्नं स्वमतमाह –

मू० वयं पुण एवं वदामो ता जाइं इमाइं चंदिमसूरियाणं देवाणं विमाणेहिंतो लेस्सातो बाहिता (उच्छूढा) अभिणिस्सडातो पयावेंति। एतासि णं लेसाणं अंतरेसु अण्णतरीतो छिण्णलेसातो संमुच्छंति। ततो णं तातो छिण्णलेसाओ संमुच्छितातो समाणिताउ तयणंतराइं बाहिराइं पोग्गलाइं संतावेंतीति। एस णं से समिते तावखेत्ते।

टी० 'वयं पुण' इत्यादि। **वयं पुनरेवं** वक्ष्यमाणेन प्रकारेण **वदामः**। तमेव प्रकारमाह– **'ता [ज](जा)इं'** इत्यादि। **'ता'** इति पूर्ववत् **या इमाः** प्रत्यक्षत उपलभ्यमानाश्चन्द्रसूर्याणां **देवानां** सत्केभ्यो **विमानेभ्यो लेश्या (बहिः) उच्छूढाः**। एतदेव व्याचष्टे – **अभिनिःसृतास्ताः प्रतापयन्ति** बाह्यं यथोचित-माकाशं प्रकाशयन्ति। **एतासां** चेत्थं विमानेभ्यो निःसृतानां **लेश्यानामन्तरेष्व-पान्तरालेषु अन्यतराः च्छिन्नलेश्या** च्छिन्नमूलाः लेश्याः **संमूर्च्छन्ति। ततः च्छिन्नमूला लेश्याः संमूर्च्छिताः सत्यः तदनन्तरान्बाह्यान्पुद्गलान् सन्तापयन्ति,** इति शब्दः पूर्ववत्। **'एस ण'**मित्यादि। **एतत्** एवंस्वरूपं **'से' तस्य** सूर्यस्य **सम्मित**मुपपन्नं **तापक्षेत्र**मिति।

तदेवं तापक्षेत्रस्य स्वरूपसम्भव उक्तः। सम्प्रति किम्प्रमाणां पौरुषीच्छायां निर्वर्त्तयतीत्यवबोद्धुकामः पृच्छति –

मू० ता कतिकट्ठं ते सूरिए पोरिसिच्छातं णिव्वत्तेइ आहिए त्ति वदेज्जा ?

टी० 'ता कइकट्ठं ते' इत्यादि। **'ता'** इति पूर्ववत् **कतिकाष्ठां** (किम्)प्रमाणां

भगवन् ! **त्वया सूर्यः [१]पौरुषीच्छायां निर्वर्त्तयन् आख्यात इति वदेत्**?

एवमुक्ते भगवान् प्रथमतो लेश्यास्वरूपविषये यावत्यः परतीर्थिकानां प्रतिपत्तयस्तावतीरुपदर्शयति –

मू० तत्थ खलु इमातो पणवीसं पडिवत्तीओ पण्णत्ताओ। तत्थेगे एवमाहंसु ता अणुसमयमेव सूरिए पोरिसीच्छायं णिव्वत्तेति आहिए। एवं एएणं अभिलावेणं जातो च्चेव ओयसंठितीए पणुवीसं पडिवत्तीओ तातो चेव णेयव्वातो जाव ता अणुउस्सप्पिणिमेव सूरिए पोरिसीच्छायं णिव्वत्तेइ आहिए त्ति वदेज्जा। एगे एवमाहंसु।

टी० 'तत्थ खलु' इत्यादि। **तत्र** तस्याः पौरुष्याः च्छायाया विषये लेश्यामधिकृत्य **खल्विमाः पञ्चविंशतिः प्रतिपत्तयः प्रज्ञप्तास्तद्यथा तत्र** तेषां पञ्चविंशतेः परतीर्थिकानां मध्ये **एके एवमाहुः 'ता'** इति पूर्ववत्, **अनुसमयमेव** प्रतिक्षणमेव **सूर्यः [१]पौरुषीच्छायां,** इह लेश्यावशतः किल पौरुषीच्छाया भवति, ततः कारणे कार्योपचारात् पौरूषीच्छायेति लेश्या द्रष्टव्या, तां **निर्वर्त्तयन् आख्याता** इति वदेत्। किमुक्तं भवति ? प्रतिक्षणमन्यामन्यां सूर्यो लेश्यां निर्वर्त्तयन् आख्यात इति वदेत्। अत्रोपसंहारमाह – **'एगे एवमाहंसु १।' 'एव'**मित्यादि। एवमुक्तेन प्रकारेण **एतेनानन्तरोदितेनाऽभिलापेन** सूत्रपाठगमेन **या एव ओजःसंस्थितौ पञ्चविंशतिः प्रतिपत्तय** उक्तास्ता **एव** क्रमेणात्रापि **नेतव्यास्तावत् यावत्** चरमप्रतिपत्तिप्रतिपादकमिदं सूत्रं – **'एगे पुण एवमाहंसु ता अणुउस्सप्पिणिमेव सूरिए पोरिसिच्छायं निव्वत्तेइ आहियति वएज्जा।'** मध्यमास्त्वालापका एवं ज्ञातव्याः - **'एगे पुण एवमाहंसु ता अणुमुहुत्तमेव सूरिए पोरीसिच्छायं निव्वत्तेइ आहिय त्ति वएज्जा। एगे एवमाहंसु।'** इत्यादि।

तदेवं लेश्याविषयाः परप्रतिपत्तीरुपदर्श्य सम्प्रति तद्विषयं स्वमतमाह –

१-२. पौरुषीं छायां - T।

मू० वयं पुण एवं वदामो - ता सूरितस्स णं उच्चत्तं च लेसं च पडुच्च छाउद्देसे उच्चत्तं च छायं च पडुच्च लेसुद्देसो लेसं च छायं च पडुच्च उच्चत्तुद्देसे।

टी० '**वयं पुण एवं वदामो**' **वयं पुनरेवं वदामः**, कथमित्याह – '**ता सूरियस्स ण**'मित्यादि। '**ता**' इति पूर्ववत् **सूर्यस्य** '**ण**'मिति वाक्यालङ्कारे [१]**उच्चत्वं च लेश्यां च प्रतीत्य च्छायोद्देशः**। किमुक्तं भवति ? यथा सूर्य उच्चैः उच्चैस्तरामधिरोहति यथा च मध्याह्नादूर्द्ध्वं नीचैर्नीचैस्तरामतिक्रामति, एतदपि [२]लौकिकव्यवहारापेक्षया उच्यते, लौकिका हि प्रथमतो दूरतरवर्त्तिनं सूर्यमुदय-मान[मि](म)तिनीचैस्तरां पश्यन्ति, ततः प्रत्यासन्नं प्रत्यासन्नतरं भवन्तमुच्चैरुच्चैस्तरां मध्याह्नादूर्द्ध्वं च क्रमेण दूरं दूरतरं भवन्तं नीचैर्नीचैस्तरामिति, तथा यथा लेश्याः सञ्चरन्ति तद्यथा अतिनीचैस्तरां वर्त्तमाने सूर्ये सर्वस्यापि प्रका[श](श्य)स्य वस्तुन उपरि प्लवमाना वस्तुनो दूरतः परिपतन्ति, ततः प्रका[श](श्य)स्य वस्तुनो महती महत्तरा च्छाया भवति, उच्चैरुच्चैस्तरां वर्त्तमाने सूर्ये प्रत्यासन्नाः प्रत्यासन्नतराः परिपतन्ति, ततः प्रका[श](श्य)स्य वस्तुनो हीना हीनतरा च्छाया भवति, तत एवं तथा तथा वर्त्तमानं सूर्यस्योच्चत्वं लेश्यां[३] च प्रतीत्य च्छायाया अन्यथा-सम्भवोद्देशो ज्ञातव्यः। इह प्रतिक्षणं तत्तत्पुद्गलोपचयेन तत्तत्पुद्गलहान्या वा यत् च्छायाया अन्यत्वं तत्केवल्येव जानाति, छद्मस्थस्तूद्देशतस्तत उक्तं '**छायोद्देश**' इति। '**उच्चत्तं च च्छायं च पडुच्च लेसोद्देस[त]**' इति, तथा तथा विवर्त्तमानं सूर्यस्योच्चत्वं **छायां** च हीनां हीनतरां अधिकामधिकतरां च तथा तथा भवन्तीं **प्रतीत्य** आश्रित्य लेश्यायाः प्रका[श](श्य)स्य वस्तुनः प्रत्यासन्नं प्रत्यान्नतरं दूरं दूरतरं [४]च परिपतन्त्या उद्देशो ज्ञातव्यः। तथा '**लेसं च छायं च पडुच्च उच्चत्तोद्देस**' इति **लेश्यां** प्रका[श](श्य)स्य वस्तुनो दूरं दूरतरमासन्नमासन्नतरं परिपतन्तीं, **छायां**

१. उच्चत्वं लेश्यां च - E,K। २. लोकव्यवहारा...- E। ३. लेश्यां तु प्रतीत्य- E। ४. वा - H।

च हीनां हीनतरामधिकामधिकतरां च भवन्तीं **प्रतीत्य** सूर्यगतस्योच्चत्वस्य तथा तथा विवर्त्तमानस्य उद्देशो ज्ञातव्यः। किमुक्तं भवति ? त्रीण्यप्येतानि प्रतिक्षणमन्यथा २ विवर्त्तन्ते। तत एकतरस्य तथा तथा विवर्त्तमानस्योद्देशतः उपलम्भादितरस्या-प्युद्देशतोऽवगमः कर्त्तव्य इति।

तदेवं लेश्यास्वरूपमुक्तम्। सम्प्रति पौरुष्याः च्छायायाः परिमाणविषये परतीर्थिकप्रतिपत्तिसम्भवं कथयति–

मू० तत्थ खलु इमातो दो पडिवत्तीतो पण्णत्ताओ - तत्थेगे एवमाहंसु - ता अत्थि णं से दिवसे जंसि च णं दिवसंसि सूरिते चउपोरिसिच्छातं णिव्वत्तेति, अत्थि णं से दिवसे जंसि णं दिवसंसि सूरिए दुपोरिसिच्छायं णिव्वत्तेति आहिए त्ति वदेज्जा। एगे एवं०। एगे पुण० ता अत्थि णं से दिवसे जंसि च णं दिवसंसि सूरिए [1]दुपोरिसीतं छायं णिव्वत्तेति, अत्थि णं से दिवसे जंसि च णं दिवसंसि सूरिए ण किंचिवि पोरिसिच्छातं णिव्वत्तेति आहिए त्ति वदेज्जा। तत्थ जे ते एवमाहंसु अत्थि णं से दिवसे जंसि च णं दिवसंसि सूरिए चउपोरिसिच्छातं णिव्वत्तेति अत्थि णं से दिवसे जंसि च णं दिवसंसि सूरिए दुपोरिसिच्छायं णिव्वत्तेति ते णं एवमाहंसु - ता जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमित्ता चारं चरति तता णं उत्तम० उक्कोसे० दिवसे जह० दुवालस० राती भवति। तंसि च णं दिवसंसि सूरिए चउपोरिसिच्छातं णिव्वत्तेति, तं जहा उग्गमणमुहुत्तंसि अत्थमणमुहुत्तंसि, तल्लेसं अभिवड्ढेमाणे [वा] (नो चेव णं) निव्वेड्ढेमाणे [वा]। ता जता णं सूरिए सव्वबाहिरं मंडलं

---

१. दुपोरिसीतछायं - H।

उवसंकमित्ता चारं चरति तता णं उत्तम० अट्ठा० राती जहण्णए दुवालस० दिवसे भवति। तंसि च णं दिवसंसि सूरिए दुपोरिसिच्छायं निव्वत्तेइ तं० उग्गमणमुहुत्तंसि अत्थमणमुहुत्तंसि, लेसं अभिवड्ढेमाणे नो चेव णं निवुड्ढेमाणे। तत्थ णं जे एवमाहंसु ता अत्थि णं से दिवसे जंसि च णं दिवसंसि सूरिए (दु)पोरिसिच्छायं निव्वत्तेइ अत्थि णं से दिवसे जंसि च णं दिवसंसि सूरिए न किंचिवि पोरिसिच्छायं निव्वत्तेइ, ते णं एवमाहंसु - ता जया णं सूरिए सव्वब्भंतरं मंडलं जाव चरइ तया णं उत्तम० अट्ठा० दिवसे भवइ जह० दुवा० राई भवइ। तंसि च णं दिवसंसि सूरिए दुपोरिसिच्छायं निव्वत्तेइ, तं० उग्गमणमुहुत्तंसि अत्थमणमुहुत्तंसि, लेसं अभिवड्ढेमाणे नो चेव णं निव्वेड्ढेमाणे। ता जया णं सूरिए सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरइ तया णं (उत्तम०) अट्ठा० राई जह० दुवा० दिवसे। तंसि च णं दिवसंसि सूरिए ण किंचिवि पोरिसिच्छातं णिव्वत्तेति, तं० उग्गमणमुहुत्तंसि अत्थमणमुहुत्तंसि य णो चेव णं लेस्सं अभिवड्ढेमाणे वा निवुड्ढेमाणे वा।

टी० '**तत्थे**'त्यादि। **तत्र** तस्याः पौरुष्याः छायायाः परिमाणचिन्ता[यां](या) विषये **खल्विमे द्वे प्रतिपत्ती प्रज्ञप्ते**, तद्यथा – **तत्र** तेषां द्वयानां परतीर्थिकानां मध्ये **एके एवमाहुरस्ति स दिवसो यस्मिन् दिवसे सूर्य** उद्गमनमुहूर्त्ते अस्तमयमुहूर्त्ते च [१]**चतुःपौरुषीं** चतुःपुरुषप्रमाणां पुरुषग्रहणमुपलक्षणं तेन सर्वस्यापि प्रका[श](श्य)स्य वस्तुनश्चतुर्गुणां **च्छायां निर्वर्त्तयति, अस्ति स दिवसो यस्मिन्दिवसे** उद्गमनमुहूर्त्ते [२]अस्तमनमुहूर्त्ते च [३]**द्विपौरुषीं** द्विपुरुषप्रमाणां **च्छायां निर्वर्त्तयति सूर्यः**, अत्रापि पुरुषग्रहणमुपलक्षणं ततः सर्वस्यापि वस्तुनः

१. चउपोरिसिच्छातं - मूले। २. अस्तमयमुहूर्त्ते - D, G। ३. दुपोरिसिच्छायं - मूले।

प्रका[श](श्य)स्य द्विगुणां च्छायां निर्वर्त्तयतीति द्रष्टव्यम्। [१]अत्रोपसंहारमाह – **'एगे एवमाहंसु।' एके पुनरेवमाहुः** - 'ता' इति पूर्ववत् **अस्ति स दिवसो यस्मिन्दिवसे** उद्गमनमुहूर्त्ते अस्तमयमुहूर्त्ते च **सूर्यो द्विपौरुषीं** पुरुषद्वयप्रमाणां **च्छायां निर्वर्त्तयति,** पुरुषग्रहणस्योपलक्षणत्वात् सर्वस्यापि प्रका[श](श्य)स्य वस्तुनो द्विगुणां च्छायां निर्वर्त्तयतीत्यर्थः। तथा **अस्ति स दिवसो यस्मिन्दिवसे** अस्तमयमुहूर्त्ते उद्गमनमुहूर्त्ते च **(सूर्यः) न काश्चिदपि [२]पौरुषीं च्छायां निर्वर्त्तयति।** सम्प्रत्येते एव मते भावयति – **'तत्थे'**त्यादि। **तत्र** तेषां द्वयानां मध्ये **ये ते** वादिन **एवमाहुः 'अस्ति स दिवसो यस्मिन्दिवसे [३]चतुःपौरुषीं च्छायां सूर्यो निर्वर्त्तयति, अस्ति स दिवसो यस्मिन् दिवसे सूर्यो [४]द्विपौरुषीं च्छायां निर्वर्त्तयति।' ते एवं** स्वमतविभावनार्थमाहुः – **'ता जया ण'**मित्यादि। **तत्र यदा** यस्मिन्काले **'ण'**मिति वाक्यालङ्कारे **(सूर्यः) [५]सर्वाभ्यन्तरं मण्डल-मुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्त उत्कर्षकोऽष्टादशमुहूर्त्तो दिवसो भवति जघन्या द्वादशमुहूर्त्ता रात्रिः। तस्मिंश्च दिवसे सूर्यश्च[६]तुःपौरुषीं** चतुः-पुरुषप्रमाणां **च्छायां निर्वर्त्तयति, तद्यथा – उद्गमनमुहूर्त्ते अस्तमनमुहूर्त्ते** च, [७]चतुःपौरुषीं छायां निर्वर्त्तयति **लेश्यामभिवर्द्धयन्** प्रका[श](श्य)स्य वस्तुन उपरि प्लवमानां दूरतरं परिक्षिपन् **'नो[च्चैः न] (चेव)' नैव निर्वेष्टयन्** प्रका[श](श्य)वस्तुन उपरि प्लवमानां प्रत्यासन्नं प्रत्यासन्नतरां परिक्षिपन्, तथा सति च्छायाया हीन-हीनतरत्वसम्भवात्। **'ता जया ण'**मित्यादि। **तत्र यदा (सूर्यः) सर्वबाह्यं मण्डल-मुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्ता उत्कर्षिका अष्टादशमुहूर्त्ता रात्रिर्भवति जघन्यो द्वादशमुहूर्त्तो दिवसः, तस्मिंश्च दिवसे सूर्यो [८]द्विपौरुषीं** पुरुषद्वयप्रमाणां **च्छायां निर्वर्त्तयति तद्यथा – उद्गमनमुहूर्त्ते [९]अस्तमनमुहूर्त्ते** च,

---

१. अत्रोपसंहारः H, I, K, M, T। २. पोरिसिच्छातं - मूले। ३. चउपोरिसिच्छातं - मूले।
४. दुपोसिच्छायं - मूले। ५. सर्वाभ्यन्तरमण्डल..... - D। ६. चउपोरिसिच्छातं - मूले।
७. चतुःपौरुषीछायां - D, G,। ८. दुपोरिसिच्छायं - मूले। ९. अस्तमयमुहूर्त्ते - B।

तदा द्विपौरुषीं च्छायां निर्वर्त्तयति **लेश्यामभिवर्द्धयन्नो चैव निर्वेष्टयन्**, अस्य वाक्यस्य भावार्थः प्राग्वद्भावनीयः। **तत्र** तेषां द्वयानां मध्ये **ये** वादिन **एवमाहुः 'अस्ति स दिवसो यस्मिन्दिवसे सूर्यो [१]द्विपौरुषीं छायां निर्वर्त्तयति, अस्ति स दिवसो यस्मिन् दिवसे सूर्यो न काश्चिदपि पौरुषीच्छायां निर्वर्त्तयति' ते एवं** स्वमतविभावनार्थमाचक्षते – **'ता जया ण'**मित्यादि। **तत्र यदा सूर्यः [२]सर्वाभ्यन्तरं मण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्त उत्कर्षकोऽष्टादशमुहूर्त्तो दिवसो भवति जघन्या द्वादशमुहूर्त्ता रात्रिः, तस्मिंश्च दिवसे सूर्यो [३]द्विपौरुषीं च्छायां निर्वर्त्तयति, तद्यथा उद्गमनमुहूर्त्ते अस्तमयमुहूर्त्ते** च, स च तदानीं द्विपौरुषीं च्छायां निर्वर्त्तयति **लेश्यामभिवर्द्धयन्नो चैव निर्वेष्टयन्**। **'ता जया ण'**मित्यादि। **तत्र यदा 'ण'**मिति वाक्यालङ्कारे **सूर्यः सर्वबाह्यमण्डलमुपसङ्क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्ता उत्कर्षिका अष्टादशमुहूर्त्ता रात्रिः जघन्यो द्वादशमुहूर्त्तप्रमाणो दिवसः, तस्मिंश्च दिवसे उद्गमनमुहूर्त्ते [४]अस्तमयमुहूर्त्ते च सूर्यो न काश्चिदपि [५]पौरुषीं च्छायां निर्वर्त्तयति। 'नो चेव ण'**मित्यादि। **न** च नैव तदानीं सूर्यो **लेश्यामभिवर्द्धयन्** भवति **निर्वेष्ट[यित्](यन्) वा,** अभिवर्द्ध[यते](ने) अधिकाधिकतराया निर्वेष्टने हीनहीनतरायाश्छायायाः सम्भवप्रसङ्गात्।

तदेवं परतीर्थिकप्रतिपत्तिद्वयं श्रुत्वा भगवान् गौतमः स्वमतं पृच्छति –

मू० ता कतिकट्ठं ते सूरिए पोरिसिच्छायं णिव्वत्तेति आहिते ति (वदेज्जा ?)

टी० 'ता कइकट्ठ'मित्यादि। यद्येवं परतीर्थिकानां प्रतिपत्ती **'ता'** तर्हि भगवन्! स्वमतेन **त्वया कतिकाष्ठां** किम्प्रमाणां **सूर्यः [६]पौरुषीं च्छायां निर्वर्त्तयन् आख्यात इति वदेत्** ?

---

१. पौरूषीं छायां - B, T, दुपोरिसिच्छायं - मूले। २. सर्वाभ्यन्तरमण्डल ... A, B, I। ३. दुपोरिसिच्छायं - मूले। ४. अस्तमनमुहूर्त्ते - T। ५. पोरिसिच्छातं - मूले। ६. पोरिसिच्छायं - मूले।

तत्र भगवान् स्वमतेन देशविभागतः पौरुषीं च्छायां तथा तथा अनियत-प्रमाणां वक्ष्यति परतीर्थिकास्तु प्रतिनियतामेव प्रतिदिवसं देशविभागेनेच्छन्ति। अतस्तन्मतान्येव प्रथमत उपदर्शयति–

मू० तत्थ खलु इमातो छण्णवती पडिवत्तिओ (पण्णत्ताओ। तं०) तत्थेगे एवमाहंसु - ता अत्थि णं से देसे जंसि च णं देसंसि सूरिए एगपोरिसिच्छातं णिव्वत्तेति आहिते ति। एगे०। एगे पुण० ता अत्थि णं से देसे जंसि च णं देसंसि सूरिए दुपोरिसिच्छातं णिव्वत्तेति आहिए ति। एवं एएणं अभिलावेणं (णेयव्वं) जाव छण्णउतिं पोरिसिच्छायं णिव्वत्तेति आहिते ति। तत्थ जे ते एव० ता अत्थि णं से देसे जंसि णं देसंसि सूरिए एगपोरिसीच्छायं णिव्वत्तेति ते णं एवमाहंसु ता सूरि[ए]तस्स णं सव्वहिट्ठिमातो सूरपडिहीतो बाहिता अभिणिस्सडाहिं लेस्साहिं ताडिज्जमाणाहिं इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जातो भूमिभागातो जावतितं सूरिए उड्ढं उच्चत्तेणं एवइयाए एगाए अद्धाए एगेणं छायाणुमाणप्पमाणेणं उमाए एत्थ णं से सूरिए एगपोरिसिच्छातं णिव्वत्तेति। तत्थ जे ते एवमाहंसु अत्थि णं से देसे जंसि च णं देसंसि सूरिए दुपोरिसिच्छायं णिव्वत्तेति ते णं एवमाहंसु - ता सूरितस्स णं सव्वहेट्ठिमातो सूरियपडिहीतो बहिआ अभिणिस्सताहिं लेसाहिं ताडिज्जमाणाहिं इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जातो भूमिभागातो जावइतं सूरिए उड्ढं उच्चत्तेणं - एवतिताहिं दोहिं अद्धाहिं दोहिं च्छायाणुमाणप्पमाणेहिं उमाए तत्थ णं से सूरिए दुपोरिसिच्छातं णिव्वत्तेति। एवं एक्केक्काए पडिवत्तीए भाणितव्वं जाव छण्णउतिमा पडिवत्ती। एगे एवमाहंसु।

टी० '**तत्थे**'त्यादि। **तस्मिन्देशविभागेन** प्रतिदिवसं प्रतिनियतायाः पौरुष्याः च्छायाया विषये **षण्णवतिप्रतिपत्तयः प्रज्ञप्तास्तद्यथा तत्र** तेषां षण्णवतेः परतीर्थिकानां मध्ये **एके एवमाहुः** - '**ता**' इति पूर्ववत्, **अस्ति स देशो यस्मिन्देशे** आगतः सन् (**सूर्य**) **एकपौरुषीमे**[१]कपुरुषप्रमाणां पुरुषग्रहणमुपलक्षणं सर्वस्यापि प्रका[श](श्य)स्य वस्तुनः स्वप्रमाणां **छायां निर्वर्त्तयति**। अत्रोपसंहारः '**एगे एवमाहंसु १।**' **एके पुनरेवमाहुरस्ति स देशो यस्मिन्देशे** समागतः **सूर्यो द्विपौरुषीं**[२] द्विपुरुषप्रमाणां पुरुषग्रहणस्योपलक्षणत्वात् सर्वस्यापि वस्तुनः प्रका[श]-(श्य)स्य द्विगुणामित्यर्थः **छायां निर्वर्त्तयति**। अत्रोपसंहारः '**एगे एवमाहंसु।**' '**एव**'मित्यादि। **एवमुक्तेन** प्रकारेण **एतेनानन्तरोदितेनाभिलापेन** सूत्रपाठगमेन शेषप्रतिपत्तिगतमपि सूत्रं **नेतव्यं** तावत् **यावत्** चरमप्रतिपत्तिगतं सूत्रम्। तदेव खण्डशो दर्शयति '**छन्नउइं**' इत्यादि। एतच्चैवं परिपूर्णं द्रष्टव्यं – '**एगे पुण एवमाहंसु अत्थि णं से देसे जंसि देसंसि सूरिए छन्नउइं पोरिसिं**[३] **छायं निव्वत्ते(ति) आहियत्ति वएज्जा, एगे एवमाहंसु।**' मध्यमप्रतिपत्तिगतास्त्वा-लापकाः सुगमत्वात् स्वयं परिभावनीयाः। सम्प्रत्येतासामेव षण्णवतिप्रतिपत्तीनां भावनिकां चिकीर्षुराह- '**तत्थे**'त्यादि। **तत्र** तेषां षण्णवतेः परतीर्थिकानां मध्ये **ये ते** वादिन **एवमाहुरस्ति स देशो यस्मिन्देशे** समायातः **सूर्य एकपौरुषीं**[४] प्रका[श](श्य)स्य वस्तुनः स्वप्रमाणां **छायां निर्वर्त्तयति ते एवं** स्वमतविभावनार्थ-**माहुः** '**ता सूरियस्स ण**'मित्यादि। '**ता**' इति पूर्ववत् **सूर्यस्य सर्वाधस्तनात् सू[यं](र्य)प्रति[विनात्](धेः)** सूर्यनिवेशादित्यर्थः **बहिर्निःसृता** या लेश्यास्ताभिः '**ताडिज्जमाणाहिं**' ऊर्द्ध्वं **ताड्यमानाभिरस्या रत्नप्रभायाः पृथिव्या बहुसम-रमणीयात् भूमिभागात् यावति सूर्य ऊर्द्ध्वमुच्चैस्त्वेन व्यवस्थितः एतावता एकेनाऽध्वना,** अध्वशब्दस्य स्त्रीत्वेन निर्देशः प्राकृत्वात्, **एकेन** च **च्छाया-**

१. एगपोरिसिच्छातं - मूले। २. दुपोरिसिच्छातं - मूले। ३. पोरिसिच्छायं - मूले। ४. एगपोरिसीच्छायं - मूले।

ऽनुमानप्रमाणेन प्रका[श](श्य)स्य वस्तुनो यदुद्देशतः प्रमाणमनुमीयते तेन, [च] इहाकाशदेशे [१]सूर्यस्य समीपे प्रका[श](श्य)स्य वस्तुनो न साक्षात्परिमाणं परिग्रहीतुं शक्यते किन्तूद्देशतो अनुमानेन ततश्छायानुमानप्रमाणेनेत्युक्तं **'उमाए'**त्ति **अवमितः** परिच्छिन्नो यो देशः प्रदेशः तस्मिन्प्रदेशे आगतः सन् **सूर्यः [२]एकपौरुषीं** पुरुषग्रहणस्योपलक्षणत्वात् सर्वस्य प्रका[श](श्य)स्य वस्तुनः स्वप्रमाणभूतां **च्छायां निर्वर्त्तयति**। इयमत्र भावना - प्रथमत उदयमाने सूर्ये या लेश्या विनिर्गत्य प्रकाशमाश्रितास्ताभिः प्रकाश्यवस्तुप्रदेशे ऊर्द्ध्वं क्रियमाणाभिः किञ्चित्[स](पू)र्वाभिमुखमवनता[नि](भिः) प्रकाश्येन (च) वस्तुना यः सम्भाव्यते परिच्छिन्नप्रकाशप्रदेशस्तत्रागतः सूर्यः प्रकाश्यवस्तुप्रमाणां च्छायां निर्वर्त्तयति, एवमुत्तरत्रापि भावना कार्या। **'तत्थे'**त्यादि। **तत्र ये ते** वादिन **एवमाहुरस्ति स देशो यस्मिन्देशे** समागतः **सूर्यो [३]द्विपौरुषीं छायां निर्वर्त्तयति ते एवं** स्वमतविस्फारणार्थ**माहुः 'ता सूरियस्स ण'**मित्यादि। **'ता'** इति पूर्ववत् **सूर्यस्य सर्वाऽधस्तनात्सूर्यप्रति[नि]धेः** सूर्यनिवेशाद्**बहिर्निः**सृताभिः **लेश्याभिस्ताड्यमानाभिरस्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद्भूमिभागादूर्द्ध्वमुच्चैस्त्वेन** व्यवस्थितः, **एतावद्भ्यां द्वाभ्यामध्वाभ्यां** च **छायानुमानप्रमाणाभ्यामवमितः** परिच्छिन्नो यो देशस्**तत्र** समागतः **सूर्यो [४]द्विपौरुषीं छायां** [५]प्रका[श](श्य)स्य वस्तुनो द्विगुणां छायां **निर्वर्त्तयति**। **एवमेकैकप्रतिपत्तावे**कैकाध्वभागैकैकच्छायानुमानप्रमाणवृद्ध्या तावन्नेतव्यं **यावत् षण्णवतितमा प्रतिपत्तिः**, तद्गतानि च सूत्राणि स्वयं परिभावनीयानि सुगमत्वात्।

तदेवमुक्ताः परतीर्थिकप्रतिपत्तयः। सम्प्रति स्वमतमुपदर्शयति –

मू० वयं पुण एवं वदामो - सातिरेगअगुणट्ठिपोरिसी णं सूरिए

---

१. सूर्यसमीपे - C, G। २. एगपोरिसिच्छातं - मूले। ३. दुपोरिसिच्छायं - मूले। ४. दुपोरिसिच्छातं - मूले। ५. प्रकाश्यवस्तुनो - T।

पोरिसिच्छायं णिव्वत्तेति आहिते ति वदेज्जा। ता अवड्ढापोरिसी णं च्छाया दिवसस्स किं गते वा सेसे वा ? ता तिभागे गते वा सेसे वा। ता पोरिसी णं छाया दिवसस्स किं गते वा सेसे वा ? ता चउब्भागे गते वा सेसे वा। ता दिवड्ढपोरिसी णं छाया दिवसस्स किं गते वा सेसे वा ? ता पंचभागे गते वा सेसे वा। एवं [1]अड्ढपोरिसीच्छाया छोढुं छोढुं पुच्छा [2]दिवसभागं छोढुं छोढुं वागरणं जाव ता अगुणसट्ठिपोरिसी णं छाया दिवसस्स किं गए वा सेसे वा ? ता वीससतभागे गते वा सेसे वा। (ता) सातिरेग-अगुणसट्ठिपोरिसी णं छाया दिवसस्स किं गए वा सेसे वा ? ता णत्थि किंचि गए वा सेसे वा।

टी० वयं पुनरेवं वक्ष्यमाणेन प्रकारेण **वदाम**स्तमेव प्रकारमाह – **'साइरेगे'**त्यादि। सूर्य उद्गमनसमये [3]अस्तमनसमये च **सातिरेकैकोनषष्टिपुरुष-प्रमाणां छायां निर्वर्त्तयति**। एतदेवाविर्भावयिषुराह – **'ता अवड्ढे'**त्यादि। अपगतमर्द्धं यस्याः सा अपार्द्धा, सा चासौ पौरुषी च **अपार्द्धपौरुषी छाया** पुरुषग्रहणस्योपलक्षणत्वात् सर्वस्यापि [4]प्रका[श](श्य)स्य वस्तुनोऽर्द्धप्रमाणा [5]छाया, एवमुत्तरत्राप्युपलक्षणव्याख्यानं द्रष्टव्यम्, **दिवसस्य किं गते** कतितमे भागे गते **शेषे वे**ति कतितमे च भागे [6]शेषे वा भवति ? भगवानाह – **'ता'** इत्यादि। **'ता'** इति पूर्ववत्, दिवसस्य **त्रिभागे गते** भवति दिवसस्य त्रिभागे वा **शेषे**। **'ता'** इत्यादि। **पौरुषी** पुरुषप्रमाणा प्रका[श](श्य)स्य वस्तुनः प्रमाणा इत्यर्थः, **छाया किं गते** कतितमे भागे गते **शेषे वे**ति कतितमे भागे शेषे वा भवति ? भगवानाह – दिवसस्य **चतुर्भागे** [7]**गते** चतुर्भागे **शेषे वा**। इयं च [8]प्रका[श](श्य)स्य

---

१. अवड्ढ...- H, U। २. दिवसस्स भागं - U, V। ३. अस्तमयन...- T। ४. प्रकाश्यवस्तुनो -T। ५. प्रमाणछाया - T। ६. शेषे भवति - E, T। ७. गते शेषे वा - T। ८. प्रकाश्यवस्तुनः - T।

वस्तुनः स्वप्रमाणभूता छाया अन्यत्र ग्रन्थान्तरे [१]सर्वाभ्यन्तरं मण्डलमधिकृत्योक्ता। तथा च **नन्द्यध्ययनचूर्णिग्रन्थः – 'पुरिसत्ति संकू पुरिसत्ति सरीरं वा ततो पुरिसे निप्फण्णा पोरिसी। एवं सव्वस्स वत्थुणो यदा स्वप्रमाणा छाया भवति तदा पोरिसी हवइ, एयं पोरिसीपमाणं उत्तरायणस्स अंते द[क्षि](क्खि)णायणस्स आईए एकं दिणं भवइ। अतो परं अट्ठ एगसट्ठिभागा अंगुलस्स द[क्षि](क्खि)णायणे वड्ढंति उत्तरायणे हस्संति। एवं मंडले मंडले अण्णा पोरिसी[२]।'** इति। तत इदं सकलमपि पौरुषीविभागप्रमाणप्रतिपादनं सर्वाभ्यन्तरं मण्डलमधिकृत्यावसेयम्। तथा **'ता'** इति पूर्ववत् **द्व्यर्द्धपौरुषी** सार्द्धपुरुषप्रमाणा **छाया** दिवसस्य **किं**विभागे कतितमे भागे **गते** भवति किं **शेषे** कतितमे भागे शेषे ? भगवानाह – **'ता'** इति पूर्ववत् दिवसस्य **पञ्चमे भागे गते वा** भवति **शेषे वा** पञ्चमे भागे। **'एव'**मित्यादि। **एव**मुक्तेन प्रकारेण **अर्द्धपौरुषीं** अर्द्धपुरुषप्रमाणां **छायां क्षिप्त्वा २** पृच्छासूत्रं द्रष्टव्यम्, **'दिवसभागं'**ति पूर्व-पूर्वसूत्रापेक्षया एकैकमधिकं **दिवसभागं क्षिप्त्वा क्षिप्त्वा व्याकरण**मुत्तरसूत्रं ज्ञातव्यम्। तच्चैवं – **'बिपोरुसी णं छाया किं गए वा सेसे वा ? ता छब्भागे गए वा सेसे वा। ता अड्ढाइज्जपोरिसी णं छाया किं गए वा सेसे वा ? ता सत्तभा[ग](गे) गए वा सेसे वा।'** इत्यादि। [३]तच्च तावत् **यावत् 'ता उगुणसट्ठी'**त्यादि, सुगमम्। सातिरेकैकोनषष्टिपौरुषीछाया दिवसस्य प्रारम्भसमये पर्यन्तसमये वा। तत आह – **'ता नत्थि किंचि गते वा सेसे वा।'** इति।

सम्प्रति छायाभेदान्व्याचष्टे –

मू० तत्थ खलु इमा पणुवीसतिविहा छाता पण्णत्ता, तं जहा- खंभच्छाया रज्जुच्छाया पासातच्छाया पागारच्छाया उत्तरच्छाया उच्चत्तच्छाया अणुलोमच्छाया पडिलोमच्छाया आरुहिता उवहिता

१. सर्वाभ्यन्तरमण्डल - E। २. पोरिसीछाया - T। ३. एतच्च - E, M।

समा पडिहता खीलच्छाया पक्खच्छाया पुरतोउदग्गा पिट्ठतोउदग्गा पुरिमकट्ठभागोवगता छायाणुवादिणी कट्ठाणुवादिणी सट्ठाणुवादिणीछाता छायाछाया छायावकंपे दिहास सगंडच्छाया गोलच्छाया।

टी० '**तत्थे**'त्यादि। **तत्र** तस्यां छायायां विचार्यमाणायां **खल्वियं पञ्चविंशतिविधा छाया प्रज्ञप्ता, तद्यथा** – '**खंभच्छाये**'त्यादि प्रायः सुगमं, विशेषव्याख्यानं चामीषां पदानां शास्त्रान्तरात् यथासम्प्रदायाद् वा वाच्यम्।

'**गोलच्छाये**'त्युक्तं ततस्तामेव गोलच्छायां भेदत आह –

मू० तत्थ खलु इमा अट्ठविहा गोलच्छाया पण्णत्ता, तं जहा- गोलच्छाया अवड्ढगोलच्छाया गोलगोलच्छाया अवड्ढगोलगोलच्छाया गोलावलिच्छाया अवड्ढगोलावलिच्छाया गोलपुंजछाया अवड्ढ-गोलपुंजच्छाया।

णवमं पाहुडं समत्तं ९।

टी० '**तत्थे**'त्यादि। **तत्र** तासां पञ्चविंशतेः छायानां मध्ये **खल्वियं गोलच्छाया अष्टविधा प्रज्ञप्ता, तद्यथा – गोलच्छाया** - गोलमात्रस्य या छाया गोलछाया, अपार्द्धस्यार्द्धमात्रस्य गोलस्य छाया **अपार्द्धगोलच्छाया,** गोलैर्बहुभिर्मीलित्वा यो निष्पादित एको गोलः स गोलगोलस्तस्य च्छाया **गोलगोलच्छाया,** अपार्द्धस्यार्द्धमात्रस्य गोलगोलस्य च्छाया **अपार्द्धगोलगोलच्छाया,** गोलानामावलिस्तस्याश्छाया **गोलावलिच्छाया,** अपार्द्धाया गोलावलेः छाया **अपार्द्ध-गोलावलिच्छाया,** गोलानां पुञ्जो गोलोत्कर इत्यर्थः, तस्य छाया **गोल-पुञ्जछाया,** अपार्द्धस्य गोलपुञ्जस्य छाया **अपार्द्धगोलपुञ्जच्छाया**।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां नवमं प्राभृतं समाप्तम्।

* * * * *

दशमं प्राभृतम्
प्रथमं प्राभृतप्राभृतम्

तदेवमुक्तं नवमं प्राभृतम्। सम्प्रति दशममारभ्यते। तस्य चायमर्थाधिकारो- यथा योग इति किं भगवन् ! त्वया समाख्यायते ? इति। ततस्तद्विषयं निर्वचनसूत्रमाह –

मू० ता जोगे(त्ति) वत्थुस्स आवलितानिपाते आहिताति वदेज्जा।

टी० 'ता जोगे[इ]त्ति वत्थुस्सेत्यादि। **'ता'** इति आस्तां तावदन्यत्कथनीय- मिदानीं **तावदे**तदेव कथ्यते **योग इति वस्तुनो** नक्षत्रजातस्य **'आवलिगा- निवातो'**त्ति आवलिकया क्रमेण निपातश्चन्द्रसूर्यैः सह सम्पात **आख्यातो** मये**ति वदेत्** स्वशिष्येभ्यः।

एवमुक्ते भगवान् गौतमः पृच्छति –

मू० ता कहं ते जोगवत्थुस्स आवलिणिवाते आहितेति?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत् **कथं** केन प्रकारेण भगवन् **त्वया** योग इति **योगवस्तुनो** नक्षत्रजात**स्यावलिकानिपातः** स **आख्यात** इति वदेत्?

भगवानाह –

मू० तत्थ खलु इमातो पंच पडिवत्तीओ पण्णत्तातो। तत्थ एगे एवमाहंसु - ता सव्वे वि णं णक्खत्ता कत्तितादीया भरणिपज्जवसिता आहिता। एगे एव० (१)। एगे पुण० ता सव्वे वि णं णक्खत्ता महादीया असिलेसपज्जवसिता आहिता। एगे एव० २। एगे पुण० ता सव्वे वि णं णक्खत्ता धणिट्ठातीता सवणपज्जवसिता आहिता। एगे० ३। एगे पुण० ता सव्वे वि णं णक्खत्ता अस्सिणिआदिता रेवतिपज्जवसिता आहिता। एगे० (४)। एगे पुण० ता सव्वेवि (णं)

णक्खत्ता भरणितादिता अस्सिणीपज्जवसिता आहिता। एगे एवमाहंसु (५)।

टी० '**तत्थ खलु**' इत्यादि। **तत्र** तस्मिन्नक्षत्रजातस्यावलिकानिपातविषये **खल्विमाः पञ्च प्रतिपत्तयः** परतीर्थिकाभ्युपगमरूपाः **प्रज्ञप्तास्तद्यथा** – **तत्र** तेषां पञ्चानां परतीर्थिकानां मध्ये **एके** परतीर्थिका **एवमाहुः** – '**ता**' इति पूर्ववत् **सर्वाण्यपि नक्षत्राणि कृत्तिकादीनि भरणिपर्यवसानानि** [1]प्रज्ञप्तानि, [स्त्रीत्वे](सूत्रे) पुंस्त्वनिर्देशः प्राकृतत्वात्। तत्रैवोपसंहारमाह – '**एगे एवमाहंसु**'। एवं शेषप्रतिपत्तिचतुष्टयगतान्यपि सूत्राणि परिभावनीयानि।

तदेवं (पर)प्रतिपत्तीरुपदर्श्य सम्प्रति स्वमतमुपदर्शयति –

मू० वयं पुण एवं वदामो- ता सव्वेवि णं णक्खत्ता अभिजिता(दीता) उत्तरासाढापज्जवसिता आहिता ति वदेज्जा। तं जहा- अभियी सवणो धणिट्ठा सतभिसता पुव्वभद्दवया उत्तरभद्दवया रेवती अस्सिणी भरणी कत्तिया रोहिणी मिगसिरं अद्दा पुणव्वसू पुस्सो असिलेसा महा पुव्वाफग्गुणी उत्तरफग्गुणी हत्थो चित्ता साती विसाहा अणुराहा जेट्ठा मूलो पुव्वासाढा उत्तरासाढा।

दसमस्स पढमं १।

टी० '**वयं पुण**' इत्यादि। **वयं पुनरेवं** वक्ष्यमाणेन प्रकारेण **वदामस्तमेव** प्रकारमाह – '**ता सव्वे वि ण**'मित्यादि। '**ता**' इति पूर्ववत्, **सर्वाण्यपि नक्षत्राण्यभिजिदादीनि उत्तराषाढापर्यवसानानि** [2]प्रज्ञप्तानि। कस्मादिति चेत्? उच्यते, इह सर्वेषामपि सुषमसुषमादिरूपाणां कालविशेषाणामादिर्युगं '**एए उ सुसमसुसमादयो अद्धाविसेसा जुगाइणा सह पवत्तंते जुगंतेण सह समप्पंती**'ति **श्रीपादलिप्तसूरि**वचनप्रामाण्यात्, युगस्य चादिः प्रवर्त्तते श्रावणे [3]मासे बहुलपक्षे

१. 'आहिता' - मूले। २. 'आहिता' - मूले। ३. मासि - N।

प्रतिपदि तिथौ बालवकरणे अभिजिति नक्षत्रे चन्द्रेण सह योगमुपगच्छति, तथा चोक्तं **ज्योतिष्करण्डके - 'सावणबहुलपडिवए बालवकरणे अभीइनक्खत्ते। सव्वत्थ पढमसमये जुगस्स आ[यं](इं) वियाणाहि॥५९॥'** अत्र सर्वत्रेति भरते ऐरावते महाविदेहे च, शेषं सुगमम्। तत इत्थं सर्वेषामपि कालविशेषाणामादौ चन्द्रयोगमधिकृत्याभिजिन्नक्षत्रस्य वर्त्तमानत्वादभिजिदादीनि नक्षत्राणि प्रज्ञप्तानि, तान्येव **तद्यथे**त्यादिनोपदर्शयति – **'अभिइ समणो'** इत्यादि।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य प्रथमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

पराभूतोऽपि पुण्यात्मा, न स्वभावं विमुञ्चति।
तोयमुष्णीकृतं कामं, शीततां पुनरेति यत्॥

भवन्ति महतां प्रायः, सम्पदो न विनाऽऽपदम्।
पत्रपातं विना किं स्याद्, भूरुहां पल्लवोद्गमः॥

आपत्प्राप्तोऽपि तेजस्वी, परस्मा उपकारकृत्।
किमस्तं व्रजता न्यस्तं, न दीपेंऽशुमता महः॥

सिद्धे कार्ये जनेषूच्चै-र्महानपि तृणायते।
बध्यते मुकुटः स्तम्भे, विवाहानन्तरं न किम्॥

द्वितीयं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य प्रथमं प्राभृतप्राभृतम्। सम्प्रति द्वितीयमारभ्यते। तस्य चायमर्थाधिकारः-नक्षत्रविषयं मुहूर्त्तपरिमाणं वक्तव्यमिति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता कहं ते मुहुत्तग्गे आहिता ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत्, **कथं** भगवन् **(त्वया)** प्रतिनक्षत्रं **मुहूर्त्ताग्रं** मुहूर्त्तपरिमाणमाख्यातं **इति वदेत्**?

एवमुक्ते भगवानाह–

मू० ता एएसि णं अट्ठावीसाए णक्खत्ताणं अत्थि णक्खत्ते जे णं णक्खत्ते णव मुहुत्ते सत्तावीसं च सत्तसट्ठिभागे मुहुत्तस्स चंदेणं सद्धिं जोगं जोएति। अत्थि णक्खत्ता जे णं नक्खत्ता पण्णरसमुहुत्ते चंदेण सद्धिं जोगं जोएंति। अत्थि णक्खत्ता जे णं णक्खत्ता तीसं मुहुत्ते चंदेण सद्धिं जोगं जोएंति। अत्थि णक्खत्ता जे णं णक्खत्ता पणयालीसं मुहुत्ते चंदेणं सद्धिं जोगं जोएंति।

टी० 'ता एएसि ण'मित्यादि। **'ता'** इति पूर्ववत्, **एतेषामष्टाविंशतिनक्षत्राणां** मध्ये **अस्ति** तन्नक्षत्रं **यन्नव मुहुर्त्तान्** [1]एकस्य च **मुहूर्त्तस्य सप्तविंशतिं सप्तषष्टि-भागान् चन्द्रेण सार्द्धं योगं युनक्ति**-उपैति, तथा **अस्ति** निपातत्वादव्ययत्वाद्वा सन्ति तानि **नक्षत्राणि यानि पञ्चदशमुहूर्त्तान्यावत् चन्द्रेण सह योगमुपयान्ति**, तथा **सन्ति** तानि **नक्षत्राणि यानि** [विंशति](**त्रिंशतं**) **मुहूर्त्तान्यावत् चन्द्रेण सह योगमश्नु(व)ते**, तथा **सन्ति** तानि **नक्षत्राणि यानि पञ्चचत्वारिंशतं मुहूर्त्तान्यावत् चन्द्रेण सार्द्धं योगं युञ्जन्ति**।

---

१. एकस्य मुहूर्त्तस्य - L।

एवं सामान्येन भगवतोक्ते विशेषनिर्द्धारणार्थं भगवान्पृच्छति गौतमः –

मू० ता एतेसिं णं अट्ठावीसाए [१]णक्खत्ताणं कयरे णक्खत्ते जे णं णक्खत्ते नव मुहुत्ते सत्तावीसं सत्तसट्ठिभागे मुहुत्तस्स चंदेणं सद्धिं जोगं जोएति ? [२]कयरे नक्खत्ता जे णं नक्खत्ता पन्नरसमुहुत्ते चंदेण सद्धिं जोगं जोएंति ? कयरे नक्खत्ता जे णं नक्खत्ता तीसं मुहुत्ते चंदेण सद्धिं जोगं जोएंति ? कयरे नक्खत्ता जे णं णक्खत्ता पणयालीसं मुहुत्ते चंदेण सद्धिं (जोगं) जोइंति ? ता एतेसि णं अट्ठावीसाए णक्खत्ताणं तत्थ णं जे णं णक्खत्ते नव मुहुत्ते सत्तावीसं सत्तसट्ठिभागे मुहुत्तस्स चंदेणं सद्धिं जोगं जोएति से णं एगे अभिई। तत्थ णं जे णं णक्खत्ता पण्णरसमुहुत्ते चंदेणं सद्धिं जोगं जोएंति ते णं छ, तं जहा - सतभिसता, भरणी, अद्दा, अस्सेसा, साई, जेट्ठा। तत्थ णं जे णं णक्खत्ता तीसं मुहुत्ते चंदेण सद्धिं जोगं जोएंति ते णं पण्णरस, तं जहा - सवणो, धनिट्ठा, पुव्वाभद्दवता, रेवती, अस्सिणी, कत्तिया, मगसिर, पुस्सो, महा, पुव्वा फग्गुणी, हत्थो, चित्ता, अणुराहा, मूलो, पुव्वासाढा। तत्थ णं जे णं णक्खत्ता पणतालीसं मुहुत्ते चंदेणं सद्धिं जोगं जोएंति ते णं छ, तं जहा-

---

१. णक्खत्ताणं तत्थ णं के से णक्खत्ते - H, R। २. इतोऽग्रे H, P, R, U प्रतिष्वेवं पाठो दृश्यते - 'से णं एगे अभीयी। तत्थ णं के ते णक्खत्ता पण्णरसमुहुत्ते चंदेणं सद्धिं जोगं जोएंति ? ते णं छ, तं जहा- सतभिसता भरणी अद्दा अस्सेसा साई जेट्ठा। तत्थ णं के ते णक्खत्ता जे णं णक्खत्ता तीसं मुहुत्ता चंदेणं सद्धिं जोगं जोएंति ? ते णं पण्णरस, तं जहा- सवणो धणिट्ठा पुव्वा भद्दवता रेवती अस्सीणी कत्तिया मिगसिर पुस्सो महा पुव्वा फग्गुणी हत्थो चित्ता अणुराहा मूलो पुव्वआसाढा। तत्थ णं के ते णक्खत्ता जे णं णक्खत्ता पणतालीसं मुहुत्ते चंदेणं सद्धिं जोगं जोएंति ? एते णं छ, तं जहा- उत्तरा भद्दवया रोहिणी पुणव्वसू उत्तरफग्गुणी विसाहा उत्तरासाढा।' - टीका एतत्पाठानुसारेण नास्ति। अतो मयाऽयं पाठो नाऽऽदृतः।

उत्तरा भद्दवता, रोहिणी, पुणव्वसू, उत्तरफग्गुणी, विसाहा, उत्तरासाढा।

टी० '**ता एएसि ण**'मित्यादि। '**ता**' इति पूर्ववत्, **एतेषामष्टाविंशतेर्नक्षत्राणां** मध्ये **कतरत्** तन्नक्षत्रं **यन्नव मुहूर्त्तानेकस्य** च **मुहूर्त्तस्य सप्तविंशतिं सप्तषष्टिभागान्** यावत् **चन्द्रेण सह योगं युनक्ति** ? तथा **कतराणि** तानि **नक्षत्राणि यानि पञ्चदशमुहूर्त्तान्यावत् चन्द्रेण सह योगं युञ्जन्ति** ? तथा **कतराणि** तानि **नक्षत्राणि यानि त्रिंशतं मुहूर्त्तान्** यावत् **चन्द्रेण सह योगमश्नुवते** ? तथा **कतराणि** तानि **नक्षत्राणि यानि पञ्चचत्वारिंशतं मुहूर्त्तान्यावत् चन्द्रेण सह योगमुपयान्ति** ? एवं गौतमेन प्रश्ने कृते भगवानाह – '**ता एएसि ण**'मित्यादि। '**ता**' इति पूर्ववत्, **एतेषामष्टाविंशतेर्नक्षत्राणां** मध्ये **यन्नक्षत्रं नव मुहूर्त्तानेकस्य** च **मुहूर्त्तस्य सप्तविंशतिं सप्तषष्टिभागान्यावत् चन्द्रेण सह योगं युनक्ति तदे[व](क)मभिजिन्नक्षत्रमवसेयम्**। कथमिति चेत् ? उच्यते, इह अभिजिन्नक्षत्रं सप्तषष्टिखण्डीकृतस्याहोरात्रस्यैकविंशतिभागान् चन्द्रेण सह योगमुपैति, ते च एकविंशतिरपि भागा मुहूर्त्तगतभागकरणार्थं त्रिंशता गुण्यन्ते जातानि षट्शतानि त्रिंशदधिकानि ६३०, तथा च एतावान् कालमधिकृत्य सीमाविस्तारोऽभिजिन्नक्षत्रस्यान्य[था](त्रा)प्युक्तः – '**छच्चेव सया तीसा भागाणं अभिइसीमविक्खंभो। दिट्ठो सव्वडहरगो सव्वेहिं अणंतनाणीहिं॥१५२॥**' (**जोइसकरंडगं पइण्णयं**) तेषां सप्तषष्ट्या भागो ह्रियते। लब्धा नव मुहूर्त्ता एकस्य च मुहूर्त्तस्य सप्तविंशतिः सप्तषष्टिभागाः ९ २७/६७। उक्तञ्च '**अभिइस्स चंदयोगो सत्तट्ठीखंडिओ अहोरत्तो। भागा य एक्कवीसं ते पुण अहिया नव मुहुत्ता॥१६२॥**' (**जो.प.**) तथा '**तत्थे**'त्यादि। **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यानि नक्षत्राणि पञ्चदशमुहूर्त्तान्यावत् चन्द्रेण सह योगमश्नुवते तानि षट्, तद्यथा शतभिषक्** इत्यादि, तथाह्येतेषां षण्णामपि नक्षत्राणां प्रत्येकं सप्तषष्टिखण्डीकृतस्याहोरात्रस्य

सत्कान् सार्द्धान् त्रयस्त्रिंशद्भागान् यावत् चन्द्रेण सह योगो भवति, ततो मुहूर्त्तगतसप्तषष्टिभागकरणार्थं त्रयस्त्रिंशत् त्रिंशता गुण्यते, जातानि नव शतानि नवत्यधिकानि ९९[९](०), यदपि चार्द्धं तदपि त्रिंशता गुण्यते गुणयित्वा द्विकेन भज्यते, लब्धाः पञ्चदशमुहूर्त्तस्य सप्तषष्टिभागास्ते पूर्वराशौ प्रक्षिप्यन्ते, ततो जातः पूर्वराशिः पञ्चोत्तरं सहस्रं, तथा चान्यत्रापि एतेषां प्रत्येकं कालमधिकृत्य सीमाविस्तारो मुहूर्त्तगतसप्तषष्टिभागानां पञ्चोत्तरं सहस्रमुक्तः - **'सयभिसया भरणीए अद्दा अस्सेस साइ जेट्ठाए। पंचोत्तरं सहस्सं भागाणं सीमविक्खंभो॥१५३॥'** (**जो.प.**) अस्य पञ्चोत्तरसहस्रस्य सप्तषष्ट्या भागो ह्रियते लब्धाः पञ्चदशमुहूर्त्ताः। उक्तञ्च – **'सयभिसया भरणीओ अद्दा अस्सेस साइ जेट्ठा य। एए छन्नक्खत्ता [पंचदस](पन्नरस)मुहुत्तसंजोगा॥८८॥'** (**मण्डलप्रकरणम्**) तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यानि नक्षत्राणि त्रिंशतं मुहूर्त्तान्यावच्चन्द्रेण सह योगं युञ्जन्ति तानि पञ्चदश, तद्यथा- 'सवणो'** इत्यादि। तथाह्येतेषां कालमधिकृत्य प्रत्येकं सीमाविष्कम्भो मुहूर्त्तगतसप्तषष्टिभागानां दशोत्तरे द्वे सहस्रे २,०१०, ततस्तयोः सप्तषष्ट्या भागे ह्रते लब्धाः त्रिंशत् मुहूर्त्ताः। तथा **तत्र यानि नक्षत्राणि पञ्चचत्वारिंशन्मुहूर्त्तान्यावत् चन्द्रेण सार्द्धं योगं युञ्जन्ति तानि षट्, तद्यथा- उत्तरभद्रपदा** इत्यादि। एतेषां हि प्रत्येकं कालमधिकृत्य सीमाविष्कम्भो मुहूर्त्तगतसप्तषष्टिभागानां त्रीणि सहस्राणि पञ्चदशोत्तराणि ३,०१५, ततस्तेषां सप्तषष्ट्या भागो ह्रियते, लब्धाः पञ्चचत्वारिंशत् मुहूर्त्ताः, उक्तञ्च – **तिन्नेव उत्तराइं पुणव्वसू रोहिणी विसाहा य। एए छन्नक्खत्ता पणयालमुहुत्तसंजुत्ता॥८९॥ (अवसेसा नक्खत्ता पनरस हुंति तीसइमुहुत्ता। चंदंमि एस जोगो नक्खत्ताणं समक्खाओ॥९०॥' (मण्डलप्रकरणम्)**

तदेवमुक्तो नक्षत्राणां चन्द्रेण सह योगः। सम्प्रति) सूर्येण सह तमभिधित्सुराह –

मू० ता एतेसि णं अट्ठावीसाए णक्खत्ताणं अत्थि णक्खत्ते जे

णं णक्खत्ते चत्तारि अहोरत्ते छच्च मुहुत्ते सूरेणं सद्धिं जोगं जोएंति। अत्थि णं (णक्खत्ता) जे णं ण(क्खत्ता) छ अहोरत्ते [१]एक्कवीसं च मुहुत्ते सूरेणं सद्धिं जोगं जोएंति। अत्थि णक्खत्ता जे णं णक्खत्ता तेरस अहोरत्ते दुवालसमुहुत्ते सूरेणं सद्धिं जोगं जोएंति। अत्थि णक्खत्ता जे णं णक्खत्ता वीसं अहोरत्ते तिण्णि य मुहुत्ते सूरेणं सद्धिं जोगं जोएंति। ता एतेसि णं अट्ठावीसाए णक्खत्ताणं कतरे णक्खत्ते जे णं णक्खत्ते चत्तारि अहोरत्ते छच्च मुहुत्ते सूरेणं सद्धिं जोगं जोएंति ? कतरे णक्ख[त्ते](त्ता) जे णं णक्खत्ता छ अहोरत्ते एक्कवीसं च मुहुत्ते सूरेणं सद्धिं जोगं जोएंति ? कतरे णक्खत्ता जे णं णक्खत्ता तेरस अहोरत्ते बारस य मुहुत्ते सूरेणं सद्धिं जोगं जोएंति ? कतरे णक्खत्ता जे णं णक्खत्ता वीसं अहोरत्ते तिण्णि य मुहुत्ते सूरेणं सद्धिं जोगं जोएंति ? ता एएसि णं अट्ठावीसाए णक्खत्ताणं जे से णक्खत्ते चत्तारि अहोरत्ते छच्च मुहुत्ते सूरेणं सद्धिं जोगं जोएंति से णं एगे अभीयी। [२]एवं एयाइं उच्चारेयव्वाइं जाव तत्थ णं जे णं णक्खत्ता वीसं अहोरत्ते तिण्णि य मुहुत्ते सूरेणं सद्धिं जोगं जोएंति ते णं छ, तं जहा- उत्तरभद्दवता जाव उत्तारासाढा।

[३]दसमे बिइयं २।

टी० 'ता एएसि ण'मित्यादि। 'ता' इति पूर्ववत्, एतेषामनन्तरोदितानामष्टाविंशतेर्नक्षत्राणां मध्ये अस्ति तन्नक्षत्रं यत् चतुरो अहोरात्रान् षट् च

१. एक्कवीसमुहुत्ते - R। २. टीकानुसारेण त्वत्रैवं पाठः सम्भाव्यते- 'तत्थ णं जे णं णक्खत्ता छ अहोरत्ते एक्कवीसं च मुहुत्ते सूरेण सद्धिं जोयं जोएंति ते णं छ, तं० सतभिसया भरणी अद्दा अस्सेसा साती जेट्ठा। तत्थ णं जे णं णक्खत्ता तेरस अहोरत्ते दुवालस य मुहुत्ते सूरेण सद्धिं जोयं जोएंति ते णं पण्णरस, तं० सवणो धणिट्ठा पुव्वाभद्दवता रेवती अस्सिणी कत्तिया मग्गसिरं पूसो महा पुव्वाफग्गुणी हत्थो चित्ता अणुराधा मूलो पुव्वासाढा। तत्थ णं जे णं.....।' ३. दसमस्स - U।

मुहूर्त्तान्यावत् सूर्येण सार्द्धं योगमुपैति, तथा [१]**अस्ती**ति (सन्ति) तानि **नक्षत्राणि यानि षड् अहोरात्रान्** [२]**एकविंशतिं च मुहूर्त्तान्यावत्सूर्येण सार्द्धं योगं युञ्जन्ति,** तथा **सन्ति** तानि **नक्षत्राणि यानि त्रयोदश अहोरात्रान्द्वादश** [३] च **मुहूर्त्तान्यावत् सूर्येण सह योग**मुप[४]यान्ति, तथा **सन्ति** तानि **नक्षत्राणि यानि विंशति-महोरात्रान्त्रीन्मुहूर्त्तान्** यावत् **सूर्येण समं योगं युञ्जन्ति**। एवं भगवता सामान्येनोक्ते विशेषावगमनिमित्तं भूयोऽपि भगवान् गौतमः पृच्छति – **'ता एए(सि) ण'**मित्यादि सुगमम्। भगवान् निर्वचनमाह – **'ता एएसि ण'**मित्यादि। **'ता'** इति पूर्ववत्, **एतेषामष्टाविंशतेर्नक्षत्राणां** मध्ये **यन्नक्षत्रं चतुरोऽहोरात्रान् षण्मुहूर्त्तान्** यावत् **सूर्येण समं योगं यु[ञ्जन्ति](नक्ति) तत् एकमभिजिन्न**क्षत्रमवसेयम्। तथाहि – सूर्ययोगविषयं पूर्वाचार्यप्रदर्शितमिदं करणं – **'जं रिक्खं जावइए वच्चइ चंदेण भाग सत्तट्ठी। तं पणभागे राइंदियस्स सूरेण तावइए॥'** अस्या अक्षरगमनिका - **यत् ऋक्षं** नक्षत्रं **यावतो** [५]रात्रिन्दिवस्याहोरात्रस्य सम्बन्धिनः **सप्तषष्टिभागान् चन्द्रेण** सह योगं **व्रजति तन्नक्षत्रं रात्रिन्दिवस्य पञ्चभागान् तावतः सूर्येण** समं व्रजति। तत्राभिजिदेकविंशतिं सप्तषष्टिभागान्चन्द्रेण समं वर्त्तते। तत एतावतः पञ्चभागानहोरात्रस्य सूर्येण समं वर्त्तमानमवसेयम्। एकविंशतेश्च पञ्चभिर्भागे हृते लब्धाश्चत्वारोऽहोरात्रा एकः पञ्चमो (भागो)ऽवतिष्ठते। स मुहूर्त्तानयनाय त्रिंशता गुण्यते जाता त्रिंशत् तस्याः पञ्चभिर्भागे हृते लब्धाः षण्मुहूर्त्ता इति, उक्तश्च – **'अभिई छच्च मुहुत्ते चतारि य केवले अहोरत्ते। सूरेण समं वच्चइ, इत्तो सेसाण वोच्छामि॥१७३॥'** (**जो.प.**) (ग्रन्थाग्रं-३०००) [६]तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यानि नक्षत्राणि षड् अहोरात्रानेकविंशतिं च मुहूर्त्तान्** यावत् **सूर्येण** समं योगमुप[७]यान्ति **तानि षट्, तद्यथा – 'सयभिसया'** इत्यादि। तथाह्येतेषां नक्षत्राणां प्रत्येकं चन्द्रेण समं योगः सार्द्धान् त्रयस्त्रि-

---

१. अस्ति तानि - A, B, C, D, F, G, H, I। २. एकविंशतिमुहूर्त्तान् - B, E, F, M, N। ३. .....द्वादश मुहूर्त्ता... - F, T। ४. ...मुपयन्ति - B, F, M, ...मुपयुञ्जन्ति - N। ५. रात्रिन्दिवसस्या... - B। ६. 'एवं एयाइं उच्चारेयव्वाइं जाव....' इति मूले पाठः। ७. ...यन्ति - A।

शत्सङ्ख्याकान् सप्तषष्टिभागानहोरात्रस्य यावत्, अपार्द्धक्षेत्रत्वात्। तत एतावतः पञ्चभागानहोरात्रस्य [1]सूर्येण समं [सं]योगः प्र[त्य](त्ये)यः, प्रागुक्तकरणप्रामाण्यानुसरणात्। त्रयस्त्रिंशतश्च पञ्चभिर्भागे हृते लब्धाः षड् अहोरात्रा पञ्चादवतिष्ठन्ते सार्द्धास्त्रयः पञ्चभागास्ते सवर्णनायां जाताः सप्त[तिः], मुहूर्त्तानयनाय त्रिंशता गुण्यन्ते, जाते द्वे शते दशोत्तरे २१०। एते च मुहूर्त्तार्द्धगतेऽतः परिपूर्णमुहूर्त्तानयनाय दशभिर्भागे हृते लब्धाः एकविंशतिः मुहूर्त्ताः। उक्तञ्च – **'सयभिसया भरणीओ अद्दा अस्सेस साइ जेट्ठा य। वच्चंति मुहुत्ते एकविस छच्चेवहोरत्ते ॥१७४॥'** (**जो.प.**) तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यानि नक्षत्राणि त्रयोदश अहोरात्रान् द्वादश च मुहूर्त्तान्** यावत् **सूर्येण** समं योगं युञ्जन्ति तानि पञ्चदश, तद्यथा– **'सवणो'** इत्यादि। तथाह्यमूनि परिपूर्णान् सप्तषष्टिभागान् चन्द्रेण समं व्रजन्ति, ततः सूर्येण सह एतानि पञ्चभागानप्यहोरात्रस्य सप्तषष्टिसङ्ख्यान् गच्छन्ति। सप्तषष्टेश्च पञ्चभिर्भागे हृते लब्धास्त्रयोदश[श्चा] (अ)होरात्रा शेषौ च द्वौ भागौ तिष्ठतः, तौ त्रिंशता गुण्येते, जाता षष्टिस्तस्या पञ्चभिर्भागे हृते लब्धा द्वादशमुहूर्त्ताः। उक्तञ्च – **'अवसेसा नक्खत्ता पन्नरस वि सूरसहगया जंति। बारस चेव मुहुत्ते तेरस य समे अहोरत्ते ॥१७६॥'** (**जो.प.**) तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यानि नक्षत्राणि विंशतिमहोरात्रान्त्रीन्मुहूर्त्तान्यावत्सूर्येण समं योगमश्नुवते तानि षट्, तद्यथा – 'उत्तरभद्दवया'** इत्यादि। एतानि षडपि नक्षत्राणि प्रत्येकं चन्द्रेण समं सप्तषष्टिभागानां शतमेकस्य च सप्तषष्टिभागस्यार्द्धं व्रजन्ति। तत एतावतः पञ्चभागानहोरात्रस्य सूर्येण समं व्रजन्तीत्यवसेयम्। शतस्य च पञ्चभिर्भागे हृते लब्धा विंशतिरहोरात्राः। यदपि चैकस्य पञ्चभागस्यार्द्धमुद्धरति तदपि त्रिंशता गुण्यते, जाता त्रिंशत्, तस्या दशभिर्भागे हृते लब्धास्त्रयो मुहूर्त्ता इति।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्टिीकायां दशमस्य प्राभृतस्य द्वितीयं प्राभृतप्राभृतं समाप्तम्।

* * * * *

१. सूर्येण योगः - A, C।

तृतीयं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य द्वितीयं प्राभृतप्राभृतम्। सम्प्रति तृतीयमारभ्यते। तस्य चायमर्थाधिकारः- एवम्भागानि नक्षत्राणि वक्तव्यानीति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता कहं ते एवंभागा आहिता ति वदेज्जा?

टी० '**ता कहं ते**' इत्यादि। '**ता**' इति पूर्ववत् **कथं** केन प्रकारेण भगवन् **त्वया एवम्भागानि** वक्ष्यमाणप्रकारभागानि नक्षत्राणि **आख्यातानीति** भगवान् **वदेत्**?

एवमुक्ते भगवानाह–

मू० ता एतेसि णं अट्ठावीसाए णक्खत्ताणं अत्थि णक्खत्ता जे णं णक्खत्ता पुव्वंभागा समखेत्ता तीसतिमुहुत्ता पण्णत्ता, अत्थि णक्खत्ता णं जे णं णक्खत्ता पच्छंभागा[1] समखेत्ता तीसतिमुहुत्ता पण्णत्ता, अत्थि णक्खता जे णं णक्खत्ता णत्तंभागा अवड्ढखेत्ता पण्णरसमुहुत्ता पण्णत्ता, अत्थि णक्खत्ता जे णं णक्खत्ता उभयंभागा दिवड्ढखेत्ता पणयालीसमुहुत्ता पण्णत्ता। ता एएसि णं अट्ठावीसाए णक्खत्ताणं कयरे नक्खत्ता जे णं नक्खत्ता पुव्वंभागा समखेत्ता तीसतिमुहुत्ता पण्णत्ता ? कतरे णक्खत्ता जे णं णक्खत्ता पच्छंभागा[2] समखेत्ता तीसतिमुहुत्ता पण्णत्ता ? कतरे णक्खत्ता जे णं णक्खत्ता णत्तंभागा अवड्ढखेत्ता पण्णरसमुहुत्ता पण्णत्ता ? कतरे णक्खत्ता जे णं णक्खत्ता उभयंभागा दिवड्ढखेत्ता पणयालीसइमुहुत्ता पण्णत्ता ? ता एएसिं अट्ठावीसाए णक्खत्ताणं तत्थ णं जे ते णक्खत्ता जे

१. पच्छाभागा - Q। २. पच्छाभागा - H।

णं णक्खत्ता पुव्वंभागा समखेत्ता तिसतिमुहुत्ता पण्णत्ता ते णं छ, (तं०-) पुव्वभद्दवता कत्तिता महा पुव्वा फग्गुणी मूलो पुव्वासाढा। तत्थ णं जे ते णक्खत्ता जे णं णक्खत्ता पच्छंभागा[1] समखेत्ता तीसतिमुहुत्ता पण्णत्ता ते णं दस, तं जहा- अभिई सवणो धणिट्ठा रेवती अस्सिणी मगसिर पुस्सो हत्थो चित्ता अणुराहा पच्छंभागा दस हवंति। तत्थ णं जे ते णक्खत्ता जे णं णक्खत्ता णत्तंभागा अवड्ढखेत्ता पण्णरसमुहुत्ता पण्णत्ता ते णं छ, तं० सतभिसता भरणी अद्दा अस्सेसा साती जेट्ठा। तत्थ णं जे ते णक्खत्ता जे णं णक्खत्ता उभयंभागा दिवड्ढखेत्ता पणयालीसतिमुहुत्ता पण्णत्ता ते णं छ, तं जहा- उत्तरभद्दवत्ता जाव उत्तरासाढा।

दसमे ततियं पाहुडं ३।

टी० **'ता एएसि ण'**मित्यादि। **'ता'** इति पूर्ववत्, **एतेषामष्टाविंशतेर्नक्षत्राणां** मध्येऽ**स्ती**ति सन्ति तानि **नक्षत्राणि यानि पूर्वभागानि** दिवसस्य पूर्वो भाग-श्चन्द्रयोगस्यादिमधिकृत्य विद्यते येषां तानि पूर्वभागानि समक्षेत्राणि- समं पूर्णमहोरात्रप्रमितं चन्द्रयोगमधिकृत्यास्ति येषां तानि **समक्षेत्राणि,** अत एव **त्रिंशन्मुहूर्त्तानि प्रज्ञप्तानि**। तथा **सन्ति** तानि **नक्षत्राणि यानि पश्चाद्भागानि** दिवस(स्य) पश्चात्तनो भागो चन्द्रयोगमधिकृत्य विद्यते येषां तानि पश्चाद्भागानि **समक्षेत्राणि त्रिंशन्मुहूर्त्तानि प्रज्ञप्तानि**। तथा **सन्ति** तानि **नक्षत्राणि यानि नक्षत्राणि नक्तम्भागानि** - नक्तं रात्रौ चन्द्रयोगस्यादिमधिकृत्य भागोऽवकाशो येषां तानि, तथा **अपार्द्धक्षेत्राणी**ति अपगतमर्द्धं यस्य तत् अपार्द्धं अर्द्धमात्रमित्यर्थः अपार्द्धमर्द्धमात्रं क्षेत्रमहोरात्रप्रमितं येषां चन्द्रयोगस्यादिमधिकृत्य तान्यपार्द्धक्षेत्राणि, अत एव **पञ्चदशमुहूर्त्तानि,** पञ्चदश चन्द्रयोगमधिकृत्य मुहूर्त्ता विद्यन्ते येषां तानि

१. पच्छाभागा - Q।

तथा (**प्रज्ञप्तानि**)। तथा **सन्ति** तानि **नक्षत्राणि यानि नक्षत्राणि उभयभागानि** उभयं दिवसरात्री तस्य उभयस्य दिवसस्य रात्रेश्चेत्यर्थः चन्द्रयोगस्यादिमधिकृत्य भागो येषां तानि, तथा **द्व्यर्द्धक्षेत्राणि** द्वितीयमर्द्धं यस्य तत् द्व्यर्द्धं सार्द्धमित्यर्थः द्व्यर्द्धं सार्द्धमहोरात्रप्रमितं क्षेत्रं येषां तानि तथा, अत एव च **पञ्चचत्वारिंशन्मुहूर्त्तानि प्रज्ञप्तानि**। एवं सामान्येनोक्ते विशेषावबोधनार्थं भगवान् गौतमः पृच्छति- **'ता एएसि ण'**मित्यादि सुगमम्। भगवान् प्रतिवचनमाह – **'ता एएसि ण'**मित्यादि। **'ता'** इति पूर्ववत् **एतेषामष्टाविंशतेर्नक्षत्राणां** मध्ये **यानि नक्षत्राणि पूर्वभागानि समक्षेत्राणि त्रिंशन्मुहूर्त्तानि प्रज्ञप्तानि तानि षट् तद्यथा 'पुव्वभद्दवया'** इत्यादि। एतच्चानन्तरे एव प्राभृतप्राभृते योगस्यादौ चिन्त्यमाने भावयिष्यते। तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यानि नक्षत्राणि पश्चाद्भागानि समक्षेत्राणि त्रिंशन्मुहूर्त्तानि प्रज्ञप्तानि तानि दश, तद्यथा- 'अभिई'** इत्यादि। तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यानि नक्षत्राणि नक्तम्भागानि अपार्द्धक्षेत्राणि पञ्चदशमुहूर्त्तानि प्रज्ञप्तानि तानि षट्, तद्यथा – 'सयभिसया'** इत्यादि। तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यानि नक्षत्राण्युभयभागानि द्व्यर्द्धक्षेत्राणि**[१] **पञ्चचत्वारिंशन्मुहूर्त्तानि तानि षट्, तद्यथा– 'उत्तरभद्दवया'**[२] इत्यादि। सर्वत्रापि[३] च भावना अग्रे अनन्तरमेव भावयिष्यते।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य तृतीयं प्राभृतप्राभृतं समाप्तम्।

* * * * *

१. द्व्यर्द्धक्षेत्राणि तानि ... - T। २. उत्तरा पोट्ठवता - G, T। ३. सर्वत्रापि भावना - T।

चतुर्थं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य तृतीयं प्राभृतप्राभृतम्। सम्प्रति चतुर्थमारभ्यते। तस्य चायमर्थाधिकारो - योगस्यादि[व](र्व)क्तव्य इति। किञ्च पूर्वमनन्तरे प्राभृतप्राभृते नक्षत्राणां पूर्वभागतादिकमुक्तम्। तच्च योगस्यादिपरिज्ञानमन्तरेण नावगन्तुं शक्यते। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते जोगस्सादि आहिता ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत्, **कथं 'ते' त्वया** भगवन्! **योगस्यादिराख्याता इति वदेत्**?

इह निश्चयनयमतेन चन्द्रयोगस्यादिता सर्वेषामपि नक्षत्राणामप्रतिनियतकाल-प्रमाणा। ततः सा करणवशात् अवगन्त[व्यं](व्या)। तच्च करणं **ज्योतिष्करण्डके** समस्तीति **तट्टीकां** कुर्वता तत्रैव सप्रपञ्चं भावितमतस्ततोऽवधार्यमत्र तु व्यवहारनयमधिकृत्य बाहुल्येन यस्य नक्षत्रस्य यथा चन्द्रयोगस्यादिर्भवति तमभिधित्सुराह-

मू० [तं जहा](ता) अभिइसवणा खलु दुवे णक्खत्ता पच्छाभागा समक्खेत्ता सातिरेगोणतालीसमुहुत्ता तप्पढमताए सायं[1] चंदेणं सद्धिं जोगं जोएंति तओ पच्छा अवरं सातिरेगं दिवसं। एवं खलु अभितिसवणा दुवे णक्खत्ता एगं रातिं एगं च सातिरेगं दिवसं चंदेण सद्धिं जोगं जोएंति जोगं जोएत्ता जोगं अणुपरियट्टंति जोगं अणुपरियट्टित्ता सायं[2] चंदं धाणिट्ठाणं समप्पेंति। ता धणिट्ठा णं खलु णक्खत्ते पच्छंभागे समखेत्ते तीसतिमुहुत्ते तप्पढमताए सायं[3] चंदेणं सद्धिं जोगं जोएंति, ततो पच्छा (राइं) अवरं (च) दिवसमेगं। एवं खलु धणिट्ठा णक्खत्ते एगं रातिं एगं च दिवसं चंदेणं सद्धिं

१. सागं - U। २. सागं - U। ३. सागं U।

जोगं जोगेति जोगं जोगेत्ता जोगं अणुपरियट्टति जो०२ [१]सायं चंदं [२]सतभिसयाणं समप्पेइ। ता सतभिसता खलु णक्खत्ते णत्तंभागे अवड्ढखेत्ते पण्णरसमुहुत्ते तप्पढमयाए [३]सायं चंदेणं सद्धिं जोगं जोएति णो लभति अवरं दिवसं। एवं खलु सतभिसता णक्खत्ते एगं रातिं चंदेण सद्धिं जोगं जोएति जो०२ जोगं अणुपरियट्टति (जो०२) पातो चंदं पुव्वाणं भद्दवताणं समप्पेति। ता [४]पुव्वभद्दवता खलु णक्खत्ते पुव्वंभागे समखेत्ते तीसतिमुहुत्ते तप्पढमताए पातो चंदेणं सद्धिं जोगं जोएति ततो पच्छा अवरं रातिं। एवं खलु पुव्वा भद्दवता णं णक्खत्ते एगं दिवसं एगं रातिं चंदेण सद्धिं जोगं जोएति जोगं०२ जोगं अणुपरियट्टति जो०२ पादो चंदं उत्तराणं भद्दवताणं समप्पेति। (ता) उत्तरभद्दवता खलु णक्खत्ते उभतंभागे दिवड्ढखेत्ते पणयालीसतिमुहुत्ते तप्पढमताए पादो चंदेणं सद्धिं जोगं जोएति ततो पच्छा एगं दिवसं रत्तिं अवरं च दिवसं। एवं खलु उत्तरभद्दवता णक्खत्ते [५]दो दिवसे एगं च रातिं चंदेणं सद्धिं जोगं जोएति जो०२ जोगं अणुपरियट्टति जो०२ त्ता सागं चं(दं) रेवतीणं समप्पेती। ता रेवती खलु णक्खत्ते पच्छंभागे [६]सम० जहा धणिट्ठा जाव [७]सायं चंदं अस्सिणीणं समप्पेति। ता अस्सिणी खलु णक्खत्ते पच्छंभागे समखेत्ते तीसइमुहुत्ते [ता] (तप्)पढमताए सागं चंदेण सद्धिं जोगं जोएति ततो पच्छा अवरं दिवसं। एवं खलु अस्सीणी णक्खत्ते एगं च रातिं एगं च दिवसं

१. सागं-U। २. सयभिसयाए - Q। ३. सागं - U। ४. पुव्वा भद्दवता - U। ५. एगं दिवसं एगं च रातिं अवरं च दिवसं - Q। ६. टीकानुसारेणाऽत्रैवं पाठः सम्भाव्यते- 'समखेत्ते तीसतिमुहुत्ते तप्पढमताए सायं चंदेणं सद्धिं जोगं जोएति, ततो पच्छा अवरं दिवसं। एवं खलु रेवतीणक्खत्ते एगं राइं एगं च दिवसं चंदेण सद्धिं जोगं जोएति जो०२ त्ता जोगं अणुपरियट्टति जो०२ त्ता सायं चंदं अस्सिणीणं समप्पेति।' ७. सागं - V।

चंदेणं सद्धिं जोगं जोएति (जो०)२ त्ता जोगं अणुपरियट्टइ (जो०२) त्ता सायं चंदे भरणीणं समप्पेति। ता भरणी खलु णक्खत्ते णत्तंभागे [१]अवड्ढ० जहा सतभिसता जाव पादो चंदं कत्तिताणं समप्पेति। [२]एवं जहा सयभिसया तहा नत्तंभागा नेयव्वा, [एवं] जहा पुव्वभद्दवता तहा पुव्वंभागा छप्पि णेयव्वा, जहा धणिट्ठा तहा पच्छंभागा[अद्दा] णेयव्वा जाव एवं खलु उत्तरासाढा दो दिवसे एगं च रातिं चंदेण सद्धिं जोगं जोएति जोगं० २(त्ता) जोगं अणुपरियट्टेति जोगं० २ त्ता [३]सायं चंदं अभितिसमणाणं समप्पेति।

दसमस्स चउत्थं ४।

टी० 'ता अभिई' इत्यादि। **'ता'** इति पूर्ववत् द्वे अभिजित्श्रवणाख्ये **नक्षत्रे पश्चाद्भागे समक्षेत्रे**। इहाभिजिन्नक्षत्रं न समक्षेत्रं नाप्यपार्द्धक्षेत्रं नापि द्व्यर्द्धक्षेत्रं, केवलं श्रवणेन सह सम्बद्धमुपात्तमित्यभेदोपचारात्तदपि समक्षेत्रमुपकल्प्य सम-क्षे[त्रे](त्रं) इत्युक्तं, **सातिरेकैकोनचत्वारिंशन्मुहूर्त्ते** सातिरेकैकोनचत्वारिंशन्मुहूर्त्त-प्रमाणे, तथाहि – सातिरेका नव मुहूर्त्ता अभिजितस्त्रिंशन्मुहूर्त्ताः श्रवणस्येत्युभयमीलने यथोक्तं मुहूर्त्तपरिमाणं भवति, **तत्प्रथमतया** चन्द्रयोगस्य प्रथमतया **सायं** विकाल-वेलायां, इह दिवसस्य प्रथमतया कतितमा(च्चरमा)द्भागादारभ्य यावद्रात्रेः कतितमो भागो [भवति] यावन्नाद्यापि परिस्फुटनक्षत्रमण्डलालोकस्तावान् कालविशेषः सायमिति द्रष्टव्यः, त[द्य]था लोके व्यवहारदर्शनात्, तस्मिन्सायंसमये **चन्द्रेण सार्द्धं**

---

१. अत्राऽपि टीकानुसारेणैवं पाठः सम्भाव्यते-'अवड्ढखेत्ते पण्णरसमुहुत्ते तप्पढमताए सायं चंदेण सद्धिं जोयं जोएति, णो लभति अवरं दिवसं। एवं खलु भरणी णक्खत्ते एगं राइं चंदेण सद्धिं जोयं जोएति जो०२ त्ता जोयं अणुपरियट्टति जो०२ त्ता पादो चंदं कत्तियाणं समप्पेति।' २. अत्र पाठस्त्रुटितो भाति। टीकानुसारेण स एवं सम्भाव्यते- 'ता कत्तिया खलु नक्खत्ते पुव्वंभागे समक्खित्ते तीसइमुहुत्ते तप्पढमताए पातो चंदेणं सद्धिं जोगं जोएति, ततो पच्छा अवरं राइं। एवं खलु कत्तिया णक्खत्ते एगं च दिवसं एगं च राइं चंदेणं सद्धिं जोगं जोएति जो०२ त्ता जोगं अणुपरियट्टति जो०२ त्ता पातो चंदं रोहिणीणं समप्पेति, रोहिणी जहा उत्तरभद्दवता, मिगसिरं जहा धणिट्ठा।' ३. सागं - U।

योगं युङ्क्तः। इहाभिजिन्नक्षत्रं यद्यपि युगस्यादौ प्रातश्चन्द्रेण सह योगमुपैति तथापि श्रवणेन सह सम्ब[न्ध](द्ध)मिह तद्विवक्षितं, श्रवणनक्षत्रं च मध्याह्नादूर्द्ध्वमपसरति दिवसे चन्द्रेण सह योगमुपादत्ते, ततस्तत्साहचर्यात् तदपि सायंसमये चन्द्रेण सार्द्धं युज्यमानं विवक्षि[त]त्वा[त्] सामान्यतः **'सायं चं[न्द्रे](दे)ण सद्धिं जोगं जुंजन्ती'**[1]त्युक्तं, अथवा युगस्यादिमतिरि[त्](च्)यान्यदा बाहुल्यमधिकृत्येदमुक्तं, ततो न कश्चिद्दोषः। **'ततो पच्छा'** इत्यादि। **पश्चा**त्तदूर्द्ध्वं **अपर**मन्यं **सातिरेकं दिवसं** यावत्। एतदेवोपसंहारस्य[2] व्याजेन व्यक्तीकरोति - **'एवं खलु'** इत्यादि। **एव**मुक्तेन प्रकारेण **खल्वि**ति निश्चये **अभिजित्श्रव[णौ](णे) द्वे नक्षत्रे** सायं-समयादारभ्य **एकां रात्रिमेकं च सातिरेकं**[3] **दिवसं चन्द्रेण सार्द्धं योगं यु[न](ङ्)क्तः**। एतावन्तं च कालं **(योगं) युक्त्वा** तदनन्तरं **योगमनुपरिवर्त्तयत** आत्मनश्च्यावयत इत्यर्थः **योगं चानुपरिवर्त्त्य सायं** दिवसस्य कतितमे पश्चाद्भागे **चन्द्रं धनिष्ठायाः समर्प्पयतः**। तदेवमभिजित्श्रवणधनिष्ठाः सायंसमये चन्द्रेण सह प्रथमतो योगं युञ्जन्ते, तेनामूनि त्रीण्यपि पश्चाद्भागान्यवसेयानि। **'ता'** इत्यादि। ततः समर्प्पणादनन्तरं **धनिष्ठा खलु नक्षत्रं पश्चाद्भागं,** सायंसमये तस्य प्रथमतश्चन्द्रेण सह युज्यमानत्वात्, **समक्षेत्रं त्रिंशन्मुहूर्त्तं तत्प्रथमतया सायंसमये चन्द्रेण समं योगं युनक्ति,** चन्द्रेण सह योगं युक्त्वा ततः सायंसमयादूर्द्ध्वं, **ततः पश्चाद्रात्रिं अपरं च दिवसं** यावद्योगं युनक्ति। एतदेवोपसंहारव्याजेनाचष्टे – **'एवं खलु'** इत्यादि सुगमं यावत् **योगमनुपरिवर्त्त्य सायंसमये चन्द्रं शतभिषजः समर्प्पयति** प्रायः परिस्फुटनक्षत्रमण्डलावलोके। तत इदं नक्षत्रं नक्तम्भागं द्रष्टव्यम्। तथा चाह – **'ता'** इत्यादि। **'ता'** इति ततः समर्प्पणादनन्तरं **शतभिषक्नक्षत्रं खलु नक्तम्भागमपार्द्धक्षेत्रं पञ्चदशमुहूर्त्तं तत्प्रथमतया** योगप्रथमतया **सायंसमये चन्द्रेण सार्द्धं योगं युनक्ति**। तच्च [य](त)थायुक्तं सत् **न लभते अपरं दिवसं**

---

१. जोएंति - मूले। २. ...संहारव्यजेन - M। ३. सातिरेकदिवसं - M।

पञ्चदशमुहूर्त्तप्रमाणत्वात्, किन्तु रा[त्रि](त्र्यन्)त[ए](रे)व योगमधिकृत्य परिसमाप्तिमुपैति। तथा चाह **'एवं खल्वि'**त्यादि सुगमं यावत् **योगमनुपरिवर्त्त्य प्रातश्चन्द्रं पूर्वयोः** [१]प्रोष्ठपदयो**र्भद्र-पदयोः समर्प्पयति**। इह पूर्वप्रोष्ठपदानक्षत्रस्य प्रातश्चन्द्रेण सह प्रथमतया योगः प्रवृत्त इतीदं पूर्वभागमुच्यते। तथा चाह-**'ता पुव्वे'**त्यादि। ततः समर्प्पणादनन्तरं [२]**पूर्वप्रोष्ठपदानक्षत्रं खलु पूर्वभागं समक्षेत्रं त्रिंशन्मुहूर्त्तं तत्प्रथमतया प्रातश्चन्द्रेण सह योगं युनक्ति**। तच्च तथायुक्तं सत् **ततः** समयादूर्द्ध्वं तं सकलं दिवस**मपरां** च **रात्रिं** यावद्वर्त्तते। एतदेवोपसंहारव्याजेनाह – **'एवं खलु'** इत्यादि सुगमं यावद्**योगमनुपरिवर्त्त्य प्रातश्चन्द्रमुत्तरयोः** [३]**प्रोष्ठपदयोः समर्प्पयति**। इदं किलोत्तरभद्रपदाख्यं नक्षत्रमुक्तप्रकारेण प्रातश्चन्द्रेण सह योगमधिगच्छति केवलं प्रथमान्पञ्चदशमुहूर्त्तानधिकान् अपनीय समक्षेत्रत्वं कल्पयित्वा यदा योगश्चिन्त्यते तदा नक्तमपि योगोऽस्तीत्युभयभागमवसेयम्। तथा चाह – **'ता'** इत्यादि। **'ता'** इति ततः समर्पणादनन्तरं **(**[४]**उत्तर)प्रोष्ठपदानक्षत्रं खलूभयभागं द्व्यर्द्धक्षेत्रं पञ्चचत्वारिंशन्मुहूर्त्तं तत्प्रथमतया** योगप्रथमतया **प्रातश्चन्द्रेण सार्द्धं योगं युनक्ति**। तच्च तथायुक्तं सत् सकलमपि **दिवस**मपरां च **रात्रिं, ततः पश्चादपरं दिवसं** यावद्वर्त्तते। एत[ाव]देवोपसंहारव्याजेन व्यक्तीकरोति **'एवं खल्वि'**त्यादि सुगमं यावद्**योगमनुपरिवर्त्त्य सायं** समये **चन्द्रं रेवत्याः समर्पयति**। ततो रेवतीनक्षत्रं सायंसमये चन्द्रेण सह योगमधिगच्छति। ततस्तत् पश्चाद्भागमवसेयम्। तथा चाह **'ता रेवई'** [५] इत्यादि। **'ता'** इति ततः समर्पणादनन्तरं, शेषं सुगमम्, इदं च चन्द्रेण युक्तं सत् सायंसमयादूर्द्ध्वं [६]सकलां रात्रिमपरं च दिवसं यावदवतिष्ठते समक्षेत्रत्वात्।

१.३. मूलानुसारेणाऽत्र 'भद्रपदयो'रिति पाठः समीचीनो भाति। २. मूलानुसारेणाऽत्र 'पूर्वभद्रपदानक्षत्र'मिति पाठः समीचीनो भाति। ४. मूलानुसारेणाऽत्र 'उत्तरभद्रपदानक्षत्र'मिति पाठः समीचीनो भाति। ५. 'ता रेवती खलु णक्खत्ते पच्छंभागे सम० जहा धणिट्ठा जाव सायं चंदं अस्सिणीणं समप्पेति।' - इति मूले पाठः। ६. सकलां च रात्रि... ।, N।

एतदेवोपसंहारत आह – **'एवं[१] खल्वि'**त्यादि सुगमं यावद्**योगमनुपरिवर्त्त्य सायंसमये चन्द्रमश्विन्याः समर्प्पयति**। तत इदमप्यश्विनीनक्षत्रं सायं समये चन्द्रेण सह युज्यमानत्वात् पश्चाद्भागमवसेयम्। तथा चाह – **'ता'** इत्यादि सुगमं, नवरमिदमप्यश्विनीनक्षत्रं समक्षेत्रत्वात् सायं समयादारभ्य सकलां[२] रात्रिमपरं दिवसं यावच्चन्द्रेण सह युक्तमवतिष्ठते। एतदेवोपसंहारव्याजेनाह– **'एवं खल्वि'**त्यादि सुगमं यावत् **योगमनुपरिवर्त्त्य सायं** प्रायः परिस्फुटनक्षत्रमालावलोकसमये **चन्द्रं भरण्याः समर्प्पयति**। इदं च भरणीनक्षत्रमुक्तयुक्त्या रात्रौ चन्द्रेण सह योगमुपैति। ततो नक्तम्भागमवसेयम्। तथा चाह **'(ता) भरणी'**त्यादि पाठसिद्धं, नवरमिदमपार्द्धक्षेत्रत्वाद्रात्रावेव योगं परिसमापयति। ततो न लभते चन्द्रेण सह युक्तमपरं दिवसम्। एतदेवोपसंहारव्याजेनाह – **'एवं[३] खल्वि'**त्यादि सुगमं यावत् योगमनुपरिवर्त्त्य प्रातश्चन्द्रं कृत्तिकानां समर्प्पयति। [४]इदं च **कृत्तिकानक्षत्र**मुक्तयुक्त्या **प्रातश्चन्द्रेण सह योग**मुपैति। ततः पूर्वभागमवसेयम्। एतदेवोपसंहारव्याजेन व्यक्तीकरोति – **'एवं खल्वि'**त्यादि सुगमं यावत् **योगमनुपरिवर्त्त्य प्रातश्चन्द्रं रोहिण्याः समर्प्पयति**। इदं च रोहिणीनक्षत्रं द्व्यर्द्धक्षेत्रमतः प्रागुक्तयुक्तिवशादुभयभागं प्रतिपत्तव्यम्। **'रोहिणी जहा उत्तरभद्दव(य)'**[इ]त्ति रोहिणी यथा प्राक् उत्तरभद्रपदा उक्ता तथा वक्तव्या। सा चैवम् – **'ता रोहिणी खलु नक्खत्ते उभयंभागे दिवड्ढखेत्ते पणयालीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ अवरं च राइं ततो पच्छा अवरं दिवसं। एवं खलु रोहिणीनक्खत्ते दो दिवसे एगं च [५]राइं चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टइ जोगं अणुपरियट्टित्ता सायं चंदं मिगसिरस्स समप्पेइ।' 'मिगसिरं जहा**

---

१. ता रेवती खलु णक्खत्ते पच्छंभागे सम० जहा धणिट्ठा जाव सायं चंदं अस्सिणीणं समप्पेति - मूले। २. रात्रिमपरं च दिवसं - I, N। ३. ता भरणी खलु णक्खत्ते णत्तंभागे अवड्ढ० जहा सतभिसता जाव पादो चंदं कात्तिताणं समप्पेति। - मूले। ४. मूले तु भरणिनक्षत्रालापकानन्तरमेवं पाठो दृश्यते - एवं जहा सयभिसया तहा नत्तंभागा नेयव्वा,....। ५. रायं - B, F।

धणिट्ठ'त्ति मृगशिरो नक्षत्रं यथाप्राग्धनिष्ठोक्ता तथा वक्तव्यम्। तद्यथा '**ता मिगसिरे खलु नक्खत्ते पच्छंभा[गं](गे) समखेत्ते तीसइमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ [१]सायं चंदेण सद्धिं जोगं जोइत्ता ततो पच्छा अवरं दिवसं। एवं खलु मिगसिरे नक्खत्ते एगं राइं एगं दिवसं चंदेण सद्धिं जोगं जोएइ (जोगं) जोइत्ता (जोगं अणुपरियट्टइ) जोगं अणुपरियट्टित्ता सायं चंदं अद्दाए समप्पेइ**' इति। '**एवं जहा सयभिसया तहा नत्तंभागा नेयव्वा, जहा पुव्वभद्दवया तहा पुव्वंभागा छप्पि नेयव्वा, जहा धणिट्ठा तहा पच्छंभागा नेयव्वा**' इति। एवमुक्तेन प्रकारेण **यथा शतभिषक्** उक्तस्तथा सर्वाण्यपि **नक्तम्भागानि नेतव्यानि, यथा पूर्वभद्रपदा तथा पूर्वभागानि षडपि नेतव्यानि, यथा धनिष्ठा तथा पश्चाद्भागानि,** उपलक्षणमेतत् तेन यथा उत्तरभद्रपदा तथा सर्वाण्यप्युभयभागानि द्रष्टव्यानि। तानि चैवं '**अद्दा खलु नक्खत्ते नत्तंभागे अवड्ढखेत्ते पन्नरसमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, नो लहइ अवरं दिवसं। एवं खलु अद्दा एगं रायं चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता पातो चंदं पुणव्वसूणं समप्पेइ।**' इदं (च) पुनर्वसुनक्षत्रं द्व्यर्द्धक्षेत्रत्वात् प्रागुक्तयुक्तेरुभयभा[व](ग)मवसेयम्। ततश्चैवं तत्सूत्रं – '**ता पुणव्वसू नक्खत्ते उभयंभागे दिवड्ढखेत्ते पणयालीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता अवरं च राइं ततो पच्छा अवरं दिवसं। एवं खलु पुणव्वसू नक्खत्ते दो दिवसे एगं च राइं चंदेण सद्धिं जोगं जोएइ जोगं जोएत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता सायं चंदं पुस्सस्स समप्पेइ।**' इदं च पुष्यनक्षत्रं सायंसमये दिवसावसानरूपे चन्द्रेण सह योगमधिगच्छति। ततः पश्चाद्भागमवसेयम्। तत एवं तत्सूत्रं – '**(ता) पुस्से[व] खलु नक्खत्ते पच्छंभागे समक्खेत्ते तीसइमुहुत्ते**

१. साइं - B।

तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं दिवसं। एवं खलु पुस्से नक्खत्ते एगं राइं एगं च दिवसं चंदेण सद्धिं जोगं जोएइ (जोगं) जोइत्ता जोगं अणुपरियट्टेइ (जोगं) अणुपरियट्टित्ता सायं चंदं असिलेसाए समप्पेइ।' इदं चाश्लेषानक्षत्रं सायंसमये परिस्फुटनक्षत्रमण्डलालोकरूपे प्रायश्चन्द्रेण सह योगमुपैति। तत इदं नक्तम्भागमवसेयम्। अपार्द्धक्षेत्रत्वाच्च तस्यामेव रात्रौ योगं परिसमापयति। तत एवं तत्सूत्रं - **'ता असलेसा खलु नक्खत्ते नत्तंभागे अवड्ढखित्ते पन्नरसमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ (जोगं) जोइत्ता नो लभइ अवरं दिवसं। एवं खलु असलेसा नक्खत्ते एगं राइं[1] चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता पातो चंदं मघाणं समप्पेइ।'** इदं तु मघानक्षत्रमुक्तयुक्त्या प्रातश्चन्द्रेण सह योगमश्नुते ततः पूर्वभागमवसेयम्। एवं च तत्सूत्रं - **'ता मघा खलु नक्खत्ते पुव्वंभागे समक्खेत्ते[2] तीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं राइं। एवं खलु मघा नक्खत्ते एगं दिवसं एगं च राइं चंदेण सद्धिं जोगं जोएइ (जो०२) त्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता पातो चंदं पुव्वफग्गुणीणं समप्पेइ।'** इदमपि पूर्वफाल्गुनीनक्षत्रं प्रातश्चन्द्रेण सह योगमुक्तनीत्या समधिगच्छति। ततः पूर्वभागं प्रत्येतव्यम्। एवं च तत्सूत्रं – **'ता पुव्वफग्गुणीनक्खत्ते पुव्वंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं राइं[3]। एवं खलु पुव्वफग्गुणीनक्खत्ते एगं च दिवसमेगं च राइं चंदेण सद्धिं जोगं जोएइ (जोगं) जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टिता पातो चंदमुत्तराणं फग्गुणीणं समप्पेइ।'** एतच्चोत्तरफाल्गुनीनक्षत्रं द्व्यर्द्धक्षेत्रमतः प्रागुक्तयुक्तिवशादुभयभागं वेदितव्यम्। एवं च तत्सूत्रं – **'ता उत्तरफग्गुणीनक्खत्ते उभयंभागे**

१. रायं - C, D। २. समक्खित्ते - B, T। ३. रायं - C।

दिवड्ढखेत्ते पणयालीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ अवरं च राइं, ततो पच्छा अवरं च दिवसं। एवं खलु उत्तरफग्गुणीनक्खत्ते दो दिवसे एगं च [१]राइं चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता [२]सायं चंदं हत्थस्स समप्पेइ।' [३]एतच्च हस्तनक्षत्रं सायं दिवसावसानसमये चन्द्रेण सह योगमधिरोहति। तेन पश्चाद्भागमवसेयम्। तत्सूत्रं चैवं – **'ता हत्थे खलु नक्खत्ते पच्छंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए [४]सायं चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं दिवसं। एवं खलु हत्थनक्खत्ते एगं [५]राइमेगं च दिवसं चंदेणं सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता सायं चंदं चित्ताए समप्पेइ।'** इदमपि चित्रानक्षत्रं सायंसमये प्रायो दिवसावसानसमये चन्द्रयोगमुपैति। तत इदमपि पश्चाद्भागमवसेयम्। एवं च तत्सूत्रं – **'ता चित्ता खलु नक्खत्ते पच्छंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं दिवसं। एवं खलु चित्तानक्खत्ते एगं रायमेगं च दिवसं चंदेण सद्धिं जोयं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता चंदं सायं साइए समप्पेइ।'** स्वातिश्च सायंसमये प्रायः परिस्फुटदृश्यमाननक्षत्रमण्डलरूपे चन्द्रेण सह योगमुपैति। तत इयं नक्तम्भागा प्रत्येया। तत्सूत्रं चेत्थं – **'ता साई खलु नक्खत्ते नत्तंभागे अवड्ढखेत्ते पन्नरसमुहुत्ते तप्पढमयाए सायं चंदेणं सद्धिं जोगं जोएइ, नो [६]लभइ अवरं दिवसं। एवं खलु साई नक्खत्ते एगं राइं चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता पातो चंदं विसाहाणं समप्पेइ।'** इदं च विशाखानक्षत्रं द्व्यर्द्धक्षेत्रम्, ततः प्रागुक्तयुक्तिवशादुभयभागमवसेयम्। एवं च तत्सूत्रम् – **'विसाहा**

---

१. रायं - A, M, राईयं - H। २. साइं - A। ३. तच्च - T। ४. साइं - G, M। ५. रायमेगं - G। ६. लभेइ - G।

खलु नक्खत्ते उभयंभागे दिवड्ढखेत्ते पणयालीसइमुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोगं जोएइ अवरं च राइं, ततो पच्छा अवरं दिवसं। एवं खलु विसाहानक्खत्ते दो दिवसे एगं च राइं चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता सायं चंदं अणुराहाए समप्पेइ।' इदं चानुराधानक्षत्रं सायंसमये दिवसावसानरूपे चन्द्रेण सह योग-मुपै(ती)ति पश्चाद्भागमवसेयमित्थं च तत्सूत्रं – **'ता अणुराहा खलु नक्खत्ते पच्छंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं दिवसं। एवं खलु अणुराहानक्खत्ते (एगं राइं) एगं (च) दिवसं चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता सायं चंदं [१]जिट्ठाए समप्पेइ।'** ज्येष्ठायाश्च सायंसमये समर्प्पयति प्रायः परिस्फुटदृश्यमाननक्षत्रमण्डले। तत इदं ज्येष्ठानक्षत्रं नक्तम्भागमवसेयम्। तत्सूत्रं चैवं – **'ता जेट्ठा खलु नक्खत्ते नत्तंभागे अवड्ढखेत्ते पन्नरसमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोगं जोएइ, नो [२]लहइ अवरं दिवसं। एवं खलु जेट्ठानक्खत्ते एगं राइं चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता [३]पाओ चंदं मूलस्स समप्पेइ।'** मूलनक्षत्रं चोक्तप्रकारेण प्रायश्चन्द्रेण सह योगमधिगच्छति प्रातस्तत इदं पूर्वभागमव[४]सातव्यम्। तत्सूत्रं चेदं – **'ता मूलनक्खत्ते पुव्वंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए [५]पाओ चंदेण सद्धिं जोगं जोएइ, ततो पच्छा अवरं राइं। एवं खलु मूलनक्खत्ते एगं च दिवसमेगं च राइं चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता [६]पाओ चंदं पुव्वासाढाणं समप्पेइ।'** इदमपि पूर्वाषाढानक्षत्रं प्रातश्चन्द्रेण सह योगमुक्तयुक्त्या समुपैतीति पूर्वभागमवसेयम्।

---

१. जेट्ठाए - G, L। २. लभइ - G। ३. पातो - G, J। ४. ...मवसेयं - E, K। ५. पातो - J, L। ६. पातो L।

[१]एवं च तत्सूत्रं – **'ता पुव्वासाढा खलु नक्खत्ते पुव्वंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए [२]पाओ चंदेण सद्धिं जोगं जोएइ अवरं च राइं। एवं खलु पुव्वासाढा नक्खत्ते एगं च दिवसमेगं च राइं चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टेइ जोगं अणुपरियट्टित्ता पातो चंदं उत्तरासाढाणं समप्पेइ।'** उत्तराषाढानक्षत्रं च द्व्यर्द्धक्षेत्रत्वादुभयभागं वेदितव्यम्। तत्सूत्रं [३]चैवं **'ता उत्तरासाढा खलु नक्खत्ते उभयंभागे दिवड्ढखेत्ते पणयालीसंमुहुत्ते तप्पढमयाए पातो चंदेणं सद्धिं जोगं जोएइ अवरं च राइं, ततो पच्छा [४]अवरं च दिवसं।'** अत ऊर्द्ध्वं चैतद्गतं सूत्रं साक्षादाह – **'जाव एवं खलु उत्तरासाढा दो दिवसे'** इत्यादि, यावत्करणात्पाश्चात्यनक्षत्रगतानि सूत्राण्यनुक्तान्यपि द्रष्टव्यानि, तानि च तथोपदर्शितानि। तदेवं बाहुल्यमधिकृत्योक्तप्रकारेण यथोक्तेषु कालेषु नक्षत्राणि चन्द्रेण सह योगमुपयान्ति[५]। ततः कानिचित्पूर्वभागानि कानिचित्पश्चाद्भागानि कानिचिन्नक्तम्भागानि कानिचिदुभयभागानि उक्तानि।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य चतुर्थं प्राभृतप्राभृतं समाप्तम्।

* * * * *

चित्तरत्नमसङ्क्लिष्टं, महतामुत्तमं धनम्।
येन सम्प्राप्यते स्थानं, जरा-मरणवर्जितम्॥

समतां सर्वभूतेषु, यः करोति सुमानसः।
ममत्वभावनिर्मुक्तो, यात्यसौ पदमव्ययम्॥

---

१. एवं तत्सूत्रं - E। २. पातो - J, L। ३. चेदं - K। ४. अवरं दिवसं - E, K, T, अवरदिवसं - J, N। ५. मुपयन्ति - K, L, N।

पञ्चमं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य चतुर्थं प्राभृतप्राभृतम्। सम्प्रति पञ्चममारभ्यते। तस्य चायमर्थाधिकारो यथा कुलानि वक्तव्यानीति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता कहं (ते) कुला आहिताति वदेज्जा ?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत् **कथं** केन प्रकारेण भगवन्! **त्वया कुलान्याख्यातानीति वदेत्**?

एवमुक्ते भगवानाह–

मू० तत्थ खलु इमे बारस कुला बारस उवकुला चत्तारि कुलोवकुला पण्णत्ता। बारस कुला तं जहा– धणिट्ठा कुलं उत्तराभद्दवता कुलं अस्सिणी कुलं कत्तिया कुलं मगसिरकुलं पुस्सो कुलं महा कुलं उत्तराफग्गुणी कुलं चित्ता कुलं विसाहा कुलं मूलकुलं उत्तरासाढा कुलं। बारस उवकुला, (तं०) सवणो उवकुलं पुव्वभद्दवता उवकुलं रेवती उवकुलं भरणी उवकुलं रोहिणी उवकुलं पुणव्वसुउवकुलं अस्सिलेसा उवकुलं पुव्वाफग्गुणी उवकुलं हत्थो उवकुलं साती उवकुलं जेट्ठा उवकुलं पुव्वासाढा उवकुलं। चत्तारि कुलोवकुला (तं०) अभिती कुलोवकुलं सतभिसता कुलोवकुलं अद्दा कुलोवकुलं अणुराधा कुलोवकुलं।

दसमे पंचमं ५।

टी० 'तत्थे'त्यादि। इह न केवलं भगवता कुलान्येवाख्यातानि किन्तूपकुलानि कुलोपकुलानि च, ततो निर्द्धारणार्थं तत्रेति भगवान् ब्रूते। **तत्र** तेषां कुलादीनां मध्ये **खल्विमानि द्वादश कुलानि,** अत्र पुंस्त्वनिर्देशः प्राकृतत्वात्। **'इमे'** इति च प्रतिपदमभिसम्बध्यते। इमानि वक्ष्यमाणस्वरूपाणि **द्वादशोपकुलानि** इमानि च

वक्ष्यमाणस्वरूपाणि **चत्वारि कुलोपकुलानि प्रज्ञप्तानि**। अथ किं कुलादीनां लक्षणम् ? उच्यते, इह यैर्नक्षत्रैः प्रायः सदा मासानां समाप्तय उपजायन्ते, मास[ानां]सदृशनामानि च तानि नक्षत्राणि कुलानि प्रसिद्धानि, तद्यथा-श्राविष्ठो मासः प्रायः श्रविष्ठया धनिष्ठाऽपरपर्यायया परिसमाप्तिमुपैति, भाद्रपद उत्तरभद्रपदाभ्यामश्वयुक् अश्विन्या इति धनिष्ठादीनि प्रायो मासपरिसमापकानि माससदृशनामानि कुलानि। तेषामेव कुलानामधस्तनानि यानि नक्षत्राणि श्रवणादीनि तान्युपकुलानि, कुलानां समीपमुपकुलं, तत्र वर्त्तन्ते यानि नक्षत्राणि तान्युपचारादुपकुलानि। यानि च कुलानामुपकुलानां चाधस्तनानि तानि कुलोपकुलानि अभिजिदादीनि चत्वारि नक्षत्राणि। उक्तञ्च – **'मासाणं परिणामा होंति कुला, उवकुला य हिट्ठिमगा। होंति पुण कुलोवकुला अभिइ सय अद्द अणुराहा॥१३९॥'** (**जम्बूद्वीपप्रज्ञप्तिः**) अत्र **'मासाणं परिणामा'** इति मासानां परिसमापकानि। क्वचित् **'मासाण सरिसनामा'** इति पाठः, तत्र मासानां सदृशनामानीति व्याख्येयम्। **'सय'**त्ति शतभिषक्। शेषं सुगमम्। सम्प्रति यानि द्वादशकुलानि यानि च द्वादश उपकुलानि यानि (च) चत्वारि कुलोपकुलानि तानि क्रमेण कथयति। **'बारसकुला तं जहा'** इत्यादि सुगमम्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य पञ्चमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

यदि सत्सङ्गनिरतो, भविष्यसि भविष्यसि।
अथासज्जनगोष्ठीषु, पतिष्यसि पतिष्यसि॥

षष्ठं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य पञ्चमं प्राभृतप्राभृतम्। सम्प्रति षष्ठमारभ्यते। तस्य चायमर्थाधिकारो यथा पौर्णमास्योऽमावास्याश्च वक्तव्या इति। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते पुण्णमासी[१] आहिता ति वदेज्जा?

टी० '**ता कहं ते**' इत्यादि। '**ता**' इति पूर्ववत् **कथं** केन प्रकारेण केन नक्षत्रेण परिसमाप्यमाना इत्यर्थः **(त्वया) पौर्णमास्य[२] आख्याता इति वदेत्**? अत्र पौर्णमासीग्रहणममावास्योपलक्षणम्। तेन कथममावास्या अप्याख्याता इति वदेत्?

एवमुक्ते भगवानाह –

मू० तत्थ खलु इमातो दुवालस पुण्णिमातो दुवालस अमावासातो। दुवालस पुण्णिमातो, तं जहा- साविट्ठी पोट्ठव[ता](ती) अस्सोई[३] कत्तिया मग्गसिरी पोसी माही फग्गुणी चेत्ती वइसाही जेट्ठामूली[४] आसाढी।

टी० '**तत्थे**'त्यादि। **तत्र** तासां पोर्णमासीनाममावास्यानां च मध्ये जातिभेदमधिकृत्य **खल्विमा द्वादश पौर्णमास्यो द्वादश** चेमा **अमावास्याः** प्रज्ञप्तास्**तद्यथा-श्राविष्ठी प्रौष्ठपदी** इत्यादि, तत्र श्रविष्ठा-धनिष्ठा तस्यां भवा श्राविष्ठी श्रावणमासभाविनी, प्रौष्ठपदा-उत्तरभद्रपदा तस्यां भवा प्रौष्ठपदी भाद्रपदमासभाविनी, अश्वयुजि भवा आश्वयुजी अश्वयुग्मासभाविनी। एवं मासक्रमेण तत्तन्नामानुरूप[५]-नक्षत्रयोगात् शेषा अपि वक्तव्याः।

सम्प्रति यैर्नक्षत्रैरेकैका पौर्णमासी परिसमाप्यते तानि पिपृच्छिषुराह–

---

१. पुण्णिमासी - P। २. पौर्णमास्याख्याता - ।। ३. कत्तियी - H। ४. जेट्ठी - P। ५. तत्तन्नामानुरूपा नक्षत्रयोगात् - H।

मू० ता साविट्ठिं णं पोण्णिमं कति णक्खत्ता जोएंति?

टी० **'ता साविट्ठिं ण'**मित्यादि। **'ता'** इति पूर्ववत् **श्रावि[ष्ठा](ष्ठीं) पौर्णमासीं कति नक्षत्राणि युञ्जन्ति-** कति नक्षत्राणि चन्द्रेण सह संयुज्य परिसमापयन्ति ?

भगवानाह–

मू० ता तिण्णि णक्खत्ता जोएंति, तं जहा - अभिई सवणो धणिट्ठा।

टी० 'ता तिण्णि' इत्यादि। **'ता'** इति पूर्ववत् **त्रीणि नक्षत्राणि युञ्जन्ति** - त्रीणि नक्षत्राणि चन्द्रेण सह यथायोगं संयुज्य परिसमापयन्ति। **तद्यथा– अभिजित् श्रवणो धनिष्ठा च**। इह श्रवणधनिष्ठारूपे द्वे एव नक्षत्रे श्राविष्ठीं पौर्णमासीं परिसमापयतः केवलमभिजिन्नक्षत्रं श्रवणेन सह सम्बद्धमिति तदपि परिसमापयतीत्युक्तम्। कथमेतदवसीयते इति चेत् ? उच्यते, इह प्रवचनप्रसिद्ध-ममावास्यापौर्णमासीविषयचन्द्रयोगपरिज्ञानार्थमिदं करणं – **'नाउमिह अमावासं जइ इच्छसि कम्मि होइ रिक्खंमि। अवहारं ठावेज्जा तत्तियरूवेहिं संगुणए॥३३६॥ छावट्ठी य मुहुत्ता बिसट्ठिभागा य पंच पडिपुण्णा। बावट्ठिभाग सत्तट्ठिगो य एक्को हवइ भागो॥३३७॥ एयमवहाररासिं इच्छ-अमावाससंगुणं कुज्जा। नक्खत्ताणं एत्तो सोहणगविहिं निसामेह॥३३८॥ बावीसं च मुहुत्ता छायालीसं बिसट्ठिभागा य। ए[वं](यं) पुणव्वसुस्स य सोहेयव्वं हवइ पुण्णं॥३३९॥ बावत्तरं सयं फग्गुणीण बाणउया बे विसाहासु चत्तारि य बायाला सोज्झा [त](अ)ह उत्तरासाढा॥३४०॥ एयं पुणव्वसुस्स य बिसट्ठिभागसहियं तु सोहणगं। एत्तो अभिइआइं बिइयं वोच्छामि सोहणगं॥३४१॥ अभि[य](इ)स्स नव मुहुत्ता बिसट्ठिभागा य हुंति चउवीसं।**

छावट्ठी य समत्ता भागा सत्तट्ठिछेयकया॥३४२॥ उगुणट्ठं पुट्ठवया तिसु चेव नवोत्तरेसु रोहिणिया। तिसु नवनउइएसु भवे पुणव्वसू फग्गुणिओ य॥३४३॥ पंचेव उगुणपन्नं सयाइ उगुणत्तराइं छच्चेव। सोज्झाणि विसाहासु मूले सत्तेव चोयाला॥३४४॥ अट्ठसय [1]इगुणविसा सोहणगं उत्तराणसाढाणं। चउवीसं खलु भागा छावट्ठी चुण्णियाओ य॥३४५॥ एयाइं सोहइत्ता जं सेसं तं हवेज्ज नक्खत्तं। इच्छं [2]करेइ उडुवइ सूरेण समं अमावासं॥३४६॥ इच्छापुण्णिमगुणिओ अवहारो सोत्थ होइ कायव्वो। तं चेव य सोहणगं अभिइआई उ कायव्वं॥३४७॥ सुद्धंमि य सोहणगे जं सेसं तं हवेज्ज नक्खत्तं। तत्थ य करेइ उडुवइ पडिपुन्नो पुन्निमं विमलं॥३४८॥' (जो.प.)

एतासां गाथानां क्रमेण व्याख्या – याम**मावास्यामिह** युगे **ज्ञातुमिच्छसि** यथा **कस्मिन्नक्षत्रे** परिसमाप्ता **भवती**ति **तावद्रूपै**र्यावन्त्योऽमावास्या अतिक्रान्तास्तावत्या सङ्ख्यया इत्यर्थः, वक्ष्यमाणस्वरूपमवधार्यते - तत्प्रथमतया स्थाप्यत इति अवधार्यो ध्रुवराशिः तमव**धार्यराशिं** पट्टिकादौ **स्थापयित्वा सङ्गुणयेत्**॥३३६॥ अथ किम्प्रमाणोऽसाववधार्यराशिरिति तत्प्रमाणनिरूपणार्थमाह – **'छावट्ठी'** गाहा – **षट्षष्टिमुहूर्त्ता** एकस्य च मुहूर्त्तस्य **पञ्च परिपूर्णा द्वाषष्टिभागा** एकस्य द्वाषष्टिभागस्य **एकः सप्तषष्टितमो भाग** एतावत्प्रमाणोऽवधार्यराशिः। कथमेत-त्प्रमाणस्योत्पत्तिरिति चेत् ? उच्यते, इह यदि चतुर्विंशत्यधिकेन पर्वशतेन पञ्च सूर्यनक्षत्रपर्याया लभ्यन्ते ततो द्वाभ्यां पर्वभ्यां किं लभामहे ? राशित्रयस्थापना- १२४।५।२। अत्रान्त्येन राशिना द्विकलक्षणेन मध्यो राशिः पञ्चलक्षणो गुण्यते। जाता दश। तेषां चतुर्विंशत्यधिकेन शतेन भागहरणम्। तत्र छेद्यछेद-कराश्योर्द्विकेनापवर्त्तना क्रियते, जातः उपरितनच्छेद्यो राशिः [3]पञ्चरूपोऽधस्तनो द्वाषष्टिरूपः। लब्धाः पञ्च द्वाषष्टिभागाः। एतेन नक्षत्राणि कर्त्तव्यानीति नक्षत्र-

१. अगुण... D, M, उगुण.... T। २. इत्थं - E, F, M, N, T। ३. पञ्चकरूपो - C, T।

करणार्थमष्टादशभिः शतैस्त्रिंशदधिकैः सप्तषष्टिभागरूपैर्गुण्यते जातान्येकनवतिशतानि पञ्चाशदधिकानि ९,१५०। छेदराशिरपि द्वाषष्टिप्रमाणः सप्तषष्ट्या गुण्यते जातान्येकचत्वारिंशत्शतानि चतुःपञ्चाशदधिकानि ४,१५४। उपरितनो राशिर्मुहूर्त्तानयनार्थं त्रिंशता गुण्यते। जाते द्वे ल[क्ष्ये](क्षे) चतुःसप्ततिसहस्राणि पञ्च शतानि २,७४,५००। तेषां चतुःपञ्चाशदधिकैकचत्वारिंशत्शतैर्भागहरणम्। लब्धाः षट्षष्टिमुहूर्त्ताः ६६। शेषा अंशास्तिष्ठन्ति त्रीणि शतानि षट्त्रिंशदधिकानि ३३६। ततो द्वाषष्टिभागानयनार्थं तानि द्वाषष्ट्या गुण्यन्ते। जाता विंशतिसहस्राणि अष्टौ शतानि द्वात्रिंशदधिकानि २०,८३२। तेषामनन्तरोक्तेन च्छेदराशिना ४,१५४ भागो ह्रियते। लब्धाः पञ्च द्वाषष्टिभागाः ५। शेषा तिष्ठति द्वाषष्टिः। ततस्तस्या द्वाषष्ट्या अपवर्त्तना क्रियते। जात एककः। च्छेदराशेरपि द्वाषष्ट्याऽपवर्त्तनायां लब्धाः सप्तषष्टिः। तत आगतं षट्षष्टिमुहूर्त्ताः एकस्य च मुहूर्त्तस्य पञ्च द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभाग इति। तदेवमुक्तमवधार्यराशिप्रमाणम्॥३३७॥ सम्प्रति शेषविधिमाह – '**एयमवहारे**'त्यादि। [१]**एतम**मनन्तरोदितस्वरूप**मवधार्यराशिमिच्छाऽमावास्यासङ्गुणं** याममावास्यां ज्ञातुमिच्छसि तत्सङ्ख्यया गुणितं **कुर्यात्**। अत ऊर्द्ध्वं तु नक्षत्राणि शोधनीयानि। ततोऽत ऊर्द्ध्वं **नक्षत्राणां शोधनकविधिं**-शोधनकप्रकारं वक्ष्यमाणं **निशमयत** आकर्ण्णयत॥३७८॥ तत्र प्रथमतः पुनर्वसुशोधनकमाह – '**बावीसं चे**'त्यादि गाथा। **द्वाविंशतिमुहूर्त्ता** एकस्य च मुहूर्त्तस्य **षट्चत्वारिंशत् द्वाषष्टिभागा एतत्** एतावत्प्रमाणं **पुनर्वसुनक्षत्रस्य परिपूर्णं भवति शोद्धव्यम्**। कथमेवम्प्रमाणस्य शोधनकस्योत्पत्तिरिति चेत् ? उच्यते, इह यदि चतुर्विंशत्यधिकेन पर्वशतेन पञ्चसूर्यनक्षत्रपर्याया लभ्यन्ते तत एकं पर्वातिक्रम्य कति पर्यायास्तेनैकेन पर्वणा लभ्यन्ते ? राशित्रयस्थापना १२४।५।१। अत्रान्त्येन राशिना एककलक्षणेन मध्यो राशिः पञ्चकरूपो गुण्यते जाताः पञ्चैव,

१. इमम ... A, D, E, F, H, I।

एकेन गुणितं तदेव भवतीति वचनात्। तेषां चतुर्विंशत्यधिकेन शतेन भागो ह्रियते, लब्धाः पञ्च चतुर्विंशत्यधिकशतभागास्ततो नक्षत्रानयनार्थमेतेऽष्टादशभिः शतैस्त्रिंशदधिकैः सप्तषष्टिभागरूपैर्गुणयितव्या इति गुणकारच्छेदराश्योर्द्विकेनापवर्त्तना, जातो गुणकारराशिर्नवशतानि पञ्चदशोत्तराणि ९१५, च्छेदराशिः द्वाषष्टिः ६२। ततः पञ्च नव[तिः](भिः) पञ्चदशोत्तरैः शतैर्गुण्यन्ते जातानि पञ्चसप्तत्यधिकानि पञ्चचत्वारिंशच्छतानि ४,५७५। छेदराशिः द्वाषष्टिलक्षणः सप्तषष्ट्या गुण्यते, जातान्येकचत्वारिंशच्छतानि चतुःपञ्चाशदधिकानि ४,१५४। तथा पुष्यस्य ये त्रयोविंशतिभागाः प्राक्तनयुगपरिसमाप्तेरुद्धरितास्ते द्वाषष्ट्या गुण्यन्ते जातानि चतुर्दश शतानि षड्विंशत्यधिकानि १,४२६। तानि प्राक्तनात्पञ्चसप्तत्यधिकपञ्चचत्वारिंशत्शतप्रमाणात् शोध्यन्ते। शेषं तिष्ठति एकत्रिंशत्शतानि एकोनपञ्चाशदधिकानि ३,१४९। तत एतानि मुहूर्त्तानयनार्थं त्रिंशता गुण्यन्ते, जातानि चतुर्नवतिसहस्राणि चत्वारि शतानि सप्तत्यधिकानि ९४,४७०। [१]तेषां च्छेदराशिना चतुःपञ्चाशदधिकैकचत्वारिंशत्शतरूपेण भागो ह्रियते। लब्धा द्वाविंशतिर्मुहूर्त्ताः। शेषं तिष्ठति त्रीणि सहस्राणि द्व्यशीत्यधिकानि ३,०८२। एतानि द्वाषष्टिभागानयनार्थं द्वाषष्ट्या गुण्यन्ते। जातमेकं लक्षमेकनवतिसहस्राणि चतुरशीत्यधिकानि १,९१,०८४। तेषां च्छेदराशिना ४,१५४ भागो ह्रियते। लब्धाः षट्चत्वारिंशत् मुहूर्त्तस्य द्वाषष्टिभागाः। एषा पुनर्वसुनक्षत्रशोधनकनिष्पत्तिः॥३३९॥ शेषनक्षत्राणां शोधनकान्याह – **'बावत्तरं सय'**मित्यादि। **द्वासप्ततं**-द्विसप्तत्यधिकं **शतं फाल्गुनीनां** उत्तरफाल्गुनीनां शोध्यम्। किमुक्तं भवति ? द्विसप्तत्यधिकेन शतेन पुनर्वसुप्रभृतीन्युत्तरफाल्गुनीपर्यन्तानि नक्षत्राणि शुध्यन्ति। एवमुत्तरत्रापि भावनीयम्। तथा **विशाखासु** विशाखापर्यन्तेषु नक्षत्रेषु शोधनकं **द्वे शते द्विनवत्यधिके** २९२। **अथा**नन्तर**मुत्तराषाढा**पर्यन्तानि नक्षत्राणि अधिकृत्य शोध्यानि **चत्वारि शतानि द्विचत्वारिंशदधिकानि** ॥३४०॥ **'एयं**

१. एतेषां - E।

पुणे'त्यादि गाथा। [१]**एतत्** अनन्तरोक्तं **शोधनकं** सकलमपि **पुनर्वसुसत्कद्वाषष्टि-भागसहितम**वसेयम्। एतदुक्तं भवति - ये पुनर्वसुसत्का द्वाविंशतिमुहूर्त्तास्ते सर्वेप्युत्तरस्मिन् उत्तरस्मिन् शोधनके अन्तःप्रविष्टा [२]वर्त्तन्ते, न [३]तु द्वाषष्टिभागाः, [४]ततो यत् यत् शोधनकं शोध्यते तत्र तत्र पुनर्वसुसत्काः षट्चत्वारिंशत् द्वाषष्टिभागा उपरितनाः शोधनीया इति। एतच्च पुनर्वसुप्रभृत्युत्तराषाढापर्यन्तं प्रथमं शोधनकं अत ऊर्द्ध्वमभिजित[मिदं](**मादिं**) कृत्वा **द्वितीयं शोधनकं वक्ष्यामि**॥३४१॥ तत्र प्रतिज्ञातमेव निर्वाहयति – '**अभिइस्से**'त्यादि गाथाचतुष्टयम्। **अभिजितो** नक्षत्रस्य शोधनकं **नव मुहूर्त्ता** एकस्य च मुहूर्त्तस्य सत्काश्चतुर्विंशतिद्वाषष्टिभागाः एकस्य च द्वाषष्टिभागस्य **सप्तषष्टिच्छेदकृताः** परिपूर्णाः **षट्षष्टिभागाः**॥३४२॥ तथा **एकोनष[ष्टि](ष्ट)**मेकोनषष्ट्यधिकं शतं **प्रोष्ठपदानामु**त्तरभद्रपदानां शोधनकम्, किमुक्तं भवति ? एकोनषष्ट्यधिकेन शतेनाभिजिदादीन्युत्तरभद्रपदापर्यन्तानि नक्षत्राणि शुध्यन्ति। एवमुत्तरत्राऽपि भावना कर्त्तव्या। तथा **त्रिषु नवोत्तरेषु** शतेषु **रोहिणिका**रोहिणीपर्यन्तानि शुध्यन्ति। तथा **त्रिषु** (**नवनवतेषु**) नवनवत्यधिकेषु शतेषु शोधितेषु **पुनर्वसु**पयन्तं नक्षत्रजातं शुध्यति॥३४३॥ तथै**कोनपञ्चाश-दधिकानि पञ्च शतानि** प्राप्य **फाल्गुन्य**श्चोत्तरफाल्गुनीपर्यन्तानि नक्षत्राणि शुध्यन्ति, **विशाखासु** विशाखापर्यन्तेषु नक्षत्रेषु **एकोनसप्तत्यधिकानि षट्शतानि** ६६९ **शोध्यानि, मूल**पर्यन्ते नक्षत्रजाते **सप्त शतानि चतुश्चत्वारिंशदधिकानि** ७४४ शोध्यानि॥३४४॥ उत्तराषाढापर्यन्तनक्षत्राणां **शोधनकमष्टौ शतानि एकोनविं-शत्यधिकानि** ८१९। सर्वेष्वपि च शोधनकेषूपरि अभिजितो नक्षत्रस्य सम्बन्धिनो मुहूर्त्तस्य **द्वाषष्टिभागाश्चतुर्विंशतिः षट्षष्टि(श्च) चूर्णिकाभागा** एकस्य द्वाषष्टि-भागस्य सप्तषष्टिभागाः शोधनीयाः॥३४५॥ '**एया(इं)**' इत्यादि। **एतानि** अनन्त-रोदितानि शोधनकानि यथायोगं **शोधयित्वा यच्छेष**मवतिष्ठते **तद्भवति नक्षत्रम्**।

---

१. तत् - E। २. प्रवर्त्तन्ते - E, G। ३. च - E। ४. ततो यत् शोधनकं - E।

एतस्मिंश्च नक्षत्रे **करोति सूर्येण सममुडुपतिरमावास्यामिति**। तदेवममावास्या-विषयचन्द्रयोगपरिज्ञानार्थं करणमुक्तम्॥३४६॥ सम्प्रति पौर्णमासीविषयचन्द्रयोग-परिज्ञानार्थं करणमाह – **'इच्छापुण्णिमे'**त्यादि। यः पूर्वममावास्याचन्द्रनक्षत्रपरि-ज्ञानार्थ**मवधार्यराशि**रुक्तः **स** एवात्रापि पौर्णमासीचन्द्रनक्षत्रपरिज्ञानविधौ **ईप्सि-तार्थपौर्णमासीगुणि[ता](तो)** यां पौर्णमासीं ज्ञातुमिच्छति तत्सङ्ख्यया गुणितः **कर्त्तव्यः**। गुणिते च सति **तदेव** पूर्वोक्तं **शोधनकं कर्त्तव्यं** केवल**मभिजिदादिकं** न तु पुनर्वसुप्रभृतिकं[1] ॥३४७॥ **शुद्धे च शोधनके यत् शेष**मवतिष्ठते **तत् भवेन्नक्षत्रं** पौर्णमासीयुक्तम्। **तस्मिंश्च** नक्षत्रे **करोति उडुपतिश्चन्द्रमाः परिपू[र्ण]र्णः पौर्णमासीं**[2] **विमला**मिति ॥३४८॥ एष[3] पौर्णमासीचन्द्रनक्षत्रपरिज्ञानविषयकरण-गाथाद्वयक्षरार्थः। सम्प्रत्यस्यैव भावना क्रियते। कोऽपि पृच्छति युगस्यादौ प्रथमा पौर्णमासी श्राविष्ठी कस्मिँश्चन्द्रनक्षत्रे परिसमाप्तिमुपैतीति ? तत्र षट्षष्टिमुहूर्त्ता एकस्य च मुहूर्त्तस्य पञ्च द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभाग इत्येवंरूपोऽवधार्यराशिः ध्रियते। स प्रथमायां किल पौर्णमास्यां पृष्टमित्येकेन गुण्यते। एकेन च गुणितं तदेव भवति। ततस्तस्मादभिजितो नवमुहूर्त्ता एकस्य च मुहूर्त्तस्य चतुर्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्षष्टिः[4] सप्तषष्टिभागा इत्येव-म्परिमाणं शोधनकं शोध्यते। तत्र षट्ष[ष्टि]ष्टेः नवमुहूर्त्ताः शुद्धाः। स्थिताः सप्त-पञ्चाशत्। तेभ्य एको मुहूर्त्तो गृहित्वा द्वाषष्टीभागीकृतस्ते च द्वाषष्टिरपि द्वाषष्टि-भागराशौ पञ्चरूपे[5] प्रक्षिप्यन्ते। जाता सप्तषष्टिर्द्वाषष्टिभागास्तेभ्यश्चतुर्विंशतिः शुद्धाः, स्थिताः पञ्चात्रिचत्वारिंशत्, तेभ्य एकं रूपमादाय सप्तषष्टिभागीक्रियते। ते च सप्तषष्टिरपि भागाः सप्तषष्टिभागैकमध्ये क्षिप्यन्ते। जाता अष्टषष्टिः सप्तषष्टिभागाः, तेभ्यः षट्षष्टिः शुद्धाः, स्थितौ पश्चात् द्वौ सप्तषष्टिभागौ। ततस्त्रिंशता मुहूर्त्तैः श्रवणः

---

१. .....प्रभृति - K। २. पूर्णमासीं - N। ३. पूर्णमासी - H। ४. सप्तषष्टिः भागा - M। ५. पञ्चकरूपे- K, M, T।

शुद्धः, स्थिताः पश्चात् मुहूर्त्ताः षड्विंशतिः । तत इदमागतं धनिष्ठानक्षत्रस्य [१]षड्विंशतौ मुहूर्त्तेषु गतेष्वेकस्य च मुहूर्त्तस्य द्विचत्वारिंशति[२] द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्वयोः सप्तषष्टिभागयोः २६।४२।२। प्रथमा श्राविष्ठी पौर्णमासी परिसमाप्तिमियर्त्ति। यदा तु द्वितीया श्राविष्ठी पौर्णमासी चिन्त्यते तदा सा युगस्यादित आरभ्य त्रयोदशीति स ध्रुवराशिः ६६ ५/६२ १/६७ त्रयोदशभिर्गुण्यते, जातानि मुहूर्त्तानामष्टौ शतानि [३]अष्टपञ्चाशदधिकानि ८५८, एकस्य च मुहूर्त्तस्य पञ्चषष्टिर्द्वाषष्टिभागाः ६५ एकस्य च द्वाषष्टिभागस्य सत्कास्त्रयोदश सप्तषष्टिभागाः १३। तत्राष्टभिः शतैरेकोनविंशत्यधिकैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य सत्कैः षट्षष्ट्या सप्तषष्टिभागैरेको नक्षत्रपर्यायः शुद्धः। ततः स्थिताः पश्चादेकोनचत्वारिंशन्मुहूर्त्ता एकस्य च मुहूर्त्तस्य चत्वारिंशत्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य चतुर्दश सप्तषष्टिभागा ३९ ४०/६२ १४/६७। ततो नवभिर्मुहूर्त्तैरेकस्य[४] च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिन्नक्षत्रं शुध्यति। स्थिताः पश्चात् त्रिंशन्मुहूर्त्ताः पञ्चदश मुहूर्त्तस्य द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य पञ्चदश सप्तषष्टिभागाः ३० १५/६२ १५/६७। तेभ्यस्त्रिंशता श्रवणः शुद्धः। आगतं धनिष्ठानक्षत्रस्य पञ्चदशसु मुहूर्त्तस्य द्वाषष्टिभागेष्वेकस्य द्वाषष्टिभागस्य पञ्चदशसु सप्तषष्टिभागेषु गतेषु ०।१५।१५ द्वितीया श्राविष्ठी पौर्णमासी परिसमाप्तिमेति। यदा तु [द्वि](तृ)तीया श्राविष्ठी पौर्णमासी चिन्त्यते तदा सा युगादितः पञ्चविंशतितमेति स पूवोक्तो ध्रुवराशिः ६६ ५/६२ १[८]/६७ पञ्चविंशत्या गुण्यते। जातानि षोडशशतानि पञ्चाशदधिकानि १,६५० एकस्य च मुहूर्त्तस्य पञ्चविंशं शतं द्वाषष्टिभागानां १२५ एकस्य च द्वाषष्टिभागस्य पञ्चविंशतिः सप्तषष्टिभागाः। तत्र षोडशभिः शतैरष्टात्रिंशदधिकैः १,६३८ मुहूर्त्तानामेकस्य[५] च

---

१. षड्विंशतिमुहूर्त्तेषु - D, K। २. द्वाचत्वारिंशति - J। ३. अष्टापञ्चा... D, M। ४. .... कस्य मुहूर्त्तस्य - D, J। ५. .... कस्य मुहूर्त्त... D।

मुहूर्त्तस्याष्टाचत्वारिंशता द्वाषष्टिभागैः ४८ एकस्य च द्वाषष्टिभागस्य द्वात्रिंशदधिकेन शतेन (सप्तषष्टिभागैः) १३२ द्वौ नक्षत्रपर्यायौ शुध्यतः। स्थिताः पश्चात् द्वादशमुहूर्त्ताः १२ एकस्य च मुहूर्त्तस्य पञ्चसप्ततिर्द्वाषष्टिभागाः ७५ एकस्य च द्वाषष्टिभागस्य सप्तविंशतिः सप्तषष्टिभागाः २७। ततो नवभिमुर्हूर्त्तैरेकस्य (च मुहूर्त्तस्य) चतुर्विंशत्या द्वाषष्टिभागैरेकस्य द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिन्नक्षत्रं शुध्यति। स्थिताः पश्चात् त्रयो मुहूर्त्ताः ३ एकस्य च मुहूर्त्तस्य पञ्चाशत् द्वाषष्टिभागाः ५०/६२ एकस्य च द्वाषष्टिभागस्याष्टाविंशतिः सप्तषष्टिभागाः २८/६७। आगतं श्रवणनक्षत्रस्य त्रिषु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्याष्टाविंशतौ सप्तषष्टिभागेषु गतेषु ३।५०।२८ तृतीया श्राविष्ठी पौर्णमासी परिसमाप्तिमुपगच्छति। एवं [1]चतुर्थी श्राविष्ठी पौर्णमासी धनिष्ठानक्षत्रस्य त्रयोदशमुहूर्त्तेष्वेकस्य मुहूर्त्तस्याष्टा-विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्विचत्वारिंशति सप्तषष्टिभागेषु १३।२८।४२ गतेषु समाप्नोति, पञ्चमी श्राविष्ठी पौर्णमासी श्रवणनक्षत्रस्य सप्तदशमुहूर्त्तेष्वेकस्य मुहूर्त्तस्यैकस्मिन् द्वाषष्टिभागे एकस्य च द्वाषष्टिभागस्य पञ्चपञ्चाशति सप्तषष्टिभागेषु १७।१।५५ गतेषु परिसमाप्तिमधिगच्छति।

तदेवं यानि नक्षत्राणि श्राविष्ठीं पौर्णमासीं परिसमापयन्ति तान्युक्तानि। सम्प्रति यानि प्रौष्ठपदीं परिसमापयन्ति तान्याह —

मू० ता पोट्ठवतिण्णं पोण्णिमं कति णक्खत्ता जोएंति ?

टी० 'ता पुट्ठव[यन्न](इण्णं)' इत्यादि। **'ता'** इति पूर्ववत् **प्रौष्ठपदीं 'ण'**मिति वाक्यालङ्कारे **पौर्णमासीं कति नक्षत्राणि युञ्जन्ति** ? (कति) नक्षत्राणि यथायोगं चन्द्रेण सह योगं (संयुज्य) परिसमापयन्तीत्यर्थः। एवं सर्वत्रापि युञ्जन्तीत्यस्य पदस्य भावना कर्त्तव्या।

भगवानाह —

---

१. चतुर्था - H, K।

मू० ता तिण्णि णक्खत्ता जोएंति, तं० सतभिसता [१]पुव्वपोट्ठवता उत्तरपोट्ठवता।

टी० '**ता**' इत्यादि। '**ता**' इति पूर्ववत् **त्रीणि नक्षत्राणि युञ्जन्ति, तद्यथा – शतभिषक् [२]पूर्वप्रोष्ठपदा उत्तरप्रोष्ठ[३]पदा** च। तत्र प्रथमां [४]प्रौष्ठपदीं पौर्णमासीमुत्तरभद्रपदानक्षत्रं सप्तदशमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तचत्वारिंशति द्वाषष्टिभागेष्वेक[५]स्य च द्वाषष्टिभागस्य त्रिषु सप्तषष्टिभागेषु १७।४७।३ गतेषु परिसमाप्तिं नयति। द्वितीयां प्रौष्ठपदीं पौर्णमासीं पूर्वभद्रपदानक्षत्रमेकविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य विंशतौ द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य षोडशसु सप्तषष्टिभागेषु २१।२०।१६ गतेषु परिणमयति। तृतीयां प्रौष्ठपदीं [६]पौर्णमासीं शतभिषक्नक्षत्रं नवमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चपञ्चाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्यैकोनत्रिंशति सप्तषष्टिभागेषु गतेषु ९।५५।२९, चतुर्थीं प्रौष्ठपदीं [७]पौर्णमासीमुत्तरभद्रपदानक्षत्रं चतुर्षु मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य त्रयस्त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रिचत्वारिंशति सप्तषष्टिभागेषु गतेषु ४।३३।४३, पञ्चमीं प्रौष्ठपदीं पौर्णमासीं पूर्वभद्रपदानक्षत्रमष्टसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्(सु द्वा)षष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्पञ्चाशति सप्तषष्टिभागेषु गतेषु ८।६।५६ परिसमापयति।

मू० ता अस्सोइं णं पुण्णिमं कति णक्खत्ता जोएंति? ता दुण्णि णक्खत्ता जोएंति, तं जहा - रेवती अस्सिणी य।

टी० '**ता आसोइं ण**'मित्यादि। **आश्वयुजीं** '**ण**'मिति वाक्यालङ्कारे **पौर्णमासीं कति नक्षत्राणि युञ्जन्ति**? भगवानाह – '**ता**' इत्यादि। '**ता**' इति पूर्ववत्। **द्वे नक्षत्रे युङ्क्तस्तद्यथा रेवती अश्विनी च**। इहोत्तरभद्रपदानक्षत्रमपि काश्चिदाश्वयुजीं पौर्णमासीं परिसमापयति। परं तत् प्रौष्ठपदीमपि पौर्णमासीं

१,२. पुव्वभद्दवता उत्तरभद्दवता - H। ३,४. प्रौष्ठपदां - C, F। ५. .....कस्य द्वाषष्टि... F, I। ६. पूर्णमासीं - F। ७. पूर्णमासी... - C।

परिसमापयति। तत्रैव च लोके तस्य प्राधान्यं, तन्नाम्नो तस्याः पौर्णमास्या अभिधानात्। अतस्तदिह न विवक्षितमित्यदोषः। तथाहि – प्रथमाश्वयुजीं पौर्णमासीं अश्विनीननक्षत्रमष्टसु मुहूर्त्तेष्वेकस्य[१] च मुहूर्त्तस्य द्विपञ्चाशति द्वाषष्टिभागेष्वेकस्य[२] च द्वाषष्टिभागस्य चतुर्षु सप्तषष्टिभागेषु ८।५२।४ (गतेषु), द्वितीयामाश्वयुजीं पौर्णमासीं रेवतीनक्षत्रं द्वादशमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तदशसु सप्तषष्टिभागेषु १२।२५।१७ (गतेषु), तृतीयामाश्वयुजीं पौर्णमासीमुत्तरभद्रपदानक्षत्रं त्रिंशति मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य षष्टौ द्वाषष्टिभागेष्वेकस्य[३] च द्वाषष्टिभागस्य त्रिंशति सप्तषष्टिभागेष्वतीतेषु ३०।६०।३०, चतुर्थीमाश्वयुजीं पौर्णमासीं रेवतीनक्षत्रं पञ्चविंशतौ मुहूर्त्तेष्वेकस्य मुहूर्त्तस्याष्टात्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुश्चत्वारिंशति सप्तषष्टिभागेषु (गतेषु) २५।३८।४४, पञ्चमीमाश्वयुजीं पौर्णमासीमुत्तरभद्रपदानक्षत्रं चतुश्चत्वारिंशति मुहूर्त्तेष्वेकस्य (च मुहूर्त्तस्य) एकादशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्त-पञ्चाशति सप्तषष्टिभागेषु गतेषु ४४।११।५७ परिसमापयति।

मू० कत्तियण्णं[४] पुण्णिमं कति णक्खत्ता जोएंति? ता दो णक्खत्ता जोएंति, तं जहा-भरणी कत्तिया य।

टी० 'कत्तियं ण'मित्यादि। **कार्त्तिकीं पौर्णमासीं 'ण'**मिति वाक्यालङ्कारे **कति नक्षत्राणि युञ्जन्ति**? भगवानाह- **द्वे नक्षत्रे युङ्क्तः, तद्यथा– भरणी कृत्तिका च**। इहाप्यश्विनीनक्षत्रमपि काश्चित्कार्त्तिकीं पौर्णमासीं परिसमापयति परं तदाश्वयुज्यां पौर्णमास्यां प्रधानमितीह तन्न विवक्षितम्। तत्र प्रथमां कार्त्तिकीं पौर्णमासीं कृत्तिकानक्षत्रमेकोनत्रिंशति मुहूर्त्तेष्वेकस्य च (मुहूर्त्तस्य) सप्तपञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चसु सप्तषष्टिभागेषु (गतेषु) २९।५७।५,

---

१. ... कस्य मुहूर्त्तस्य - C। २. .... कस्य द्वाषष्टि ... C। ३.... कस्य द्वाषष्टि... C, F। ४. कत्तियण्णं पुच्छा, ता - H।

द्वितीयां कार्त्तिकीं पौर्णमासीं कृत्तिकानक्षत्रं त्रिषु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्याष्टादशसु सप्तषष्टिभागेषु गतेषु ३।३०।१८, तृतीयां कार्त्तिकीं पौर्णमासीमश्विनीनक्षत्रं द्वाविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रिषु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकत्रिंशति सप्तषष्टिभागेषु (गतेषु) २२।३।३१, चतुर्थीं कार्त्तिकीं पौर्णमासीं कृत्तिकानक्षत्रं षोडशमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रिचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चचत्वारिंशति सप्तषष्टिभागेषु (गतेषु) १६।४३।४५, पञ्चमीं कार्त्तिकीं पौर्णमासीं भरणीनक्षत्रं [१]पञ्चमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षोडशसु द्वाषष्टिभागेषु [२]एकस्य च द्वाषष्टिभागस्याष्टापञ्चाशति सप्तषष्टिभागेषु (गतेषु) ५।१६।५८ परिसमापयति।

मू० [३]ता मग्गसिरिं पुण्णिमं कति नक्खत्ता जोयंति ? (ता दोण्णि), तं जहा- रोहिणी मिगसिरं च, पोसिं [णं] तिण्णि तं० अद्दा पुणवस्सू पुस्सो य, माहिं दोण्णि, तं० अस्सिलेसा महा य, फग्गुणिं दोण्णी तं जहा पुव्वा फग्गुणी उत्तरा फग्गुणी य, चि(त्ति) दोण्णि तं जहा हत्थो चित्ता य, वइसाहिं दोण्णि तं जहा साती विसाहा य, जेट्ठामूलिं तिण्णि तं० अणुराहा जेट्ठा मू(लो)य, (ता) आसाढिं णं पुण्णिमं कति णक्खत्ता जोएंति ? ता दोण्णि णक्खत्ता जोएंति तं० पुव्वासाढा उत्तरा य।

टी० '**ता मग्गसि[रं](रिं) ण**'मित्यादि। '**ता**' इति पूर्ववत् **मार्गशीर्षीं** '**ण**'मिति वाक्यालङ्कारे **पौर्णमासीं कति नक्षत्राणि युज्जन्ति** ? भगवानाह – '**ता दोण्णी**'त्यादि। '**ता**' इति [४]प्राग्वत् **द्वे नक्षत्रे युङ्क्तस्तद्यथा रोहिणी मृगशिरश्च,** तत्र प्रथमां मार्गशीर्षीं पौर्णमासीं मृगशिरो नक्षत्रमेकविंशतौ

१. पञ्चसु मुहूर्त्ते..... - E, T। २. एकस्य द्वाषष्टि.. - E, G। ३. एवं एएणं अभिलावेणं मग्गसिरिं दोण्णि, तं जहा - H। ४. पूर्ववत् - E, G।

मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सम्बन्धिनो द्वाषष्टिभागस्य सत्केषु षट्सु सप्तषष्टिभागेषु गतेषु २१।०।६, द्वितीयां मार्गशीर्षीं पौर्णमासीं रोहिणीनक्षत्रमेकोनचत्वारिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चत्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकोनविंशतौ सप्तषष्टिभागेषु गतेषु ३९।३५।१९, तृतीयां [१]मार्गशीर्षीं पौर्णमासीं रोहिणीनक्षत्रं [२]त्रयोदशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टासु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्वात्रिंशति सप्तषष्टिभागेषु (गतेषु) १३।८।३२, चतुर्थीं मार्गशीर्षीं पौर्णमासीं मृगशिरोनक्षत्रं [३]सप्तसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टाचत्वारिंशति द्वाषष्टि-भागेष्वेकस्य च द्वाषष्टिभागस्य षट्चत्वारिंशति सप्तषष्टिभागेषु (गतेषु) ७।४८।४६, पञ्चमीं मार्गशीर्षीं पौर्णमासीं रोहिणीनक्षत्रं षड्विंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकोनषष्टौ सप्तषष्टिभागेषु गतेषु २६।२१।५९ परिणमयति। **'पोसिं तिण्णि'**त्ति। अ[थ](त्र) पृच्छासूत्रं स्वयं द्रष्टव्यम्। तच्चैवं – **'ता पोसिं (णं पुण्णिमासिं) कइ नक्खत्ता जोइंति ?'** इदं सुगमम्। निर्वचनसूत्रमिदं **'ता तिन्नि नक्खत्ता जोएंति, तं जहा- अद्दा पुणव्वसू पुस्सो य।'** **'ता'** इति पूर्ववत्। **त्रीणि नक्षत्राणि** पौषीं पौर्णमासीं **युञ्जन्ति, तद्यथा आर्द्रा पुनर्वसुः पुष्यश्च**। तत्र प्रथमां पौषीं पौर्णमासीं पुनर्वसुनक्षत्रं द्वाचत्वारिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तसु सप्तषष्टिभागेषु गतेषु ४२।५।७, द्वितीयां पौषीं पौर्णमासीं पुनर्वसुनक्षत्रं पञ्चदश-मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य विंशतौ सप्तषष्टिभागेषु गतेषु १५।४०।२०, तृतीयां पौषीं पौर्णमासीमधिकमासादर्वाक्त-नीमार्द्रानक्षत्रं चतुर्षु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रयोदशसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशति सप्तषष्टिभागेषु गतेषु ४।१३।३३, अधिकमासभाविनीं पुनस्तामेव तृतीयां पौर्णमासीं पुष्यनक्षत्रं दशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टादशसु

१. मार्गशीर्षपौर्णमासीं - M। २. त्रयोदशमुहूर्त्तेष्वे... G। ३. सप्तमुहूर्ते.... - M, T।

द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य चतुस्त्रिंशति सप्तषष्टिभागेषु (गतेषु) १०।१८।३४, चतुर्थीं पौषीं पौर्ण्णमासीं पुनर्वसुनक्षत्रमष्टाविंशतिमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रिपञ्चाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशति सप्तषष्टिभागेषु (गतेषु) २८।५३।४७, पञ्चमीं पौषीं पौर्ण्णमासीं पुनर्वसुनक्षत्रं द्वयोर्मुहूर्त्तयोरेकस्य च मुहूर्त्तस्य षड्विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षष्टौ सप्तषष्टिभागेषु गतेषु २।२६।६० परिसमाप्तिं नयति। '**मा[हीं](हिं) दोण्णि**' इत्यादि। अत्रापि पृच्छासूत्रं निर्वचनसूत्रं च स्वयं द्रष्टव्यम्। तच्चैवं – '**ता माहिं णं [1]पुण्णिमासिं कइ नक्खत्ता जोएंति ?**' सुगमम्। निर्वनचनसूत्रमिदं – '**ता दोण्णि नक्खत्ता जोएंति, तं जहा अस्सेसा मघा य।**' '**ता**' इति पूर्ववत्, **द्वे नक्षत्रे** माघीं पौर्ण्णमासीं **युङ्क्तस्तद्यथा अश्लेषा मघा (च)**, चशब्दात् काश्चित् माघीं पौर्ण्णमासीं पूर्वफाल्गुनीनक्षत्रं काश्चित् पुष्यनक्षत्रञ्च, तद्यथा - प्रथमां माघीं पौर्ण्णमासीं मघानक्षत्रमष्टादशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य दशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्याष्टसु सप्तषष्टिभागेषु गतेषु १८।१०।८, द्वितीयां माघीं पौर्ण्णमासीमश्लेषानक्षत्रं षट्सु मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य पञ्चचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्यैकविंशतौ सप्तषष्टिभागेषु गतेषु ६।४५।२१, तृतीयां माघीं पौर्ण्णमासीं पूर्व्वफाल्गुनीनक्षत्रमेकस्मिन् मुहूर्त्ते मुहूर्त्तस्य च त्रयोविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चत्रिंशति सप्तषष्टिभागेषु व्यतिक्रान्तेषु १।२३।३५, चतुर्थीं माघीं पौर्ण्णमासीं मघानक्षत्रं चतुर्षु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टापञ्चाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्याष्टाचत्वारिंशति सप्तषष्टिभागेषु (गतेषु) ४।५८।४८, पञ्चमीं माघीं [2]पौर्ण्णमासीं पुष्यनक्षत्रं त्रयोविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकत्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्यैकषष्टौ सप्तषष्टिभागेषु गतेषु २३।३१।६१ परिणमयति। '**फग्गुणीं दोण्णि, तं जहा – पुव्वा फग्गुणी**

१. पुण्णमासिं - B, N। २. पूर्ण्णमासीं - T।

उत्तरा फग्गुणी य।' अत्रापि पृच्छासूत्रं निर्वचनसूत्रं च स्वयमेव द्रष्टव्यम्। (तच्चैवं-) '**ता फग्गुणीं णं पोण्णमासिं कइ नक्खत्ता जोएंति ?**' सुगमम्। निर्वचनसूत्रमिदं – '**ता दोण्णि णक्खत्ता जोएंति, तं जहा- पुव्वफग्गुणी उत्तरफग्गुणी य।**' '**ता**' इति पूर्ववत् **द्वे नक्षत्रे** फाल्गुनीं पौर्णमासीं परिणमय-तस्तद्यथा **पूर्वफाल्गुनी उत्तरफाल्गुनी च**। तत्र प्रथमां फाल्गुनीं पौर्णमासीमुत्तर-फाल्गुनीनक्षत्रं चतुर्विंशतिमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चदशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य नवसु सप्तषष्टिभागेषु (गतेषु) २४।१५।९, द्वितीयां फाल्गुनीं पौर्णमासीं पूर्वफाल्गुनीनक्षत्रं सप्तविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चाशति द्वाषष्टिभागेष्वेकस्य[1] च द्वाषष्टिभागस्य द्वाविंशतौ सप्तषष्टिभागेषु (गतेषु) २७।५०।२२, तृतीयां फाल्गुनीं पौर्णमासीमुत्तरफाल्गुनीनक्षत्रं सप्तत्रिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टाविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्त्रिंशति सप्तषष्टिभागेषु (गतेषु) ३७।२८।३६, चतुर्थीं फाल्गुनीं पौर्णमासीमुत्तरफाल्गुनीनक्षत्रमेकादशसु[2] मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैकस्मिन् द्वाषष्टिभागे एकस्य च द्वाषष्टिभागस्यैकोनपञ्चाशति सप्तषष्टिभागेषु (गतेषु) ११।१।४९, पञ्चमीं फाल्गुनीं पौर्णमासीं पूर्वफाल्गुनीनक्षत्रं चतुर्दशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्विषष्टौ सप्तषष्टिभागेषु १४।३६।६२ गतेषु परिसमापयति। '**चित्तिं दोण्णि। तं जहा- हत्थो चित्ता य।**' अत्रापि पृच्छासूत्रं निवर्चनसूत्रं च स्वयं परिभावनीयम्। तच्चैवं- '**ता चित्तिं णं पुण्णिमासिं कइ नक्खत्ता जोएंति ? ता दुण्णि[3] नक्खत्ता जोएंति। तं जहा - हत्थो चित्ता य।**' '**ता**' इति पूर्ववत्, चैत्रीं पौर्णमासीं **द्वे नक्षत्रे युङ्क्तस्तद्यथा हस्तश्चित्रा च**। तत्र प्रथमां चैत्रीं पौर्णमासीं चित्रानक्षत्रं पञ्चदशमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य दशसु सप्तषष्टिभागेषु (गतेषु) १५।२०।१०, द्वितीयां चैत्रीं पौर्णमासीं हस्तनक्षत्रमष्टादशसु

---

१. ... कस्य द्वाषष्टि... T। २. ... मेकादशमुहूर्त्ते... H। ३. दोण्णि - D।

मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चपञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रयोविंशतौ सप्तषष्टिभागेषु १८।५५।२३ गतेषु परिसमापयति, तृतीयां चैत्रीं पौर्णमासीं चित्रानक्षत्रमष्टाविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रयस्त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तत्रिंशति सप्तषष्टिभागेषु (गतेषु) २८।३३।३७, चतुर्थीं चैत्रीं पौर्णमासीं चित्रानक्षत्रं द्वयोर्मुहूर्त्तयोरेकस्य च मुहूर्त्तस्य षट्सु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चाशति सप्तषष्टिभागेषु (गतेषु) २।६।५०, पञ्चमीं चैत्रीं पौर्णमासीं हस्तनक्षत्रं पञ्चसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैकचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रिषष्टौ सप्तषष्टिभागेषु ५।४१।६३ (गतेषु) परिसमाप्तिं नयति। **'विसाहिं[1] दोण्णि, तं जहा- साई विसाहा य'**त्ति। अत्रापि पृच्छासूत्रं निर्वचनसूत्रं चैवं परिभावनीयम्। **'ता वेसाहिं[2] णं पुण्णमासिं कइ नक्खत्ता जोएंति ?'** इदं सुगमम्। **'ता दो नक्खत्ता जोएंति, तं जहा- साई विसाहा य।'** **'ता'** इति प्राग्वत् वैशाखीं पौर्णमासीं **द्वे नक्षत्रे युङ्क्तस्तद्यथा स्वातिर्विशाखा च,** चशब्दादनुराधा, इदं हि अनुराधानक्षत्रं विशाखातः परं, विशाखा चाऽस्यां (पौर्णमास्यां) प्रधाना, ततः परस्यामेव पौर्णमास्यां (तत्) साक्षादुपात्तं ने[हत्ति](हेति)। तत्र प्रथमां वैशाखीं पौर्णमासीं विशाखानक्षत्रं षट्त्रिंशति मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य पञ्चविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्यैकादशसु सप्तषष्टिभागेषु गतेषु ३६।२५।११, द्वितीयां वैशाखीं पौर्णमासीं विशाखानक्षत्रं नवमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षष्टौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुर्विंशतौ सप्तषष्टिभागेषु (गतेषु) ९।६०।२४, तृतीयां वैशाखीं पौर्णमासीं अनुराधानक्षत्रं चतुर्षु मुहूर्त्तेष्वेकस्य[3] मुहूर्त्तस्याष्टात्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्याष्टात्रिंशति सप्तषष्टिभागेषु (गतेषु) ४।३८।३८, चतुर्थीं वैशाखीं पौर्णमासीं विशाखानक्षत्रं त्रयोविंशतौ मुहूर्त्तेष्वेकस्य च

---

१. वइसाहिं - मूले। २. विसाहिं - T। ३. ....कस्य च मुहूर्त्त... - F, J।

मुहूर्त्तस्यैकादशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्यैकपञ्चाशति सप्तषष्टिभागेषु (गतेषु) २३।११।५१, पञ्चमीं वैशाखीं पूर्णमासीं स्वातिनक्षत्रं एकादशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुःष[ष्टि](ष्टौ) सप्तषष्टिभागेषु ११।४६।६४ (गतेषु) परिणमयति। **'जेट्ठामूलिं तिण्णि, तं जहा-अणुराधा जेट्ठा मूलो** [इति](**य**)। अत्रापि पृच्छासूत्रं निर्वचनसूत्रं चैवं द्रष्टव्यम् - **'ता जिट्ठामूलिं णं पोण्णमासिं कइ नक्खत्ता जोएंति ?'** सुगमम्, **'ता तिण्णि नक्खत्ता जोएंति, तं जहा-अणुराहा जेट्ठा मूलो य।'** **'ता'** इति पूर्ववत् (ज्येष्ठामूलीं पौर्णमासीं) **त्रीणि नक्षत्राणि युञ्जन्ति, (तद्यथा) अनुराधा ज्येष्ठा मूलं च**। तत्र प्रथमां ज्येष्ठामूलीं पौर्णमासीं मूलनक्षत्रं द्वादशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्वादशसु[१] सप्तषष्टिभागेषु गतेषु १२।३०।१२, द्वितीयां ज्येष्ठामूलीं पौर्णमासीं ज्येष्ठा-नक्षत्रमेकस्मिन्मुहूर्त्ते एकस्य च मुहूर्त्तस्य त्रिषु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य पञ्चविंशतौ सप्तषष्टिभागेषु (गतेषु) १।३।२५, तृतीयां ज्येष्ठामूलीं पौर्णमासीं[२] मूलनक्षत्रं पञ्चविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रिचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकोनचत्वारिंशति सप्तषष्टिभागेषु गतेषु २५।४३।३९, चतुर्थीं ज्येष्ठामूलीं पौर्णमासीं ज्येष्ठानक्षत्रं चतुर्दशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षोडशसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य द्विपञ्चाशति सप्तषष्टिभागेषु गतेषु १४।१६।५२, पञ्चमीं ज्येष्ठामूलीं पौर्णमासीमनुराधानक्षत्रं सप्तदशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकपञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चषष्टौ सप्तषष्टिभागेषु गतेषु १७।५१।६५ परिणमयति। सम्प्रत्याषाढीपौर्णमासीविषयं पृच्छासूत्रं साक्षादाह – **'ता आसाढिं णं पोण्णमासीं[३] कइ नक्खत्ता जोएंति ?'** **'ता'** इति पूर्ववत्, **आषाढीं 'ण'**मिति वाक्यालङ्कारे पूर्णमासीं कति नक्षत्राणि

१. द्वादशसप्तषष्टिभागेषु - F, J। २. पूर्णमासीं - F । ३. 'पुण्णिमं' - मूले।

युञ्जन्ति ? भगवानाह– '**ता दोण्णी**'त्यादि। '**ता**' इति पूर्ववत् ['**आषाढीं ण**'मिति वाक्यं प्राग्वत्] **द्वे नक्षत्रे युङ्क्तः**, तद्यथा **पूर्वाषाढा** (**उत्तराषाढा**[1]) **च**। तत्र प्रथमामाषा[णां](ढीं) पूर्णिमां उत्तराषाढानक्षत्रमष्टादशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चत्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रयोदशसु सप्तषष्टिभागेषु (गतेषु) १८।३५।१३, द्वितीयामाषाढीं पूर्णमासीं पूर्वाषाढानक्षत्रं द्वाविंशतिमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य षड्विंशतौ सप्तषष्टिभागेषु (गतेषु) २२।८।२६, तृतीयामाषाढीं पौर्णमासीमुत्तराषाढानक्षत्रं एकत्रिंशति मुहूर्त्तेषु एकस्य च मुहूर्त्तस्याष्टाचत्वारिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य चत्वारिंशति सप्तषष्टिभागेषु (गतेषु) ३१।४८।४०, चतुर्थीमाषाढीं पौर्णमासीमुत्तराषाढानक्षत्रं पञ्चसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रिपञ्चाशति सप्तषष्टिभागेषु गतेषु ५।२१।५३, पञ्चमीमाषाढीं पौर्णमासीमधिक(मासादर्वा)क्तनीं पूर्वाषाढानक्षत्रं अष्टसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्पञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्षष्टौ सप्तषष्टिभागेषु (गतेषु) ८।५६।६६, अधिकमाससम्बन्धीनीं पुनस्तामेव पञ्चमीमाषाढीं पौर्णमासीमुत्तराषाढानक्षत्रं स्वयं (परिसमाप्नुवन्) परिसमापयति।

तदेवं यानि नक्षत्राणि यां पौर्णमासीं युञ्जन्ति तान्युक्तानि। सम्प्रति गतार्थमपि मन्दमतिविबोधनार्थं कुलादियोजनमाह–

मू० ता साविट्ठिं णं पुण्णिमं[2] किं कुलं जोएति उवकुलं जोएति कुलोवकुलं जोएति ?

टी० 'ता साविट्ठिं ण'मित्यादि। '**ता**' इति पूर्ववत् **श्राविष्ठीं पौर्णमासीं किं कुलं युनक्ति उपकुलं युनक्ति कुलोपकुलं वा युनक्ति**?

भगवानाह–

---

१. 'उत्तरा य' - मूले। २. पोण्णिमा - H।

मू० ता कुलं वा जोएइ उवकुलं वा जोएति कुलोवकुलं वा जोएति। कुलं जोएमाणे धणिट्ठाणक्खत्ते जोएति, उवकुलं जोएमाणे सवणे णक्खत्ते जोएति, कुलोवकुलं जोएमाणे अभिइणक्खत्ते जोएति। ता साविट्ठिं णं पोण्णिमं कुलं वा जोएति उवकुलं वा जोएइ कुलोवकुलं वा जोएइ। कुलेण वा जुत्ता उवकुलेण वा जुत्ता कुलोवकुलेणं वा जुत्ता साविट्ठी पोण्णिमा जुत्तति वत्तव्वं सिया।

टी० '**ता कुलं वा**' इत्यादि। **कुलं वा युनक्ति,** वाशब्दः समुच्चये, ततः कुलमपि युनक्तीत्यर्थः, एव**मुपकुलमपि**, एवं **कुलोपकुलमपि**। तत्र **कुलं युञ्जत् धनिष्ठानक्षत्रं युनक्ति,** तस्यैव कुल(तया) प्रसिद्धस्य सतः श्राविष्ठ्यां पौर्णमास्यां भावात्, **उपकुलं युञ्जत् श्रवणनक्षत्रं युनक्ति, कुलोपकुलं युञ्जत् अभिजिन्नक्षत्रं युनक्ति,** तद्धि तृतीयायां श्राविष्ठ्यां पौर्णमास्यां द्वादशसु मुहूर्त्तेषु किञ्चित्समधिकेषु गतेषु चन्द्रेण सह योगमुपैति, ततः श्रवणसहचरत्वात् स्वयमपि तस्याः पौर्णमास्याः पर्यन्ते वर्त्तमान(त्वा)त् तदपि तां परिसमापयतीति विवक्षितत्वात् युनक्ति इत्युक्तम्। सम्प्रति उपसंहारमाह – '**ता साविट्ठिं ण**'मित्यादि। यत एवं त्रिभिरपि कुलादिभिः श्राविष्ठ्याः पौर्णमास्या योजनाऽस्ति, ततः **श्राविष्ठीं पौर्णमासीं कुलं वा युनक्ति उपकुलं वा युनक्ति कुलोपकुलं वा युनक्ति** इति वक्तव्यं स्यात् इति स्वशिष्येभ्यः प्रतिपादनं कुर्यात्, यदि वा **कुलेन वा युक्ता** सती **श्राविष्ठी पौर्णमासी उपकुलेन वा युक्ता कुलोपकुलेन वा युक्तेति वक्तव्यं स्यात्।**

मू० ता पोट्ठवइं णं पोण्णिमं किं कुलं जोएति तहेव पुच्छा। ता कुलं वा जोएति उवकुलं वा जोएति कुलोवकुलं वा जोएइ, कुलं जोएमाणे उत्तरभद्दवयाणक्खत्ते जोएति उवकुलं जोएमाणे पुव्वभद्दवयाणक्खत्ते जोएति कुलोवकुलं जोएमाणे सतभिसया-

णक्खत्ते जोएति। ता पोट्ठवतं णं पुण्णिमं कुलं वा जोएति उवकुलं वा जोएति तं चेव जाव [१]पुट्ठवदा पुण्णिमा जुत्ता ति वत्तव्वं सिया। ता अस्सोइं णं पोण्णिमं किं कुलं जोएति पुच्छा। ता कुलं वा जोएति उवकुलं वा जोएति नो लभति कुलोवकुलं, कुलं जोएमाणे अस्सिणीणक्खत्ते जोएति उवकुलं जोएमाणे रेवतीणक्खत्ते जोएति। ता असोतिं णं पुण्णिमं कुलं वा जोएति उवकुलं वा जोएति। कुलेण वा जुत्ता उवकुलेण वा जुत्ता अस्सोती पुण्णिमा जुत्तात्ति वत्तव्वं सिया। एवं एएणं अभिलावेणं पोसपोण्णिमाते जेट्ठा-मूलपुण्णिमाते ता कुलोवकुला भाणियव्वा, सेसासु कलोवकुला णत्थि जाव आसाढी पोण्णिमा जुत्तात्ति वत्तव्वं सिया।

टी० एवं शेषमपि सूत्रं निगमनीयम् यावत् '**एवं एएणं अभिलावेण**'मित्यादि। एवमुक्तेन प्रकारेण **एतेना**नन्तरोदितेना**ऽभिलापेन** शेषा अपि पौर्णमास्यो वक्तव्याः, नवरं पौष्या पौर्णमास्या ज्येष्ठामूल्याश्च कुलोपकुले वक्तव्ये, शेषासु पौर्णमासीषु कुलोपकुलानि न सन्ति, ततो न वक्तव्यानि, पाठश्चैवं – '**ता कत्तियं णं पुण्णमासीं किं कुलं वा जोएइ उवकुलं वा जोएइ (कुलोवकुलं वा जोएइ) ? ता कुलंपि जोएइ (उवकुलंपि जोएइ) नो लभइ कुलोवकुलं, कुलं जोएमाणे कत्ति(आ)नक्खत्ते जोएइ उवकुलं जोएमाणे भरणीनक्खत्ते जोएइ। ता कत्तियं णं पुण्णिमं कुलं वा जोएइ (उवकुलं वा जोएइ) कुलेण वा जुत्ता उवकुलेण वा जुत्ता कत्तिया पुण्णिमा जुत्तति वत्तव्वं सिया।**' इत्यादि तावद्वक्तव्यं यावदाषाढीपौर्णमासीसूत्रपर्यन्तस्तथा चाह– '**जाव आसाढी पुण्णिमा जुत्तात्ति वत्तव्वं सिया।**'

तदेवं पौर्णमासीवक्तव्यतामभिधाय सम्प्रत्यमावास्यावक्तव्यतामाह–

१. पोट्ठवता पोण्णिमा - U।

मू० दुवालस अमावासातो तं जहा सावि[ट्ठि](ट्ठी) पोट्ठवता जाव आसाढी।

टी० '**दुवालसे**'त्यादि। **द्वादश अमावास्याः** प्रज्ञप्तास्तद्यथा **श्राविष्ठी प्रौष्ठपदी** इत्यादि। तत्र मासपरिसमापकेन श्रविष्ठानक्षत्रेणोपलक्षितो यः श्रावणो मासः सोप्युपचारात् श्राविष्ठा, तस्यां भवा श्राविष्ठी। किमुक्तं भवति ? श्रविष्ठा-नक्षत्रपरिसमाप्यमानश्रावणमासभाविनी इति, प्रौष्ठपदी प्रोष्ठपदानक्षत्रपरिसमाप्यमान-भाद्रपदमासभाविनी, एवं सर्वत्रापि वाक्यार्थो भावनीयः।

मू० ता सावित्रिं णं अमावसं कति णक्खत्ता जोएंति ? ता दो णक्खत्ता जोएंति, तं जहा - अस्सिलेसा महा य।

टी० '**ता सावित्रिं ण**'मित्यादि। '**ता**' इति पूर्ववत् **श्राविष्ठीममावास्यां कति नक्षत्राणि युञ्जन्ति** - कति नक्षत्राणि यथायोगं चन्द्रेण सह संयुज्य श्राविष्ठीममावास्यां परिसमापयन्ति ? भगवानाह – '**ता दोण्णि**' इत्यादि। '**ता**' इति पूर्ववत् **द्वे नक्षत्रे युङ्क्तस्तद्यथा अश्लेषा मघाश्च**। इह व्यवहारनयमतेन यस्मिन्नक्षत्रे पौर्णमासी भवति तत आरभ्यार्वाक्तने[1] पञ्चदशे नक्षत्रे अमावास्या, तत आरभ्य पञ्चदशे नक्षत्रे पौर्णमासी। तत्र श्राविष्ठी पौर्णमासी श्रवणे धनिष्ठायां चोक्ता, ततो अमावास्यायामप्यस्यां श्रावि[ष्ठा](ष्ठ्या)मश्लेषामघाश्चोक्ताः लोके च तिथिगणितानुसारतो गतायामप्यमावास्यायां वर्त्तमानायामपि च प्रतिपदि यस्मिन्नहोरात्रे प्रथमतोऽमावास्याऽभूत् स सकलोऽप्यहोरात्रो अमावास्येति व्यवह्रियते, ततो मघानक्षत्रमप्येवं व्यवहारतोऽमावास्यायां प्राप्यते इति न कश्चिद्विरोधः। परमार्थतः पुनरिमाममावास्यां श्राविष्ठीमिमानि त्रीणि नक्षत्राणि परिसमापयन्ति तद्यथा-पुनर्वसुः पुष्यो अश्लेषा च। तथाह्यमावास्याचन्द्रयोगपरिज्ञानार्थं करणं प्रागेवोक्तम्। तत्र भावना क्रियते - कोऽपि पृच्छति युगस्यादौ प्रथमा श्राविष्ठ्यमावास्या केन चन्द्रयुक्तेन

१. ... र्वाक्तनपञ्चदशे - H।

नक्षत्रेणोपेता सती समाप्तिमुपयाति? तत्र पूर्वोदितस्वरूपोऽवधार्यराशिः षट्षष्टिमुहूर्त्ता एकस्य च मुहूर्त्तस्य पञ्च द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभागः इति प्रमाणो ध्रियते। तत एकेन गुण्यते, प्रथमाया अमावास्यायाः पृष्टत्वात्, एकेन च गुणितं तदेव भवतीति राशिस्तावानेव जातस्ततस्तस्मात् द्वाविंशतिमुहूर्त्ता एकस्य च मुहूर्त्तस्य षट्चत्वारिंशत् द्वाषष्टिभागा इत्येवं परिमाणं पुनर्वसुशोधनकं शोध्यते, षट्षष्टिमुहूर्त्तेभ्यो द्वाविंशतिमुहूर्त्ताः शुद्धाः, स्थिताः पश्चात् चतुश्चत्वारिंशत् ४४, तेभ्य एकं मुहूर्त्तमपकृष्य तस्य द्वाषष्टिभागा क्रियन्ते, कृत्वा च ते द्वाषष्टिभागराशिमध्ये प्रक्षिप्यन्ते, जाताः सप्तषष्टिः, तेभ्यः षट्चत्वारिंशत् विशुद्धाः शेषास्तिष्ठन्त्येकविंशतिः, त्रिचत्वारिंशतो मुहूर्त्तेभ्यः त्रिंशता मुहूर्त्तैः पुष्यः शुद्धः, स्थिताः पश्चात् त्रयोदशमुहूर्त्ताः। अश्लेषानक्षत्रं [सा](चा)र्द्धक्षेत्रमिति पञ्चदशमुहूर्त्तप्रमाणम्। तत इदमागतमश्लेषानक्षत्रमेकस्मिन् मुहूर्त्ते एकस्य च मुहूर्त्तस्य चत्वारिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा च्छिन्नस्य षट्षष्टिसङ्ख्येषु भागेषु शेषेषु प्रथमामावास्या समाप्तिमुपगच्छति, तथा च वक्ष्यति- **'ता एएसि णं पंचण्हं संवच्छराणं पढमं अमावासं चंदो केण नक्खत्तेणं जोएइ ? ता असिलेसाहिं, असिलेसाण एको मुहुत्तो चत्तालीसं च बासट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छित्ता छावट्ठी चुण्णिया भागा सेसा।'** (पृ.४०५) इति। यदा तु द्वितीयाऽमावास्या चिन्त्यते, तदा सा युगादित आरभ्य त्रयोदशी। ततः[१] स ध्रुवराशिः ६६ ५/६२ १/६७ त्रयोदशभिर्गुण्यते, जातानि मुहूर्त्तानामष्टौ शतानि अष्टपञ्चाशदधिकानि ८५८ एकस्य च मुहूर्त्तस्य पञ्चषष्टि(द्वाषष्टि)भागाः ६५ एकस्य च द्वाषष्टिभागस्य त्रयोदश सप्तषष्टिभागाः १३। तत्र **'चत्तारि य बायाला अह सोज्झा उत्तरासाढा'** इति वचनात् चतुर्भिर्द्वाचत्वारिंशदधिकैर्मुहूर्त्तशतैः षट्चत्वारिंशता द्वाषष्टिभागैरुत्तराषाढा-

---

१. ततो ध्रुवराशिः - H।

पर्यन्तानि नक्षत्राणि शुद्धानि, स्थितानि पश्चात् मुहूर्त्तानां चत्वारि शतानि षोडशोत्तराणि एकस्य च मुहूर्त्तस्य एकोनविंशतिः द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयोदश सप्तषष्टिभागाः ४१६ १९/६२ १३/६७। तत एतस्मात् त्रीणि शतानि नवनवत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागा ३९९ २४/६२ ६६/६७ इति शोधनीयम्। ततः षोडशोत्तरेभ्यश्चतुःशतेभ्यस्त्रीणि (शतानि) नवनवत्यधिकानि शुद्धानि स्थिताः पश्चात् सप्तदशमुहूर्त्तास्तेभ्य एकं मुहूर्त्तं गृहीत्वा (तस्य) द्वाषष्टिभागाः क्रियन्ते, कृत्वा च द्वाषष्टिभागराशौ प्रक्षिप्यन्ते, जाता एकाशीतिः, तस्याश्चतुर्विंशतिः शुद्धाः स्थिताः पश्चात्सप्तपञ्चाशत्, तस्या रूपमेकमादाय सप्तषष्टिभागाः क्रियन्ते, तेभ्यः षट्षष्टिः शुद्धाः पञ्चादेकोऽऽवतिष्ठते स सप्तषष्टिभागराशौ प्रक्षिप्यते, जाताश्चतुर्दश सप्तषष्टिभागाः। आगतं पुष्यनक्षत्रं षोडशमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्पञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुर्दशसु सप्तषष्टिभागेष्वतिक्रान्तेषु द्वितीयां श्राविष्ठीममावास्यां परिसमापयति। [1]यदा तु तृतीया श्राविष्ठ्यमावास्या चिन्त्यते तदा सा युगादित आरभ्य पञ्चविंशतितमेति स ध्रुवराशिः ६६ ५/६२ १/६७ पञ्चविंशत्या गुण्यते, जातानि षोडशतानि पञ्चाशदधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य पञ्चविंशं द्वाषष्टिभागशतं एकस्य च द्वाषष्टिभागस्य पञ्चविंशतिः सप्तषष्टिभागाः १,६५० १२५/६२ २५/६७। तत्र चतुर्भिर्द्वाचत्वारिंशदधिकैर्मुहूर्त्तशतैरेकस्य च मुहूर्त्तस्य षट्चत्वारिंशता द्वाषष्टिभागैः प्रथममुत्तराषाढापर्यन्तं शोधनकं शुद्धं स्थितानि पञ्चान्मुहूर्त्तानां द्वादशशतान्यष्टोत्तराणि १,२०८ द्वाषष्टिभागाश्च मुहूर्त्तस्य एकोनाशीतिः ७९ एकस्य[2] च द्वाषष्टिभागस्य पञ्चविंशतिः सप्तषष्टिभागाः २५। ततोऽष्टभिः शतैरेकोन[त्रिं](विं)शत्यधिकैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टि-भागैरेकस्य च द्वाषष्टिभागस्य षट्षट्या सप्तषष्टिभागैरेको नक्षत्रपर्यायः शुध्यति,

---

१. यदा तृतीया- G। २. एकस्य द्वाषष्टि.... - G।

स्थितानि पश्चात् त्रीणि शतानि नवाशीत्यधिकानि मुहूर्त्तानां ३८९ एकस्य (च मुहूर्त्तस्य) चतुःपञ्चाशत् द्वाषष्टिभागाः ५४ (एकस्य च द्वाषष्टिभागस्य षड्विंशतिः सप्तषष्टिभागाः २६)। ततो भूयस्त्रिभिर्नवोत्तरैर्मुहूर्त्त[स्य]शतैरेकस्य[१] च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य[२] च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि रोहिणिकापर्यन्तानि शुद्धानि, स्थिता[नि](:) पश्चात् मुहूर्त्ता अशीतिः एकस्य च मुहूर्त्तस्य एकोनत्रिंशत् द्वाषष्टिभागा एकस्य[३] च द्वाषष्टिभागस्य सप्तविंशतिः सप्तषष्टिभागाः ८० २९/६२ २७/६७। ततस्त्रिंशता मुहूर्त्तैर्मृगशिरः शुद्धं, स्थिताः पञ्चाशत्मुहूर्त्ताः ५०। ततः पञ्चदशभिरार्द्रा शुद्धा, स्थिताः पञ्चत्रिंशत् ३५। आगतं पुनर्वसुनक्षत्रं पञ्चत्रिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकोनत्रिंशति द्वाषष्टिभागेष्वेकस्य द्वाषष्टिभागस्य सप्तविंशतौ सप्तषष्टिभागेषु (गतेषु) तृतीयां श्राविष्ठीममावास्यां परिसमापयति। एवं चतुर्थीं श्राविष्ठीममावास्यामश्लेषानक्षत्रं प्रथमस्य मुहूर्त्तस्य सप्तसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकचत्वारिंशति सप्तषष्टिभागेषु गतेषु ०।७।४१, पञ्चमीं श्राविष्ठीममावास्यां पुष्यनक्षत्रं त्रिषु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य द्विचत्वारिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य चतुपञ्चाशता सप्तषष्टिभागेषु गतेषु ३।४२।५४ परिणमयति।

मू० एवं एएणं अभिलावेणं। पोट्ठवतिं दोण्णि, तं जहा- पुव्वफग्गुणी उत्तरा य, [अ](आ)सोतिं दोण्णि, तं जहा- हत्थो चित्ता य, कत्तियं साई विसाहा य, मग्गसिरिं तिण्णि, तं जहा अणुराहा जेट्ठा मूलो य, पोसिं दोण्णि, तं जहा पुव्वाअसाढा उत्तरा य, माहिं तिण्णि, तं० अभिती सवणो धणिट्ठा, फग्गुणिं सतभिसया पुव्वाभद्दवता, चित्तिं तिण्णि, तं जहा- उत्तरभद्दवया रेवती अस्सिणी य, वतिसाहिं भरणी कत्तिया य, जेट्ठामूलिं रोहिणी

१. ... कस्य मुहूर्त्तस्य - G। २. ...कस्य द्वाषष्टि... M। ३. एकस्य द्वाषष्टि... - T।

मिगसिरं च, ता आसा[ढी](ढिं) णं अमावसं कति णक्खत्ता जोएंति ? ता तिण्णि णक्खत्ता जोएंति, तं० अद्दा पुणव्वसू पूसो।

टी० एवमुक्तेन प्रकारेण **एतेना**नन्तरोदिते**नाभिलापेन** शेषमप्यमावास्याजातं नेतव्यम्। विशेषमाह– '**पोट्ठवयं**[१] **दोण्णि, तं जहा- पुव्वा**[२] **फग्गुणी उत्तरा य**' त्ति। तत्रैवं सूत्रपाठः '**ता पोट्ठवयं णं अमावासं कइ नक्खत्ता जोएंति, ता दोण्णि नक्खत्ता जोएंति, तं जहा- पुव्वफग्गुणी उत्तरफग्गुणी य।**' इदमपि व्यवहारत उच्यते, परमार्थतः पुनस्त्रीणि नक्षत्राणि प्रौष्ठपदीममावास्यां परिसमापयन्ति, तद्यथा मघा पूर्वफाल्गुनी उत्तरफाल्गुनी च। तत्र प्रथमां प्रौष्ठपदीममावास्या-मुत्तरफाल्गुनीनक्षत्रं चतुर्षु मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य षड्विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्वयोः सप्तषष्टिभागयोरति ४।२६।२ क्रान्तयोः, द्वितीयां प्रौष्ठपदीममावास्यां पूर्वफाल्गुनीनक्षत्रं सप्तसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकषष्टौ द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य पञ्चदशसु सप्तषष्टिभागेषु ७।६१।१५ गतेषु, तृतीयां प्रौष्ठपदीममावास्यां मघानक्षत्रमेकादशसु मुहूर्त्तेष्वेकस्य[३] च मुहूर्त्तस्य चतुस्त्रिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्याष्टाविंशतौ सप्तषष्टिभागेषु ११।३४।२८ गतेषु, चतुर्थीं प्रौष्ठपदीममावास्यां पूर्वफाल्गुनीनक्षत्रमेकविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य द्वादशसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य द्वाचत्वारिंशति सप्तषष्टिभागेषु २१।१२।४२ गतेषु, पञ्चमीं प्रौष्ठपदीममावास्यां मघानक्षत्रं चतुर्विंशतौ मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य सप्तचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चपञ्चाशति सप्तषष्टिभागेष्वतिक्रान्तेषु २४।४७।५५ परिसमापयति। '**आसोइं दोण्णि, तं जहा हत्थो चित्ता य।**' इति। अत्राप्येवं सूत्रपाठः – '**ता आसोइं णं अमावासं कइ नक्खत्ता जोएंति ? ता दोण्णि नक्खत्ता जोएंति हत्थो चित्ता य।**' एतदपि व्यवहारतो निश्चयतः पुनराश्वयुजीममावास्यां [द्वे नक्षत्रे परिसमापयतस्] (त्रीणि

---

१. पोट्ठवतिं - मूले। २. पुव्वफग्गुणी - मूले। ३. ....कस्य मुहूर्त्तस्य.... - T।

नक्षत्राणि परिसमापयन्ति) तद्यथा उत्तरफाल्गुनी हस्तः (चित्रा) च। तत्र प्रथमामाश्वयुजीममावास्यां हस्तनक्षत्रं पञ्चविंशतौ मुहूर्त्तेष्वेकस्य मुहूर्त्तस्य एकत्रिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य त्रिषु सप्तषष्टिभागेषु २५।३१।३ (गतेषु), द्वितीयाममावास्यामुत्तरफाल्गुनीनक्षत्रं चतुश्चत्वारिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चतुर्षु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षोडशसु सप्तषष्टिभागेषु गतेषु ४४।४।१६, तृतीयामाश्वयुजीममावास्यामुत्तरफाल्गुनीनक्षत्रं सप्तदशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकोनचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकोनत्रिंशति सप्तषष्टिभागेषु १७।३९।२९ (गतेषु), चतुर्थीमाश्वयुजीममावास्यां हस्तनक्षत्रं [१]द्वादशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तदशसु द्वाषष्टिभागेषु [२]एकस्य च द्वाषष्टिभागस्य त्रिचत्वारिंशति सप्तषष्टिभागेषु गतेषु १२।१७।४३, पञ्चमीमाश्वयुजीममावास्यामुत्तरफाल्गुनीनक्षत्रं त्रिंशति मुहूर्त्तेष्वेकस्य मुहूर्त्तस्य द्विपञ्चाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य [३]षट्पञ्चाशति सप्तषष्टिभागेषु गतेषु ३०।५२।५६[४] परिसमापयति। **'कत्तियं साई विसाहा य'** त्ति। अत्राप्येवं सूत्रपाठः - **'ता कत्तियं णं अमावासं कइ नक्खत्ता जोएंति ? ता दुन्नि नक्खत्ता जोएंति, तं जहा साई विसाहा य।'** एतदपि व्यवहारनयमतेन निश्चयतः पुनस्त्रीणि नक्षत्राणि कार्त्तिकीममावास्यां परिसमापयन्ति, तद्यथा-चित्रा स्वातिः विशाखा च। तत्र प्रथमां कार्त्तिकीममावास्यां विशाखानक्षत्रं षोडशमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुर्षु सप्तषष्टिभागेषु गतेषु १६।३६।४, द्वितीयां कार्त्तिकीममावास्यां स्वातिनक्षत्रं [५]पञ्चसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य [६]नवसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य सप्तदशसु सप्तषष्टिभागेषु ५।९[७]।१७ (गतेषु), तृतीयां कार्त्तिकीममावास्यां

१. द्वादशमुहूर्त्ते .. - B, E, L। २. एकस्य द्वाषष्टि.. - E। ३. मुद्रितसूर्यप्रज्ञप्तिवृत्तावत्र 'चतुःपञ्चाशती'ति पाठो दृश्यते, स तु न समीचीनो भाति। ४. मुद्रितसूर्यप्रज्ञप्तिवृत्तावत्र '५४' इति पाठो दृश्यते, स तु न समीचीनो भाति। ५. पञ्चमुहूर्त्ते - B। ६. मुद्रितसूर्यप्रज्ञप्तिवृत्तावत्र 'द्वाविंशता'विति पाठो दृश्यते...., स तु न समीचीनो भाति। ७. मुद्रितसूर्यप्रज्ञप्तिवृत्तावत्र '२२' इति पाठो दृश्यते, स तु न समीचीनो भाति।

चित्रानक्षत्रमष्टसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चतुश्चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रिंशति सप्तषष्टिभागेषु ८।४४।३० (गतेषु), चतुर्थीं कार्त्तिकी-ममावास्यां विशाखानक्षत्रं [त्रयोदशसु](त्रिषु) मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य द्वाविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुश्चत्वारिंशति सप्तषष्टिभागेषु [१]३।२२।४४ (गतेषु), पञ्चमीं कार्त्तिकीममावास्यां चित्रानक्षत्रमेकविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तपञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तपञ्चाशति सप्तषष्टिभागेषु २१।५७।५७ (गतेषु) समाप्तिमुपनयति। **'मग्गसिरिं तिण्णि, तं जहा अणुराहा जेट्ठा मूलो य।'** इति। अत्रापि सूत्रालापक एवं - **'ता मग्गसिरिं णं अमावासं कइ नक्खत्ता जोएंति ? ता तिण्णि नक्खत्ता जोएंति, तं जहा- अणुराहा जेट्ठा मूलो य।'** इति। एतदपि व्यवहारतो निश्चयतः पुनरिमानि त्रीणि नक्षत्राणि मार्ग्गशीर्षीममावास्यां परिसमापयन्ति तद्यथा विशाखा अनुराधा ज्येष्ठा च। तत्र प्रथमां मार्ग्गशीर्षीममावास्यां ज्येष्ठानक्षत्रं सप्तसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैक-चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चसु सप्तषष्टिभागेषु ७।४१।५ (गतेषु), द्वितीयां मार्ग्गशीर्षीममावास्यामनुराधानक्षत्रमेकादशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चतुर्दशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्याष्टादशसु सप्तषष्टिभागेषु ११।१४।१८ (गतेषु), तृतीयां मार्ग्गशीर्षीममावास्यां विशाखानक्षत्रमेकोन-[विं](त्रिं)शति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकोनपञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकत्रिंशति सप्तषष्टिभागेषु गतेषु २९।४९।३१, चतुर्थीं मार्ग्गशीर्षीम-मावास्यामनुराधानक्षत्रं चतुर्विंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तविंश[ति](तौ) द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चचत्वारिंशति सप्तषष्टिभागेषु गतेषु २४।२७।४५, पञ्चमीं मार्ग्गशीर्षीममावास्यां विशाखानक्षत्रं त्रिचत्वारिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सम्बन्धिनो द्वाषष्टिभागस्याष्टापञ्चाशति सप्तषष्टिभागेषु

४३।०।५८ परिसमापयति। '**पोसिं[1] च दोण्णि। तं जहा- पुव्वासाढा उत्तरासाढा[2] य**' त्ति। तत्रैवं सूत्रालापकः – '**ता पोसिं णं अमावासं कइ नक्खत्ता जोएंति ? ता दोण्णि नक्खत्ता जोएंति, तं जहा - पुव्वासाढा य उत्तरासाढा य**' त्ति। एतदपि व्यवहारत उक्तम्, निश्चयतः पुनस्त्रीणि नक्षत्राणि परिसमापयन्ति, तद्यथा मूलं पूर्वाषाढा उत्तराषाढा च, तथाहि – प्रथमां पौषीममावास्यां पूर्वाषाढा-नक्षत्रमष्टाविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्सु सप्तषष्टिभागेषु गतेषु २८।४६।६, द्वितीयां पौषीममावास्यां पूर्वाषाढानक्षत्रं द्वयोर्मुहूर्त्तयोरेकस्य च मुहूर्त्तस्य एकोनविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकोनविंशतौ सप्तषष्टिभागेषु २।१९।१९ (गतेषु), (तृतीयां पौषीममावास्यामधिकमासादर्वाक्तनीं मूलनक्षत्रं पञ्चसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चतुष्पञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्वात्रिंशति सप्तषष्टिभागेषु गतेषु ५।५४।३२,) तृतीयामधिकमासभाविनीं पौषीममावास्यामुत्तराषाढानक्षत्रमेकादशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकोनषष्टौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशति सप्तषष्टिभागेषु गतेषु ११।५९।३३, चतुर्थीं पौषीममावास्यां पूर्वाषाढानक्षत्रं पञ्चदशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य[षट्पञ्चाशति] (द्वात्रिंशति) द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्चत्वारिंशति सप्तषष्टिभागेषु १५।[५६](३२)।४६ (गतेषु), पञ्चमीं पौषीममावास्यां मूलनक्षत्रमेकोनविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्च[ाशति](सु) द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्यैकोनषष्टौ सप्तषष्टिभागेष्वतिक्रान्तेषु १९।५[०]।५९ परिसमापयति। '**माहिं तिण्णि, तं जहा अभिई सवणो धनिट्ठा।**' इति। अत्राप्येवं सूत्रालापकः- '**ता माहिं णं अमावासं कइ नक्खत्ता जोएंति ? ता तिण्णि नक्खत्ता जोएंति, तं जहा- अभिई सवणो धणिट्ठा य।**' एतदपि व्यवहारतो निश्चयतः पुनरमूनि त्रीणि नक्षत्राणि माघीं अमावास्यां परिसमापयन्ति,

---

१. पोसिं दोण्णि - मूले। २. उत्तरा य- मूले।

तद्यथा- उत्तराषाढा अभिजित् श्रवणश्च, तथाहि – प्रथमां माघीममावास्यां श्रवण-नक्षत्रं (दशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षड्विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्याष्टसु सप्तषष्टिभागेषु गतेषु १०।२६।८), द्वितीयां माघीममावास्यां [अभिजिन्](उत्तराषाढा)नक्षत्रं [त्रिषु] (अष्टात्रिंशति) मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य [षड्विं](चतुर्विं)शतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य विंशतौ सप्तषष्टिभागेषु गतेषु ३(८)।२[६](४)।२०, तृतीयां माघीममावास्यां श्रवणनक्षत्रं त्रयोविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैकोनचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चत्रिंशति सप्तषष्टिभागेषु २३।३९।३५ (गतेषु), चतुर्थीं माघीममावास्यामभिजिन्नक्षत्रं षट्सु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तत्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशति सप्तषष्टिभागेषु गतेषु ६।३७।४७, पञ्चमीं माघीममावास्या-मुत्तराषाढानक्षत्रं पञ्चविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य दशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षष्टौ सप्तषष्टिभागेष्वतिक्रान्तेषु २५।१०।६० परिणमयति। '[१]**फग्गु[णी](णिं) दोण्णि, तं जहा- सयभिसया पुव्वभद्दवय त्ति**।' [२]अत्राप्येवं सूत्रालापकः – '**ता फग्गुणिं णं अमावासं कइ नक्खत्ता जोएंति ? ता दोण्णि नक्खत्ता जोएंति, तं जहा सयभिसया पुव्वभद्दवया य**'त्ति। एतदपि व्यवहारतो निश्चयतः पुनरमूनि त्रीणि नक्षत्राणि फाल्गुनीममावास्यां परिसमापयन्ति, तद्यथा – धनिष्ठा शतभिषक् पूर्वभद्रपदा च। तत्र प्रथमां फाल्गुनीममावास्यां पूर्वभद्रपदा(नक्षत्रं) [३]एकस्मिन् मुहूर्त्ते एकस्य च मुहूर्त्तस्य एकत्रिंशति द्वाषष्टिभागेषु गतेषु एकस्य च द्वाषष्टिभागस्य नवसु सप्तषष्टिभागेषु गतेषु [४]१।३१।९, द्वितीयां फाल्गुनीममावास्यां धनिष्ठानक्षत्रं विंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चतुर्षु द्वाषष्टिभागेष्वेकस्य च

---

१. फग्गुणिं सतभिसया... मूले। २. अत्रालापकः - M। ३. मुद्रितसूर्यप्रज्ञप्तिवृत्तावत्र 'षटसु मुहूर्त्तेषु' इति पाठो दृश्यते, स तु न समीचीनो भाति। ४. मुद्रितसूर्यप्रज्ञप्तिवृत्तावत्र '६' इति पाठो दृश्यते, स तु न समीचीनो भाति।

द्वाषष्टिभागस्य द्वाविंशतौ सप्तषष्टिभागेषु २०।४।२२ (गतेषु), तृतीयां फाल्गुनी-ममावास्यां [पूर्वाषाढा](पूर्वभद्रपदा)नक्षत्रं चतुर्दशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चतुश्चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्त्रिंशति सप्तषष्टिभागेषु १४।४४।३६ (गतेषु), चतुर्थीं फाल्गुनीममावास्यां शतभिषक्नक्षत्रं त्रिषु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तदशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकोनपञ्चाशति सप्तषष्टिभागेषु ३।१७।४९ (गतेषु), पञ्चमीं फाल्गुनीममावास्यां धनिष्ठानक्षत्रं षट्सु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य द्विपञ्चाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य सत्केषु द्वाषष्टौ सप्तषष्टिभागेषु गतेषु ६।५२।६२ परिणमयति। **'चित्तिं तिण्णि, तं जहा- उत्तरभद्दवया रेवई अस्सिणी य।'** त्ति। अत्राप्येवं सूत्रालापकः - **'ता चित्तिं णं अमावासं कइ नक्खत्ता जोएंति ? (ता तिण्णि नक्खत्ता जोएंति), तं जहा उत्तरभद्दवया रेवई अस्सिणी य।'** एतदपि व्यवहारनयमतेन, निश्चयनयमतेन पुनरमूनि नक्षत्राणि चैत्रीममावास्यां समापयन्ति, तद्यथा पूर्वभद्रपदा उत्तरभद्रपदा रेवती च। तत्र प्रथमां चैत्रीममावास्यां उत्तरभद्रपदानक्षत्रं [१]सप्तत्रिंशन्मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य दशसु सप्तषष्टिभागेषु ३७।३६।१० (गतेषु), द्वितीयां चैत्रीममावास्यामुत्तरभद्रपदा-नक्षत्रमेकादशसु मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य नवसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टि-भागस्य त्रयोविंशतौ सप्तषष्टिभागेषु ११।९।२३ (गतेषु), तृतीयां चैत्रीममावास्यां रेवतीनक्षत्रं पञ्चसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकोनपञ्चाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य सप्तत्रिंशति सप्तषष्टिभागेषु ५।४९।३७ (गतेषु), चतुर्थीं चैत्रीममावास्यामुत्तरभद्रपदानक्षत्रं [२]चतुर्विंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य द्वाविंशतौ

---

१. मुद्रितसूर्यप्रज्ञप्तिवृत्तावत्र 'सप्तविंशतौ' इति पाठो दृश्यते, स तु न समीचीनो भाति।
२. मुद्रितसूर्यप्रज्ञप्तिवृत्तावत्र 'त्रयोविंशतौ' इति पाठो दृश्यते, स तु न समीचीनो भाति।

द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पञ्चाशति सप्तषष्टिभागेषु [१]२४।२२।५० (गतेषु), पञ्चमीं चैत्रीममावास्यां पूर्वभद्रपदानक्षत्रं सप्तविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तपञ्चाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य त्रिषष्टौ सप्तषष्टिभागेष्वतिक्रान्तेषु २७।५७।६३ परिसमापयति। '**[२]विसाहिं भरणी कत्तिया।**' इति। अत्राप्येवं सूत्रपाठः – '**ता वेसाहिं णं अमावासं कइ नक्खत्ता जोएंति ? ता दुण्णि नक्खत्ता जोइंति, तं जहा - भरणी कत्तिया य त्ति।**' एतच्च व्यवहारतो निश्चयतः पुनस्त्रीणी नक्षत्राणि वैशाखीममावास्यां परिसमापयन्ति, तानि चामूनि, तद्यथा- रेवती अश्विनी भरणी च। तत्र प्रथमां वैशाखीममावास्या-मश्विनीनक्षत्रमष्टाविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकादशसु सप्तषष्टिभागेषु २८।४१।११ (गतेषु), द्वितीयां वैशाखीममावास्यामश्विनीनक्षत्रं द्वयोर्मुहूर्त्तयोरेकस्य च मुहूर्त्तस्य [एकोनचत्वारिंशति] (चतुर्दशसु) द्वाषष्टिभागेष्वेक[३]स्य च द्वाषष्टिभागस्य [त्रयोविं](चतुर्विं)शतौ सप्त-षष्टिभागेषु २।[३९](१४)।२[३](४) (गतेषु), तृतीयां वैशाखीममावास्यां भरणी-नक्षत्रमेकादशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चतुःपञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्याष्टात्रिंशति सप्तषष्टिभागेषु गतेषु ११।५४।३८, चतुर्थीं वैशाखी-ममावास्यामश्विनीनक्षत्रं पञ्चदशसु मुहूर्त्तेष्वेक[४]स्य च मुहूर्त्तस्य सप्तविंशतौ द्वाषष्टि-भागेष्वेकस्य च द्वाषष्टिभागस्य एकपञ्चाशति सप्तषष्टिभागेषु १५।२७।५१ (गतेषु), पञ्चमीं वैशाखीममावास्यां रेवतीनक्षत्रमेकोनविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सम्बन्धिनो द्वाषष्टिभागस्य सत्केषु चतुःषष्टौ सप्तषष्टिभागेषु १९।०।६४ (गतेषु) परिणमयति। '**जेट्ठामूलिं रोहिणी मिगसिरं चे**'ति। अत्राप्येवं सूत्रालापकः - '**ता जेट्ठामूलिं णं अमावासं कइ नक्खत्ता जोएंति ? ता दोण्णि नक्खत्ता**

१. '२३' इति मुद्रितसूर्यप्रज्ञप्तिवृत्तौ पाठः, स तु न समीचीनो भाति। २. वतिसाहिं भरणी कत्तिया य। - मूले। ३. ...कस्य द्वाषष्टि.... - A, B, C, D, E, F, G, H, I, J, K। ४. ... कस्य मुहूर्त्तस्य - T।

जोएंति, तं जहा- रोहिणी मिगसिरं च।' एतदपि व्यवहारतः, निश्चयतः पुनरिमे द्वे नक्षत्रे ज्येष्ठामूलीममावास्यां परिसमापयतस्तद्यथा रोहिणी कृत्तिका च। तत्र प्रथमां ज्येष्ठामूलीममावास्यां रोहिणीनक्षत्रमेकोनविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्वादशसु सप्तषष्टिभागेषु गतेषु १९।४६।१२, द्वितीयां ज्येष्ठामूलीममावास्यां कृत्तिकानक्षत्रं त्रयोविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकोनविंशतौ द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य पञ्चविंशतौ सप्तषष्टिभागेष्वतिक्रान्तेषु २३।१९।२५, तृतीयां ज्येष्ठामूलीममावास्यां रोहिणीनक्षत्रं द्वात्रिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैकोनषष्टौ द्वाषष्टिभागेष्वेकस्य (च) द्वाषष्टिभागस्य एकोनचत्वारिंशति सप्तषष्टिभागेषु ३२।५९।३९ (गतेषु), चतुर्थीं ज्येष्ठामूली-ममावास्यां रोहिणीनक्षत्रं षट्सु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य द्वात्रिंशति द्वाषष्टि-भागेष्वेकस्य च द्वाषष्टिभागस्य द्विपञ्चाशति सप्तषष्टिभागेषु ६।३२।५२ (गतेषु), पञ्चमीं ज्येष्ठामूलीममावास्यां कृत्तिकानक्षत्रं[१] दशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य पञ्चषष्टौ सप्तषष्टिभागेषु गतेषु १०।५।६५ परिसमापयति। '**(ता) आसा[ढी](ढिं) ण**'मित्यादि। '**ता**' इति पूर्ववत् **आ[सा](षा)ढीं 'ण**'मिति वाक्यालङ्कारे अमावास्यां **कति नक्षत्राणि युञ्जन्ति** ? भगवानाह– '**ता**' इत्यादि। '**ता**' इति पूर्ववत् **त्रीणि नक्षत्राणि युञ्जन्ति, तद्यथा आर्द्रा पुनर्वसुः पुष्यश्च**। एतदपि व्यवहारत उक्तम्, परमार्थतः पुनरमूनि त्रीणि नक्षत्राणि आषाढीममावास्यां परिणमयन्ति[२] तद्यथा मृगशिर आर्द्रा[३] पुनर्वसुश्च। तत्र प्रथमामाषाढीममावास्यामार्द्रानक्षत्रं दशसु[४] मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य एकपञ्चाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रयोदशसु सप्तषष्टिभागेषु १०।५१।१३[५] (गतेषु), द्वितीयामाषाढीममावास्यां मृगशिरो नक्षत्रं [सप्तविंशतौ] (चतुर्दशसु) मुहूर्त्ते-

१. ... नक्षत्रं च दशसु - E। २. परिसमापयन्ति - E। ३. पुनर्वसुः आर्द्रा च - H, T। ४. सूर्यप्रज्ञप्तिवृत्तावत्र 'द्वादशसु' इति पाठो दृश्यते, स तु न समीचीनो भाति। ५. सूर्यप्रज्ञप्तिवृत्तावत्र '१२' इति पाठो दृश्यते, स तु न समीचीनो भाति।

ष्वेकस्य च मुहूर्त्तस्य चतुर्विंशतौ द्वाषष्टिभागेष्वेकस्य[१] च द्वाषष्टिभागस्य षड्विंशतौ सप्तषष्टिभागेषु [१७](१४)। २४।२६ (गतेषु), तृतीयामाषाढीममावास्यां पुनर्वसुनक्षत्रं नवसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य द्वयोर्द्वाषष्टिभागयोरेकस्य च द्वाषष्टिभागस्य चत्वारिंशति सप्तषष्टिभागेषु ९।२।४० (गतेषु), चतुर्थीमाषाढीममावास्यां मृगशिरो नक्षत्रं सप्तविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तत्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रिपञ्चाशति सप्तषष्टिभागेषु गतेषु २७।३७।५३, (पञ्चमीमाषाढी-ममावास्यामधिकमासादर्वाक्तनीं मृगशिरोनक्षत्रमेकस्मिन्मुहूर्त्ते एकस्य च मुहूर्त्तस्य दशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्षष्टौ सप्तषष्टिभागेषु गतेषु १।१०।६६,) पञ्चमी(मधिकमासभाविनी)माषाढीममावास्यां पुनर्वसुनक्षत्रं द्वाविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षोडशसु द्वाषष्टिभागेषु गतेषु २२।१६।० परिसमापयतीति।

तदेवं द्वादशानामप्यमावास्यानां चन्द्रयोगोपेतनक्षत्रविधिरुक्तः। सम्प्रत्येतासामेव कुलादियोज[न](ना)माह –

मू० ता साविट्ठिं णं अमावासं किं कुलं जोएति पुच्छा? ता कुलं वा जोएति उवकुलं वा जोएति णो लभति कुलोवकुलं, कुलं जोएमाणे महा णक्खत्ते जोएति उवकुलं जोएमाणे अस्सिलेसा णक्खत्ते जोएति। ता सावि(ट्ठी)(ट्ठिं) णं अमावसं कुलं वा जोएति उवकुलं वा जोएइ, कुलेण वा जुत्ता उवकुलेण वा जुत्ता साविट्ठी अमावासा जुत्ता ति वत्तव्वं सिता। एवं (नेयव्वं, णवरं) मग्गसिरिए माहीए[२] फग्गुणीए आसाढीए य कुलोवकुलं भाणितव्वं सेसाणं कुलोवकुलं णत्थि जाव कुलोवकुलेण वा जुत्ता आसाढी अमावास त्ति वत्तव्वं सिता।

१. ...कस्य द्वाषष्टि...-B। २. व्यवहारतः फाल्गुनीममावास्यां कुलोपकुलं न युनक्ति परन्तु चैत्रीममावास्यां कलोपकुलं युनक्ति। ततोऽत्र 'चित्तीए' इति पाठेन भाव्यम्। तत्त्वं तु केवलिगम्यम्।

दसमस्स छट्ठं ६।

टी० **'ता सावित्थिं ण'**मित्यादि। **'ता'** इति पूर्ववत् **श्रावित्थीं** श्रावणमासभाविनी**ममावास्यां किं कुलं युनक्ति उपकुलं युनक्ति कुलोपकुलं वा युनक्ति** ? भगवानाह – **'कुलं वे'**त्यादि। **कुलमपि युनक्ति,** वाशब्दोऽपिशब्दार्थः, **उपकुलं वा युनक्ति, न लभते** योगमधिकृत्य **कुलोपकुलम्**। तत्र कुलसंज्ञं नक्षत्रं श्राविष्ठीममावास्यां युञ्जत् मघानक्षत्रं युनक्ति। एतच्च व्यवहारत उच्यते। व्यवहारतो हि गतायामप्यमावास्यायां वर्त्तमानायामपि च प्रतिप[।]दि[त] योऽहोरात्रो मूले[म]ऽमावा[स्यायां](स्यया) सम्ब[न्धः](द्धः) स सकलोऽप्यहोरात्रो अमावास्येति व्यवह्रियते। तत एवं व्यवहारतः श्रावि[ष्ठा](ष्ठ्)याममावास्यायां मघानक्षत्रसम्भवादुक्तं **कुलं युञ्ज[त](त्) मघा नक्षत्रं युनक्तीति,** (परमार्थतः पुनः कुलं युञ्जत्पुष्यनक्षत्रं युनक्तीति) प्रतिपत्तव्यम्। तस्यैव कुलप्रसिद्ध्या प्रसिद्धस्य श्राविष्ठ्याममावास्यायां सम्भवादेतच्च प्रागेव भावितम्। एवमुत्तरसूत्रमपि व्यवहारनयमतेन यथायोगं परिभावनीयम्। **उपकुलं युञ्जत् अश्लेषानक्षत्रं युनक्ति।** सम्प्रत्युपसंहारमाह – **'ता सावित्थिं ण'**मित्यादि। यत उक्तप्रकारेण द्वाभ्यां कुलोपकुलाभ्यां श्राविष्ठ्याममावास्या[याश्](यां) चन्द्रयोगः समस्ति न तु कुलोपकुलेन ततः **श्राविष्ठीममावास्यां कुलमपि** वाशब्दोऽपिशब्दार्थः **युनक्ति उपकुलं वा युनक्ति इति वक्तव्यं स्यात्, यदि वा कुलेन वा युक्ता उपकुलेन वा युक्ता सती श्राविष्ठी अमावास्या युक्तेति वक्तव्यं स्यात्। 'एवं नेयव्व'**मिति। **एवमुक्तेन** प्रकारेण शेषमप्यमावास्याजातं **नेतव्यं,** नवरं मार्गशीर्ष्यां माघ्यां फाल्गुन्यामाषाढ्यां[१] च कुलोपकुलं भणितव्यम्। शेषाणां त्वमावास्यानां कुलोपकुलं नास्ति। ततो न वक्तव्यम्। सम्प्रति पाठकानुग्रहाय सूत्रालापका दर्श्यन्ते – **'ता पोट्ठवइं[२] णं अमावासं किं कुलं जोएइ उवकुलं जोएइ कुलोवकुलं जोएइ ?**

---

१. व्यवहारतः फाल्गुनीममावास्यां कुलोपकुलं न युनक्ति परन्तु चैत्रीममावास्यां कलोपकुलं युनक्ति। ततोऽत्र 'चैत्र्याम्' इति पाठेन भाव्यम्। तत्त्वं तु केवलिगम्यम्। २. पोट्ठवयं - B, C, D, G।

ता कुलं वा जोएइ उवकुलं वा जोएइ नो लभइ कुलोवकुलं। कुलं जोएमाणे उत्तरफग्गुणी जोएइ उवकुलं जोएमाणे पुव्वफग्गुणी जोएइ। ता [1]पोट्ठवइं णं अमावासं कुलं वा जोएइ उवकुलं वा जोएइ, कुलेण वा जुत्ता उवकुलेण वा जुत्ता पोट्ठवया अमावासा जुत्तति वत्तव्वं सिया। ता आसोइं णं अमावासं किं कुलं जोएइ उवकुलं जोएइ कुलोवकुलं जोएइ ? ता कुलं वा जोएइ उवकुलं वा जोएइ नो लब्भइ कुलोवकुलं। कुलं जोएमाणे चित्ता नक्खत्ते जोएइ उवकुलं जोएमाणे हत्थनक्खत्ते जोएइ। (ता) आसोइं णं अमावासं कुलं वा जोएइ उवकुलं वा जोएइ, कुलेण वा जुत्ता उवकुलेण वा जुत्ता आसोई अमावासा जुत्तत्ति वत्तव्वं सिया। ता कत्तियं णं अमावासं किं कुलं जोएइ उवकुलं जोएइ कुलोवकुलं जोएइ ? ता कुलं वा जोएइ उवकुलं वा जोएइ नो लभते कुलोवकुलं। कुलं जोएमाणे विसाहा नक्खत्ते जोएइ उवकुलं जोएमाणे साई नक्खत्ते जोएइ। ता कत्तियं णं अमावासं कुलं वा जोएइ, उवकुलं वा जोएइ, कुलेण वा जुत्ता उवकुलेण वा जुत्ता कत्तिई अमावासा जुत्तति वत्तव्वं सिया। ता मग्गसिरिं णं अमावासं किं कुलं जोएइ उवकुलं जोएइ कुलोवकुलं वा जोएइ ? ता कुलं वा जोएइ उवकुलं वा जोएइ कुलोवकुलं वा जोएइ। कुलं जोएमाणे मूलनक्खत्ते जोएइ उवकुलं जोएमाणे जेट्ठानक्खत्ते जोएइ कुलोवकुलं जोएमाणे अणुराहानक्खत्ते जोएइ। ता मग्गसिरिं णं अमावासं कुलं वा जोएइ उवकुलं वा जोएइ कुलोवकुलं वा जोएइ, कुलेण वा जुत्ता उवकुलेण वा जुत्ता कुलोवकुलेण वा जुत्ता मग्गसिरी अमावासा जुत्तेत्ति वत्तव्वं सिया।' इत्यादि। निश्चयतः पुनः कुलादियोजना प्रागुक्तं चन्द्रेण सह योगमधिकृत्य स्वयं परिभावनी[यम्](या)।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्टिीकायां दशमस्य प्राभृतस्य षष्ठं प्राभृतप्राभृतं समाप्तम्।

* * * * *

१. पोट्ठवयं - C, D।

सप्तमं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य षष्ठं प्राभृतप्राभृतम्। सम्प्रति सप्तमं वक्तव्यम्। तस्य चायमर्थाधिकारः— पौर्णमास्यमावास्यानां चन्द्रयोगमधिकृत्य सन्निपातो वक्तव्य[ा](स्)ततस्तद्विषयं प्रश्नसूत्रमाह —

मू० ता कहं ते सण्णिवाते आहिते ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत्, **कथं**- केन प्रकारेण भगवन् ! **त्वया** चन्द्रयोगमधिकृत्य पौर्णमास्यमावास्यानां **सन्निपात आख्यातः इति वदेत्**?

एवमुक्ते भगवानाह —

मू० ता जता णं साविट्ठी पुण्णिमा भवति तता णं माही अमावसा भवति। जता णं माघी पुण्णिमा भवति तता णं साविट्ठी अमावसा भवति। (ता) जता णं पोट्ठवई पुण्णिमा भवति तता णं फग्गुणी अमावसा भवति। जता णं फग्गुणी पुण्णिमा भवति तता णं पोट्ठवता अमावसा भवति। (एवं) एएणं अभिलावेणं आसोईए चेत्तीए कत्तिइए वतिसाहिए य मग्गसिरिए जेट्ठामूलीए य। ता जता णं पोसी पुण्णिमा भवति तता णं आसाढी अमावसा भवति, जता णं आसाढी पोण्णिमा भवति तता णं पोसी अमावसा भवति।

दसमे सत्तमं पाहुडं ७।

टी० 'ता जया ण'मित्यादि। इह व्यवहारनयमतेन यस्मिन्नक्षत्रे पौर्णमासी भवति [१]ततश्चारभ्य अर्वाक्तने पञ्चदशे चतुर्दशे वा नक्षत्रे नियमतोऽमावास्या। ततो

१. तत आरभ्य - I, N।

यदा श्राविष्ठी श्रविष्ठानक्षत्रयुक्ता **पौर्णमासी भवति तदा** तस्या अर्वाक्तनी **अमावास्या माघी**-मघानक्षत्रयुक्ता **भवति,** मघानक्षत्रादारभ्य श्राविष्ठानक्षत्रस्य पञ्चदशत्वात्। एतच्च श्रावणमासमधिकृत्य भावनीयम्। **यदा** तु **'ण'**मिति वाक्यालङ्कारे **(माघी)**-मघानक्षत्रयुक्ता **पौर्णमासी भवति तदा** पाश्चात्या **अमावास्या श्राविष्ठी** श्रविष्ठायुक्ता **भवति,** [१]मघात आरभ्य पूर्वं श्रविष्ठानक्षत्रस्य पञ्चदशत्वात्। एतच्च माघमासमधिकृत्य वेदितव्यम्। **'ता जया ण'**मित्यादि। **तत्र यदा 'ण'**मिति वाक्यालङ्कारे **प्रौष्ठपदी**- उत्तरभद्रपदायुक्ता **पौर्णमासी भवति तदा 'ण'**मिति प्राग्वत् पाश्चात्या **अमावास्या फाल्गुनी** (उत्तरफाल्गुनी)-नक्षत्रयुक्ता **भवति,** उत्तरभद्रपदात आरभ्य पूर्वमुत्तरफाल्गुनीनक्षत्रस्य पञ्चदशत्वात्। य[द्वा](त्त्व)पान्तरालेऽभिजिन्नक्षत्रं तत्स्तोककालत्वात् प्रायो न व्यवहारपथमवतरति, तथा च **समवायाङ्गसूत्रं – 'जंबुद्दीवे दीवे अभिईवज्जेहिं सत्तावीसाए नक्खत्तेहिं संववहारो वट्टइ'** त्ति। ततः सदपि तन्न गण्यते इति पञ्च-दशमेवोत्तरभद्रपदात आरभ्य पूर्वमुत्तरफाल्गुनीनक्षत्रमिति। एतच्च भाद्रपद-मासमधिकृत्योक्तमवसेयम्। **'ता जया ण'**मित्यादि। **यदा** च **फाल्गुनी** - उत्तरफाल्गुनीनक्षत्रयुक्ता **पौर्णमासी भवति तदा** पाश्चात्या **अमावास्या पौष्ठपदी**-उत्तरभद्रपदोपेता **भवति,** उत्तरफाल्गुनीमारभ्य पूर्वमुत्तरभद्रपदानक्षत्रस्य चतुर्दशत्वात्, इदं च फाल्गुनमासमधिकृत्योक्तम्। [२]**'ता जया ण'**मित्यादि। **यदा आश्वयुजी** अश्वयुग्नक्षत्रोपेता **पौर्णमासी भवति तदा** पाश्चात्यानन्तराऽ**मावास्या चैत्री**-चित्रानक्षत्रोपेता **भवति,** आश्विन्या आरभ्य पूर्वं चित्रानक्षत्रस्य पञ्चदशत्वात्। एतच्च व्यवहारनयमधिकृत्योक्तमवसेयम्, निश्चयत एकस्यामप्यश्वयुग्मासभाविन्या-ममावास्(या)यां चित्रानक्षत्र(स्य)ाऽसम्भवात्। एतच्च प्रागेव दर्शितम्। **यदा** च

---

१. मघानक्षत्रादारभ्य - E। २. अत्र मूलानुसारेण टीका नास्ति, मूले तु आश्वयुज्याश्चैत्र्याश्च परस्परं सन्निपातोऽपि अतिदिष्टः।

चैत्री-चित्रानक्षत्रोपेता **पौर्णमासी भवति तदा** ततः पाश्चात्या अनन्तरा **अमावास्या आश्वयुजी** अश्वयुग्नक्षत्रोपेता **भवति**। एतदपि व्यवहारतः, निश्चयत एकस्यामपि चैत्रमासभाविन्याममावास्यायामश्विनीनक्षत्रस्यासम्भवात्। '**एव**'मित्यादि। **एवमेतेना**नन्तरोदितेना**भिलापेन कार्त्तिक्या वैशाख्याश्च** परस्परं सन्निपातो वक्तव्यस्तदनन्तरं **मार्गशीर्ष्या ज्येष्ठामूल्याश्च**, सूत्रालापकाश्चैवं - '**ता जया णं कत्तिई पुन्निमा भवइ तया णं वेसाही अमावासा भवइ, जया णं वेसाही पुण्णिमा भवइ तया णं कत्तिई अमावासा भवइ। ता जया णं मग्गसिरी पोण्णिमा भवइ तया णं जेट्ठामूली अमावासा भवइ, जया णं जेट्ठामूली पोण्णिमा भवइ तया णं मग्गसिरी अमावासा भवइ।**' पौष्या आषाढ्याश्च सन्निपात्रसूत्रं साक्षादाह- '**ता जया ण**'मित्यादि। एतच्च प्राग्वद्भावनीयमिति।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य सप्तमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

आमे घडे निहित्तं, जहा जलं तं घडं विणासेइ।
इय सिद्धंतरहस्सं, अप्पाहारं विणासेइ।।

जइवि हु दिवसेण पयं, धरेइ पक्खेण वा सिलोगद्धं।
उज्जोयं मा मुंचसु, जइ इच्छसि सिक्खिउं नाणं।।

अष्टमं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य सप्तमं प्राभृतप्राभृतम्। साम्प्रतमष्टममारभ्यते। तस्य चायमर्थाधिकारो नक्षत्राणां संस्थानं वक्तव्यमिति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता कहं ते णक्खत्तसंठिती आहितेति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। 'ता' इति पूर्ववत् **कथं** - केन प्रकारेण भगवन्! (त्वया) नक्षत्राणां संस्थितिः संस्थानमा**ख्याता इति वदेत्**?

एवमुक्ते भगवानाह –

मू० ता एएसि णं अट्ठावीसाए णक्खत्ताणं अभीयी णक्खत्ते णं गोसीसावलिसंठिए पण्णत्ते, सवणे णक्खत्ते काहारसंठिते पण्णत्ते, धणिट्ठा णक्खत्ते सउणिपलिणगसंठिए पण्णत्ते, सतभिसया पुप्फोवयारसंठिते, एवं[1] पुव्वभद्दवता णक्खत्ते अद्धवावीसंठिए पण्णत्ते, उत्तरभद्दवता अद्धवावीसंठिए प०, रेवती णक्खत्ते णावासंठिए प०, अस्सिणी णक्खत्ते अस्सखंधगसंठिए प०, भरणी णक्खत्ते भगसंठिए प०, कत्तिया णक्खत्ते छुरघरसंठिए प०, रोहिणी णक्खत्ते सगडुद्धीसंठिए प०, मिगसिरे णक्खत्ते मिगसीसावलिसंठिए प०, अद्दा णक्खत्ते रुहिरबिंदुसंठिते प०, पुणव्वसू ण(क्खत्ते) तुलासं० (प०), पूसे ण० वद्धमाणसं० प०, अस्सिलेसा (ण०) पडागासंठिए पण्णत्ते, महा ण० पागारसंठिए प०, पुव्वफग्गुणी अद्धपलियं(क)संठिए प०, उत्तरावि एवं चेव, हत्थे (ण०) हत्थसं० (प०), चित्ता ण० मुहुफुल्लगसंठिए (प०), साई ण० खीलग० (प०), विसाहा ण० दाम[णि](णी)संठिए (प०), अणुराहा णक्खत्ते एगावलिसंठिए (प०), जेट्ठा णक्खत्ते गयदंतसंठिए (प०), मूले

१. पुव्वभद्दवया एवं उत्तरभद्दवया अद्ध... - U।

(ण०) विच्छुणंगूलसंठिए (प०), पुव्वासाढा णक्खत्ते गतविक्कमसंठिते पण्णत्ते, उत्तरासाढा णक्खत्ते सीहणिसाईसंठिए प०। दसमे अट्ठमं ८।

टी० 'ता एएसि ण'मित्यादि। **'ता'** इति पूर्ववत् **एतेषा**मनन्तरोदितानाम-**ष्टाविंशतेर्नक्षत्राणां** मध्येऽ**भिजिन्नक्षत्रं गोशीर्षावलिसंस्थितं प्रज्ञप्तम्**। (गोः शीर्षं) गोशीर्षं तस्यावलिः - तत्पुद्गलानां दीर्घरूपा श्रेणिस्तत्समसंस्थानं प्रज्ञप्तम्। **श्रवणनक्षत्रं कासा[रु](र)संस्थितं प्रज्ञप्तम्**। एवं शेषाण्यपि स्वस्वसंस्थानानि नक्षत्राणि भावनीयानि, नवरं दामनी पशुबन्धनम्, शेषं प्रायः सुगमम्। संस्थान-सङ्ग्राहिकाश्चेमा **जम्बूद्वीपप्रज्ञप्ति**सत्कास्तिस्रो गाथाः – **'गोसीसावली१ काहार२ [सि](स)उणि३ पुप्फोवयार४ वावी५-६ य। [नो](ना)वा७ आसक्खंधग[1]८ भग९ छुरघरए१० सगडुद्धी११॥१०८॥ मिगसीसावलि१२ रुहिरबिंदु१३ तुल१४ वद्धमाणग१५। पडागा१६ पागारे१७ पल्लंके१८ हत्थे१९-२० मुहफुल्लए२१ चेव॥१०९॥ खीलग२२ दामणि२३ एगावली२४ य गयदंत२५ विच्छुय[2]अयले२६ य। गयविक्कमे२७ य ततो सीहनिसाई[3]२८ य संठाणा ॥११०॥'**

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्याष्टमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

सुखं वा यदि वा दुःखं, यत्किञ्चित् क्रियते परे।
यत्कृतं च पुनः पश्चात्, सर्वमात्मनि तद्भवेत्॥

१. आसक्खंध७ भग८ - F। २. विच्छुणंगुलसंठिए - मूले। ३. ....निसाई संठाणा - F।

नवमं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्याष्टमं प्राभृतप्राभृतम्। सम्प्रति नवममारभ्यते, तस्य चायमर्थाधिकारः - प्रतिनक्षत्रं ताराप्रमाणं वक्तव्यमिति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता कहं ते णक्खत्ताणं तारग्गे आहिए त्ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत् **कथं** केन प्रकारेण **'ते'** त्वया भगवन् ! **नक्षत्राणां ताराग्रं** ताराप्रमाण**माख्यातमिति वदेत्**?

एवमुक्ते भगवानाह–

मू० ता एएसि णं अट्ठावीसाते णक्खत्ताणं अभीयी णक्खत्ते तितारे पण्णत्ते, सवणे तितारे पण्णत्ते, धणिट्ठा पंचतारे पण्णत्ते, सतभिसता दसतारे पण्णत्ते, पुव्वभद्दवता दुतारे (प०), उत्तरभद्दवया दुतारे (प०), रेव[ति](ती) बत्तीसतितारे पण्णत्ते, अस्सिणी तितारे (प०), भरणी तितारे (प०), कत्तिया छतारे पण्णत्ते, रोहिणी पंचतारे पण्णत्ते, मिगसिरे तितारे (प०), अद्दा एगतारे प०, पुणव्वसू पंचतारे (प०), पूसे तितारे पण्णत्ते, असिलेसा छतारे पण्णत्ते,महा सत्ततारे प०, पुव्वाफग्गुणी दुतारे पण्णत्ते, एवं उत्तरावि, हत्थे पंचतारे (प०), चित्ता ण० एगतारे (प०), साती ण० एगतारे (प०), विसाहा णक्खत्ते पंचतारे (प०), अणुराहा णक्खत्ते चउतारे पण्णत्ते, जेट्ठा तितारे (प०), मूलणक्खते एक्कारसतारे (प०), पुव्वासाढा चउतारे (प०), उत्तरासाढा णक्खत्ते चउतारे पण्णत्ते।

दसमे नवमं ९।

टी० 'ता एएसि ण'मित्यादि। **'ता'** इति पूर्ववत् **एतेषामष्टाविंशतेर्नक्षत्राणां** मध्ये **अभिजिन्नक्षत्रं त्रितारं प्रज्ञप्तम्। श्रवणनक्षत्रं त्रितारं प्रज्ञप्तम्।** शेषाण्यपि सूत्राणि भावनीयानि। ताराप्रमाणसङ्ग्राहिके चेमे **जम्बूद्वीपप्रज्ञप्ति**सत्के गाथे –

"तिग१ तिग२ पंचग३ दस४ दुग५ दुग६ बत्तीसं७ तिगं८ तह तिगं९ च।
छ[१]१० प्पंचग११ तिग१२ एक्कग१३ पंचग१४ तिग१५ च्छक्कगं१६ चेव॥१०२॥
सत्तग१७ दुग१८ दुग१९ पंचग२० एक्के२१ क्कग२२ पंच२३ चउ२४। तिगं२५
चेव एक्कारसग२६ चउक्कं२७ चउक्कगं२८ चेव तारग्गं॥१०३॥"

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य नवमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

विभूसा इत्थिसंसग्गो, पणीयं रसभोअणं।
नरस्सत्तगवेसिस्स, विसं तालउडं जहा॥

मुत्तुं पि बारसंगं, स एव मरणम्मि कीरए जम्हा।
अरहंतनमुक्कारो, तम्हा सो बारसंगत्थो॥

दाने शीले तपस्येव, भावना मिलिता यदि।
तदा मोक्षसुखाकाङ्क्षा, चिन्तनीया जनैरिह॥

---

१. छप्पंच - T।

दशमं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य नवमं प्राभृतप्राभृतम्। सम्प्रति दशममारभ्यते। तस्य चायमर्थाधिकारो- यथा कति नक्षत्राणि स्वयमस्तङ्गमनेनाहोरात्रपरिसमापकतया कं मासं नय(न)तीति। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते णेआ आहिते ति वदेज्जा?

टी० 'ता कहं ते नेता आहियत्ति[1] वएज्जा?' 'ता' इति पूर्ववत् **कथं** केन प्रकारेण भगवन् ! **त्वया** स्वयमस्तङ्गमनेनाऽहोरात्रपरिसमापको नक्षत्ररूपो **नेता आख्यात इति वदेत्**?

भगवानाह–

मू० ता वासाणं पढमं मासं चत्तारि णक्खत्ता णेंति, तं० उत्तरासाढा अभिई सवणो धणिट्ठा, उत्तरासाढा णक्खत्ते चोद्दस अहोरत्ते णेति, अभियी णक्खत्ते सत्त अहोरत्ते णेति सवणे णक्खत्ते अट्ठ अहोरते णेति, धणिट्ठा णक्खत्ते एगं अहोरत्तं णेति, तंसि च णं मासंसि चउरंगुलपोरिसीए छायाए सूरिए अणुपरियट्टति। तस्स णं मासस्स चरमदिवसे दो पयाणि चत्तारि अंगुलाइं पोरिसी भवति। ता वासाणं बितियं मासं कति णक्खत्ता णेंति ? [तिण्णि] (ता चत्तारि णक्खत्ता णेंति) तं जहा- धणिट्ठा सतभिसया पुव्वाभद्दवता उत्तरभद्दवता। एवं एएणं अभिलावेणं जहेव जंबुद्दीवपण्णत्तीए तहेव एत्थंपि भाणितव्वं जाव तंसि च णं मासंसि वट्टाए समचउरंससंठिताए णग्गोहपरिमंडलाए सकायमणुरंगि(ता)ए[2] छायाए सूरिए अणुपरियट्टति। तस्स णं मासस्स चरमदिवसे लेहट्ठाय[2] दोपादा य पोरिसी भवति।

दसमे दसमं १०।

---

१. आहयत्ति - E, J। २. लेहट्ठाइं दोपदाइं पोरिसीए - S।

टी० 'ता वासाण'मित्यादि। ता इति **तत्र वर्षाणां** वर्षाकालस्य चतुर्मास-प्रमाणस्य **प्रथमं** श्रावणलक्षणं **मासं चत्वारि नक्षत्राणि** स्वयमस्तङ्गमनेनाऽ-होरात्रपरिसमापकतया क्रमेण **नयन्ति, तद्यथा - उत्तराषाढा अभिजित् श्रवणो धनिष्ठा** च। तत्रोत्तराषाढा प्रथमान् **चतुर्दश अहोरात्रान्** स्वयमस्तङ्गमनेना-होरात्रपरिसमापकतया **नयति**। तदनन्तरम**भिजिन्नक्षत्रं सप्ताहोरात्रान् नयति**। ततः परं **श्रवणनक्षत्रमष्टावहोरात्रान्**। एवं च सर्वसङ्कलनया श्रावणमासस्यैकोन-त्रिंशदहोरात्रा गतास्ततः परं श्रावणमासस्य सम्बन्धिनं चरम**मेकमहोरात्रं धनिष्ठानक्षत्रं** स्वयमस्तङ्गमनेन अहोरात्रपरिसमापकतया **नयति**। एवं चत्वारि नक्षत्राणि श्रावणमासं नयन्ति। '[१]**तस्सिं च ण**'मित्यादि। **तस्मिंश्च** श्रावण**मासे चतुरङ्-गुलपौरुष्या**-चतुर(ङ्गुल)धिकपौरुष्या **छायया सूर्योऽनु** प्रतिदिवसं **परावर्त्तते**। किमुक्तं भवति ? श्रावणे मासे प्रथमादहोरात्रादारभ्य प्रतिदिवसमन्यान्य-मण्डलसङ्क्रान्त्या तथाकथञ्चनाऽपि सूर्यः परावर्त्तते यथा तस्य श्रावणमासस्य पर्यन्ते चतुरङ्गुलाधिका द्विपदा पौरूषी भवति। एतदेवाह – **'तस्स ण**'मित्यादि। **तस्य** श्रावण**मासस्य चरमे दिवसे द्विपदे चत्वारि चाङ्गुलानि पौरुषी भवति। 'ता वासाण**'मित्यादि। **'ता'** इति पूर्ववत्, **वर्षाणां** वर्षाकालस्य चतुर्मासप्रमाणस्य **द्वितीयं** भाद्रपदलक्षणं **मासं कति नक्षत्राणि नयन्ति** ? अस्य वाक्यस्यार्थः पूर्ववत् स्वयं भावनीयः। भगवानाह – **'ता'** इति पूर्ववत्, **चत्वारि नक्षत्राणि नयन्ति, तद्यथा धनिष्ठा शतभिषक् पूर्वप्रोष्ठपदा** [२](**उत्तरप्रोष्ठपदा**) च। **'एव**'मित्यादि। **एव**मुक्तेन प्रकारेण **एतेनानन्तरोदितेना-ऽभिलापेन यथैव जम्बूद्वीपप्रज्ञप्तौ** भणितं **तथैव इहापि** [३]**भणितव्यं यावत्** आषाढमासचिन्तायां '[४]**तस्सिं च ण**'मित्यादि। तच्चैवं – **'धणिट्ठा चउद्दस अहोरत्ते नेइ, सयभिसया सत्त अहोरत्ते नेति,**

१. मूले तु 'तंसि' इति पाठो दृश्यते। २. मूले तु 'पुव्वभद्दवता उत्तरभद्दवता' इति पाठोऽस्ति। ३. भाणितव्यम् - K। ४. मूले तु 'तंसि च ण'मिति पाठोऽस्ति।

पुव्वभद्दवया अट्ठ अहोरत्ते नेति, उत्तरपोट्ठवया एगं अहोरत्तं नेइ। तस्सिं च णं मासंसि अट्ठंगुलपोरिसीए च्छायाए सूरिए अणुपरियट्टइ। तस्स णं मासस्स [१]चरमे दिवसे दो पयाइं अट्ठंगुलाइं पोरिसी भवइ। ता वासाणं तइयं मासं कइ नक्खत्ता निंति ? ता तिण्णि नक्खत्ता निंति, तं जहा - उत्तरा पोट्ठवया (रेवई) अस्सीणी। उत्तरा पोट्ठवया चउद्दस अहोरत्ते नेइ, रेवई पन्नरस अहोरत्ते नेइ, अस्सिणी एगं अहोरत्तं नेइ। तस्सिं च णं मासंसि दुवालसंगुलपोरिसीए (छायाए सूरिए) अणुपरियट्टइ। तस्स णं मासस्स चरमे (दिवसे) लेहत्थाइं तिण्णि पयाइं पोरिसी भवइ। ता वासाणं चउत्थं मासं कइ नक्खत्ता निंति ? ता तिन्नि नक्खत्ता निंति, तं जहा- अस्सिणी भरणी कत्तिया य। अस्सिणी चोद्दस अहोरत्ते नेइ, भरणी पन्नरस अहोरत्ते नेइ, कत्तिया एगं अहोरत्तं नेइ। तस्सिं च णं मासंसि सोलसअंगुलपोरिसीए च्छायाए सूरिए अणुपरियट्टइ। तस्स णं मासस्स चरमे दिवसे तिण्णि पयाइं चत्तारि य अंगुलाइं पोरिसी भवइ। ता हेमंताणं पढमं मासं कइ नक्खत्ता नेंति ? ता तिण्णि नक्खत्ता नेंति, तं जहा- कत्तिया रोहिणी [अ](सं)ठाणा। कत्तिया चोद्दस अहोरत्ते नेइ, रोहिणी पन्नरस अहोरत्ते नेइ (संठाणा एगं अहोरत्तं णेति)। तस्सिं च णं मासंसि वीसंगुलाए पोरिसीए च्छायाए सूरिए अणुपरियट्टइ। तस्स णं मासस्स चरमे दिवसे तिण्णि पयाइं अट्ठंगुलाइं पोरिसी भवइ। ता हेमंताणं दोच्चं मासं कइ नक्खत्ता नेंति ? (ता) चत्तारि नक्खत्ता नेंति, तं जहा- [२]संठाणा अद्दा पुणव्वसू पुस्सो। संठाणा चउद्दस अहोरत्ते नेइ, अद्दा सत्त अहोरत्ते नेइ, पुणव्वसू अट्ठ अहोरते नेइ, [३]पुस्सो एगं अहोरत्तं नेइ। तस्सिं च णं मासंसि चउव्वीसंगुला(ए) पोरिसीए छायाए सूरिए अणुपरियट्टइ। तस्स णं मासस्स चरमे दिवसे लेहट्ठाणि चत्तारि पयाइं पोरिसी

१. चरिमे - M। २. संठाणे - H। ३. पुस्से- H।

भवइ। ता हेमंताणं तइयं मासं कइ नक्खत्ता णेंति ? ता तिण्णि नक्खत्ता [१]णिंति, तं जहा- पुस्सो अस्सेसा मघा, पुस्सो चोद्दस अहोरत्ते नेइ, अस्सेसा पन्नरस अहोरत्ते नेइ, महा एगं अहोरत्तं नेइ। तस्सिं च णं मासंसि वीसंगुला(ए) पोरिसीए च्छायाए सूरिए अणुपरियट्टइ। तस्स णं मासस्स चरमे दिवसे तिण्णि पयाइं अट्ठंगुलाइं पोरिसी भवइ। ता हेमंताणं चउत्थं मासं कइ नक्खत्ता (णेंति) ? (ता) तिण्णि नक्खत्ता णेंति, तं जहा - मघा पुव्वफग्गुणी उत्तरफग्गुणी य। महा चोद्दस अहोरत्ते नेइ, पुव्वा फग्गुणी पन्नरस अहोरत्ते नेइ, उत्तरफग्गुणी एगं अहोरत्तं नेइ। तस्सिं च णं मासंसि सोलसंगुला(ए) पोरिसीए च्छायाए सूरिए अणुपरियट्टइ। तस्स णं मासस्स [२]चरमे दिवसे तिण्णि पयाइं चत्तारि अंगुलाइं पोरिसी भवइ। ता गिम्हाणं पढमं मासं कइ नक्खत्ता नेंति ? ता तिण्णि नक्खत्ता णेंति, तं जहा- उत्तरफग्गुणी हत्थो चित्ता य, उत्तरफग्गुणी चोद्दस अहोरत्ते नेइ, हत्थो पन्नरस अहोरत्ते नेइ, चित्ता एगं अहोरत्तं नेइ। तस्सिं च णं मासंसि दुवाल-संगुलपोरिसीए च्छायाए सूरिए अणुपरियट्टइ। तस्स णं मासस्स चरमे (दिवसे) लेहट्ठाणि तिण्णि पयाइं पोरिसी भवइ। ता गिम्हाणं बिइयं मासं कइ नक्खत्ता निंति ? ता तिण्णि नक्खत्ता [३]णिंति, तं जहा- चित्ता साई विसाहा, चित्ता चोद्दस अहोरत्ते नेइ, साई पन्नरस अहोरत्ते नेइ, विसाहा एगं अहोरत्तं नेइ। तस्सिं च णं मासंसि अट्ठंगुलपोरिसीए च्छायाए सूरिए अणुपरियट्टइ। तस्स णं मासस्स [४]चरमे दिवसे दो पयाइं अट्ठंगुलाइं पोरिसी हवइ। ता गिम्हाणं तइअं मासं कइ नक्खत्ता [५]णिंति ? (ता) चत्तारि नक्खत्ता [६]णिंति, तं जहा - विसाहा अणुराहा जेट्ठा मूलो, विसाहा चोद्दस

---

१. णेंति - D, G। २. चरिमे - D, L। ३. णेंति - G। ४. चरिमे - L। ५. णेंति - G। ६. णेंति - G।

अहोरत्ते नेइ, अणुराहा सत्त अहोरत्ते नेइ, जेट्ठा अट्ठ अहोरत्ते नेइ, मूलो एगं अहोरत्तं नेइ। तस्सिं च णं मासंसि चउरंगुलपोरिसीए च्छायाए सूरिए अणुपरियट्टइ। तस्स णं मासस्स [१]चरमे दिवसे दो पयाणि चत्तारि य [२]अंगुलाइं पोरिसी भवति। ता गिम्हाणं चउत्थं मासं कइ नक्खत्ता नेंति ? ता तिण्णि नक्खत्ता नेंति, तं जहा- मूलो पुव्वासाढा उत्तरासाढा य। मूलो चोद्दस अहोरत्ते नेइ, पुव्वासाढा पन्नरस अहोरत्ते नेइ, उत्तरासाढा एगं अहोरत्तं नेइ' इति। अत ऊर्द्धवं तत्सूत्रं साक्षादस्ति, तच्च पश्चाद्ग्रहीष्यते पाश्चात्यं तु सूत्रं सकलमपि सुगमं, नवरं **'लेहट्ठाणि तिन्नि पयाइं'** ति रेखा पादपर्यन्तवर्त्तिनी सीमा, तत्स्थानि त्रीणि पदानि पौरुषी [तिन्नी नक्खत्ता नेंति] भवति। किमुक्तं भवति ? परिपूर्णानि त्रीणि पदानि पौरुषी भवतीति। एषा तु चतुरङ्गुला प्रतिमासं वृद्धिस्तावदवसेया यावत्पौषो मासस्तदनन्तरं चतुरङ्गुला प्रतिमासं हानिर्वक्तव्या। सा च तावत् यावदाषा[३]ढो मासस्तेनाषाढमासपर्यन्ते द्विपदा पौरुषी भवति। इदं च पौरुषीपरिमाणं व्यवहारत उक्तम्। निश्चयतः सार्द्धैस्त्रिंशता अहोरात्रैश्चतुरङ्गुला वृद्धिर्हानिर्वा वेदितव्या। तथा च निश्चयतः पौरुषीपरिमाणप्रतिपादनार्थमिमाः पूर्वाचार्यप्रदर्शिताः करणगाथाः - **'पव्वे पन्नरसगुणे तिहि सहिए पोरिसीए आणयणे। [चु](छ)लसी य सय विभत्ते जं लद्धं तं वियाणाहि॥३९४॥ जइ होइ विसमलद्धं द[क्षि](क्खि)णम[इ](य)णं हविज्ज नायव्वं। अह हवइ समं लद्धं नायव्वं उत्तरं [न](अ)यणं॥३९५॥ अयणगयतिहिरासी चउगुणो [पुव्वया य सययंमि] (पव्वपाय भइयव्वं)। जं लद्धमंगुलाणि य खयवुड्ढी पोरिसीए॥३९६॥ दक्खिणवुड्ढी दु[ग]पया उ अंगुलाणं तु होइ नायव्वा। उत्तरअयणे हाणी कायव्वा चउहिं [पया](पाए)हिं॥३९७॥ सावण-बहुलपडिवया दुपया पोरिसी धुवा होइ। चत्तारि अंगुलाइं मासेणं**

१. चरिमे - L। २. अंगुलाणि - B, C, G, L, N। ३. ...षाढमास... - N।

वड्ढए ततो॥३९८॥ एकत्तीसइ भागा तिहिए पुण अंगुलस्स चत्तारि। दं[क्षि](क्खि)णअयणे वुड्ढी जाव उ चत्तारि उ पयाइं॥३९९॥ उत्तरअयणे हाणी चउहिं पाएहिं जाव दो पाया। एवं तु पोरिसिए वुड्ढिखया हुंति नायव्वा॥४००॥ वुड्ढी वा हाणी वा जावइया पोरिसीए दिट्ठा उ। तत्तो दिवसगएणं जं लद्धं तं खलु अयणगयं॥४०१॥' (**जो.प.**) एतासां क्रमेण व्याख्या- युगमध्ये यस्मिन्पर्वणि यस्यां तिथौ पौरुषीपरिमाणं ज्ञातुमिष्यते, ततः पूर्वं युगादित आरभ्य यानि **पर्वाण्य**तिक्रान्तानि तानि ध्रियन्ते, धृत्वा च **पञ्चदशभिर्गुण्यन्ते**, गुणयित्वा च विवक्षितायास्तिथेर्याः प्रागतिक्रान्ता**स्तिथय**-स्ताभिः **सहितानि** क्रियन्ते, कृत्वा च **षडशीत्यधिकेन शतेन** तेषां भागो ह्रियते। इह एकस्मिन्नयने त्र्यशीत्यधिकमण्डलशतपरिमाणे चन्द्रनिष्पादितानां तिथीनां षडशीत्यधिकं शतं भवति। ततस्तेन भागहरणं, भागे च हृते **यल्लब्धं तत् विजानीहि** सम्यगवधारयेत्यर्थः॥३९४॥ तत्र **यदि लब्धं विषमं भवति** यथा एकस्त्रिकः पञ्चकः सप्तको नवको वा, तदा तत्पर्यन्तवर्त्ति**दक्षिणमयनं ज्ञातव्यम्, अथ भवति लब्धं समं** तद्यथा द्विकश्चतुष्कः षष्ठो अष्टको वा, तदा तत्पर्यन्तवर्त्ति **उत्तरायणम**-वसेयम्॥३९५॥ तदेवमुक्तो दक्षिणायनोत्तरायणपरिज्ञानोपायः। सम्प्रति षडशीत्यधिकेन शतेन भागे हृते यत् शेषमवतिष्ठते यदि वा भागाऽसम्भवात् यत्शेषं तिष्ठति तद्गतविधिमाह – '**अयणगये**'त्यादि। यः पूर्वं भागे हृते भागाऽसम्भवे वा शेषीभूतो**ऽयनगतस्तिथिराशि**र्वर्त्तते, स **चतुर्भिर्गुण्यते**, गुणयित्वा **पर्वपा[दो](दे)न** युगमध्ये यानि सर्व (ग्रन्थाग्रं ४०००) सङ्ख्यया पर्व्वाणि चतुर्विंशत्य-धिकशतसङ्ख्यानि तेषां पादेन चतुर्थेनांशेन एकत्रिंशता इत्यर्थः तया **भागे हृते यल्लब्धं तान्यङ्गुलानि** चकारादङ्गुलांशाश्च **पौरुष्याः क्षयवृद्धौ** ज्ञातव्यानि,

---

१. द[क्षि](क्खि)णे अयणे - A, B, C, D, E, F, G, I, J। २. य - C, K। ३. भागाऽसम्भवात् - K।

दक्षिणायने पदध्रुवराशेरुपरि वृ[द्ध्या](द्धौ) ज्ञातव्यानि, उत्तरायणे पदध्रुवराशेः क्षये ज्ञातव्यानि इत्यर्थः। अथैवम्भूतस्य गुणकारस्य भागहारस्य वा कथमुत्पत्तिः ? उच्यते, यदि षडशीत्यधिकेन तिथिशतेन चतुर्विंशतिरङ्गुलानि क्षये वृद्धौ वा प्राप्यन्ते, तत एकस्यां तिथौ का वृद्धिः क्षयो वा ? राशित्रयस्थापना १८६।२४।१। अत्रान्त्येन राशिना एकलक्षणेन मध्यमो राशिश्चतुर्विंशतिर्गुण्यते, जातः स तावानेव, एकेन गुणितं तदेव भवतीति वचनात्। तत आद्येन राशिना षडशीत्यधिकशतरूपेण भागो ह्रियते। तत्रोपरितनराशेः स्तोकत्वाद् भागो न लभ्यते। ततश्चेद्यच्छेदकराश्योः षट्केनापवर्त्तना[1], जात उपरितनो राशिश्चतुष्करूपः, अधस्तन एकत्रिंशत्, लब्धमेकस्यां तिथौ चत्वार एकत्रिंशद्भागाः क्षये वृद्धौ चेति चतुष्[का](को) गुणकार उक्त एकत्रिंशद् भागहार इति॥३९६॥ इह यल्लब्धं तान्यङ्गुलानि क्षये वृद्धौ वा ज्ञातव्यानीत्युक्तम्, तत्र कस्मिन्नयने कियत्प्रमाणं ध्रुवराशेरुपरि वृद्धौ कस्मिन् वा अयने किं प्रमा[णराशेः]णं ध्रुवराशेः क्षये इत्येतन्निरूपणार्थमाह- **'दक्खिणवुड्ढी'** इत्यादि। **दक्षिणायने द्विपादात्**[2] पदद्वयस्योपरि **अङ्गुलानां वृद्धिर्ज्ञातव्या, उत्तरायणे चतुर्भ्यः** सकाशा**दङ्गुलानां हानिः**॥३९७॥ तत्र युगमध्ये प्रथमे संवत्सरे दक्षिणायने यतो दिवसादारभ्य वृद्धि[स](स्त)न्निरूपयति – **'सावणे'**त्यादिगाथाद्वयम्। युगस्य प्रथमे संवत्सरे **श्रावणे मासे बहुलपक्षे प्रतिपदि पौरुषी द्विपदा** पदद्वयप्रमाणा **ध्रुवा भवति**। ततस्तस्मात्प्रतिपद आरभ्य प्रतितिथि क्रमेण तावद्वर्द्धते यावन्मासेन सूर्यमासेन सार्द्धत्रिंशदहोरात्रप्रमाणेन चन्द्रमासापेक्षया एकत्रिंशत्तिथ्यात्मकेनेत्यर्थः[3] चत्वारि अङ्गुलानि वर्द्धन्ते॥३९८॥ कथमेतदवसीयते यथा मासेन - सूर्यमासेन सार्द्धत्रिंशदहोरात्रप्रमाणेन एकत्रिंशत्तिथ्यात्मकेनेत्यत आह **'एगत्तीसे'**त्यादि। यतः एकस्यां **तिथौ चत्वार एकत्रिंशद् भागा** वर्द्धन्ते, एतच्च प्रागेव भावितं, परिपूण्[र्णं](र्णे) तु **दक्षिणायने वृद्धिर्यावत्** परिपूर्णानि **चत्वारि**

१. वर्त्तनाज्जात - T। २. द्विपदात् - G। ३. एकत्रिंशत्तिथिभिरित्यर्थः - E, G, T।

पदानि, ततो मासेन-सूर्यमासेन (सार्द्ध)त्रिंशदहोरात्रप्रमाणेन एकत्रिंशत्तिथ्यात्मकेनेत्युक्तम्। तदेवमुक्ता वृद्धिः॥३९९॥ सम्प्रति हानिमाह – '**उत्तरे**'त्यादि, युगस्य प्रथमे संवत्सरे माघे मासे बहुलपक्षे सप्तम्या आरभ्य **चतुर्भ्यः पादेभ्यः** सकाशात् प्रतितिथि एकत्रिंशद्भागचतुष्टय**हानि**स्तावदवसेया **यावदु**त्तरायणपर्यन्ते **द्वौ पादौ** पौरुषीति, एष प्रथमसंवत्सरगतो विधिः। द्वितीये संवत्सरे श्रावणे मासे बहुलपक्षे त्रयोदशीमादौ कृत्वा वृद्धिः, (माघमासे शुक्लपक्षे चतुर्थीमादिं कृत्वा क्षयः। तृतीयसंवत्सरे श्रावणे मासे शुक्लपक्षे दशमी वृद्धेरादिः, माघमासे बहुलपक्षे प्रतिपत् क्षयस्यादिः। चतुर्थे संवत्सरे श्रावणमासे बहुलपक्षे सप्तमी वृद्धेरादिः, माघमासे बहुलपक्षे त्रयोदशी क्षयस्यादिः। पञ्चमे संवत्सरे श्रावणे मासे शुक्लपक्षे चतुर्थी वृद्धेरादिः,) माघमासे शुक्लपक्षे दशमी क्षयस्यादिः। एतच्च करणगाथानुपा[त](त्त)-मपि पूर्वाचार्यप्रदर्शितव्याख्यानादवसितम्। सम्प्रत्युपसंहारमाह– '**एवं तु**' इत्यादि। **एवमुक्तेन** प्रकारेण **पौरुष्यां** पौरुषीविषये **वृद्धिक्षयौ** यथाक्रमं दक्षिणायनेषूत्तरायणेषु वेदितव्यौ॥४००॥ तदेवमक्षरार्थमधिकृत्य व्याख्याताः करणगाथाः। सम्प्रत्यस्य करणस्य भावना क्रियते। कोऽपि पृच्छति-युगे आदित आरभ्य पञ्चाशीतितमपर्वणि पञ्चम्यां तिथौ कतिपदा पौरुषी भवति ? तत्र चतुरशीतिर्ध्रियते, तस्या(श्चा)-धस्तात्पञ्चम्यां तिथौ [तृघ्न] (पृष्ट)मिति पञ्च, चतुरशीतिश्च पञ्चदशभिर्गुण्यते, जातानि द्वादशशतानि षष्ट्यधिकानि १,२६०। तेषु मध्येऽधस्तनाः पञ्च प्रक्षिप्यन्ते, जातानि पञ्चषष्ट्यधिकानि (द्वादशशतानि) १,२६५। तेषां षडशीत्यधिकेन शतेन भागो ह्रियते, लब्धाः षट्। आगतं षट् अयना व्यतिक्रान्ता इति सप्तममयनं वर्त्तते। तद्गतं च शेषमेकोनपञ्चाशदधिकं शतं तिष्ठति १४९। ततश्चतुर्भिर्गुण्यते, जातानि पञ्चशतानि षण्णवत्यधिकानि ५९६। तेषामेकत्रिंशता भागहरणे लब्धा एकोनविंशतिः १९, शेषास्तिष्ठन्ति सप्त ७। द्वादशाङ्गुलानि पाद इत्येकोनविंशतेर्द्वादशभिः पदं लब्धं, शेषाणि तिष्ठन्ति सप्त अङ्गुलानि षष्ठं चायनमुत्तराय[नं](णं), तद्गतं, सप्तमं तु

दक्षिणायनं वर्त्तते। ततः पदमेकं सप्ताङ्गुलानि पदद्वयप्रमाणे ध्रुवराशौ प्रक्षिप्यन्ते, जातानि त्रीणि पदानि सप्त अङ्गुलानि। ये च सप्त एकत्रिंशद्भागाः शेषीभूता वर्त्तन्ते तान् यवान् कुर्म्मः। तत्राष्टौ यवा अङ्गुले इति, ते सप्त [षष्टि] (अष्ट)भिर्गुण्यन्ते, जाता षट्पञ्चाशत् ५६, तस्या एकत्रिंशता भागे हृते लब्ध एको यवः, शेषास्तिष्ठन्ति यवस्य पञ्चविंशतिरेकत्रिंशद्भागाः। आगतं पञ्चाशीतितमे पर्वणि पञ्चम्यां त्रीणि पदानि सप्त अङ्गुलानि एको यव एकस्य यवस्य पञ्चविंशतिरेकत्रिंशद्भागा इति एतावती पौरुषीति। अपरः कोऽपि पृच्छति- सप्तनवतितमे पर्वणि पञ्चम्यां तिथौ कतिपदा पौरुषीति। ततः षण्णवतिर्ध्रियते, तस्याश्चाधस्तात् पञ्च, षण्णवतिश्च पञ्चदशभिर्गुण्यते, जातानि चतुर्दशशतानि चत्वारिंशदधिकानि १,४४०। तेषां मध्ये अधस्तनाः पञ्च प्रक्षिप्यन्ते, जातानि चतुर्दशशतानि पञ्चचत्वारिंशदधिकानि १,४४५। तेषां षडशीत्यधिकेन शतेन भागो ह्रियते, लब्धानि सप्त अयनानि, शेषं तिष्ठति त्रिचत्वारिंशदधिकं शतं १४३। त[तश्](त्) चतुर्भिर्गुण्यते, जातानि पञ्च शतानि द्विसप्तत्यधिकानि ५७२। तेषामेकत्रिंशता भागो ह्रियते, लब्धान्यष्टादश अङ्गुलानि १८। तेषां मध्ये द्वादशभिरङ्गुलैः पदमिति लब्धमेकं पदं षट् अङ्गुलानि, उपरि चांशा उद्धरन्ति चतुर्दश १४। ते यवानयनार्थमष्टभिर्गुण्यन्ते, जातं द्वादशोत्तरं शतं ११२। तस्यैकत्रिंशता भागे हृते लब्धास्त्रयो यवाः (शेषास्)तिष्ठन्ति य[वांश](वस्य) एकोनविंशतिरेकत्रिंशद्भागाः। सप्त चायनान्यतिक्रान्तान्यष्टमं वर्त्तते, अष्टमं चायन- मुत्तरायणं, उत्तरायणे च पदचतुष्टयरू[पेण](पात्) ध्रुवराशेर्हानिर्वक्तव्या। तत एकं पदं [सप्ता](षड)ङ्गुलानि त्रयो यवा एकस्य यवस्य एकोनविंशतिरेकत्रिंशद्भागा इति पदचतुष्टयात्पात्यते, शेषं तिष्ठति द्वे पदे पञ्चाङ्गुलानि चत्वारो यवा एकस्य च यवस्य द्वादश एकत्रिंशद्भागा। एतावती युगे आदित आरभ्य सप्तनवतितमे पर्वणि पञ्चम्यां तिथौ पौरुषीति। एवं सर्वत्र भावनीयम्। सम्प्रति पौरुषीपरिमाण-

ज्ञापनार्थमियं करणगाथा '**वुड्ढी वे**'त्यादि। **पौरुष्यां यावती वृद्धिर्हानिर्वा दृष्टा ततः** सकाशाद्-**दिवसगतेन** प्रव[र्द्ध](र्त्त)मानेन वा त्रैराशिककर्मानुसरणतो[१] **यत् लब्धं तत् अयनगतं**- अयनस्य तावत्प्रमाणं गतं वेदितव्यम्॥४०१॥ एष करणगाथाक्षरार्थः भावना त्वियं – तत्र दक्षिणायने पदद्वयस्योपरि चत्वारि अङ्गुलानि वृद्धौ दृष्टानि। ततः कोऽपि पृच्छति- कियत् गतं दक्षिणायनस्य ? अत्र त्रैराशिककर्मावता[रे](रो) यदि चतुर्भिरङ्गुलस्य एकत्रिंशद्भागैरेका तिथिर्लभ्यते ततश्चतुर्भिरङ्गुलैः कति तिथीर्लभामहे ? राशित्रयस्थापना - ४।१।४। अत्रा[द्यो](न्त्यो) राशिरङ्गुलरू[पो](प) एकत्रिंशद्भागकरणार्थमेकत्रिंशता गुण्यते, जातं चतुर्विंशत्यधिकं शतं १२४। तेन मध्यो राशिर्गुण्यते, जातं तदेव चतुर्विंशत्यधिकं शतं १२४, एकस्य गुणने तदेव भवतीति वचनात्, तस्य चतुष्करूपेणादिराशिना भागो ह्रियते, लब्धा एकत्रिंशत्तिथयः। आगतं दक्षिणायने एकत्रिंशत्तमायां तिथौ चतुरङ्गुला पौरुष्यां वृद्धिरिति। तथा उत्तरायणे पदचतुष्टयादङ्गुलाष्टकं हीनं पौरुष्यामुपलभ्य कोऽपि पृच्छति-किं गतमुत्तरायणस्य ? अत्रापि त्रैराशिकं, यदि चतुर्भिरङ्गुलस्य एकत्रिंशद्भागैरेका तिथिर्लभ्यते ततो अष्टभिरङ्गुलैर्हीनैः कति तिथयो लभ्यन्ते ? राशित्रयस्थापना ४।१।८। अत्रान्त्यो राशिरेकत्रिंशद्भागकरणार्थमेकत्रिंशता गुण्यते, जाते द्वे शते अष्टचत्वारिंशदधिके २४८। ताभ्यां मध्यो राशिर्गुण्यते, जाते ते एव द्वे शते अष्टचत्वारिंशदधिके २४८। तयोराद्येन राशिना चतुष्करूपेण भागहरणं, लब्धा द्वाषष्टिः ६२। आगतमुत्तरायणे द्वाषष्टितमायां तिथौ अष्टावङ्गुलानि पौरुष्या हीनानीति। '[२]**तस्सिं च णं मासंसि व[ट्ठा](ट्टा)ए**' इत्यादि। **तस्मिन्नाषाढे मासे** प्रका[श](श्य)स्य वस्तु[ना](नो वृत्तस्य) **वृत्तया** समचतुरस्रसंस्थानसंस्थितस्य **समचतुरस्रसंस्थानसंस्थितया** न्यग्रोधपरिमण्डलसंस्थानस्य **न्यग्रोधपरिमण्डल(या** उप)लक्षणमेतत्, शेषसंस्थानसंस्थितप्रका[श](श्य)स्य वस्तुनः शेषसंस्थानसंस्थितया,

१. सारतो - T। २. मूले तु 'तंसि' इति पाठोऽस्ति।

आषाढे हि मासे प्रायः सर्वस्यापि प्रका[श](श्य)स्य वस्तुनो दिवसस्य चतुर्भागेऽतिक्रान्ते शेषे वा स्वप्रमाणा च्छाया भवति, निश्चयतः पुनराषाढमासस्य चरमे दिवसे, तत्रापि सर्वाभ्यन्तरे मण्डले वर्त्तमाने सूर्ये। ततो यत् प्रका[शं](श्यं) वस्तु यत्संस्थानं भवति तस्य च्छायाऽपि तत्संस्थानोपजायते। तत उक्तं वृत्तस्य वृत्तया इत्यादि। एतदेवाह– **स्वकायमनुरङ्गिन्या** स्वस्य-स्वकीय(स्य) छायानिबन्धनस्य वस्तुनः कायः शरीरं स्व[की](का)यस्तं अनुरज्यते-तदनुगतमनुकारं विदधातीत्येवंशीलाऽनुरङ्गिनी **'द्विष-दुह-नुहे'**[1]त्यादि[नो](ना) (**मलयगिरिशब्दानुशासने कृदन्ते ४/१३**) घि[न्](नञ्)प्रत्ययः। तया स्वकायमनुरङ्गिन्या **च्छायया सूर्यो अनु** प्रतिदिवसं **परावर्त्तते**। एतदुक्तं भवति-आषाढस्य प्रथमादहोरात्रादारभ्य प्रतिदिवसमन्यान्यमण्डलसङ्क्रान्त्या तथा कथञ्चनापि सूर्यः परावर्त्तते यथा सर्वस्यापि प्रका[श](श्य)वस्तुनो दिवसस्य चतुर्भागेऽतिक्रान्ते शेषे वा स्वानुकारा स्वप्रमाणा च च्छाया भवतीति। (शेषं सुगमम्।)

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्टिीकायां दशमस्य प्राभृतस्य दशमं प्राभृतप्राभृतं समाप्तम्। [शेषं सुगमम्]

* * * * *

जं जं समयं जीवो, आविसइ जेण जेण भावेण।
सो तम्मि तम्मि समये, सुहासुहं बंधए कम्मं।।

अप्पा जाणइ अप्पा, जहट्ठिओ अप्पसक्खिओ धम्मो।
अप्पा करेइ तं तह, जह अप्पसुहावहं होइ।।

आहारेसु सुहेसु अ, रम्मावसहेसु काणणेसुं च,
साहूण नाहिगारो, अहिगारो धम्मकज्जेसु।।

१. मलयगिरिशब्दानुशासने कृदन्ते चतुर्थे पादे इदं सूत्रमित्थमुपन्यस्तम्- 'दुष-द्विष-द्रुह-दुह-अभ्याहन-युज-भुज-भज-रुज-रज-त्यज-अनुरुधः घिनञ् ॥१३॥'

एकादशं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य दशमं प्राभृतप्राभृतम्। साम्प्रतमेकादशमारभ्यते तस्य चायमर्थाधिकारो यथा नक्षत्राणि अधिकृत्य चन्द्रमार्गा वक्तव्या इति। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता कहं ते चंदमग्गा आहिता ति वदेज्जा?

टी० 'ता कहं ते चंदमग्गा आहियत्ति वएज्जा ?' इति। **'ता'** इति पूर्ववत् **कथं** केन प्रकारेण (**त्वया**) नक्षत्राणां दक्षिणत उत्तरत प्रमर्दतो यदि वा सूर्यनक्षत्रैर्विरहिततया **चन्द्रमार्गाश्चन्द्रस्य** मण्डलगत्या परिभ्रमणरूपा मण्डलरूपा वा मार्गा **आख्याता इति वदेत्**?

भगवानाह–

मू० ता एएसिं णं अट्ठावीसाए णक्खत्ताणं अत्थि णक्खत्ता जे णं णक्खत्ता सदा चंदस्स दाहिणेणं जोगं जोएंति, अत्थि णक्खत्ता जे णं णक्खत्ता सदा चंदस्स उत्तरेणं जोगं जोएंति, अत्थि णक्खत्ता जे णं णक्खत्ता चंदस्स दाहिणेणवि उत्तरेणवि पमद्दंपि जोगं जोएंति, अत्थि णक्खत्ता जे णं णक्खत्ता चंदस्स दाहिणेण वि पमद्दंपि जोगं जोएंति, अत्थि णक्खत्ते जे णं णक्खत्ते सदा चंदस्स पमद्दं जोगं जोएति।

टी० 'ता एएसि ण'मित्यादि। **'ता'** इति पूर्ववत्, **एतेषामष्टाविंशतेर्नक्षत्राणां** मध्ये **अस्ती**ति निपातत्वादार्षत्वाद्वा सन्ति तानि **नक्षत्राणि यानि 'ण'**मिति वाक्यालङ्कारे **सदा चन्द्रस्य दक्षिणेन** दक्षिणस्यां दिशि व्यवस्थितानि **योगं युञ्जन्ति** कुर्वन्ति, तथा **सन्ति** तानि **नक्षत्राणि यानि सदा चन्द्रस्य उत्तरेण** उत्तरस्यां दिशि व्यवस्थितानि **योगं युञ्जन्ति,** तथा **सन्ति** तानि **नक्षत्राणि यानि चन्द्रस्य दक्षिणस्यामपि** दिशि स्थितानि **उत्तरस्यामपि** दिशि स्थितानि योगं युञ्जन्ति

प्रमर्द्दमपि प्रमर्द्दरूपमपि **योगं** कुर्वन्ति, तथा **सन्ति** तानि **नक्षत्राणि यानि चन्द्रस्य दक्षिणस्यामपि** दिशि व्यवस्थितानि योगं युञ्जन्ति **प्रमर्द्दरूपमपि योगं युञ्जन्ति, अस्ति** [तं](तन्)**नक्षत्रं यत्सदा चन्द्रस्य प्रमर्द्दं**-प्रमर्द्दनरूपं **योगं युनक्ति**।

एवं सामान्येन भगवतोक्ते भगवान् गौतमो विशेषावगमनिमित्तं भूयः पृच्छति –

मू० ता एएसिं अट्ठावीसाए णक्खत्ताणं कतरे णक्खत्ता जे णं णक्खत्ता सदा चंदस्स दाहिणेणं जोगं जोएंति जाव कतरे णक्खत्ते जे णं णक्ख[त्ता](त्ते) सदा चंदस्स पमद्दं जोगं जोएति।

टी० 'ता एएसि ण'मित्यादि सुगमम्।

भगवानाह –

मू० ता एतेसि णं अट्ठावीसाए णक्खत्ताणं जे णं णक्खत्ता सता चंदस्स दाहिणेणं जोगं जोएंति ते णं छ, तं जहा संठाणा अद्दा पुस्सो अस्सिलेसा हत्थो मूलो। [१]तत्थ णं जे ते णक्खत्ता जे णं णक्खत्ता सता चंदस्स उत्तरेण जोगं जोएंति ते णं बारस, तं जहा- अभि[यि](यी) सवणो[२] धणिट्ठा सयभिसया पुव्वभद्दवया उत्तरभद्दवया रेवई अस्सिणी भरणी पुव्वा फग्गुणी उत्तरा फग्गुणी सा[ति](ती)। तत्थ णं जे ते णक्खत्ता चंदस्स दाहिणेणवि उत्तरेणवि पमद्दंपि जोगं जोएंति ते णं सत्त, तं जहा-कत्तिया रोहिणी पुणव्वसू महा चित्ता विसाहा अणुराहा। तत्थ णं जे ते णक्खत्ता जे णं णक्खत्ता चंदस्स दाहिणेणवि पमद्दंपि जोगं जोएंति ताओ णं दुवे आसाढातो, आसाढातो सव्वबाहिरे मंडले जोगं जोएंसु वा जोएंति वा जोगिस्संति वा। तत्थ णं जे से णक्खत्ते जे णं णक्खत्ते सता चंदस्स पमद्दं जोगं जोएति सा णं एगा जेट्ठा।

---

१. तत्थ णं जे णं णक्खत्ता - Q। २. सवणो जाव भरणी... H, P, O, U।

टी० '**ता एएसि ण**'मित्यादि। '**ता**' इति पूर्ववत् **एतेषा**मनन्तरोदिताना-**मष्टाविंशतेर्नक्षत्राणां** मध्ये **यानि नक्षत्राणि सदा चन्द्रस्य दक्षिणस्यां** दिशि व्यवस्थितानि **योगं** कुर्वन्ति **तानि षट्, तद्यथा- मृगशिर[१] आर्द्रा पुष्यो अश्लेषा हस्तो मूलश्च**। एतानि हि सर्वाण्यपि पञ्चदशस्य चन्द्रमण्डलस्य बहिश्चारं चर(ऩ)ति, तथा चोक्तं **करणविभावनायां- 'पन्नरसयस्स चंदमंडलस्स बाहिरओ मिगसिर। अद्दा पुस्सो असिलेसा मूलो हत्थो य॥'** इति। **जम्बूद्वीपप्रज्ञप्ता**वप्युक्तं **'संठाण अद्दा पुस्सो असिलेसा हत्थो तहेव मूलो य। बाहिरओ बाहिरमंडलस्स छप्पेते नक्खत्ता ॥१०१॥'** ततः सदैव दक्षिणदिग्व्यवस्थितान्ये(व) तानि चन्द्रेण सह योगं युञ्जन्त्युपपद्यन्ते नान्येथेति। तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यानि नक्षत्राणि सदा** सर्वकालं **चन्द्रस्योत्तरेणो**त्तरस्यां दिशि व्यवस्थितानि **योगं युञ्जन्ति तानि द्वादश, तद्यथा 'अभि[ति](ती)'** इत्यादि। एतानि हि द्वादशापि नक्षत्राणि सर्वाभ्यन्तरे चन्द्रमण्डले चारं चरन्ति। तथा चोक्तं **करणविभावनाया**मेव - **'पढमे [संवच्छर](सव्वब्भंतर)चंदमंडले नक्खत्ता इमे, तं जहा- अभिई सवणो धनिट्ठा सयभिसया पुव्वभद्दवया[२] उत्तरभद्दवया रेवई अस्सिणी भरणी पुव्वाफग्गुणी उत्तराफग्गुणी साई इति।'** यदा चैतैः सह योगस्तदा स्वभाव-(तश्च)चन्द्रः शेषेष्वेव मण्डलेषु वर्त्तते। ततः सदैवै(ता)न्युत्तरदिग्व्यवस्थितान्येव चन्द्रमसा योगमुपयन्तीति। तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यानि तानि नक्षत्राणि यानि चन्द्रस्य दक्षिणस्यामपि** दिशि व्यवस्थितानि योगं युञ्जन्ति **उत्तरस्यामपि** दिशि व्यवस्थितानि योगं युञ्जन्ति **प्रमर्द्दरूपमपि योगं युञ्जन्ति तानि सप्त, तद्यथा कृत्तिका रोहिणी पुनर्वसुः मघा चित्रा विशाखाऽनुराधा**। केचित्पुनर्ज्येष्ठानक्षत्रमपि दक्षिणोत्तरप्रमर्द्दयोगि मन्यन्ते, तथा चोक्तं **लोकश्रियां - 'पुणव्वसू रोहिणी चित्ता मह ज्जेट्ठणुराह[३]। कत्तिय विसाहा चंदस्स उभयजोगी**

१. संठाणा-मूले, 'संठाणा' इति मृगशिरस एव नामान्तरम्। २. पुव्वा भद्दवया - C। ३. ज्जेट्ठाणुराह - C।

य त्ति॥' अत्र उभययोग इति व्याख्यानयता **टीकाकृता** उक्तं – **'एतानि नक्षत्राण्युभययोगीनि चन्द्रस्य दक्षिणेनोत्तरेण च युज्यन्ते कदाचिद्भेदमप्युपयान्तीति।**' तच्च वक्ष्यमाणज्येष्ठासूत्रेण सह विरोधीति न प्रमाणम्।[१] तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **ये ते नक्षत्रे ये**[ते]**'ण'**मिति वाक्यालङ्कारे सदा **चन्द्रस्य दक्षिणेनाऽपि** दक्षिणस्यामपि दिशि व्यवस्थिते योगं युङ्क्तः **प्रमर्दं च** प्रमर्दरूपं च **योगं यु(ङ्)क्तस्ते 'ण'**मिति वाक्यालङ्कारे **द्वे आषाढे** पूर्वाषाढोत्तराषाढारूपे। ते हि प्रत्येकं चतुस्तारे, तथा च प्रागेवोक्तं - **'पुव्वासाढे चउतारे पण्णत्ते उत्तरासाढे चउतारे पण्णत्ते'** इति। तत्र द्वे द्वे तारे सर्वबाह्यस्य पञ्चदशस्य मण्डलस्याभ्यन्तरे[भ्यो] द्वे द्वे बहिः, तथा चोक्तं **करणविभावनायां** - **'पुव्वुत्तराणं आसाढाणं दो दो ताराओ[२] अब्भिंतरतो। दो दो बाहिरओ सव्वबाहिरस्स मंडलस्स॥**' इति। ततो ये द्वे द्वे तारे अभ्यन्तरतस्तयोर्मध्ये चन्द्रो गच्छतीति तदपेक्षया प्रमर्दयोगं[३] युङ्क्त इत्युच्यते (ये तु) द्वे द्वे तारे [य](बहि)स्ते चन्द्रस्य पञ्चदशेऽपि मण्डले चारं चरतः सदा दक्षिणदिगव्यवस्थिते ततस्तदपेक्षया दक्षिणेन योगं युङ्क्त इत्युच्यते। सम्प्रत्येतयोरेव प्रमर्दयोगभावनार्थं किञ्चिदाह - **'ताओ[४] य सव्वबाहिरे'**त्यादि। **ते च** पूर्वाषाढोत्तराषाढारूपे नक्षत्रे चन्द्रेण सह **योगमयुङ्क्तां यु[क्तो](क्ते) योक्ष्येते** च[५] सदा **सर्वबाह्ये मण्डले** व्यवस्थि[तौ](ते)। ततो यदा पूर्वाषाढोत्तराषाढाभ्यां सह चन्द्रो योगमुपैति तदा नियमतोऽभ्यन्तरतारकाणां मध्येन गच्छतीति तदपेक्षया प्रमर्दमपि योगं युङ्क्त इत्युक्तम्। तथा **तत्र** तेषामष्टाविंशतेर्नक्षत्राणां मध्ये **यत्तन्नक्षत्रं सदा चन्द्रस्य[६] प्रमर्दं** प्रमर्दरूपं **योगं युनक्ति सा एका ज्येष्ठा।**

तदेवं मण्डलगत्या परिभ्रमणरूपाश्चन्द्रमार्गा उक्ताः। सम्प्रति मण्डलरूपान्

---

१. तथा तेषा... H। २. तारा अब्भिंतरतो - K। ३. प्रमर्दं योगं - K। ४. मूले तु 'आसाढातो' इति पाठोऽस्ति। ५. वा-B,M। ६. चन्द्रस्य प्रमर्दरूपं-M।

चन्द्रमार्गानाह–

मू० ता कति णं चंदमंडला आहिता ति वदेज्जा?

टी० '**ता कइ णं चंदमंडला**' इत्यादि। '**ता**' इति पूर्ववत् **कतिसङ्ख्यानि**, '**ण**'मिति वाक्यालङ्कारे, **चन्द्रमण्डलानि आख्यातानि इति वदेत्**?

भगवानाह–

मू० ता पण्णरस चंदमंडला आहिताति वदेज्जा। ता एएसि णं पण्णरसण्हं चंदमंडलाणं अत्थि चंदमंडला जे णं चंदमंडला सता णक्खत्तेहिं अविरहिता, अत्थि चंदमंडला जे णं चंदमंडला सता णक्खत्तेहिं विरहिता, अत्थि चंदमंडला जे णं चंदमंडला रविससिणक्खत्ताणं सामण्णा भवंति, अत्थि चंदमंडला जे णं चंदमंडला सता आदिच्चेहिं विरहिता। ता एएसिं (णं) पण्णरसण्हं चंदमंडलाणं [जे णं] कयरे ते चंदमंडला[1] जे णं चंदमंडला सया णक्खत्तेहिं अविरहिता जाव चंदमंडला सदादिच्चेहिं विरहिता ? ता एएसिं (णं) पण्णरसण्हं चंदमंडलाणं तत्थ जे ते चंदमंडला जे णं चंदमंडला सता णक्खत्तेहिं अविरहिता ते अट्ठ तं जहा- पढमे चंदमंडले ततिए चंदमंडले छट्ठे चंदमंडले सत्तमे चंदमंडले अट्ठमे चंदमंडले दसमे चंदमंडले एक्कारसमे चंदमंडले पण्णरसमे चंदमंडले। तत्थ णं जे ते चंदमंडला जे णं चंदमंडला सता णक्खत्तेहिं विरहिता ते णं सत्त, तं जहा-बीए चंदमंडले चउत्थे चंदमंडले पंचमे नवमे बारसमे चंदमंडले तेरसमे चंदमंडले चोद्दसमे चंदमंडले। तत्थ णं जे ते चंदमंडला जे णं चंदमंडला रविससिणक्खत्ताणं सामण्णा भवंति ते णं चत्तारि, तं जहा- पढमे चंदमंडले ततिए चंदमंडले

१. चंदमंडला सया... - H।

एगारसमे चंदमंडले पण्णरसमे चंदमंदले। तत्थ णं जे ते चंदमंडला जे णं चंदमंडला सता आदिच्चेहिं विरहिता आहिता ति वदेज्जा, ते णं पंच, तं जहा- छट्ठे चंदमंडले सत्तमे चंदमंडले अट्ठमे चंदमंडले णवमे चंदमंडले दसमे चंदमंडले।

दसमे [१]एक्कारसमं ११।

टी० **'ता पन्नरसे'**त्यादि। **'ता'** इति पूर्ववत् **पञ्चदश [२]चन्द्रमण्डलान्याख्यातानीति वदेत्**। तत्र पञ्च चन्द्रमण्डलानि जम्बूद्वीपे शेषाणि चन्द्रस्य मण्डलानि लवणसमुद्रे, तथा चोक्तं **जम्बुद्वीपप्रज्ञप्तौ**– **'जंबुद्दीवे णं भंते ! दीवे केवइयं ओगाहित्ता केवइया चंदमंडला पन्नत्ता ? गोयमा ! जंबुद्दीवे दीवे असीयं जोयणसयं ओगाहित्ता एत्थ णं पंच (चंद)मंडला पन्नत्ता। लवणे णं भंते ! समुद्दे केवइया चंदमंडला पन्नत्ता ? गोयमा ! लवणे णं समुद्दे तिण्णि तीसे जोयणसए ओगाहित्ता एत्थ णं दस चंदमंडला पन्नत्ता। एवमेव सपुव्वावरेणं जंबुद्दीवे लवणे य पन्नरस चंदमंडला भवंतीति मक्खायं।'** (सूत्र १४२) **'ता एएसि ण'**मित्यादि। **'ता'** इति **तत्र एतेषां पञ्चदशानां चन्द्रमण्डलानां** मध्ये **'अत्थि'**त्ति **सन्ति चन्द्रमण्डलानि यानि सदा नक्षत्रैरविरहितानि,** तथा **सन्ति चन्द्रमण्डलानि यानि** [२] **सदा नक्षत्रैर्विरहितानि,** तथा **सन्ति चन्द्रमण्डलानि यानि रविशशिनक्षत्राणां सामान्यानि** साधारणानि, किमुक्तं भवति ? रविरपि तेषु मण्डलेषु गच्छति शश्यपि नक्षत्राण्यपीति। तथा **सन्ति चन्द्रमण्डलानि यानि सदा आदित्याभ्यां,** सूत्रे द्वित्वेऽपि बहुवचनं प्राकृतत्वात्, **विरहितानि,** येषु न कदाचिदपि द्वयोः सूर्ययोर्मध्ये एकोऽपि सूर्यो गच्छतीति भावः। [३]एवं च भगवता सामान्येनोक्ते भगवान् गौतमो विशेषावगमनिमित्तं भूयः प्रश्नयति - **'ता एएसि ण'**मित्यादि (सुगमम्)। भगवानाह- **'ता एएसि ण'**मित्यादि।

१. एक्कारसं - H। २. चन्द्रमण्डलानि व्याख्यातानीति - A, H। ३. एवं भगवता - B, E।

'ता' इति पूर्ववत् **एतेषां चन्द्रमण्डलानां** मध्ये **यानि तानि चन्द्रमण्डलानि यानि** 'ण'मिति प्राग्वत् **सदा नक्षत्रैरविरहितानि (तान्यष्टौ), तद्यथा 'पढमे चंदमंडले'** इत्यादि। तत्र प्रथमे मण्डले अभिजिदादीनि द्वादश नक्षत्राणि, तथा (च) तत्सङ्ग्रहणिगाथा- **'अभिई सवण धणिट्ठा, सयभिसया दो य होंति भद्दवया। रेवइ अस्सिणी भरणी दो फग्गुणी साइ पढमंमि॥१॥'** ( )[१] तृतीये चन्द्रमण्डले पुनर्वसुमघे षष्ठे चन्द्रमण्डले कृत्तिका सप्तमे रोहिणिचित्रे अष्टमे विशाखा दशमेऽनुराधा एकादशे ज्येष्ठा पञ्चदशे मृगशिर आर्द्रा पुष्योऽश्लेषा हस्तो मूलः पूर्वाषाढा उत्तराषाढा च। तत्राऽऽद्यानि षड् नक्षत्राणि यद्यपि पञ्चदशस्य मण्डलस्य बहिश्चारं चरन्ति तथापि तानि तस्य प्रत्यासन्नानीति त[त गु](त्र ग)ण्यन्ते ततो न कश्चिद्विरोधः। तथा **तत्र** तेषां पञ्चदशानां मण्डलानां मध्ये **यानि चन्द्रमण्डलानि सदा नक्षत्रैर्विरहितानि तानि सप्त, तद्यथा- द्वितीयं चन्द्रमण्डलमि**त्यादि। तथा **तत्र** तेषां पञ्चदशानां (चन्द्रमण्डलानां मध्ये **यानि**) **चन्द्रमण्डलानि रविशशिनक्षत्राणां सामान्यानि भवन्ति तानि** 'ण'मिति प्राग्वत् **चत्वारि, तद्यथा प्रथमे चन्द्रमण्डले** इत्यादि। तथा **तत्र** तेषां पञ्चदशानां (चन्द्रमण्डलानां) मध्ये **यानि तानि चन्द्रमण्डलानि सदा आदित्याभ्यां विरहितानि तानि पञ्च, तद्यथा 'छट्ठे चंदमंडले'** इत्यादि सुगमम्। एतद्भणनाच्च यान्यभ्यन्तराणि पञ्च चन्द्रमण्डलानि तद्यथा प्रथमं द्वितीयं तृतीयं चतुर्थं पञ्चमं, यानि तु सर्वबाह्यानि पञ्च चन्द्रमण्डलानि तद्यथा एकादशं द्वादशं त्रयोदशं चतुर्दशं पञ्चदशमित्येतानि दश सूर्यस्य साधार[णी चे]णानीति गम्यते, तथा चोक्तमन्यत्र – **'दस च्चेव मंडला य अब्भिंतरबाहिरा रविससीणं। सामन्नाणि उ नियमा [एत्ति](पत्ते)या होंति सेसाणि॥२०८॥' (जो.प.)** अस्या अक्षरगमनिका - पञ्चाभ्यन्तराणि पञ्च बाह्यानि सर्वसङ्ख्यया दश मण्डलानि नियमाद्रविशशिनोः

१. तृतीयचन्द्रमण्डले - F, T।

सामान्यानि साधारणानि, शेषाणि तु यानि पञ्च चन्द्रमण्डलानि षष्ठादीनि दशम-पर्यन्तानि (तानि) प्रत्येकान्यसाधारणानि चन्द्रस्य, तेषु चन्द्र एव गच्छति न तु जातुचिदपि सूर्य इति भावः। इह किं चन्द्रमण्डलं कियता भागेन सूर्यमण्डलेन स्पृश्यते ? कियन्ति वा चन्द्रमण्डलस्य चन्द्रमण्डलस्यापान्तराले सूर्यमण्डलानि ? कथं वा षष्ठादीनि दशमपर्यन्तानि पञ्च चन्द्रमण्डलानि सूर्यो न स्पृशति ? इति चिन्तायां विभागोपदर्शनं पूर्वाचार्यैः कृतं, ततस्तद्विनेयजनानुग्रहायोपदिश्यते[१] - तत्र प्रथमत एतद्भावनार्थं विकम्पक्षेत्रकाष्ठा निरूप्यते। इह सूर्यस्य विकम्पक्षेत्रकाष्ठा पञ्च योजनशतानि दशोत्तराणि, तथाहि - यदि सूर्यस्य एकेनाहोरात्रेण विकम्पो द्वे योजने एकस्य च योजनस्याष्टचत्वारिंशदेकषष्टिभागा लभ्यन्ते, तत त्र्यशीत्यधिकेन रात्रिन्दिवशतेन किं लभामहे ? राशित्रयस्थापना १। २ ४८/६१। १८३। अत्र सवर्ण्णनार्थं द्वे योजने एकषष्ट्या गुण्येते गुणयित्वा चोपरितना अष्टाचत्वारिंशदेक-षष्टिभागाः प्रक्षिप्यन्ते, ततो जातं सप्तत्यधिकशतं १७०। एतत्त्र्यशीत्यधिकेन शतेनान्त्येन राशिना गुण्यते, जातान्येकत्रिंशत्सहस्राणि शतमेकं दशोत्तरं ३१,११०। तत एतस्य राशेर्योजनाऽऽनयनार्थमेकषष्ट्या भागो ह्रियते, लब्धानि पञ्च योजनशतानि दशोत्तराणि ५१०। एतावती सूर्यस्य विकम्पक्षेत्रकाष्ठा, चन्द्रमसः पुनर्विकम्पक्षेत्रकाष्ठा पञ्च योजनशतानि नवोत्तराणि एकस्य च योजनस्य त्रिपञ्चाशदेकषष्टिभागाः, तथाहि-चन्द्रमस एकेनाहोरात्रेण विकम्पः षट्त्रिंशत् योजनानि एकस्य योजनस्य पञ्चविंशतिरेकषष्टिभागा एकस्य च एकषष्टिभागस्य चत्वारः सप्तभागा लभ्यन्ते। ततश्च[नुद](तुर्द)शभिरहोरात्रैः किं लभामहे ? राशित्रयस्थापना १। ३६ २५/६१ ४/७। १४। अत्र सवर्ण्णनार्थं प्रथमतः षट्त्रिंशत् एकषष्ट्या गुण्यते, गुणयित्वा चोपरितना पञ्चविंशतिरेकषष्टिभागास्तत्र प्रक्षिप्यन्ते जातानि द्वाविंशतिशतानि एकविंशत्यधिकानि २,२२१। एतानि सप्तभिर्गुणयित्वा चोपरितनाश्चत्वारः

१... दर्श्यते - D।

सप्तभागास्तत्र प्रक्षिप्यन्ते, ततो जातानि पञ्चदश सहस्राणि पञ्च शतान्येकपञ्चाशदधिकानि १५,५५१। ततो योजनाऽऽनयनार्थं च्छेदराशिरप्येकषष्टिलक्षणः सप्तभिर्गुण्यते, जातानि चत्वारि शतानि सप्तविंशत्यधिकानि ४२७। तत उपरितनो राशिः चतुर्दशभिरन्त्यराशिरूपैर्गुण्यते, ततो जाते द्वे लक्षे सप्तदशसहस्राणि सप्त शतानि चतुर्दशाधिकानि २,१७,७१४, ततश्चेद्यच्छेदकराश्योः सप्तभिरपवर्त्तना, जात उपरितनो राशिः एकत्रिंशत् सहस्राणि शतमेकं द्व्युत्तरं ३१,१०२, छेद्यराशिरेकषष्टिः ६१, ततस्तया भागे हृते लब्धानि पञ्च योजनशतानि नवोत्तराणि एकस्य च योजनस्य त्रिपञ्चाशदेकषष्टिभागाः ५०९ ५३/६१। एतावती चन्द्रमसो विकम्पक्षेत्रकाष्ठा, सूर्यमण्डलस्य (२) च परस्परमन्तरं द्वे द्वे योजने चन्द्रमण्डलस्य (२) च परस्परमन्तरं पञ्चत्रिंशत् योजनानि एकस्य च योजनस्य त्रिंशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य चत्वारः सप्तभागाः, उक्तश्च **जम्बूद्वीपप्रज्ञप्तौ- 'सूरमंडलस्स णं भंते ! सूरमंडलस्स एस णं केवइए अबाहाए अंतरे पण्णत्ते ! (गोअमा ! दो जोयणाइं सूरमंडलस्स सूरमंडलस्स अबाहाए अंतरे पण्णत्ते।' (सूत्र १२९)** तथा **'चंदमंडलस्स णं भंते ! चंदमंडलस्स एस णं केवइए अबाहाए अंतरे पण्णत्ते ? गोयमा ! पन्नत्तीसं जोयणाइं तीसं च एगट्ठिभागा जोयणस्स एगं च एगट्ठिभागं सत्तहा छित्ता चत्तारि अ चुण्णिआ भागा सेसा चंदमंडलस्स अबाहाए अंतरे पण्णत्ते।')** (सूत्र १४४) इति। एतदेव च सूर्यमण्डलस्य चन्द्रमण्डलस्य च स्वस्वमण्डलविष्कम्भपरिमाणयुक्तं सूर्यस्य चन्द्रम[स्य](स॰)च विकम्पपरिमाणमवसेयम्, तथा चोक्तं - **'सू[रि](र)विकंपो एको समंडला होति मंडलंतरिया। चंदविकंपो य तहा समंडला मंडलंतरिया॥२१२॥' (जो.प.)** अस्या गाथाया अक्षरगमनिका-**एकः सूर्यविकम्पो** भवति **'मंडलंतरिय'**त्ति अंतरमेवान्तर्यं भैषजादित्वात् स्वार्थे यण्, ततः स्त्रीत्वविवक्षायां ङीप्रत्यये आन्तरी आन्तर्येवान्तरिका मण्डलस्यान्तरिका (**मण्डलान्तरिका**), **'समंडल'**त्ति इह

मण्डलशब्देन मण्डलविष्कम्भ उच्यते परिमाणे (परिमाण)वत उपचारात्, ततः सह मण्डले(न) मण्डलविष्कम्भपरिमाणेन वर्त्तते इति **समण्डला**, किमुक्तं भवति ? एकस्य सूर्यमण्डलान्तरस्य यत् परिमाणं द्वे योजने तदेकसूर्यमण्डलविष्कम्भ-परिमाणेनाष्टाचत्वारिंशदेकषष्टिभागलक्षणेन सहितमेकस्य सूर्यविकम्पस्य परिमाणमिति, **तथा मण्डलान्तरिका**-चन्द्रमण्डलान्तरपरिमाणं पञ्चत्रिंशत् योजनानि एकस्य योजनस्य त्रिंशदेकषष्टिभागा एकस्य च (एक)षष्टिभागस्य चत्वा[रि](रः) सप्त भागा इत्येवंरूपं '**समंडल**'त्ति मण्डलविष्कम्भपरिमाणेन सहिता एकश्चन्द्रविकम्पो **भवति**। यस्तु विकम्पक्षेत्रकाष्ठादर्शनतो विकम्पपरिमाणं ज्ञातुमिच्छति तं प्रतीयं पूर्वाचार्योपदर्शिता करणगाथा- '**सगमंडलेहिं लद्धं सयकट्ठातो हवंति सविकंपा। [जं](जे) सगविक्खंभजुया हवंति सगमंडलंतरिया॥२१५॥**' **(जो.प.)** अस्या अक्षरगमनिका - ये चन्द्रमसः सूर्यस्य वा विकम्पाः, कथम्भूतास्ते इत्याह- **स्वकविष्कम्भयुताः स्वकमण्डलान्तरिकाः** - स्वस्वमण्डलविष्कम्भपरिमाण-सहितस्वस्वमण्डलान्तरिकारूपा इत्यर्थः, **भवन्ति स्वकाष्ठातः** स्वस्वविकम्पयोग्य-क्षेत्रपरिमाणस्य **स्वकमण्डलैः** स्वस्वमण्डलसङ्ख्यया भागे हृते **यल्लब्धं** तावत्प्रमाणास्ते **स्वविकम्पाः** स्वस्वविकम्पका **भवन्ति**, तथाहि- सूर्यस्य विकम्पक्षेत्रकाष्ठा पञ्च योजनशतानि दशोत्तराणि ५१० तान्येकषष्टिभागकरणार्थ-मेकषष्टया गुण्यन्ते जातान्येकत्रिंशत्सहस्राणि शतमेकं दशोत्तरं ३१,११०, सूर्यमण्डलानि विकम्पक्षेत्रे त्र्यशीत्यधिकं शतं १८३, ततो योजनाऽऽनयनार्थं त्र्यशीत्यधिकं मण्डलशतमेकषष्ट्या गुण्यते, जातान्येकादशसहस्राणि शतमेकं त्रिषष्ट्यधिकं ११,१६३। एतेन पूर्वराशेर्भागो ह्रियते, लब्धं द्वे योजने शेषमुपरिष्टादुद्धरति सप्ताशीतिशतानि चतुरशीत्यधिकानि ८,७८४। ततः सम्प्रत्येक-षष्टिभागा आनेतव्या इति अधस्ताच्छेदराशिस्त्र्यशीत्यधिकं शतं तेन भागे हृते लब्धा अष्टाचत्वारिंशदेकषष्टिभागाः ४८। एतावदेकैकस्य सूर्यविकम्पस्य परिमाणम्। तथा

चन्द्रस्य विकम्पक्षेत्रकाष्ठा पञ्च योजनशतानि नवोत्तराणि त्रिपञ्चाशच्चैकषष्टिभागा योजनस्य ५०९ ५३/६१। तत्र योजनान्येकषष्टिभागकरणार्थमेकषष्ट्या गुण्यन्ते जातान्येकत्रिंशत्सहस्राणि एकोनपञ्चाशदधिकानि ३१,०४९। तत उपरितनास्त्रिपञ्चाशदेकषष्टिभागाः प्रक्षिप्यन्ते। जातान्येकत्रिंशत्सहस्राणि शतमेकं द्व्युत्तरम् ३१,१०२। चन्द्रस्य विकम्पक्षेत्रमध्ये मण्डलानि चतुर्दश १४। ततो योजनानयनार्थं चतुर्दश एकषष्ट्या गुण्यन्ते जातान्यष्टौ शतानि चतुष्पञ्चाशदधिकानि ८५४। तैः पूर्वराशेर्भागो ह्रियते। लब्धानि षट्त्रिंशद्योजनानि ३६। शेषाणि तिष्ठन्ति त्रीणि शतान्यष्टापञ्चाशदधिकानि ३५८। अत ऊर्द्धवमेकषष्टिभागा आनेतव्याः। ततश्चतुर्दशरूपो अधस्तात् च्छेदराशिः १४। तेन भागो ह्रियते। लब्धाः पञ्चविंशतिरेकषष्टिभागाः २५। शेषास्तिष्ठन्त्यष्टौ। ते सप्तभागकरणार्थं सप्तभिर्गुण्यन्ते। जाता षट्पञ्चाशत् ५६। तस्याश्चतुर्दशभिर्भागे हृते लब्धाश्चत्वारः सप्तभागाः। एतावत्परिमाण एकैकश्चन्द्रविकम्प इति। तदेवं चन्द्रस्य सूर्यस्य च विकम्पक्षेत्रकाष्ठा चन्द्रमण्डलानां सूर्यमण्डलानां च परस्परमन्तरमुक्तम्। सम्प्रति प्रस्तुतमभिधीयते — तत्र सर्वाभ्यन्तरचन्द्रमण्डले सर्वाभ्यन्तरं सूर्यमण्डलं सर्वात्मना प्रविष्टं केवलमष्टौ चैकषष्टिभागाश्चन्द्रमण्डलस्य बहिः शेषा वर्त्तन्ते, चन्द्रमण्डलात् सूर्यमण्डलस्याष्टाभिरेकषष्टिभागैर्हीनत्वात्। ततो द्वितीयाच्चन्द्रमण्डलादर्वागपान्तराले द्वादशसूर्यमार्गास्तथाहि द्वयोश्चन्द्रमण्डलयोरन्तरं पञ्चत्रिंशत् योजनानि त्रिंशच्चैकषष्टिभागा योजनस्य एकस्य च एकषष्टिभागस्य सत्काश्चत्वारः सप्तभागाः। तत्र योजनान्येकषष्टिभागकरणार्थमेकषष्ट्या गुण्यन्ते, गुणयित्वा चोपरितनास्त्रिंशदेकषष्टिभागाः प्रक्षिप्यन्ते, जातान्येकविंशतिशतानि पञ्चषष्ट्यधिकानि २,१६५। सूर्यस्य विकम्पो द्वे योजने अष्टाचत्वारिंशदेकषष्टिभागा योजनस्य। तत्र द्वे योजने एकषष्ट्या गुण्येते, जातं द्वाविंशं शतं १२२। तत उपरितना अष्टाचत्वारिंशदेकषष्टिभागाः प्रक्षिप्यन्ते,

जातं सप्तत्यधिकं शतं १७०। [१]तेन पूर्वराशेर्भागो ह्रियते, लब्धा द्वादश। एतावन्तोऽपान्तराले सूर्यमार्गा भवन्ति, शेषं तिष्ठति पञ्चविंशं शतं १२५। तत्र द्वाविंशेन शतेन द्वादशस्य सूर्यमार्गस्योपरि द्वे योजने लब्धे शेषास्तिष्ठन्ति [तत्र योजनद्वयानन्तरं] (त्रय) एकषष्टिभागाः, येऽपि च प्रथमे चन्द्रमण्डले रविमण्डलात् शेषा अष्टावेकषष्टिभागास्तेप्यत्र प्रक्षिप्यन्ते, जाता एकादश एकषष्टिभागाः। तत इदमागतं द्वादशात् सूर्यमार्गात्परतो द्वितीयाच्चन्द्रमण्डलादर्वाक् द्वे योजने एकादश च एकषष्टिभागा योजनस्य एकस्य च एकषष्टिभागस्य चत्वारः सप्तभागाः। तत्र योजनद्वयानन्तरं सूर्यमण्डलमतो द्वितीयाच्चन्द्रमण्डलादर्वागभ्यन्तरं प्रविष्टं सूर्यमण्डल-मेकादश एकषष्टिभागानेक[२]स्य च एकषष्टिभागस्य च सत्कान् चतुरः सप्तभागान्। ततः षट्त्रिंशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य सत्कास्त्रयः सप्तभागाः इत्येतावत्परिमाणं सूर्यमण्डलं चन्द्रमण्डलस[न्मि](म्मि)श्रम्। ततः सूर्यमण्डलात्परतो [यद्वि](बहिर्वि)निर्गतं चन्द्रमण्डलमेकोनविंशतिमेकषष्टिभागानेकस्य च एकषष्टि-भागस्य चतुरः सप्तभागान्। ततः परं भूयस्तृतीयाच्चन्द्रमण्डलादर्वाक् यथोक्त-परिमाणमन्तरं तद्यथा पञ्चत्रिंशद् योजनानि त्रिंशदेकषष्टिभागा योजनस्य [३]एकस्य च एकषष्टिभागस्य सत्काश्चत्वारः सप्त भागाः। एतावति चान्तरे द्वादशसूर्यमार्गा लभ्यन्ते उपरि च द्वे योजने त्रयश्चैकषष्टिभागा योजनस्यैक(स्य चैक)षष्टिभागस्य सत्काश्चत्वारः सप्तभागाः। ततोऽत्र प्रागुक्ता द्वितीयस्य चन्द्रमण्डलस्य सत्काः सूर्यमण्डलाद्बहिर्विनिर्गता एकोनविंशतिरेकषष्टिभागा एकस्य च (एक)षष्टिभागस्य चत्वारः सप्तभागाः प्रक्षिप्यन्ते। ततो जातास्त्रयोविंशतिरेकषष्टिभागाः एकस्य च एकषष्टिभागस्य सत्क एकः सप्तभागः। तत इदमायातम्– द्वितीयाच्चन्द्रमण्डलात्परतो द्वादश (सूर्यमार्गाः, द्वादशाच्च) सूर्यमार्गात्परतो योजनद्वयातिक्रमे सूर्यमण्डलं, तच्च तृतीयाच्चन्द्रमण्डलादर्वागभ्यन्तरं प्रविष्टं त्रयोविंशतिमेकषष्टिभागानेकं चैकषष्टि-

१. एतेन - L। २. ... कस्य एक... - E। ३. एकस्य एक... A।

भागसत्कं सप्तभागम्। ततः शेषाश्चतुर्विंशतिरेकषष्टिभागा एकस्य च एकषष्टिभागस्य षट् सप्तभागाः सूर्यमण्डलस्य तृतीयचन्द्रमण्डलसम्मिश्राः। ततस्तृतीयचन्द्रमण्डलं सूर्यमण्डलाद्बहिर्विनिर्गतमेकत्रिंश[ति](त)मेकषष्टिभागानेकस्य च (एक)षष्टिभागस्य सत्कमेकं सप्तभागम्। ततो भूयोऽपि यथोक्तं चन्द्रमण्डलान्तरं तस्मिंश्च द्वादशसूर्यमार्गा लभ्यन्ते, द्वादशस्य सूर्यमार्गस्योपरि द्वे योजने त्रय एकषष्टिभागा योजनस्य एकस्य च एकषष्टिभागस्य सत्काश्चत्वारः सप्तभागाः। ततो [य](येऽ)त्र तृतीयचन्द्रमण्डल-सत्काः सूर्यमण्डलाद्बहिर्विनिर्गता एकत्रिंशदेकषष्टिभागाः योजनस्य एकस्य च एकषष्टिभागस्य सत्क एकः सप्तभागस्[त](तेऽ)त्र प्रक्षिप्यन्ते। ततो जाताश्चतु-स्त्रिंशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य सत्काः पञ्च सप्तभागाः। तत इदं वस्तुतत्त्वं जातं, तृतीयाच्चन्द्रमण्डलात्परतो द्वादश (सूर्यमार्गाः, द्वादशाच्च) सूर्यमार्गात्परतो योजनस्य द्वयमतिक्रम्य सूर्यमण्डलम्, तच्चतुर्थाच्चन्द्रमण्डला-दर्वागभ्यन्तरं प्रविष्टं चतुस्त्रिंशतमेकषष्टिभागान् एकस्य च एकषष्टिभागस्य सत्कान् पञ्च सप्तभागान्, ततः शेषं सूर्यमण्डलस्य त्रयोदश एकषष्टिभागा एकस्य[१] एकषष्टिभागस्य सत्कौ द्वौ सप्तभागौ इत्येतावच्चतुर्थचन्द्रमण्डलस[न्मि](म्मि)श्रम्। चतुर्थस्य चन्द्रमण्डलस्य सूर्यमण्डलाद्बहिर्विनिर्गतं द्विचत्वारिंशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य सत्काः पञ्च सप्त[ति]भागाः। ततः पुनरपि यथोदितपरिमाणं चन्द्रमण्डलान्तरम्। तत्र द्वादशसूर्यमार्गा लभ्यन्ते द्वादशस्य च सूर्यमार्गस्योपरि द्वे योजने त्रय एकषष्टिभागा योजनस्य एकस्य च एकषष्टिभागस्य सत्काश्चत्वारः सप्तभागाः। तत्र ये चतुर्थस्य चन्द्रमण्डलस्य सूर्यमण्डलाद्बहिर्विनिर्गता द्वाचत्वा-रिंशदेकषष्टिभागाः एकस्य च एकषष्टिभागस्य सत्काः पञ्च सप्तभागास्तेऽत्र राशौ प्रक्षिप्यन्ते। ततो जाता षट्चत्वारिंशदेकषष्टिभागा द्वौ च एकस्य एकषष्टिभागस्य सत्कौ सप्तभागौ। तत एवं वस्तुस्वरूपमवगन्तव्यं, चतुर्थाच्चन्द्रमण्डलात्परतो (द्वादश

१. एकस्य च एकषष्टि... - T।

सूर्यमार्गाः,) द्वादशात्सूर्यमार्गात्परतो योजनद्वयातिक्रमे सूर्यमण्डलम्, तच्च पञ्चमाच्चन्द्रमण्डलादर्वाक् अभ्यन्तरं प्रविष्टं षट्चत्वारिंशतमेकषष्टिभागान् द्वौ च एकस्य एकषष्टिभागस्य सत्कौ सप्तभागौ, शेषं [द्वादश]सूर्यमण्डलस्य एक[स्य] एकषष्टिभाग एकस्य च एकषष्टिभागस्य पञ्च सप्तभागा इत्येतावत्परिमाणं पञ्चमचन्द्रमण्डलसम्मिश्रम्। तस्य च पञ्चमस्य चन्द्रमण्डलस्य सूर्यमण्डलाद्बहिर्विनिर्गतं चतुष्पञ्चाशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य द्वौ सप्तभागौ। तदेवं पञ्च सर्वाभ्यन्तराणि मण्डलानि सूर्यमण्डलस[न्मि](म्मि)श्राणि, चतुर्षु[1] च चन्द्रमण्डलान्तरेषु द्वादश द्वादश सूर्यमार्ग्गा इति जातम्। सम्प्रति षष्ठादीनि दशमपर्यन्तानि पञ्च चन्द्रमण्डलानि सूर्यमण्डलाऽसंस्पृष्टानि भाव्यन्ते। तत्र पञ्चमाच्चन्द्रमण्डलात्परतो भूयः षष्ठं चन्द्रमण्डलमधिकृत्यान्तरम्, तच्च पञ्चत्रिंशद्योजनानि त्रिंशच्चैकषष्टिभागा योजनस्य एकस्य च (एक)षष्टिभागस्य सत्काश्चत्वारः सप्तभागाः। तत्र पञ्चत्रिंशद्योजनान्येकषष्टिभागकरणार्थमेकषष्ट्या गुण्यन्ते, गुणयित्वा चोपरितनास्त्रिंशदेकषष्टिभागाः प्रक्षिप्यन्ते, जातान्येकविंशतिशतानि पञ्चषष्ट्यधिकानि २,१६५। येऽपि च पञ्चमस्य चन्द्रमण्डलस्य सूर्यमण्डलाद्बहिर्विनिर्ग्गताश्च(तुष्)पञ्चाशदेकषष्टिभागा द्वौ एकस्य षष्टिभागस्य सत्कौ सप्तभागौ तेऽत्र प्रक्षिप्यन्ते, जातानि द्वाविंशतिशतानि एकोनविंशत्यधिकानि २,२१९। सूर्यस्य विकम्पो द्वे योजने अष्टाचत्वारिंशदेकषष्टि-भागाधिके। तत्र (द्वे) योजने एकषष्ट्या गु[ण्य](ण्ये)ते, जातं द्वाविंशं शतमेकषष्टिभागानाम्। तत उपरितना अष्टचत्वारिंशदेकषष्टिभागाः प्रक्षिप्यन्ते, जातं सप्तत्यधिकं शतं १७०। एतेन[2] पूर्वराशेर्भागो ह्रियते लब्धास्त्रयोदश १३, शेषास्तिष्ठन्ति नव एकस्य च एकषष्टिभागस्य सत्काः षट् सप्तभागाः। तत इदमागतं पञ्चमाच्चन्द्रमण्डलात् परतस्त्रयोदश सूर्यमार्ग्गास्त्रयोदशस्य[3] च सूर्यमार्ग्गस्योपरि षष्ठाच्चन्द्रमण्डलादर्वागन्तरं नव एकषष्टिभागा योजनस्य एकस्य च एकषष्टिभागस्य

१. चर्तुषु चन्द्रमण्डलान्तरेषु - T। २. तेन - F, K, M, T। ३. ...त्रयोदशसूर्यमार्ग्गस्योपरि - T।

सत्काः षट् सप्तभागाः। ततः षष्ठं चन्द्रमण्डलम्, तच्च षट्पञ्चाशदेकषष्टिभागात्मकम्, ततः परतः सूर्यमण्डलादर्वाक् अन्तरं षट्पञ्चाशदेकषष्टिभागा एकस्य च एकषष्टि-भागस्य एकः सप्तभागः। तदनन्तरं सूर्यमण्डलम्, तस्माच्च परत एकषष्टिभागानां चतुरुत्तरेण शतेन एकस्य एकषष्टिभागस्य सत्केनैकेन सप्तभागेन हीनं यथोदितप्रमाणं चन्द्रमण्डलान्तरं प्राप्यते इति। तस्मात् सूर्यमण्डलात्परतो अन्ये द्वादशसूर्यमार्ग्गा लभ्यन्ते। ततः सर्वसङ्कलनया तस्मिन्न[भ](८)यन्तरे त्रयोदशसूर्यमार्ग्गाः, तस्य च त्रयोदशस्य सूर्यमार्ग्गस्योपरि सप्तमाच्चन्द्रमण्डलादर्वाक् अन्तरमेकविंशतिरेकषष्टिभागा एकस्य[१] च एकषष्टिभागस्य त्रयः सप्तभागाः। ततः सप्तमं[२] चन्द्रमण्डलम्, तस्माच्च सप्तमाच्चन्द्रमण्डलात्परतश्चतुश्चत्वारिंशत् एकषष्टिभागैरेकस्य च एकषष्टिभागस्य सत्कैश्चतुर्भिः सप्तभागैः सूर्यमण्डलम्। ततो द्विनवतिसङ्ख्यैरेकषष्टिभागैश्चतुर्भिश्च एकस्य एकषष्टिभागस्य सत्कैः सप्तभागैर्न्यूनं यथोदितप्रमाणं चन्द्रमण्डलान्तरम्। ततः परमस्तीत्यन्येऽपि द्वादशसूर्यमार्ग्गा लभ्यन्ते इति तस्मिन्नप्यन्तरे सर्वसङ्कलनया त्रयोदशसूर्यमार्ग्गास्त्रयोदशस्य सूर्यमार्ग्गस्य बहिरष्टमाच्चन्द्रमण्डलादर्वाक् अन्तरं त्रयस्त्रिंशदेकषष्टिभागाः। ततोऽष्टमं चन्द्रमण्डलम्, तस्माच्चाष्टमाच्चन्द्रमण्डलात्प-रतस्त्रयस्त्रिंशता एकषष्टिभागैः सूर्यमण्डलम्। तत एकाशीतिसङ्ख्यैरेकषष्टिभागैरूनं यथोदितप्रमाणं चन्द्रमण्डलान्तरं पुरतो विद्यते इति। ततः परतोऽन्येऽपि द्वादशसूर्यमार्ग्गास्ततस्तस्मिन्नप्यन्तरे सर्वसङ्कलनया त्रयोदशसूर्यमार्ग्गाः, त्रयोदशाच्च सूर्यमार्ग्गात्परतो नवमाच्चन्द्रमण्डलादर्वाक् अन्तरं चतुश्चत्वारिंशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य चत्वारः सप्तभागाः। ततः परं नवमं चन्द्रमण्डलम्। तस्माच्च नवमाच्चन्द्रमण्डलात्परतो एकविंशत्या एकषष्टिभागैरेकस्य च एकषष्टिभागस्य त्रिभिः सप्तभागैः सूर्यमण्डलम्। तत एकोनसप्ततिसङ्ख्यैरेकषष्टिभागैरेकस्य च एकषष्टि-भागस्य त्रिभिः सप्तभागैः परिहीणं यथोक्तप्रमाणं चन्द्रमण्डलान्तरं, तत्र चान्ये

१. एकस्य एक - K। २. सप्तमचन्द्रमण्डलं - M।

द्वादशसूर्यमार्ग्गाः। एवं चास्मिन्नप्यन्तरे सर्वसङ्कलनया त्रयोदशसूर्यमार्ग्गाः, तस्य च त्रयोदशस्य सूर्यमार्ग्गस्योपरि दशमाच्चन्द्रमण्डलादर्वाक् अ[न]न्तरं षट्पञ्चाशदेकषष्टि(भागा एकस्य च एकषष्टि)भागस्य (एकः) सप्तभागः। ततो दशमं[१] चन्द्रमण्डलं, तस्माच्च दशमाच्चन्द्रमण्डलात्परतो नव[ति](भि)रेकषष्टिभागैरेकस्य च एकषष्टिभागस्य सत्कैः षड्भिः सप्तभागैः सूर्यमण्डलम्। ततः सप्तपञ्चाशता एकषष्टिभागैरेकस्य च एकषष्टिभागस्य सत्कैः षड्भिः सप्तभागैरूनं प्रागुक्तपरिमाणं चन्द्रमण्डलान्तरम्। ततो भूयोऽपि द्वादश सूर्यमार्ग्गा लभ्यन्ते इति तस्मिन्नप्यन्तरे सर्वसङ्कलनया त्रयोदश सूर्यमार्ग्गास्ततस्त्रयोदशसूर्यमार्ग्गस्योपर्येकादशाच्च[२] चन्द्रमण्ड-लादर्वागन्तरं सप्तषष्टि(ः एकषष्टि)भागा एकस्य च एकषष्टिभागस्य सत्का पञ्च सप्तभागाः। तदेवं पञ्च चन्द्रमण्डलानि षष्ठादीनि दशमपर्यन्तानि सूर्या[न्मि](सम्मि)श्राणि षट्सु (च) चन्द्रमण्डलान्तरेषु त्रयोदशसूर्यमार्ग्गा इति। सम्प्रत्ये-तदनन्तरमुच्यते। तत्र एकाद[शे](शं) चन्द्रमण्ड[ले](लं) चतुष्पञ्चाशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य सत्कौ द्वौ सप्तभागौ इत्येतावत्सूर्यमण्डलादभ्यन्तरं प्रविष्टं एक एकषष्टिभाग (एक)स्य च एकषष्टिभागस्य पञ्च सप्तभागा इत्येतावन्मात्रं सूर्यमण्डलस[न्मि](म्मि)श्रम्, एकादशाच्च[३] चन्द्रमण्डलाद्बहिर्विनिर्ग्गतं सूर्यमण्डलस्य षट्चत्वारिंशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य सत्कौ द्वौ सप्तभागौ। एतावता हीनं परतः चन्द्रमण्डलान्तरमस्तीति द्वादशसूर्यमार्ग्गा लभ्यन्ते। ततः परमेकोनाशीत्या एकषष्टिभागैरेकस्य च (एक)षष्टिभागस्य द्वाभ्यां सप्तभागाभ्यां द्वादशं चन्द्रमण्डलम्। तच्च द्वादशं चन्द्रमण्डलं सूर्यमण्डलादभ्यन्तरं प्रविष्टं द्वाचत्वारिंशतमेकषष्टिभागान् एकस्य च एकषष्टिभागस्य सत्कान् पञ्च सप्तभागान्, शेषं च त्रयोदश एकषष्टिभागा योजनस्य एकस्य च (एक)षष्टिभागस्य सत्कौ द्वौ सप्तभागावित्येतावन्मात्रं सूर्यमण्डलस[न्मि](म्मि)श्रम्। तस्माच्च द्वादशाच्चन्द्रमण्डलाद्बहिर्विनिर्ग्गतं सूर्यमण्डलं

१. चन्द्रमण्डलं दशमं - H, T। २. .... दशाच्चन्द्र - T। ३. एकादशाच्चन्द्रमण्डला... - H, K।

चतुस्त्रिंशतमेकषष्टिभागानेकस्य च एकषष्टिभागस्य सत्कान् पञ्च सप्तभागान्।तत एतावन्मात्रेण हीनं परतश्चन्द्रमण्डलान्तरं, तत्र च द्वादशसूर्यमार्गा लभ्यन्ते द्वादशाच्च सूर्यमण्डलात्परतो नवतिसङ्ख्यैरेकषष्टिभागैरेकस्य च एकषष्टिभागस्य सत्कैः षड्भिः सप्तभागैः त्रयोदशं चन्द्रमण्डलम्। तच्च त्रयोदशं चन्द्रमण्डलं सूर्यमण्डलादभ्यन्तरं प्रविष्टं एकत्रिंशतमेकषष्टिभागान् (एकस्य च) एकषष्टिभागस्य सत्कमेकं सप्तभागं, शेषं चतुर्विंशतिरेकषष्टिभागा एकस्य च एकषष्टिभागस्य सत्काः षट् सप्तभागा इत्येतावन्मात्रं सूर्यमण्डलस[न्मि](म्मि)श्रम्। तस्माच्च त्रयोदशाच्चन्द्रमण्डलाद्बहिः सूर्यमण्डलं विनिर्गतं त्रयोविंशतिमेकषष्टिभागा(न्) एकस्य च एकषष्टिभागस्य सत्कमेकं सप्तभागम्। तत एतावद्धीनं परतश्चन्द्रमण्डलान्तरं, तत्र च द्वादश सूयमार्गा द्वादशाच्च सूर्यमार्ग्गात्परत एकषष्टिभागानां द्व्युत्तरेण शतेन एकस्य च एकषष्टिभागस्य सत्कैस्त्रिभिः सप्तभागैश्चतुर्दशं चन्द्रमण्डलम्। तच्च चतुर्दशं चन्द्र(मण्डलं सूर्य) मण्डलादभ्यन्तरं प्रविष्टमेकोनविंशतिमेकषष्टिभागानेकस्य च एकषष्टिभागस्य सत्कान् चतुरः सप्तभागान्, शेषं षट्त्रिंशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य सत्कास्त्रयः सप्तभागा इत्येतावत्परिमाणं सूर्यमण्डलस[न्मि](म्मि)श्रम्। तस्माच्चतुर्दशाच्चन्द्र-मण्डलाद्बहिर्विनिर्गतं सूर्यमण्डलं एकादश एकषष्टिभागानेकस्य एकषष्टिभागस्य चतुरः सप्तभागान्। तत एतावता हीनं यथोक्तपरिमाणं चन्द्रमण्डलान्तरम्। तत्र च द्वादशसूर्यमार्ग्गा द्वादशाच्च सूर्यमार्ग्गात्परत एकषष्टिभागानां चतुर्दशोत्तरेण शतेन पञ्चदशं चन्द्रमण्डलम्। तच्च पञ्चदशं चन्द्रमण्डलं सर्वान्तिमात्सूर्यमण्डलादर्वागभ्यन्तरं प्रविष्टम[प्यधि](ष्टावे)कषष्टिभागान्, शेषा अष्टाचत्वारिंशदेकषष्टिभागाः सूर्यमण्डलस [न्मि](म्मि)श्राः। तदेवमेतान्येकादशादीनि पञ्चदशपर्यन्तानि पञ्च चन्द्रमण्डलानि सूर्यमण्डलस[न्मि](म्मि)श्राणि भवन्ति, चतुर्षु[1] च चरमेषु चन्द्रमण्डलान्तरेषु द्वादश (द्वादश) सूर्यमार्ग्गाः। एवं च यदन्यत्र चन्द्रमण्डलान्तरेषु सूर्यमार्ग्गप्रतिपादनमकारि

१. चतुर्षु चरमेषु - T।

यथा **'चंदंतरेसु अट्ठसु अब्भिंतरबाहिरेसु सूरस्स। बारस बारस मग्गा छसु तेरस तेरस हवंति॥२०९॥'** **(जो.प.)** तदपि संवादि द्रष्टव्यम्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृस्य एकादशं प्राभृतप्राभृतं समाप्तम्।

* * * * *

अप्पा चेव दमेयव्वो, अप्पा हु खलु दुद्दमो।
अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य॥

सुद्धा ते जिअलोए, जिणवयणं जे नरा न याणंति।
सुद्धाण वि ते सुद्धा, जे नाऊणं न वि करेंति॥

सव्वो पुव्वकयाणं कम्माणं, पावए फलविवागं।
अवराहेसु गुणेसु य, णिमित्तमित्तं परो होइ॥

जं अब्भसेई जीवो, गुणं च दोसं च इत्थ जम्मम्मि।
तं परलोए पावई, अब्भासेणं पुणो तेणं॥

द्वादशं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य एकादशं प्राभृतप्राभृतम्। सम्प्रति द्वादशमारभ्यते। तस्य चायमर्थाधिकारो देवतानामध्ययनानि वक्तव्यानि। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता कहं ते [१]देवाणं अज्झयणा आहिता ति वदेज्जा?

टी० 'ता कहं ते देवयाण'मित्यादि। **'ता'** इति पूर्ववत्, **कथं**-केन प्रकरेण भगवन्! **त्वया** नक्षत्राधिपतीनां **देवतानामध्ययनानि** अधीयन्ते ज्ञायन्ते यैस्तान्यध्ययनानि नामानीत्यर्थः **आख्यातानि इति वदेत्**?

एवं प्रश्ने कृते भगवानाह–

मू० ता एतेसि णं अट्ठावीसाते णक्खत्ताणं अभीई णक्खते बम्हदेवयाए पण्णत्ते, सवणे ण० विण्हुदेवयाए पण्णत्ते, एवं जहा जंबुद्दीवपण्णत्तीए जाव उत्तरासाढा णक्खत्ते वीसदेवताए पण्णत्ते।

दसमे बारसमं १२।

टी० 'ता एएसि ण'मित्यादि। **'ता'** इति पूर्ववत्, **एतेषा**मनन्तरोदितानां **मष्टाविंशतेर्नक्षत्राणां** मध्ये **अभिजिन्नक्षत्रं ब्रह्मदेवताकं प्रज्ञप्तं, श्रवणनक्षत्रं विष्णुदेवताकं प्रज्ञप्तं, 'एव'**मित्यादि **एवं यथा जम्बूद्वीपप्रज्ञप्तौ** तथा वक्तव्यं **यावदुत्तराषाढानक्षत्रं विष्वग्देवताकं प्रज्ञप्तमि**ति। तच्चैवं- **'धणिट्ठा णक्खत्ते वसुदेवयाए पण्णत्ते, सयभिसया णक्खत्ते वरुणदेवयाए पण्णत्ते, पुव्वपोट्ठवया णक्खत्ते अयदेवयाए पण्णत्ते, उत्तरा पुट्ठवया णक्खत्ते अभिवड्ढिदेवयाए पण्णत्ते, रेवइणक्खत्ते पुस्सदेवयाए पण्णत्ते, अस्सिणी णक्खत्ते अस्सदेवयाए पण्णत्ते, भरणी णक्खत्ते यमदेवयाए पण्णत्ते, कत्तिया नक्खत्ते अग्गिदेवयाए पण्णत्ते, रोहिणी णक्खत्ते पयावइदेवयाए पण्णत्ते, संठाणणक्खत्ते सोमदेवयाए पण्णत्ते, अद्दा नक्खत्ते रुद्ददेवयाए पण्णत्ते, पुणव्वसुनक्खत्ते**

१. टीकानुसारेणाऽत्र 'देवयाणं' इति पाठः समीचीनो भाति।

अ[ट्ठिए](दिति)देवयाए पण्णत्ते, पुस्सनक्खत्ते बहस्सइदेवयाए पण्णत्ते, अस्सेसा णक्खत्ते सप्पदेवयाए पण्णत्ते, मघा नक्खत्ते पिइदेवयाए पण्णत्ते, पुव्वा फग्गुणी नक्खत्ते भगदेवयाए पण्णत्ते, उत्तरा फग्गुणी णक्खत्ते अज्जमदेवयाए पण्णत्ते, हत्थणक्खत्ते सविइदेवयाए पण्णत्ते, चित्ता नक्खत्ते तट्ठदेवयाए पण्णत्ते, साइनक्खत्ते वायुदेवयाए पण्णत्ते, विसाहा णक्खत्ते इंदग्गिदेवयाए पण्णत्ते, अणुराहा णक्खत्ते मित्तदेवयाए पण्णत्ते, जेट्ठा णक्खत्ते इंददेवयाए पण्णत्ते, मूलनक्खत्ते निरइदेवयाए पण्णत्ते, पुव्वासाढा णक्खत्ते आयुदेवयाए पण्णत्ते, उत्तरासाढा णक्खत्ते विस्सदेवयाए पण्णत्ते।' (सूत्र १५७) इति। अमीषां देवानामभिधानानां सङ्ग्रहणिगाथा इमाः प्रवचनप्रसिद्धाः सन्ति- **'बम्हा१ विण्हु२ य वसु३ वरुणो४ तह यजो५ अणंतरं होइ। अभिवड्ढि ६ पूस७ गंधव्व[1]८ चेव परतो जमो९ होइ॥१४८॥ अग्गि१० पयावइ११ सोमे१२ रुद्दे१३ अ[दिव](दिई)१४ बहस्सई१५ चेव। नागो१६ पिइ१७ भग१८ अज्जम१९ सविया२० तट्ठा२१ य वाऊ२२ य॥१४९॥ इंदग्गी२३ मित्तो२४ वि य इंदे२५ निरई२६ य आऊ२७ विस्सो२८ य। नामाणि देवयाणं रिक्खाणं[2] हवंति जहकमसो॥१५०॥'** (जो.प.)

इति मलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य द्वादशं प्राभृतप्राभृतं समाप्तम्।

* * * * *

तं कज्जं पि न कायव्वं, जं गुरुहिं न मन्नियं।
गुरुणो जं जहा बिंति, कुज्जा सीसो तहा य तं॥

---

१. 'अस्सिणी णक्खत्ते अस्सदेवयाए' इति जम्बूद्वीपप्रज्ञप्तौ पाठः। २. 'हवंति रिक्खाणं' - S, ज्योतिष्करण्डकप्रकीर्णके त्वितोऽग्रे एवं पाठः - 'एत्तो सीमं पिमे सुणसु'।

त्रयोदशं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य द्वादशं प्राभृतप्राभृतम्। सम्प्रति त्रयोदशमारभ्यते। तस्य चायमर्थाधिकारो - मुहूर्त्तानां नामधेयानि वक्तव्यानि। ततस्तद्विषयं प्रश्नसूत्रमाह-

मू० ता कहं ते मुहुत्ताणं णामधेज्जा आहितीति वदेज्जा?

टी० 'ता कहं ते (मुहुत्ता)ण'मित्यादि। **'ता'** इति पूर्ववत्, **कथं** - केन प्रकारेण **त्वया** भगवन् ! **मुहूर्त्तानां नामधेयानि** नामान्येव नामधेयानि **'नामरूपभागाद्धेयः'** ( ) इति स्वार्थे धेयप्रत्ययः **आख्यातानि इति वदेत्**?

भगवानाह–

मू० ता एगमेगस्स णं अहोरत्तस्स तीसं मुहुत्ता पण्णत्ता। तं जहा- रोद्दे सेते मित्ते वाऊ [तुंवी] (सुवीई) तहेव अभिचंदे य। माहिंदे बलवं [ब](प)म्हे बहुसच्चे चेव ईसाणे ॥१॥ तट्ठे य भावियप्पा वेसमणे [वा](या)वरे[1] य आणंदे। विजए य विजयसेणे पायावच्चे उवसमे य॥२॥ गंधव्व अग्गिवेसे सतवसभे आतवं च अम[मं](मे) च। अणवं च भोमे वसभे सच्चवं[2] च रक्खसे चेव॥३॥

दसमे तेरसमं १३।

टी० 'ता एगमेगस्स ण'मित्यादि। **'ता'** इति पूर्ववत्, **एकैकस्याहोरात्रस्य त्रिंशत् मुहूर्त्ताः प्रज्ञप्ता** वक्ष्यमाणनामधेययुक्ता इति शेषः। तान्येव नामधेयान्याह - **'तं जहा रुद्दे'**त्यादि गाथात्रयम्। तत्र प्रथमो मुहूर्त्तो **रुद्रो**, द्वितीयः **श्रेयान्**, तृतीयो **मित्रः**, चतुर्थो **वायुः**, पञ्चमः **सुपीति**, षष्ठो **अभिचन्द्रः**, सप्तमो **माहेन्द्रः**, अष्टमो **बलवान्**, नवमः **पक्ष्मो**, दशमो **बहुसत्यः**, एकादश [ऐ](ई)**शानः**, द्वादशस्[त्र](त्व)**ष्टा**, त्रयोदशो **भावितात्मा**, चतुर्दशो **वैश्रवणः**, **अपरः**[3] पञ्चदशः, षोडश **आनन्दः**, सप्तदशो **विजयः**, अष्टादशो **विजयसेनः**, एकोनविंशतितमः

१. वरुणे - S। २. सव्वट्ठे- P, S। ३. पञ्चदशः वरुणः - S।

प्राजापत्यः, विंशतितम **उपशमः**, एकविंशतितमो **गन्धर्व्वः**, द्वाविंशतितमो [१]**अग्निवेश्यः**, त्रयोविंशतितमः **शतवृषभः**, चतुर्विंशतितम **आतपवान्**, पञ्चविंशतितमोऽमम**ः**, षड्विंशतितम **ऋणवान्**, सप्तविंशतितमो **भौमो**ऽष्टाविंशतितमो **वृषभः**, एकोनत्रिंशत्तमः [२]**सत्यवान्**, त्रिंशत्तमो **राक्षसः**।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्टिटीकायां दशमस्य प्राभृतस्य त्रयोदशं प्राभृतप्राभृतं समाप्तम्।

* * * * *

ण धम्मम्मि पमाओ, एग मच्चू विसाइणो।
पमाएणं अणंताणि, जम्माणि मरणाणि य॥

दट्ठूण वि हीरंतं, विसंठुलं जगमिणं जमभडेहिं।
किं नच्चंतो चिट्ठसि, रे पाव! विवेगपरिहीणो॥

समए समए रे जीव!, जं न चिंतेसि धम्ममुवउत्तो।
तं नारय-तिरिय-भवाडवीइ, अइदुक्खिओ भमसि॥

---

१. अग्निवैश्यः - M। २. सर्वार्थः - S।

चतुर्दशं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य त्रयोदशं प्राभृतप्राभृतम्। सम्प्रति चतुर्दशमारभ्यते। तस्य चायमर्थाधिकारो दिवसनामप्ररूपणा कर्त्तव्या। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते दिवसाणं णामधेज्जा आहिता ति वदेज्जा?

टी० **'ता कहं ते'** इत्यादि। **'ता'** इति पूर्ववत्, **कथं**-केन प्रकारेण केन क्रमेणेत्यर्थः भगवन् ! **त्वया दिवसानां नामधेयानि व्याख्यातानि[१] इति वदेत्** ?

भगवानाह –

मू० ता एगमेगस्स णं पक्खस्स पण्णरस (२) दिवसा पण्णत्ता। तं जहा पडिवयदिवसे बितिया दिवसे एवं जाव पण्णरसी दिवसे। ता एएसिं णं पण्णरसण्हं दिवसाणं पण्णरस णामधेज्जा पण्णत्ता। तं जहा पुव्वंगे सि[द्धे](द्ध)मणोरमे मणोहरे जसभद्दे जसोधरे सव्वकामसमिद्धे इंदमुद्धाभिसित्ते सोमणसे धणंजते अत्थसिद्धे अभिजाते अच्च[सि](स)णे सतंजए अग्गिवेसे उवसमे दिवसाणं णामधेज्जाइं।

टी० **'ता एगमेगस्स ण'**मित्यादि। **'ता'** इति पूर्ववत्, **एकैकस्य** अत्रापान्तरालवर्त्ती मकारोऽलाक्षणिकः **'ण'**मिति वाक्यालङ्कारे **पक्षस्य पञ्चदश पञ्चदश दिवसा** वक्ष्यमाणक्रमयुक्ताः **प्रज्ञप्ताः**। तमेव क्रममाह – **'तं जहे'**त्यादि। **तद्यथा प्रतिपत्** प्रथमो **दिवसः, द्वितीया** द्वितीयो **दिवसस्तृतीया**[२] तृतीयो **दिवसः**, एवं यावत्**पञ्चदशी** पञ्चदशो **दिवसः**। **'ता एएसि ण'**मित्यादि। **तत्र एतेषां पञ्चदशानां दिवसानां** क्रमेण **पञ्चदश नामधेयानि प्रज्ञप्तानि, तद्यथा**- प्रथमः प्रतिपल्लक्षणः **पूर्व्वाङ्ग**नामा द्वितीयः **सिद्धमनोरमः** तृतीयो **मनोहर**श्चतुर्थो **यशोभद्रः**

---

१. आहिता - मूले। २. एवं जाव.... - मूले।

पञ्चमो **यशोधरः** षष्ठः [१]**सर्वकामसमृद्धः** सप्तम **इन्द्रमूर्द्धाभिषिक्तो**ऽष्टमः **सौमनसो** नवमो **धनञ्जयो** दशमो**ऽर्थसिद्धः** एकादशो**ऽभिजातो** द्वादशो**ऽत्यशनः** त्रयोदशः **शतञ्जयः** चतुर्दशो**ऽग्निवेश्यः** पञ्चदश **उपशमः**। एतानि **दिवसानां** क्रमेण **नामधेयानि**।

मू० ता कहं ते रातीओ आहितेति वदेज्जा ? ता एगमेगस्स णं पक्खस्स पण्णरस पण्णरस राती पण्णत्ता। तं जहा- पडिवयराती बितीया राती जाव पण्णरसी राती। ता एयासि णं पण्णरसण्हं रातीणं पण्णरस नामधेज्जा पण्णत्ता, तं जहा- उत्तमा सुणक्खत्ता एयालवच्चा जसोधरा सोमणसा सिरिसंभूता विजया वेजयंती जयंती अपराजिता इच्छा समाहारा तेया अभितेया देवाणंदा [णी](णि)रती रयणीणं नामधेज्जाइं।

दसमे चउदसमं १४।

टी० '**ता कह**'मित्यादि। '**ता**' इति पूर्ववत्, **कथं**-केन प्रकारेण केन क्रमेणेत्यर्थः (**त्वया**) **रात्रय आख्याता इति वदेत्**? भगवानाह – '**ता एगमेगस्स ण**'मित्यादि। '**ता**' इति प्राग्वत्, **एकैकस्य पक्षस्य** [२]**पञ्चदश पञ्चदश रात्र्यः प्रज्ञप्तास्तद्यथा प्रतिपत्सम्बन्धिनी** प्रथमा **रात्रिः**, द्वितीयदिवसम्बन्धिनी **द्वितीया** (**रात्रिः**), [३]एवं **पञ्चदशी रात्रिः**। एतच्च कर्म्ममासापेक्षया द्रष्टव्यम्, तत्रैव पक्षे परिपूर्णानां पञ्चदशानामहोरात्राणां सम्भवात्। '**ता ए[स](यासि) ण**'मित्यादि। **तत्र एतासां पञ्चदशानां रात्रीणां** यथाक्रममूनि **पञ्चदश नामधेयानि प्रज्ञप्तानि, तद्यथा**- प्रथमा प्रतिपत्सम्बन्धिनी रात्री**रुत्तमा** उत्तमनामा, द्वितीया **सुनक्षत्रा**, तृतीया **एतालपत्या**, चतुर्थी **यशोधरा**, पञ्चमी **सौमनसी**, षष्ठी **श्रीसम्भूता**, सप्तमी **विजया**, अष्टमी **वैजयन्ति**, नवमी **जयन्ती**, दशमी **अपराजिता**, एकादशी **इच्छा**,

१. सर्वकालसमृद्धः - F। २. पञ्चदश रात्र्यः - A। ३. जाव - मूले।

द्वादशी **समाहारा**, त्रयोदशी **तेजा**, चतुर्दशी **अतितेजा**, पञ्चदशी **देवानन्दा**[१]। अमूनि क्रमेण **रात्रीणां**[२] **नामधेयानि**।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य चतुर्दशं प्राभृतप्राभृतं समाप्तम्।

* * * * *

जह जह बहुस्सुओ, सम्मओ अ सीसगणसंपरिवुडो अ।
अविणिच्छिओ अ समए, तह तह सिद्धंतपडिणीओ।।

सयलम्मि वि जियलोए, तेण इहं घोसिओ अमाघाओ।
इक्कंपि जो दुहत्तं, सत्तं बोहेइ जिणवयणे।।

संसारचारए चारए व्व, आवीलियस्स बंधेहिं।
उव्विग्गो जस्स मणो, सो किर आसन्नसिद्धिपहो।।

उस्सुत्तभासगाणं, बोहीनासो अणंतसंसारो।
पाणच्चए वि धीरा, उस्सुत्तं ता न भासंति।।

जिणआणाभंगभयं, भवसयभीयाण होइ जीवाणं।
भवसयअभीरुयाणं, जिणआणाभंजणं कीला।।

१. देवाणंदा णिरती - मूले। २. रयणीणं - मूले।

पञ्चदशं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य चतुर्दशं प्राभृतप्राभृतम्। सम्प्रति पञ्चदशमारभ्यते। तस्य चायमर्थाधिकारस्तिथयो वक्तव्या इति। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते तिही आहिता ति वदेज्जा ?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत्, **कथं** केन प्रकारेण क्रमेण **(त्वया) तिथय आख्याता इति वदेत्**? दिवसेभ्यस्तिथीनां कः प्रतिविशेषो येनैता पृथक् पृच्छ्यन्ते ? उच्यते, इह सूर्यनिष्पादिता अहोरात्राश्चन्द्रनिष्पादितास्तिथयः। तत्र चन्द्रमसा तिथयो निष्पाद्यन्ते वृद्धिहानिभ्याम्। तथा चोक्तं – **'तं रययकुमुयसरिसप्पभस्स चंदस्स रातिसुभगस्स। लोए तिहित्ति निययं भन्नइ वुड्ढीए हाणीए॥११०॥' (जो.प.)** ते च वृद्धिहानी चन्द्रमण्डलस्य न स्वरूपतः किन्तु राहुविमानावरणानावरणकृते। तथाहि- इह द्विविधो राहुः, तद्यथा - (पर्वराहुः ध्रुवराहुश्च। तत्र यः) पर्व्वराहुस्तद्गता चिन्ता अत्रानुपयोगिनीत्यग्रे वक्ष्यते, **क्षेत्रसमासटीकायां** वा कृतेति ततोऽवधार्या। यस्तु ध्रुवराहुस्तस्य विमानं कृष्णं, तच्च चन्द्रमण्डलस्याऽधस्ताच्चतुरङ्गुलमसम्प्राप्तं [भवत तं] (सत्) चारं चरति। तत्र चन्द्रमण्डलं बुद्ध्या द्वाषष्टिसङ्ख्यैर्भागैः परिकल्प्यते, परिकल्प्य च तेषां भागानां पञ्चदशभिर्भागो ह्रियते, लब्धाश्चत्वारो द्वाषष्टिभागाः, शेषौ द्वौ भागौ तिष्ठतः, तौ च सदाऽनावृतौ, एषा किल चन्द्रमसः षोडशी कलेति प्रसिद्धिः। तत्र कृष्णपक्षे प्रतिपदि ध्रुवराहुविमानं कृष्णं चन्द्रमण्डलस्याधोभागेन चतुरङ्गुलमसम्प्राप्तं सत् चारं चर[ति](त्) आत्मीयेन पञ्चदशेन (भागेन) द्वौ द्वाषष्टिभागौ सदाऽनावार्यस्वभावौ मु[क्ता](क्त्वा) शेषद्वाषष्टि(भाग)सत्कषष्टिभागात्मकस्य चन्द्रमण्डलस्य [च] एकं (च)तु[भा](र्भा)गात्मकं पञ्चदशभागमावृणोति, द्वितीयस्यामात्मीयाभ्यां द्वाभ्यां पञ्चदशभागाभ्यां द्वौ पञ्चदशभागौ, तृतीयस्या[आ](मा)त्मीयैस्त्रिभिः पञ्चदशभागैस्त्रीन्

पञ्चदशभागान्, एवं यावदमावास्(या)यां पञ्चदशभागानावृणोति, ततः शुक्लपक्षे प्रतिपदि एकं पञ्चदशभागं प्रकटीकरोति, द्वितीयस्यां द्वौ पञ्चदशभागौ, तृतीयस्यां त्रीन्पञ्चदशभागान्, एवं यावत्पञ्चदश्यां पञ्चदशभागा[न्](न)नावृतान् करोति, तदा च सर्वात्मना परिपूर्णं चन्द्रमण्डलं लोके प्रकटं भवति। वक्ष्यति चामुमर्थमग्रेऽपि सूत्रकृत्- **'तत्थ णं जे से धुवराहू से णं बहुलपक्खपडिवये पन्नरसयभागेणं'** (पृष्ठ ६०७) इत्यादिना ग्रन्थेन। तत्र यावता कालेन कृष्णपक्षे षोडशो भागो द्वाषष्टिभागसत्कचतुर्भागात्मको हानिमुपगच्छति स तावान् कालविशेषस्तिथिरित्युच्यते। तथा यावता कालेन शुक्लपक्षे षोडशो भागो द्वाषष्टिभागसत्क(भाग) चतुष्टयप्रमाणः परिवर्द्धते [१]तावत्प्रमाणकालविशेषस्तिथिर्भवति। उक्तश्च **'सोलसभागे काऊण उडुव[यं](इं) हायएत्थ पन्नरसं। तत्तियमित्ते भागे पुणो वि परिवड्ढए जोण्हा॥१११॥ कालेण जेण हायइ सोलसभागो उ सा तिही होइ। तह चेव य वुड्ढीए एवं तिहिणो समुप्पत्ती॥११२॥'** **(जो.प.)** अत्र **'जोण्हा'** इति ज्योत्सना शुक्लपक्ष इत्यर्थः। शेषं सुगमम्। अयश्च पूर्वाचार्यपरम्पराऽऽयात उपनिषदुपदेशः- अहोरात्रस्य द्वाषष्टिभागप्रविभक्तस्य य एकषष्टिभागस्तावत्प्रमाणा तिथिरिति। अथाहोरात्रः त्रिंशत्मुहूर्त्तप्रमाणः सु[वर्णि](प्रती)तः, प्रागेव सूत्रकृता तस्य तावत्प्रमाणतयाऽभिधानात्, तिथिस्तु किम्मुहूर्त्तप्रमाणेति ? उच्यते, परिपूर्णा एकोनत्रिंशन्मुहूर्त्ता एकस्य च मुहूर्त्तस्य द्वात्रिंशत् द्वाषष्टिभागाः, उक्तश्च **'अउणत्तिसं पुन्ना उ मुहुत्ता सोमतो तिही होइ। भागा वि य बत्तीसं बावट्ठिकएणं च्छेएणं॥११६॥'** **(जो.प.)** कथमेतदवसीयते ? इति चेत्, उच्यते, इह अहोरात्रस्य द्वाषष्टिभागीकृतस्य सत्का ये एकषष्टिभागास्तावत्प्रमाणा तिथिरित्युक्तम्। ततः एकषष्टिस्त्रिंशता गुण्यते जातान्यष्टादशशतानि त्रिंशदधिकानि १,८३०। एते च किल द्वाषष्टिभागीकृतसकलतिथिगतमुहूर्त्तसत्का अंशाः। ततो मुहूर्त्ताऽऽनयनार्थं तेषां

१. तावत्प्रमाणः कालविशेषः - B, G, I।

द्वाषष्ट्या भागो ह्रियते, लब्धा एकोनत्रिंशत् मुहूर्त्ता द्वात्रिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य। एतावत्प्रमाणा तिथिः। एतावता हि कालेन चन्द्रमण्डलगतः पूर्व्वोदितप्रमाणः षोडशो भागो हानिं वोपगच्छति वर्द्धते वा। तत एतावानेव तिथेः परिमाणकालः। तदेवमहोरात्रादस्ति तिथेः प्रतिविशेष इत्युपपन्नस्तिथिविषयः पृथक् प्रश्नः।

एवं गौतमेन प्रश्ने कृते भगवानाह –

मू० तत्थ खलु इमा दुविहा तिही पण्णत्ता, तं जहा दिवसतिही य रातितिही य।

टी० 'तत्थ खलु' इत्यादि। **तत्र** तिथिविचारविषये **खल्विमा**[१] वक्ष्यमाण-स्वरूपा **द्विविधास्तिथयः प्रज्ञप्तास्तद्यथा दिवसतिथयो रात्रितिथयश्च**। तत्र यस्तिथेः पूर्वार्द्धभागः स दिवसतिथिरित्युच्यते, यस्तु पश्चार्द्धभागः स रात्रि-तिथिरित्युच्यते।

मू० ता कहं ते दिवसतिही आहियत्ति वएज्जा ? ता एगमेगस्स णं पक्खस्स पण्णरस दिवसतिही पण्णत्ता, तं जहा- णंदे भद्दे जए तुच्छे पुण्णे पक्खस्स पंचमी पुणरवि नंदे भद्दे जए तुच्छे पुण्णे पक्खस्स दसमी पुणरवि णंदे भद्दे जए तुच्छे पुण्णे पक्खस्स पण्णरसी। एवं तिगुणा (ए)ते तिहीओ सव्वेसिं दिवसाणं।

टी० 'ता कह'मित्यादि। **'ता'** इति पूर्ववत्, **कथं** केन प्रकारेण कया नाम्नां परिपाट्या इत्यर्थः **दिवसतिथय आख्याता इति वदेत्** ? भगवानाह- **'एगमेगस्स ण'**मित्यादि। **'ता'** इति प्राग्वत् **एकैकस्य 'ण'**मिति वाक्यालङ्कारे **पक्षस्य** मध्ये **पञ्चदश दिवसतिथयः प्रज्ञप्तास्तद्यथा**- प्रथमा **नन्दा** द्वितीया **भद्रा** तृतीया **जया** चतुर्थी **तुच्छा पक्षस्य पञ्चमी पूर्णा**। ततः **पुनरपि** षष्ठी तिथि**र्नन्दा** सप्तमी **भद्रा** अष्टमी **जया** नवमी **तुच्छा दशमी पक्षस्य पूर्णा**। ततः **पुनरप्येकादशी** तिथि**र्नन्दा** द्वादशी **भद्रा** त्रयोदशी **जया** चतुर्दशी **तुच्छा पक्षस्य पञ्चदशी पूर्णे**ति।

१. वक्ष्यमाणरूपा - H।

'**एव**'मित्यादि। एवमुक्तेन प्रकारेण '**एते**' इति स्त्रीत्वेऽपि प्राप्ते पुंस्त्वनिर्देशः प्राकृतत्वात्, **एता** अनन्तरोदितास्ति**थयो** नन्दाद्या नन्दादीन्यनन्तरोदितानि तिथिनामानीत्यर्थः [१]**त्रिगुणा**स्त्रिभिर्गुणितानीति भावः, **सर्वेषां** पक्षान्तर्वर्त्तिनां **दिवसानां** सर्व्वासां पक्षान्तर्व्वत्तिनीनां दिवसतिथीनामित्यर्थः।

मू० ता कहं ते रातितिही आहिता ति वदेज्जा? ता एगमेगस्स णं पक्खस्स पण्णरस रातितिही पण्णत्ता, तं जहा- उग्गवती भोगवती जसवती सव्व[ट्ठ]सिद्धा सुहणामा पुणरवि उग्गवती भोगवती जसवती सव्वसिद्धा सुहणामा पुणरवि उग्गवती भोगवती जसवती सव्वसिद्धा सुहणामा। एवं तिगुणा एए तिहीओ सव्वासिं रातीणं।

दसमे पण्णरसमं १५।

टी० '**ता कहं ते**' इत्यादि। '**ता**' इति पूर्व्ववत्, **कथं** केन प्रकारेण कया नाम्नां परिपाट्या इत्यर्थः भगवन्! **ते** त्वया **रात्रितिथय आख्याता इति वदेत्**? भगवानाह – '**एगमेगस्स ण**'मित्यादि। '**ता**' इति पूर्ववत् **एकैकस्य पक्षस्य पञ्चदश रात्रितिथयः प्रज्ञप्तास्तद्यथा** प्रथमा **उग्रवती** द्वितीया **भोगवती** तृतीया **यशोमती** चतुर्थी **सर्व्वसिद्धा** पञ्चमी **शुभनामा**। ततः पुनरपि षष्ठी **उग्रवती** सप्तमी **भोगवती** अष्टमी **यशोमती** नवमी **सर्व्वसिद्धा** दशमी **शुभनामा**। ततः पुनरप्येकादशी **उग्रवती** द्वादशी **भोगवती** त्रयोदशी **यशोमती** चतुर्दशी **सर्व्वसिद्धा** पञ्चदशी **शुभनामा**। **एवमेतास्त्रिगुणास्तिथय** एवमेतानि त्रिगुणानि (तिथि)-नामानीत्यर्थः **सर्व्वासां रात्रीणां** रात्रितिथीनां वाचकानीति शेषः।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्टीकायां दशमस्य प्राभृतस्य पञ्चदशं प्राभृतप्राभृतं समाप्तम्।

* * * * *

---

१. त्रिगुणास्त्रिगुणितानीति - H, I, T।

षोडशं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य पञ्चदशं प्राभृतप्राभृतम्। सम्प्रति षोडशमारभ्यते। तस्य चायमर्थाधिकारो यथा गोत्राणि [च] वक्तव्यानीति। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते गोत्ता आहिता ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। तत्र नक्षत्राणां न स्वरूपतो गोत्रसम्भवो यत इदं गोत्रस्य स्वरूपं लोके प्रसिद्धिमुपागमत्- **प्रकाशका(द्)यपुरुषाभिधान(त) स्तदपत्यसन्तानो गोत्रम्**। यथा गर्गस्यापत्यसन्तानो गर्गाभिधानो गोत्रमिति। न चैवंस्वरूपं नक्षत्राणां गोत्रं सम्भवति, तेषामौपपातिकत्वात्। तत इत्थं [१]गोत्रसम्भवो द्रष्टव्यो यस्मिन्नक्षत्रे शुभैरशुभैर्वा ग्रहैः समानं यस्य गोत्रस्य यथाक्रमं शुभमशुभं वा भवति तत्तस्य गोत्रम्। ततः प्रश्नोपपत्तिः। **'ता'** इति पूर्ववत् **कथं त्वया** नक्षत्राणां **गोत्राण्याख्यातानीति वदेत्**?

भगवानाह–

मू० ता एएसि णं अट्ठावीसाए णक्खत्ताणं अभियिणक्खत्ते मोग्गलायणसगोत्ते पण्णत्ते, सवणे संखायणसगोत्ते पण्णत्ते, धणिट्ठा [२]अग्गभावसगोत्ते आहिताति वदेज्जा, सतभिसया कंडिल्लायणसगोत्ते, पुव्वा भद्दवता जाउकण्णिसगोत्ते, उत्तरा भद्दवता ण० धणंजयसगोत्ते, रेवती पुस्सायणस०, अस्सिणी आसायणसगोत्ते, भरणी भगवेसायणसगोत्ते, कत्तिया अग्गिवेसायणस०, रोहिणी गोतमस०, मग्गसिरं भारद्दायस०, अद्दा लोहिच्चायणस०, पुणव्वसू वासिट्ठसगोत्ते, पूसे उमज्जायणस०, असलेसा मंडव्वातणस०, महा पिंगायणस०, पुव्वा फग्गुणी गोवल्लायणस०, उत्तरा फग्गुणी कासवगोत्ते, हत्थो कोसियस०, चित्ता दब्भियस०, साती

१. गोत्रसम्भवो यस्मिन्नक्षत्रे ... - A। २. अग्गतावसगोत्ते - U।

चामरच्छातणस०, विसाहा अंगातणस०, अणुराहा (गो)लायवा-तणस०, जेट्ठा तिगिच्छायणस०, मूले कच्चायणस०, पुव्वासाढा व[ज्झा](ज्झिया)यणस०, उत्तरासाढा णक्खत्ते वग्घावच्चसगोत्ते पण्णत्ते।

दसमे सोलसमं १६।

टी० **'ता एएसि ण'**मित्यादि। **'ता'** इति पूर्ववत्, **एतेषामष्टाविंशतेर्नक्षत्राणां** मध्ये **अभिजिन्नक्षत्रं मौद्गल्यायनसगोत्रं** मौद्गल्यायनेन सह गोत्रेण वर्त्तते यत्तत्था, **श्रवणनक्षत्रं सङ्ख्यायनसगोत्रं प्रज्ञप्तम्**। एवं शेषाण्यपि सूत्राणि भावनीयानि। क्रमेण [१]गोत्रसङ्ग्राहिकाश्चेमा **जम्बूद्वीपप्रज्ञप्तिसत्काश्चतस्रः** सङ्ग्रहणिगाथाः – **'मोग्गलायण१ संखायणे (य त)ह अग्गभाव३ कं[ढिलो](डिल्लो)४। तत्तो य जाउकन्ने५, धणंजए६ चेव बोद्धव्वे॥१०४॥ [२]पुस्सायणे७ अस्सायणे८ य भग्गवेसे९ य अग्गिविसे१० य। गोयम११ भारद्दाजे१२ लोहिच्चे१३ चेव वासिट्ठे१४॥१०५॥ उमज्जायण १५ मंड[वया](व्वाय)णे१६ य पिंगायणे १७ य गोवल्ले१८। कासव१९ कोसिय२० द[ब्भ](ब्भि)य२१ चामरच्छाय२२ अंगा२३ य॥१०६॥ गो[लट्ठायट्ठाय](लायवातणे य)२४ (तिगिच्छायणे य)२५ [कि](कच्च)चायणे२६ हवइ मूले। तत्तो य वज्झियायण२७ वग्घावच्चे२८ य गोत्ताइं॥१०७॥'**

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्टीकायां दशमस्य प्राभृतस्य षोडशं प्राभृतप्राभृतं समाप्तम्।

* * * * *

१. गोत्रसङ्ग्राहिकाश्च जम्बूद्वीप... - H। २. पुस्सायणे य - M, T।

सप्तदशं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य षोडशं प्राभृतप्राभृतम्। सम्प्रति सप्तदशमारभ्यते। तस्य चायमर्थाधिकारो भोजनानि वक्तव्यानीति। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते भोयणा आहिता [इ]त्ति वइज्जा ?

टी० 'ता कहं (ते) भोयणा' इत्यादि। **'ता'** इति पूर्ववत्, **कथं**-केन प्रकारेण नक्षत्रविषयाणि (**त्वया**) **भोजनानि आख्यातानि इति वदेत्** ?

भगवानाह –

मू० ता एएसि णं अट्ठाविसाए णक्खत्ताणं कत्तियाहिं दहिणा भोच्चा कज्जं साहेति, रोहिणीहिं वसभमंसेणं[१] भोच्चा कज्जं साहेति, मिगसिरेणं मिगमंसेण[२] भोच्चा कज्जं साहेइ, अद्दाहिं णवणीएणं भोच्चा कज्जं साहेति, पुणव्वसुणा घएणं भोच्चा, पुस्सेणं खीरेणं भोच्चा, अस्सिलेसाहिं दीवगमंसेणं[३], महाहिं किंसरीं[४] भोच्चा, पुव्वाहिं फग्गुणीहिं मिंढगमंसेणं[५] भोच्चा, उत्तराहिं फग्गुणीहिं णक्खीमंसेणं[६] भोच्चा, हत्थेणं वच्छाणीएणं[७] भोच्चा, चित्ताहिं मुग्गसूएणं[८] भोच्चा, सातीहिं फलाइं भोच्चा, विसाहाहिं आसीतियातो[९] भोच्चा, अणुराहाहिं मीसाकुरंगे[१०] भोच्चा, जेट्ठाहिं कोलट्ठिएणं[११] भोच्चा, मूलेणं मूलसाएणं[१२] भोच्चा, पुव्वाहिं आसाढाहिं आमलसारिएणं[१३] भोच्चा, उत्तराहिं (आसाढाहिं) बिल्लेहिं[१४] भोच्चा, अभीइणा पुप्फाइं भोच्चा, सवणेणं

---

१. घृतम्। २. 'कस्तूरी' इति भाषायाम्। ३. 'कवचसिंग, कमल' इति भाषायाम्। ४. 'केसर, केसार' इति भाषायाम्। ५. 'एलायची' इति भाषायाम्। ६. कन्दविशेषः। ७. 'सिंघाडा' इति भाषायाम्। ८. 'मूंग की दाल' इति भाषायाम्। ९. 'आठली, शाक' इति भाषायाम्। १०. 'मिश्रकुर धान्य' इति भाषायाम्। ११. 'कोला-कद्दू' इति भाषायाम्। १२. मूसगसातेणं - U, 'मूली, मोगरे का शाक' इति भाषायाम्। १३. 'आंवला' इति भाषायाम्। १४. 'बिल्वफल, पक्का निंबू' इति भाषायाम्।

खीरेणं भोच्चा, धणिट्ठाहिं जूसेणं[१] भोच्चा, सतभिस(याए) तुवरिउं[२] भोच्चा, पुव्वाहिं भद्दवयाहिं करिल्लगा[३] भोच्चा, उत्तराहिं भद्दवयाहिं वराहमंसेणं[४] भोच्चा, रेवईहिं जलचरमंसेणं[५] भोच्चा, अस्सिणीहिं तित्तिरमंसेणं[६] भोच्चा, अहवा वट्टग(मंसेणं भोच्चा), भरणीहिं तिलतंदुलियं[७] भोच्चा कज्जं साहेति।

दसमे सत्तरसमं १७।

टी० '**ता एएसि ण**'मित्यादि। '**ता**' इति पूर्व्ववत्, **एतेषा**मनन्तरोदिता-नाम**ष्टाविंशतेर्नक्षत्राणां** मध्ये **कृत्तिकाभिः** पुमान् **कार्यं साधयति दध्ना** स[न्मि](म्मि)श्रमोदनं **भुक्त्वा**। किमुक्तं भवति ? कृत्तिकासु प्रारब्धं (कार्यं) दध्नि भु[ङ्क्]क्ते प्रायो निर्विघ्नं सिद्धिमासादयति, इति। एवं शेषेष्वपि सूत्रेषु भावना द्रष्टव्या।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य सप्तदशं प्राभृतप्राभृतं समाप्तम्।

* * * * *

आणाए च्चिय चरणं, तब्भंगे जाण किं न भग्गं ति।
आणं च अइक्कंतो, कस्साएसा कुणइ सेसं॥

न गृहे न बहिर्न जने, न कानने नान्तिके न वा दूरे।
न दिने च क्षणदायां, पापानां भवति रतिभावः॥

---

१. 'करेला, सक्कर कोला' इति भाषायाम्। २. 'तूंबा' इति भाषायाम्। ३. 'करेला' इति भाषायाम्। ४. 'कपूर' इति भाषायाम्। ५. जलम्। ६. 'सीताफल' इति भाषायाम्। ७. 'तिल का तेल, चावल' इति भाषायाम्।

अष्टादशं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य सप्तदशं प्राभृतप्राभृतम्। सम्प्रत्यष्टादशमारभ्यते। तस्य चायमर्थाधिकारश्चन्द्रादित्यचारा वक्तव्याः। ततस्तद्विषयं प्रश्नसूत्रमाह–

मू० ता कहं ते चारा आहिते ति वदेज्जा ?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत्, **कथं** - केन प्रकारेण किम्प्रमाणया सङ्ख्यया इत्यर्थः **चारा आख्याता इति वदेत्** ?

भगवानाह–

मू० तत्थ खलु इमे दुविहा चारा पण्णत्ता। तं जहा- आइच्चचारा य चंदचारा य।

टी० 'तत्थे'त्यादि। **तत्र** चारविचारविषये **खल्विमे** वक्ष्यमाणस्वरूपा **द्विविधा** द्विप्रकाराश्चाराः **प्रज्ञप्ताः**[1]। [2]द्वैविध्यमेवाह – **तद्यथा आदित्यचाराश्चन्द्रचाराश्च** चशब्दो परस्परसमुच्चये।

तत्र प्रथमतश्चन्द्रचारविज्ञानार्थं तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते चंदचारा आहियत्ति वइज्जा? ता पंचसंवच्छरीए णं जुगे अभीई नक्खत्ते सत्तट्ठिचारा चंदेण सद्धिं जोगं जोएइ, सवणे नक्खते सत्तट्ठिचारा चंदेण सद्धिं जोगं जोएइ। एवं जाव उत्तरासाढा नक्खते सत्तट्ठिचारा चंदेण सद्धिं जोगं जोएइ।

टी० 'ता कहं ते' इत्यादि। **'ता'** इति प्राग्वत्, **कथं** केन प्रकारेण कया सङ्ख्यया इत्यर्थः **त्वया** भगवन्! **चन्द्रचारा आख्याता इति वदेत्**? भगवानाह – **'ता पंचसंवच्छरीए'** इत्यादि। **'ता'** इति पूर्ववत् **पञ्चसांवत्सरिके** चन्द्रादिपञ्चसंवत्सरप्रमाणे **युगे** युगमध्ये **अभिजिन्नक्षत्रं सप्तषष्टिचारान्** यावत् **चन्द्रेण सार्द्धं योगं युनक्ति**। किमुक्तं भवति ? चन्द्रोऽभिजिता नक्षत्रेण सह संयुक्तो युगमध्ये सप्तषष्टिसङ्ख्यान् चारान् चरतीति। कथमेतत्प्रत्येयमिति चेत् ? उच्यते,

१. प्रज्ञप्तास्तद्यथा - D। २. द्वैविध्यमाह - C, K।

इह योगमधिकृत्य सकलनक्षत्रमण्डलीपरिसमाप्तिरेकेन नक्षत्रेण मासेन भवति, नक्षत्रमासाश्च युगमध्ये सप्तषष्टिरेतच्चाग्रे भावयिष्यति। ततः प्रतिनक्षत्रपर्यायमेकैकं चारमभिजिता नक्षत्रेण सह चन्द्रस्य योगसम्भवादुपपद्यते चन्द्रो अभिजिता नक्षत्रेण सह संयुक्तो युगमध्ये सप्तषष्टिसङ्ख्यान् (चारान्) चर(ती)ति। एवं च प्रतिनक्षत्रं भावनीयम्।

सम्प्रति [चन्द्र](आदित्य)चारविषयं प्रश्नसूत्रमाह –

मू० ता कहं ते आदिच्चचारा आहिता ति वदेज्जा ? ता पंचसंवच्छरीए णं जुगे अभिती णक्खत्ते पंच चारा सूरिएणं सद्धिं जोगं जोएति। एवं एएणं अभिलावेणं जाव उत्तरासाढा णक्खत्ते पंच चारा सूरेण सद्धिं जोगं जोएति।

दसमे अट्ठारसमं।[1]

टी० 'ता कहं ते' इत्यादि। **'ता [कहं]'** (इति) पूर्ववत्, **कथं** कया सङ्ख्यया भगवन् ! **(त्वया आदित्यचारा आख्याता इति वदेत्** ? भगवानाह – **'ता पंचसंवच्छरिए ण'**मित्यादि। **'ता'** इति पूर्ववत्, **पञ्चसांवत्सरिके** चन्द्रादिपञ्च-संवत्सरप्रमाणे **युगे** युगमध्येऽ**भिजिन्नक्षत्रं पञ्च चारान्** यावत् **सूर्येण सह योगं युनक्ति**। अत्राप्ययं भावार्थः - अभिजिता नक्षत्रेण संयुक्तः सूर्यो युगमध्ये पञ्चसङ्ख्यान् चारान् चरति। कथमेतदवगम्यते इति चेत् ? उच्यते, इह योगमधिकृत्य सूर्यस्य सकलनक्षत्रमण्डलीपरिसमाप्तिरेकेन सूर्यसंवत्सरेण,सूर्यसंवत्सराश्च युगे भवन्ति पञ्च, ततः प्रतिनक्षत्रपर्यायमेकैकं वारमभिजिता नक्षत्रेण सह योगस्य सम्भवात् घटतेऽभिजिता नक्षत्रेण सह संयुक्तः सूर्यो युगे पञ्च)चारान् चरतीति। एवं शेषनक्षत्रेष्वपि भावना भावनीया।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्याष्टादशं प्राभृतप्राभृतं समाप्तम्।

* * * * *

१. दसमस्स - U।

एकोनविंशतितमं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्याष्टादशं प्राभृतप्राभृतम्। साम्प्रतमेकोनविंशतितममारभ्यते। तस्य चायमर्थाधिकारः - मासप्ररूपणा कर्त्तव्येति। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते मासाणं णामधेज्जा आहितेति वदेज्जा?

टी० '**ता**' इति पूर्ववत्, **कथं** केन प्रकारेण [मासानां] (कया) नाम्नां परिपाट्या इत्यर्थः भगवन् ! **त्वया मासानां नामधेयान्याख्यातानीति वदेत्** ? भगवानाह –

मू० ता एगमेगस्स णं संवच्छरस्स दुवालस मासा पण्णत्ता। तेसि णं दुविहा नामधेज्जा भवंति, तं० लोइया लोउत्तरिया य। तत्थ लोइया ना[म](मा) सावणे भद्दवए अस्सोए कत्तिए मग्गसिरे पोसे माहे फागुणे चित्ते वइसाहे जेट्ठामूले आसाढे। लोउत्तरिया नामा अभिणंदिए सुप्पतिट्ठे विजए पीतिवद्धणे सिज्जंसे सिवे सिसिरे हिमवं वसंत मासे कुसुमसंभवे निदाहे वणविरोही।

दसमे एक्कूणवीसतिमं १९।

टी० '**(ता) एगमेगस्स ण**'मित्यादि। '**ता**' इति पूर्ववत् **एकैकस्य संवत्सरस्य द्वादश मासाः प्रज्ञप्तास्तेषां** च द्वादशानामपि मासानां **नामधेयानि द्विविधानि** प्रज्ञप्तानि, **तद्यथा- लौकिकानि लोकोत्तराणि च**। **तत्र** लोके प्रसिद्धानि लौकिकानि, लो[को](कादु)त्तराणि यानि न लोके प्रसिद्धानि किन्तु प्रवचन एव तानि लोकोत्तराणि। तत्र लौकिकलोकोत्तराणां मध्ये **लौकिकानि नामान्य**मूनि तद्यथा **श्रावणो भाद्रपद** इत्यादि, **लोकोत्तराणि नामान्य**मूनि तद्यथा श्रावणरूपो मासोऽ**भिनिन्दितो** द्वितीयः **सुप्रतीष्ठ**स्तृतीयो **विजय**श्चतुर्थः **प्रीतिवर्द्धन**ः पञ्चमः **श्रेयान्** षष्ठः **शिव**ः सप्तमः **शिशिरो**ऽष्टमो **हिमवान्** नवमो **वसन्तो** मासो दशमः

[१]**कुसुमसम्भवः** एकादशो **निदाघो** द्वादशो **वनविरो[ही](धी)**।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य एकोनविंशतितमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

नाणमकारणबंधू, नाणं मोहंधयारदीणबंधू।
नाणं संसारसमुद्द-तारणे बंधुरं जाणं।।

सुइ जहा ससुत्ता, न नस्सई कयवरम्मि पडिया वि।
जीवो वि तह ससुत्तो, न नस्सई गओ वि संसारे।।

पहसंतगिलाणेसु, आगमगाहीसु तह य कयलोए।
उत्तरपारणगम्मि य दिन्नं सुबहुफलं होइ।।

आत्मारामं मनो यस्य, मुक्त्वा संसारसंकथाम्।
अमोघामृतधाराभिः, सर्वाङ्गीणं स सिच्यते।।

संसारानित्यतां बुद्ध्वा, ये तिष्ठन्ति निराकुलाः।
ते नूनं वह्निना दीप्ते, शेरते निर्भरं गृहे।।

---

१. कुसुमशम्भवः - H।

विंशतितमं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य एकोनविंशतितमं प्राभृतप्राभृतम्। सम्प्रति विंशतितममारभ्यते। तस्य चायमर्थाधिकारो यथा पञ्च संवत्सराः प्रतिपाद्याः। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कति णं संवच्छरा आहिता ति वदेज्जा?

टी० 'ता कइ ण'मित्यादि। **'ता'** इति पूर्ववत्, **कति** किंसङ्ख्या **'ण'**मिति वाक्यालङ्कारे **संवत्सरा आख्याता इति वदेत्**?

भगवानाह –

मू० ता पंच संवच्छरा आहिता त्ति वदेज्जा। तं० णक्खत्तसंवच्छरे जुगसंवच्छरे पमाणसंवच्छरे लक्खणसंवच्छरे सणिच्छरसंवच्छरे। ता णक्खत्तसंवच्छरे दुवालसविहे पन्नत्ते, तं जहा- सावणे भद्दवए जाव आसाढे। जं वा बहस्सतिमहग्गहे दुवालसहिं संवच्छरेहिं सव्वं णक्खत्तमंडलं समाणेति। ता जुगसंवच्छरे पंचविहे पण्णत्ते, तं जहा- चंदे चंदे अभिवड्ढिते चंदे अभिवड्ढिते। ता पढमस्स णं चंदसंवच्छरस्स चउव्वीसं पव्वा पण्णत्ता, दुच्चस्स[१] णं चंदसंवच्छरस्स चउव्वीसं पव्वा पण्णत्ता, तच्चस्स णं अभिवड्ढियसंवच्छरस्स छव्वीसं पव्वा पण्णत्ता, चउत्थस्स णं चंदसंवच्छरस्स चउवीसं पव्वा पण्णत्ता, पंचमस्स णं अभिवड्ढियसंवच्छरस्स छव्वीसं पव्वा पण्णत्ता। एवमेव सपुव्वावरेणं पंचसंवच्छरिए जुए एते चउव्वीसे पव्वसते भवतीति मक्खाते। ता पमाणसंवच्छरे पंचविहे पण्णत्ते, तं जहा- णक्खत्ते चंदे उऊ[२] आइच्चे अभिवड्ढिए। ता लक्खणसंवच्छरे पंचविहे पण्णत्ते, तं जहा- नक्खत्ते चंदे उडू आइच्चे अभिवड्ढिए। ता णक्खत्ते णं संवच्छरे णं पंचविहे

१. बीयस्स - Q। २. उडू - O।

प०, तं०-समगं णक्खत्ता जोगं जोएंति समगं उडू परिणमंति। णच्चुण्हं णातिसीओ बहूदओ होति णक्खत्तो॥१॥ ससिसमगपोण्णिमासिं जोएंति समचारिणक्खत्ता। कडुओ बहुउदओ य तमाहु संवच्छरं चंदं॥२॥ विसमं पवालिणो परिणमंति, अणुदूसु देंति पुप्फफलं। वासं ण सम्म वासति तमाहु संवच्छरं कम्मं॥३॥ पुढविदगाणं च रसं पुप्फफलाणं च देइ आइच्चो। अप्पेणवि वासेणं सम्मं णिप्फज्ज[ती](ए) सासं॥४॥ आदिच्चतेयतविया[1] खणलव-दिवसा उडू। परिणमंति पूरेति निन्नथलए तमाहु अभिवड्ढितं जाण॥५॥ ता सणिच्छरसंवच्छरे (णं) अट्ठावीसतिविहे पण्णत्ते, (तं०) अभि[ति](ती) सवणो जाव उत्तरासाढा जं वा सणिच्छरे महग्गहे तीसाए संवच्छरेहिं सव्वणक्खत्तमंडलं समाणेति[2]।

दसमे वीसतिमं पाहुडं २०।

टी० 'ता' इत्यादि। 'ता' इति प्राग्वत्, **पञ्च संवत्सरा आख्याता इति वदेत्। तद्यथा - नक्षत्रसंवत्सर** इत्यादि। तत्र यावता कालेन अष्टाविंशत्यापि नक्षत्रैः सह क्रमेण योगपरिसमाप्तिस्तावान् कालविशेषो द्वादशभिर्गुणितो नक्षत्रसंवत्सरः, उक्तश्च **'नक्खत्तचंदजोगो बारसगुणितो उ नक्खत्तो॥४२॥' (जो.प.)** अत्र पुनरेको निखिलनक्षत्रपर्याययोग एको नक्षत्रमासः। स च सप्तविंशतिरहोरात्रा एकविंशतिश्च सप्तषष्टिभागा अहोरात्रस्य। एष राशिर्यदा द्वादशभिर्गुण्यते तदा त्रीण्यहोरा[त्राणि]त्रशतानि सप्तविंशत्यधिकानि एकपञ्चाशच्च सप्तषष्टिभागा अहोरात्रस्य एतावत्प्रमाणो **नक्षत्रसंवत्सरः**। युगं पञ्चवर्षात्मकं, तत्पूरकः संवत्सरो **युगसंवत्सरः**। युगस्य प्रमाणहेतुः संवत्सरः **प्रमाणसंवत्सरः**, लक्षणेन यथावस्थितेनोपेतः संवत्सरो **लक्षणसंवत्सरः**। शनैश्चरनिष्पादितः संवत्सरः (**शनैश्चरसंवत्सरः** शनैश्चरसम्भवः)।

---

१. ....किरण... - U। २. समाणेति ति - H।

तदेवं पञ्चापि संवत्सरान्नामतः प्रतिपाद्य सम्प्रत्येषामेव पञ्चानां संवत्सराणां यथाक्रमं भेदानाह – **'ता नक्खत्ते'** इत्यादि। **'ता'** इति प्राग्वत्, **तत्र नक्षत्रसंवत्सरो द्वादशप्रकारस्तद्यथा श्रावणो भाद्रपद** इत्यादि। इह एकः समस्तनक्षत्रयोगपर्यायो द्वादशभिर्गुणितो नक्षत्रसंवत्सरः। ततो ये नक्षत्रसंवत्सरस्य पूरका द्वादश समस्त-नक्षत्रयोगपर्यायाः श्रावणभाद्रपदादिनामानस्ते अवयवे समुदायोपचारात् नक्षत्र-संवत्सराः। ततः श्रावणादिभेदात् द्वादशविधो नक्षत्रसंवत्सरः। **'जं वे'**त्यादि। वाशब्दः पक्षान्तरसूचने अथवा **यत्सर्वं** समस्तं **नक्षत्रमण्डलं बृहस्पतिमहाग्रहो** योगमधिकृत्य **द्वादशभिः संवत्सरैः समानयति**[१] परिभ्रमन् समापयति एष नक्षत्रसंवत्सरः। किमुक्तं भवति ? यावता कालेन बृहस्पतिनामा महाग्रहो योगमधिकृत्याभिजिदादीन्यष्टाविंशतिमपि नक्षत्राणि परिसमापयति तावान् कालविशेषो द्वादशवर्षप्रमाणो नक्षत्रसंवत्सरः।

'ता जुगसंवच्छरे'त्यादि। **'ता'** इति पूर्ववत्, **युगसंवत्सरो** युगपूरकः संवत्सरः **पञ्चविधः प्रज्ञप्तस्तद्यथा चान्द्रश्चान्द्रोऽभिवर्द्धित(श्चान्द्रोऽभिवार्द्धित)** श्चैव। उक्तञ्च **'चंदो चंदो अभिवड्ढितो य चंदो अभिवड्ढितो चेव। पंचसहियं जुगमिणं दिट्ठं तेलोकदंसीहिं॥५४॥ पढमबि(इ)या उ चंदा तइयं अभि-वड्ढिअं वियाणाहि। चंदं चेव चउत्थं पंचममभिवड्ढियं जाण॥५५॥'** (**जो.प.**) तत्र द्वादशपूर्णमासीपरावर्त्ता यावता कालेन समाप्तिमुपयान्ति[२] तावान् कालविशेषश्चान्द्रसंवत्सरः। उक्तञ्च **'पुन्निमपरियट्टा पुण बारस संवच्छरो हवइ चंदो।'** (**जो.प.४२**) एकश्च पूर्णमासीपरावर्त्त एकश्चान्द्रो मासस्तस्मिंश्च[३] चान्द्रे मासेऽहोरात्रपरिमाणचिन्तायामेकोनत्रिंशदहोरात्रा द्वात्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य। एतत् द्वादशभिर्गुण्यते, जातानि त्रीणि शतानि चतुष्पञ्चाशदधिकानि रात्रिन्दिवानां

---

१. समानयति एष नक्षत्र... - F, N, समानयति परिसमापयति। एष ... - J। २. .....मुपयन्ति - A, F, I। ३. .....तस्मिंश्चान्द्रे - T।

द्वादश च द्वाषष्टिभागा [१]रात्रिन्दिवसस्य। एवम्परिमाणश्चान्द्रः संवत्सरः। यस्मिन्संवत्सरे अधिकमाससम्भवेन त्रयोदश चन्द्रस्य मासा भवन्ति सोऽभिवर्द्धितसंवत्सरः, उक्तश्च **'तेरस य चंदमासा [वा](ए)सो अभिवड्ढिओ उ नायव्वो।'** (जो.प.४३) एकस्मिंश्च चन्द्रमासे अहोरात्रा एकोनत्रिंशद्भवन्ति द्वात्रिंशच्च द्वाषष्टिभा[गस्य](गा) अहोरात्रस्य। एतच्चानन्तरमुक्तम्। तत एष राशिस्त्रयोदशभिर्गुण्यते जातानि त्रीण्यहोरात्रशतानि त्र्यशीत्यधिकानि चतुश्चत्वारिंशच्च द्वाषष्टिभागा अहोरात्रस्य। एतावदहोरात्र(प्रमाणोऽभिवर्द्धितसंवत्सर उपजायते। कथमधिकमाससम्भवो येनाभिवर्द्धितसंवत्सर उपजायते ? कियता वा कालेन सम्भवतीति ? उच्यते, इह युगं चन्द्रचन्द्राभिवर्द्धितचन्द्राभिवर्द्धितरूपपञ्चसंवत्सरं सूर्यसंवत्सरापेक्षया परिभाव्यमानमन्यूनातिरिक्तानि पञ्च वर्षाणि भवन्ति, सूर्यमासश्च सार्द्धत्रिंशदहोरात्र)प्रमाणश्चा(न्द्र)मास एकोनत्रिंशद्दिनानि द्वात्रिंशच्च द्वाषष्टिभागा दिनस्य। ततो गणितपरिभावनया सूर्यसंवत्सरसत्कत्रिंशन्मासातिक्रमे एकश्चान्द्रमासोऽधिको लभ्यते। तथा च पूर्वाचार्यप्रदर्शितेयं करणगाथा – **'चंदस्स जो विसेसो आइच्चस्स य हविज्ज मासस्स। तीसइ गुणीओ संतो हवई हु अहिमासगो एक्को॥१०३॥'** **(जो.प.)** अस्या अक्षरगमनिका - **आदित्यस्य** - आदित्यसंवत्सरसम्बन्धिनो मासस्य मध्यात् **चन्द्रस्य** - चन्द्रमासस्य **यो भवति विश्लेषः**, इह विश्ले[ष](षे) कृते सति यदवशिष्यते तदुपचारात् विश्लेषः, स **त्रिंशता** गुण्यते, **गुणितः सन् भवत्येकोऽधिकमासः**। तत्र सूर्यमासपरिमाणात्सार्द्धत्रिंशदहोरात्ररूपात् चन्द्रमासपरिमाणमेकोनत्रिंशद्दिनानि द्वात्रिंशच्च द्वाषष्टिभागा दिनस्येत्येवंरूपं शोध्यते। ततः स्थितं पश्चाद्दिनमेकेन द्वाषष्टिभागेन न्यूनम्। तत्र दिनं त्रिंशता गुण्यते, जातानि त्रिंशद्दिनानि, एकश्च द्वाषष्टिभागस्त्रिंशता गुणितः, जातास्त्रिंशद् द्वाषष्टिभागाः, ते

---

१. रात्रिन्दिवस्य - F।

त्रिंशद्दिनेभ्यः शोध्यन्ते, ततः स्थितानि शेषाण्येकोनत्रिंशद्दिनानि द्वात्रिंशच्च द्वाषष्टिभागा दिनस्य, एतावत्परिमाणश्चन्द्रमास इति भवति सूर्यसंवत्सरसत्कत्रिंशन्मासातिक्रमेण एकोऽधिकमासो, युगे च सूर्यमासाः षष्टिस्ततो [सूर्यो](भूयो)ऽपि सूर्यसंवत्सरसत्कत्रिंशन्मासातिक्रमे द्वितीयोऽधिकमासो भवति। उक्तञ्च **'सट्ठीए अइयाए हवइ हु अहिमासगो जुगद्धंमि। बावीसे पव्वसये हवइ [१]य बीओ जुगंतंमि॥१०४॥'** **(जो.प.)** अस्या अपि अक्षरगमनिका - एकस्मिन्युगे अनन्तरोदितस्वरूपे पर्वणां - पक्षाणां **षष्टौ अतीतायां** षष्टिसङ्ख्येषु पक्षेष्वतिक्रान्तेषु इत्यर्थः, एतस्मिन्नवसरे **युगार्द्धे** युगार्द्धप्रमाणे एकोऽ**धिकमासो भवति, द्वितीय**स्त्वधिकमासो (**द्वाविंशे**) द्वा[त्रिं](विं)शत्यधिके **पर्वशते** अतिक्रान्ते **युगस्यान्ते** युगपर्यवसाने **भवति**। युगमध्ये [२]तृतीये संवत्सरे अधिकमासः पञ्चमे चेति द्वौ युगे अभिवर्द्धितसंवत्सरौ। सम्प्रति युगे सर्वसङ्ख्यया यावन्ति पर्व्वाणि भवन्ति तावन्ति निर्दिदिक्षुः प्रतिवर्षं पर्वसङ्ख्यामाह- **'ता पढमस्स ण'**मित्यादि। **'ता'** इति **तत्र** युगे **प्रथमस्य 'ण'**मिति वाक्यालङ्कृतौ [च]**(चा)न्द्रस्य संवत्सरस्य चतुर्विंशतिः पर्व्वाणी प्रज्ञप्तानि**। द्वादशमासात्मको हि चान्द्रः संवत्सरः एकैकस्मिंश्च मासे द्वे द्वे पर्वणी, ततः सर्वसङ्ख्यया चान्द्रे संवत्सरे चतुर्विंशतिः पर्वाणि। **द्वितीयस्य चान्द्रसंवत्सरस्य चतुर्विंशतिः पर्वाणि** भवन्ति। **अभिवर्द्धितसंवत्सरस्य षड्विंशतिः पर्वाणि,** तस्य त्रयोदशमासात्मकत्वात्। **चतुर्थस्य चान्द्रसंवत्सरस्य चतुर्विंशतिः पर्वाणि। पञ्चमस्य अभिवर्द्धितसंवत्सरस्य षड्विंशतिः पर्वाणि,** कारणमनन्तरमेवोक्तम्। तत **एवमेव** उक्तेनैव प्रकारेण **'सपुव्वावरेणं'** ति पूर्व्वापरगणितमीलनेन **पञ्चसांवत्सरिके युगे चतुर्विंशत्यधिकं पर्वशतं भवतीत्याख्यातं** सर्वैरपि तीर्थकृद्भिर्मया च। इह कस्मिन्नयने कस्मिन् वा मण्डले किं पर्व्व समाप्तिमुपयातीति चिन्तायां पूर्वाचार्यैः करणगाथा अभिहिताः। ततस्ता

१. हु - G। २. तृतीयसंवत्सरे - E।

विनेयजनानुग्रहार्थमुपदर्श्यन्ते- '**इच्छापव्वेहिं गुणं अयणं रूवाहियं तु कायव्वं। सोज्झं च हवइ एत्तो अयणक्खित्तं उडुवइस्स॥३५४॥ जइ अयणा सुज्झंति तइ पव्वजुया उ रूवसंजुत्ता। ताव[च्छि](इ)तं अयणं नत्थि निरंसं[हि](मि) रूवजुयं॥३५५॥ कसिणंमि होइ रूवं पक्खेवो दो य होंति भिन्नंमि। जावइया तावइ[ए पव्वे](या एए) ससिमंडला होंति॥३५६॥ ओयंमि उ गुणकारे अब्भिंतरमंडले हवइ आई। जुम्मंमि य गुणकारे बा[रा]हिरगे मंडले आई॥३५७॥**' (**जो.प.**) एतासां क्रमेण व्याख्या- यस्मिन्पर्वणि अयनमण्डलादि-विषया ज्ञातुमिच्छा तैर्ध्रुवराशिर्गुण्यते। अथ कोऽसौ ध्रुवराशिः ? उच्यते, इह ध्रुवराशिप्रतिपादिकेयं पूर्व्वाचार्योपदर्शिता गाथा- '**एगं च मंडलं मंडलस्स सत्तट्ठिभाग चत्तारि। नव चेव चुन्नियाओ इगतिसकएण च्छेएण॥३५३॥**' (**जो.प.**) अस्या अक्षरयोजना - **एकं मण्डल**मेकस्य (च **मण्डलस्य**) **सप्तषष्टि-भागाश्चत्वार** एकस्य च सप्तषष्टिभागस्य **एकत्रिंशत्कृतेन च्छेदेन** ये **चूर्णिका भागास्ते न[वा](व)** एतावत्प्रमाणो ध्रुवराशिः, अयश्च पर्व्वगतक्षेत्रादयनगतक्षेत्रापगमे शेषीभूतः। एतस्य चोत्पत्तिमात्रं भावयिष्यामः। तत एवम्भूतं ध्रुवराशी**मीप्सित-पर्वभिर्गुणयित्वा** तदनन्तर**मयनं रूपाधिकं कर्त्तव्यम्**। तथा गुणितस्य मण्डल-राशेर्यदि चन्द्र[मासे](मसोऽ)य[न्]न[क्ष](क्षे)त्रं परिपूर्णमधिकं वा सम्भाव्यते तत **एत-स्मादीप्सितपर्व्वसङ्ख्या[न्]गुणितान्मण्डलराशेरुडुपतेश्चन्द्रमसो अयनक्षेत्रं भवति शोध्यम्**॥३५४॥ **यति** च यावत्सङ्ख्यानि चाऽ**यनानि शुध्यन्ति ततिभिर्युक्तानि** [प](**पू**)**व्वाणि** अयनानि क्रियन्ते, कृत्वा च भूयो **रूपसंयुक्तानि**[1] विधेयानि। यदि पुनः परिपूर्णानि मण्डलानि शुध्यन्ति राशिश्च पश्चान्निर्लेपो जायते तदा त[त्र अ]दयनसङ्ख्या(नैः) **निरंशं** [शत](सद्)**रूपयुक्तं नास्ति,** न तत्रायनराशौ रूपं प्रक्षिप्यते इति भावः॥३५५॥ तथा **कृत्स्ने** परिपूर्णराशौ **भवत्येकं रूपं** मण्डलराशौ

१. रूपयुक्तानि - T।

प्रक्षेपणीयम्। **भिन्ने** खण्डे अंशसहिते राशावित्यर्थः **द्वे** रूपे मण्डलराशौ प्रक्षेपणीये, प्रक्षेपे च कृते सति **या**[वत्](**वान्**)मण्डलराशिर्भवति **तावन्ति मण्डलानि** तावतिथे ईप्सिते पर्वणि **भवन्ति**॥३५६॥ तथा यदि ईप्सितेन पर्वणा **ओजो**रूपेण वि(ष)मलक्षणेन **गुणकारो** भवति, तत **आदिरभ्यन्तरे मण्डले** द्रष्टव्यः **युग्मे** तु समे तु **गुणकारे आदिर्बाह्ये मण्डले** अवसेयः॥३५७॥ एष करण-गाथासमूहाक्षरार्थः। भावना त्वियं-कोऽपि पृच्छति युगादौ प्रथमं पर्व्व कस्मिन्नयने कस्मिंश्च मण्डले समाप्तिमुपयाति ? तत्र प्रथ[म](मं पर्व) पृष्टमिति वामपार्श्वे पर्व्वसूचक एककः स्थाप्यते, ततस्तस्यानुश्रेणि दक्षिणपार्श्वे एकमयनं तस्य चानुश्रेणि एकं मण्डलं तस्य च मण्डलस्याधस्ताच्चत्वारः सप्तषष्टिभागास्तेषामप्यधस्तान्नव एकत्रिंशद्भागा एष सर्व्वोपि राशिः (ध्रुवराशिः)। स ईप्सितेन एकेन पर्वणा गुण्यते। 'एकेन[१] च गुणितं तदेव भवती'ति जातस्तावानेव राशिस्ततो'ऽयनं रूपाधिकं च कर्त्तव्यमि'ति वचनादेकं रूपमयने प्रक्षिप्यते, मण्डलराशौ चाऽयनं (न) शुध्यति ततो **'दो य होंति भिन्नंमि'** इति वचनान्मण्डलराशौ द्वे रूपे प्रक्षिप्येते। तत आगतमिदं प्रथम[२] पर्व द्वितीये अयने तृतीयस्य मण्डलस्य **'ओयंमि गुणकारे अब्भिंतरमंडले हवइ आई'** इति वचनात् अभ्यन्तरवर्त्तिनश्चतुर्षु सप्तषष्टिभागेषु एकस्य च सप्तषष्टिभागस्य नवस्वेकत्रिंशद्भागेषु गतेषु समाप्तिमुपयातीति। अयनं चेह चन्द्रायणमवसेयं, चन्द्रायणं च यु[ग्मपा](गस्या)दौ प्रथममुत्तरायणं द्वितीयं दक्षिणायनमिति द्वितीये अयने अभ्यन्तरवर्त्तिनस्तृतीयस्य मण्डलस्येत्युक्तम्। तथा कोऽपि पृच्छति द्वितीयं पर्व्व कस्मिन्नयने कस्मिन्वा मण्डले समाप्तिमधिगच्छतीति ? (तत्र) द्वितीयं पर्व पृष्टमिति स एव प्रागुक्तो ध्रुवराशिः समस्तोऽपि द्वाभ्यां गुण्यते। ततो जाते द्वे अयने द्वे मण्डले अष्टौ सप्तषष्टिभागा अष्टादश एकत्रिंशद्भागाः। ततो'ऽयनं रूपाधिकं कर्त्तव्यमि'ति वचनात् अयने रूपं प्रक्षिप्यते, मण्डलराशौ

१. एकेन गुणितं - D। २. प्रथमपर्व - T।

चायनं न शुध्यति, ततो **'दो य होंति भिन्नंमि'** इति वचनात् मण्डलराशौ द्वे प्रक्षिप्येते। तत आगतं द्वितीयं पर्व तृतीये अयने चतुर्थस्य मण्डल(स्य) **'[युग्](जुम्)मंमि[व] (य) गुणकारे बाहिरगे मंडले हवइ आई'** इति वचनादबाह्यमण्डलादर्वाग्वर्त्तिनो अष्टसु सप्त(षष्टि)भागेष्वेकस्य[१] च सप्तषष्टि-भागस्याष्टादशस्वेकत्रिंशद्भागेषु अतिक्रान्तेषु परिसमाप्तिमुपैति। तथा कोऽपि प्रश्नयति चतुर्दशं पर्व कतिसङ्ख्येष्वयनेषु मण्डलेषु वा समाप्तिं गच्छतीति ? स एव प्रागुक्तो ध्रुवराशिः समस्तोऽपि चतुर्दशभिर्गुण्यते जातान्ययनानि चतुर्दश मण्डलान्यपि चतुर्दश चत्वा[रि](रः) सप्तषष्टिभागाश्चतुर्दशभिर्गुणिताः जाता षट्पञ्चाशत् ५६ नव एकत्रिंशद्भागाश्चतुर्दशभिर्गुणिताः जातं षड्विंशत्यधिकं शतं १२६। तत्र षड्विंशत्य-धिकस्य शतस्य एकत्रिंशता भागो ह्रियते, लब्धाश्चत्वारः सप्तषष्टिभागा द्वौ (चूर्णिकाभागौ तिष्ठतः, चत्वारश्च सप्तषष्टिभागा उपरितने सप्तषष्टिभागराशौ प्रक्षिप्यन्ते, जाताः षष्टिः सप्तषष्टिभागाः ६०/६७, चतुर्दशभ्यश्च मण्डलेभ्यस्त्रयोदश-भिर्मण्डलैस्त्रयोदशभिश्च सप्तषष्टिभागैरयनं शुद्धं, तेन) भूतपूर्वाण्ययनानि चतुर्दशसङ्ख्यानि युतानि क्रियन्ते, तत'ऽयनं रूपाधिकं कर्त्तव्यमि'ति वचनात् भूयोऽपि तत्रैकं रूपं प्रक्षिप्यते, जातानि षोडश अयनानि, सप्तषष्टिभागाश्च[२] चतुष्पञ्चाशत्सङ्ख्या मण्डलराशावुद्धरितास्तिष्ठन्ति, ते सप्तषष्टिभागराशौ (षष्टि)रूपे प्रक्षिप्यन्ते, जातं चतुर्दशोत्तरं शतं ११४, तस्य सप्तषष्ट्या भागो ह्रियते, लब्धमेकं मण्डलं पश्चादवतिष्ठ(न्)ते सप्तचत्वारिंशत् सप्तषष्टिभागाः, ततो **'दो य होंति भिन्नंमि'** इति वचनात् मण्डलराशौ द्वे रूपे प्रक्षिप्येते, जातानि त्रीणि मण्डलानि, चतुर्दशभिश्चात्र गुणनं कृतं, चतुर्दशराशिश्च यद्यपि युग्मरूपस्तथाप्यत्र मण्डलराशेरेकमयनमधिकं प्रविष्टमिति त्रीणि (मण्डलान्यभ्यन्तर)मण्डलादारभ्य द्रष्टव्यानि। तत आगतं चतुर्दशं पर्व षोडशे अयने अभ्यन्तरमण्डलादारभ्य तृतीये[३]

---

१. ...कस्य सप्त.... - T। २. ... भागाश्चतुष्पञ्चाश... T। ३. तृतीयमण्डले - A, T।

मण्डले सप्तचत्वारिंशति सप्तषष्टिभागेषु गतेष्वेकस्य च सप्तषष्टिभागस्य द्वयोरेकत्रिंशद्भागयोर्गतयोः परिसमाप्नोतीति। तथा द्वाषष्टितमपर्वजिज्ञासायां पूर्व्वोक्तो ध्रुवराशिर्द्वाषष्ट्या गुण्यते, जातानि द्वाषष्टिरयनानि द्वाषष्टि[म](र्म)ण्डलानि द्वे शते अष्टचत्वारिंशदधिके सप्तषष्टिभागानां २४८ पञ्च शतानि [१]अष्टापञ्चाशदधिकान्येकत्रिंशद्भागानां ५५८, तेषामेकत्रिंशता भागे हृते लब्धाः परिपूर्णा अष्टादश सप्तषष्टिभागाः, ते उपरितने सप्तषष्टिभागराशौ प्रक्षिप्यन्ते जाते द्वे शते षट्षष्ट्यधिके २६६, उपरि च द्वाषष्टिमण्डलानि तेभ्यो द्विपञ्चाशता मण्डलैर्द्विपञ्चाशता च एकस्य मण्डलस्य सप्तषष्टिभागैश्चत्वारि अयनानि लब्धानि, तान्ययनराशौ प्रक्षिप्यन्ते, जातानि षट्षष्टिरयनानि ६६, पञ्चादवतिष्ठन्ते नव मण्डलानि पञ्चदश[भिश्] च सप्तषष्टिभागाः, (तत्र पञ्चदश सप्तषष्टिभागाः) सप्तषष्टिभागराशौ प्रक्षिप्यन्ते, जाते द्वे शते एकाशीत्यधिके २८१, तयोः सप्तष[ष्टि](ष्ट्या) भागे हृते लब्धानि चत्वारि मण्डलानि, शेषा अवतिष्ठन्ते त्रयोदश सप्तषष्टिभागाः, मण्डलानि च मण्डलराशौ प्रक्षिप्यन्ते, जातानि त्रयोदश मण्डलानि, त्रयोदशभिर्मण्डलैस्त्रयोदशभिश्च सप्तषष्टिभागैः परिपूर्णमेकमयनं लब्धमिति तदयनराशौ प्रक्षिप्यते जातानि सप्तषष्टिरयनानि **'(नत्थि नि)रंसंमि रूवजुयं'** ति वचनात् अयनराशौ (रूपं) न प्रक्षिप्यते, केवलं **'कसिणंमि होइ रूवं पक्खेवो'** इति वचनान्मण्डलस्थाने एकं रूपं न्यस्यते, द्वाष[ष्टि](ष्ट्या) चात्र गुणकारः कृतो द्वाषष्टिरूपश्च राशिर्युग्मो यान्यपि च चत्वार्ययनानि प्रविष्टानि तान्यपि युग्मरूपाणि, रूपं चात्राधिकमेकं न प्रक्षिप्तमिति पञ्चममयनं तत्स्थाने द्रष्टव्यमिति बाह्यमण्डलमादि[द्र](र्द्र)ष्टव्यम्। तत आगतं द्वाषष्टितमं पर्व्व सप्तष[ष्ट्या चा](ष्टाव)यनेषु परिपूर्णेषु जातेषु बाह्यमण्डले प्रथमरूपे परिसमाप्ते समाप्तिं गतमिति। एवं सर्वाण्यपि पर्व्वाणि भावनीयानि, केवलं विनेयजनानुग्रहाय पर्वायनप्रस्तारो लेशतो अक्षरताडित उपदर्श्यते। तत्र प्रथमं पर्व्व द्वितीये अयने तृतीये मण्डले, तृतीयस्य मण्डलस्य चतु[र्थ](र्षु) सप्तषष्टिभागेषु [२]एकस्य

१. अष्टपञ्चा ... - A। २. एकस्य सप्त... - T।

च सप्तषष्टिभाग(स्य) नवस्वेकत्रिंशद्भागेषु गतेषु समाप्तमिति ध्रुवराशिं कृत्वा पर्वायनमण्डलेषु प्रत्यकमेकैकं रूपं प्रक्षेप्तव्यं, भागेषु च तावत्सङ्ख्याका भागाः, मण्डले चायनक्षेत्रे परिपूर्णे त्रयोदश मण्डलानि एकस्य च मण्डलस्य त्रयोदश सप्तषष्टिभागा इत्येतावत्प्रमाणमयनक्षेत्रं शोधयित्वा अयन(मयन)राशौ प्रक्षेप्तव्यम्। अनेन क्रमेण वक्ष्यमाणः प्रस्तारः सम्यक्परिभावनीयः। स च प्रस्तारोऽयं - प्रथमं पर्व द्वितीये अयने तृतीये मण्डले तृतीयस्य मण्डलस्य चतुर्षु सप्तषष्टिभागेषु एकस्य च सप्तषष्टिभागस्य नवस्वेकत्रिंशद्भागेषु गतेषु समाप्तम्, द्वितीयं पर्व तृतीये अयने (चतुर्थे मण्डले) चतुर्थस्य मण्डलस्याष्टसु सप्तषष्टिभागेषु एकस्य च सप्तषष्टि-भागस्याष्टादशस्वेकत्रिंशद्भागेषु, तृतीयं पर्व चतुर्थे अयने पञ्चमे मण्डले पञ्चमस्य मण्डलस्य द्वादशसु सप्तषष्टिभागेषु एकस्य च सप्तषष्टिभागस्य सप्तविंशतौ एकत्रिंशद्भागेषु, चतुर्थं पर्व पञ्चमे अयने षष्ठे मण्डले षष्ठस्य मण्डलस्य सप्तदशसु सप्तषष्टिभागेषु एकस्य च सप्तषष्टिभागस्य पञ्चसु एकत्रिंशद्भागेषु, पञ्चमं पर्व षष्ठेऽयने सप्तमे मण्डले सप्तममण्डलस्य एकविंशतौ सप्तषष्टिभागेषु एकस्य च सप्तषष्टिभागस्य चतुर्द्दशस्वेकत्रिंशद्भागेषु, षष्ठं पर्व सप्तमेऽयनेऽष्टमे मण्डले अष्टमस्य मण्डलस्य पञ्चविंशतौ सप्तषष्टिभागेषु [1]एकस्य च सप्तषष्टिभागस्य त्रयोविंशतावेकत्रिंशद्भागेषु, सप्तमं पर्व अष्टमेऽयने नवमे मण्डले नवमस्य मण्डलस्य त्रिंशति सप्तषष्टिभागेष्वेकस्य च सप्तषष्टिभागस्य एकस्मिन्नेकत्रिंशद्भागे, अष्टमं पर्व नवमेऽयने दशमे मण्डले दशमस्य मण्डलस्य चतुस्त्रिंशति सप्त(षष्टि)भागेष्वेकस्य च सप्तषष्टिभागस्य दशस्वेकत्रिंशद्भागेषु, नवमं पर्व दशमे अयने एकादशे मण्डले एकादशस्य (मण्डलस्याष्टात्रिंशति सप्तषष्टिभागेष्वेकस्य च सप्तषष्टिभागस्य एकोनविंशतावे-कत्रिंशद्भागेषु, दशमं पर्व एकादशेऽयने द्वादशे मण्डले द्वादशस्य च मण्डलस्य द्वाचत्वारिंशति सप्तषष्टिभागेषु एकस्य च सप्तषष्टिभागस्याष्टाविंशतौ एकत्रिंशद्भागेषु,

---

१. एकस्य सप्त... - H, M, T।

एकादशं पर्व द्वादशेऽयने त्रयोदशे मण्डले त्रयोदशस्य मण्डलस्य) सप्तचत्वारिंशति सप्तषष्टिभागेषु एकस्य च सप्तषष्टिभागस्य षट्सु एकत्रिंशद्भागेषु, द्वादशं पर्व चतुर्दशेऽयने प्रथमे मण्डले [द्वादश](प्रथम)स्य मण्डलस्य [द्वाचत्वारिं](अष्टात्रिं)शति सप्तषष्टिभागेषु एकस्य च [द्वा](सप्त)षष्टिभागस्य[ाष्टाविंशतौ] (पञ्चदशसु) एकत्रिंशद्भागेषु, त्रयोदशं पर्व्व पञ्चदशे अयने [1]द्वितीये मण्डले द्वितीयस्य मण्डलस्य द्वाचत्वारिंशति सप्तषष्टिभागेष्वेकस्य च सप्तषष्टिभागस्य चतुर्विंशतावेकत्रिंशद्भागेषु, चतुर्दशं पर्व्व षोडशे अयने तृतीये मण्डले तृतीयस्य मण्डलस्य सप्तचत्वारिंशति सप्तषष्टिभागेष्वेकस्य च सप्तषष्टिभागस्य द्वयोरेकत्रिंशद्भागयोः, पञ्चदशं पर्व सप्तदशे अयने चतुर्थे मण्डले चतुर्थस्य मण्डलस्य एकपञ्चाशति सप्तषष्टिभागेष्वेक[2]स्य च सप्तषष्टिभागस्य एकादशस्वेकत्रिंशद्भागेषु, एवं शेषेष्वपि पर्वस्वयनमण्डलप्रस्तारो भावनीयो ग्रन्थगौरवभयान्न लिख्यते। अथ किं पर्व कस्मिन्चन्द्रनक्षत्रयोगे परिसमाप्तिमुपयातीति चिन्तायां पूर्वाचार्यैः करणमुपदर्शितम्। सम्प्रति तदप्युपदर्श्यते- **'चउवीससयं काऊण पमाणं सत्तसट्ठिमेव फलं। इच्छापव्वेहिं गुणं काऊणं प[व्व](ज्ज)या लद्धा॥३५९॥ अट्ठा[रुकं](र)सहिं (सएहिं) तीसेहिं सेसगम्मि गुणियंमि। तेरस बिउत्तरेहिं सएहिं अभिइम्मि सुद्धंमि॥३६०॥ सत्तट्ठिबिसट्ठीणं सव्वग्गेणं, तत्तो उ जं सेसं। तं रिक्खं नायव्वं जत्थ सम[त्थ](त्तं) हवइ [पु](प)व्वं॥३६१॥'** **(जो.प.)** त्रैराशिकविधौ **चतुर्विंशत्यधिकं शतं प्रमाणं** प्रमाणराशिं **कृत्वा सप्तषष्टिरूपं फलं**-फलराशिं कुर्यात् कृ[ते](त्वा) च **ईप्सितैः पर्वभिर्गुण**(नं-गु)णकारं विदध्यात्, विधाय चाद्येन राशिना चतुर्विंशत्यधिक[3]शतेन भागे हृते **यल्लब्धं** ते **पर्याया** ज्ञातव्याः॥३५९॥ यत्पुनः शेषमवतिष्ठते तत् **अष्टादशभिः शतैस्त्रिंशदधिकैः** सङ्गुण्यते, सङ्गुणिते च तस्मिन् ततस्त्र्यो-**दशभिः शतैर्द्व्युत्तरैरभिजित्** शोधनीयः, अभिजितो [भा](भो)ग्यानामेकविंशतेः

१. द्वितीयमण्डले - F, T। २. ... कस्य सप्त... - T। ३. ....धिकेन शतेन - E।

सप्तषष्टिभागानां द्वाषष्ट्या गुणने एतावतः शोधन(क)स्य लभ्यमानत्वात्॥३६०॥ ततस्तस्मिन् शोधिते **सप्तषष्टि**सङ्ख्[यो](या) या **द्वाषष्ट्यस्तासां सर्वाग्रेण** यद्भवति, किमुक्तं भवति? सप्तषष्ट्या द्वाषष्टौ गुणितायां यद्भवति तेन भागे हृते यल्लब्धं तावन्ति नक्षत्राणि शुद्धानि, **यत्पुनस्ततो** भागहरणादपि **शेषम**वतिष्ठते **(तद्) ऋक्षं** नक्षत्रं **ज्ञातव्यं यत्र** विवक्षितं **पर्व समाप्त**मिति॥३६१॥ एष गाथात्रयाक्षरार्थः[१]। भावना त्वियं- यदि चतुर्विंशत्यधिकेन पर्वशतेन सप्तषष्टिः पर्याया लभ्यन्ते तत एकेन पर्वणा किं लाभामहे ? राशित्रयस्थापना - १२४।६७।१। अत्र चतुर्विंशत्यधिकशतरूपो राशिः प्रमाणभूतः, सप्तषष्टिरूपः फलं, तत्रान्त्येन राशिना मध्यराशिर्गुण्यते, [त](जा)तः तावानेव तस्या(द्)येन राशिना चतुर्विंशत्यधिकेन शतेन भागहरणं, स च स्तोकत्वात् भागं न प्रयच्छति, ततो नक्षत्रानयनार्थमष्टादशभिः शतैस्त्रिंशदधिकैः सप्तषष्टिभागरूपैर्गुणयिष्याम[२] इति गुणकारछेदराश्योरर्द्धेन अपवर्त्तना, जातो गुणकारराशिर्नव शतानि पञ्चदशोत्तराणि ९१५, च्छेदराशिः द्वाषष्टिः ६२। तत्र सप्तषष्टिर्नवशतैः पञ्चदशोत्तरैर्गुण्यते जातानि एकषष्टिः सहस्राणि त्रीणि शतानि पञ्चोत्तराणि ६१,३०५। एतस्मादभिजितस्त्रयोदशशतानि द्व्युत्तराणि शुद्धानि, स्थितानि शेषाणि षष्टिसहस्राणि त्र्युत्तराणि ६०,००३। तत्र च्छेदराशिर्द्वाषष्टिरूपः सप्तषष्ट्या गुण्यते, जातान्येकचत्वारिंशच्छतानि चतुष्पञ्चाशदधिकानि ४,१५४। तैर्भागे हृते लब्धाश्चतुर्दश १४। तेन श्रावणादिनि पुष्यपर्यन्तानि चतुर्दश नक्षत्राणि शुद्धानि, शेषाणि तिष्ठन्ति अष्टादशशतानि सप्तचत्वारिंशदधिकानि १,८४७। एतानि मुहूर्तानयनार्थं त्रिंशता गुण्यन्ते, जातानि पञ्चपञ्चाशत् सहस्राणि चत्वारि शतानि दशोत्तराणि ५५,४१०। तेषां भागे हृते लब्धा (स्त्रयोदश मुहूर्त्ताः, शेषाणि तिष्ठन्ति चतुर्दश शतानि अष्टोत्तराणि १,४०८। एतानि द्वाषष्टिभागानयनार्थं द्वाषष्ट्या गुणयितव्यानीति गुणकारच्छेदराश्योर्द्वाषष्ट्याऽपवर्त्तना क्रियते। तत्र गुणकारराशिर्जात

१. गाथाक्षरार्थः - E। २. .....र्गुणयिष्यामि - T।

एककश्छेदराशिः सप्तषष्टिः, एकेन च गुणित उपरितनो राशिर्जातस्तावानेव तस्य सप्तषष्ट्या भागे हृते लब्धा) एकविंशतिः २१, पश्चादवतिष्ठते एकः सप्तषष्टिभाग एकस्य द्वाषष्टिभागस्य। आगतं प्रथमपर्व अश्लेषायास्त्रयोदश मुहूर्त्तान् एकस्य च मुहूर्त्तस्य एकविंशतिर्द्वाषष्टिभा[गेन](गान्) एकस्य च द्वाषष्टिभागस्यैकं सप्तषष्टिभागं भुक्त्वा समाप्तमिति। तथा यदि चतुर्विंशत्यधिकेन पर्वशतेन सप्तषष्टिः पर्याया लभ्यन्ते ततो द्वाभ्यां पर्वभ्यां किं लभामहे ? राशित्रयस्थापना - १२४।६७।२। अत्रान्त्येन राशिना द्विकलक्षणेन मध्यराशिर्गुण्यते, जातं चतुस्त्रिंशदधिकं शतम्। तस्याद्येन राशिना चतुर्विंशत्यधिकशतरूपेण भागो ह्रियते, लब्ध एको नक्षत्रपर्यायः स्थिताः शेषा दश। तत एतत् नक्षत्रानयनायाष्टादशभिः शतैस्त्रिंशदधिकैः सप्तषष्टिभागैर्गुण-यिष्यामि इति गुणकारच्छेदराश्योरर्द्धेनापवर्त्तना, जातो गुणकारराशिर्नवशतानि पञ्चदशोत्तराणि ९१५, च्छेदराशिर्द्वाषष्टिस्तत्र दश नवभिः शतैः पञ्चदशोत्तरैर्गुण्यन्ते जातान्येकनवतिशतानि पञ्चाशदधिकानि ९,१५०। तेभ्यस्त्रयोदश शतानि द्व्युत्तराण्य-भिजितः शुद्धानि, स्थितानि पञ्चादष्टसप्ततिशतानि अष्टाचत्वारिंशदधिकानि ७,८४८। तत्र द्वाषष्टिरूपश्छेदराशिः सप्तषष्ट्या गुण्यते जातान्येकचत्वारिंशच्छतानि चतुष्पञ्चाशदधिकानि ४,१५४। तैर्भागे हृते लब्धमेकं श्रवणरूपं नक्षत्रं शेषाणि तिष्ठन्ति षट्त्रिंशच्छतानि चतुर्नवत्यधिकानि ३,६९४। एतानि मुहूर्त्तानयनार्थं त्रिंशता गुण्यन्ते। ततो जातमेकं लक्षं दश सहस्राणि अष्टौ शतानि विंशत्युत्तराणि १,१०,८२०। तेषां च्छेदराशिना भागे हृते लब्धाः षड्विंशतिमुहूर्त्ताः २६, शेषाणि तिष्ठन्ति षोडशोत्तराण्यष्टाविंशतिशतानि २,८१६। एतानि द्वाषष्टिभागानयनार्थं द्वाषष्ट्या गुणयितव्यानि। तत्र गुणकारच्छेदराश्योर्द्वाषष्ट्याऽपवर्त्तना। तत्र गुणकार-राशिरेकरूपो[1] (जातश्)छेदराशिः सप्तषष्टिः। तत्र एकेन उपरितनो राशिर्गुणितो जातस्तावानेव। तस्य सप्तषष्ट्या भागे हृते लब्धा द्वाचत्वारिंशत् द्वाषष्टिभागा एकस्य

१. ...रेककरूपो - D।

च द्वाषष्टिभागस्य द्वौ सप्तषष्टिभागौ। आगतं द्वितीयं पर्व धनिष्ठानक्षत्रस्य षड्विंशतिं मुहूर्त्तान् एकस्य च मुहूर्त्तस्य द्वाचत्वारिंशतं द्वाषष्टिभागा(न्) एकस्य च द्वाषष्टिभागस्य द्वौ सप्तषष्टिभागौ भुक्त्वा समाप्तिमुपगच्छतीति। एवं शेषेष्वपि पर्वसु समाप्तिनक्षत्राणि भावनीयानि। तत्सङ्ग्राहिकाश्चेमा पूर्वाचार्यप्रदर्शिताः पञ्चगाथाः - '**सप्प१ धणिट्ठा२ अज्जम३ अभिवुड्ढी४ चित्त५ आस६ [यं](इं)दग्गि७। रोहिणि८ जिट्ठा९ मिगसिर१० विस्सा११ऽदिति१२ सवण१३ पिउदेवा१४ ॥३६२॥ अज१५ [म](अज्)जम१६ अभिवुड्ढी१७ चित्ता१८ आसो१९ तहा विसाहाओ२०। रोहिणि२१ मूलो२२ अद्दा२३ वीसं२४ पुस्सो२५ धणिट्ठा२६ य॥३६३॥ भग२७ अज२८ अ(ज्)जम२९ पूसो३० साई३१ अग्गी३२ य मित्तदेवा३३ य। रोहिणि३४ पुव्वासाढा३५ पुणव्वसू३६ वीस३७ य॥३६४॥ अहि३८ वसु३९ भगा४०ऽभिवुड्ढी४१ हत्थ४२ऽस्स४३ विसाह४४ कत्ति[वस](या)४५ जेट्ठा४६। सोमा४७ऽऽउ४८ रवी४९ सवणो५० पिउ५१ व[र](रु)ण५२ भं[ा]गा५३ऽभिवुड्ढि[1] ५४ य॥३६५॥ चित्ता५५ऽऽस५६ वइसाह५७ऽग्गी५८ मूलो५९ अद्दा६० य। विस्स६१ पुस्सो६२ य, एए जुगपुव्वद्धे बिसट्ठिपव्वेसु नक्खत्ता॥३६६॥**' **(जो.प.)** एतासां (व्याख्या- प्रथमस्य पर्वणः समाप्तौ **सर्प्पः** - सर्प्पदेवतोपलक्षितं नक्षत्रं अश्लेषा १ द्वितीयस्य **धनिष्ठा** २ तृतीयस्य**आर्यमा**- अर्यमदेवतोपलक्षिता उत्तरफाल्गुन्यः ३ चतुर्थस्या**भिवृद्धिः** - अभिवृद्धिदेवतोपलक्षिता उत्तरभद्रपदा ४ पञ्चमस्य **चित्रा** ५) ष[ष्ठा स्पष्टो](ष्ठस्याश्वः-अश्व)देवतोपलक्षि[तो](ता) अश्विनी ६ सप्तमस्य (**इन्द्राग्निः**) इन्द्राग्निदेवतोपलक्षिता विशाखाः७, अष्टमस्य **रोहिणी**८, नवमस्य **ज्येष्ठा**९, दशमस्य **मृगशिरः** १०, एकादशस्य (**विष्वक्**)-विष्वक्देव-तोपलक्षिता उत्तराषाढा ११, द्वादशस्या(**दितिः** अ)दितिदेवतोपलक्षितः पुनर्वसुः १२, त्रयोदशस्य **श्रवणः** १३, चतुर्दशस्य **पितृदेवा** - मघाः १४ ॥३६२॥

१. भगोभिवुड्ढि - C, T।

पञ्चदशस्**याजो** अजदेवतोपलक्षिता पूर्वभद्रपदा षोडशस्**यार्यमा** अर्यमदेवतोपलक्षिता उत्तरफाल्गुन्यः १६, सप्तदशस्या**भिवृद्धि**रभिवृद्धिदेवतोपलक्षिता[1] उत्तरभद्रपदाः १७, अष्टादशस्य **चित्रा** १८, एकोनविंशतितमस्**याश्व**ः अश्वदेवतोपलक्षि[तः](ता) अश्विनी १९, विंशतितमस्य **विशाखा** २०, एकविंशतितमस्य **रोहिणी** २१, द्वाविंशतितमस्य **मूल[ा]**ः २२, त्रयोविंशतितमस्य **आर्द्रा**ः २३, चतुर्विंशतितमस्य (**विष्वक्**)-विष्वग्देवतोपलक्षिता उत्तराषाढाः २४, पञ्चविंशतितमस्य **पुष्य**ः २५, षड्विंशति-तमस्य **धनिष्ठा**ः २६ ॥३६३॥ सप्तविंशतितमस्य **भग**ः-भगदेवतोपलक्षिताः पूर्वफाल्गुन्यः २७, अष्टाविंशतितम**स्याज**ः - अजदेवतोपलक्षिताः पूर्वभद्रपदाः २८, एकोनत्रिंशत्तम**स्यार्यमा**-अर्यमदेवता उत्तरफाल्गुन्यः २९, त्रिंशत्तमस्य (**पुष्य**ः) पुष्यदेवताका रेवती ३०, एकत्रिंशत्तमस्य **स्वाति**ः ३१, द्वात्रिंशत्तम**स्याग्नि**ः अग्निदेवतोपलक्षिताः कृत्तिकाः ३२, त्रयस्त्रिंशत्तमस्य **मित्रदेवा**-मित्रनामा देवो यस्याः सा तथा अनुराधा इत्यर्थः ३३, चतुस्त्रिंशत्तमस्य **रोहिणी** ३४, पञ्चत्रिंशत्तमस्य **पूर्वाषाढा**ः ३५, षट्त्रिंशत्तमस्य **पुनर्वसु**ः ३६, सप्तत्रिंशत्तमस्य **विष्वग्दे**[वो](वा) उत्तराषाढा इत्यर्थः ३७ ॥३६४॥ अष्टात्रिंशत्तम**स्याहि**ः-अहिदेवतोपलक्षिता अश्लेषा ३८, एकोनचत्वारिंशत्तमस्य (**वसु**ः)-वसुदेवतोपलक्षिता धनिष्ठा ३९, चत्वारिं-शत्तमस्य **भगो**-[2]भगदे[वो](वाः) पूर्वफाल्गुन्यः ४०, एकचत्वारिंशत्तम**स्याभि**-(**वृद्धि**ः-अभि)वृद्धिदेवतोपलक्षिता उत्तरभद्रपदा ४१, द्वाचत्वारिंशत्तमस्य **हस्त**ः ४२, त्रिचत्वारिंशत्तमस्य **अश्व**ः- अश्वदेवता अश्विनी ४३, चतुश्चत्वारिंशत्तमस्य **विशाखा**ः ४४, पञ्चचत्वारिंशत्तमस्य **कृतिका** ४५, षट्चत्वारिंशत्तमस्य **ज्येष्ठा** ४६, सप्तचत्वारिंशत्तमस्य **सोम**ः सोमदेवोपलक्षितं मृगशि[र](रो)नक्षत्रं ४७, [3]अष्टचत्वारिंशत्तम**स्यायु**ः-आयुर्देवाः पूर्व्वाषाढाः ४८, एकोनपञ्चाशत्तमस्य **रवि**ः-रविनामकदेवोपलक्षितं पुनर्वसुनक्षत्रं ४९, पञ्चाशत्तमस्य **श्रवण**ः ५०,

---

१. ... देवोपलक्षिता - B, L। २. भगदेवोपलक्षिताः - M। ३. अष्टा... - T।

एकपञ्चाशत्तमस्य **पिता**-पितृदेवा मघाः ५१, द्विपञ्चाशत्तमस्य **वरुणो** वरुणदेवोपलक्षितं शतभिषक् नक्षत्रं ५२, त्रिपञ्चाशत्तमस्य **भगो** भगदेवाः पूर्वाफाल्गुन्यः ५३, चतुष्पञ्चाशत्तमस्य**ाभि(वृद्धिः**-अभि)वृद्धिदेवा उत्तरभद्रपदा ५४॥३६५॥ पञ्चपञ्चाशत्तमस्य **चित्राः** ५५, षट्पञ्चाशत्तमस्य**ाश्वः**अश्वदेवोपलक्षिता अश्विनी ५६, सप्तपञ्चाशत्तमस्य **विशाखाः** ५७, अष्टपञ्चाशत्तमस्य**ाग्नि**(: - अग्नि)देवतोपलक्षिताः कृत्तिकाः ५८, एकोनषष्टितमस्य **मूलः** ५९, षष्टितमस्य **आर्द्राः** ६०, एकषष्टितमस्य (**विष्वक्**-) विष्वग्देवा उत्तराषाढाः ६१, द्वाषष्टितमस्य **पुष्यः** ६२। एतदुपसंहारमाह– **एतानि नक्षत्राणि** युगस्य **पूर्वार्द्धे** यानि द्वाषष्टिसङ्ख्यानि पर्वाणि तेषु क्रमेण वेदितव्यानि॥३६६॥ एवं प्रागुक्तकरणवशादुत्तरार्द्धेऽपि युगस्य द्वाषष्टिसङ्ख्येषु पर्वस्ववगन्तव्यानि। सम्प्रति कस्मिन्सूर्यमण्डले किं पर्व समाप्तिं यातीति चिन्तायां [चतुः](यत्) पूर्वाचार्यैरुपदर्शितं करणं तदभिधीयते **'सूरस्स वि नायव्वो सगेण अयणेण मंडलविभागो। अयणंमि उ[ये](जे) दिवसा रूवहिए मंडले हवइ॥३६७॥'** **(जो.प.)** अस्या व्याख्या-**सूर्यस्यापि** पर्वविषयो **मण्डलविभागो** विज्ञातव्यः **स्वकीयेनायनेन**। किमुक्तं भवति ? सूर्यस्य स्वकीयमयनमपेक्ष्य तस्मिन् तस्मिन् मण्डले तस्य तस्य पर्वणः परिसमाप्तिरवधारणीयेति[1]। तत्रा**यने** शोधिते सति **ये दिवसा** उद्धरिता वर्त्तन्ते तत्सङ्ख्ये **रूपाधिके मण्डले** त[त ई](दी)प्सितं पर्व परिसमाप्तं **भवती**ति वेदितव्यम्॥३६७॥ एषा करणगाथाक्षरघटना। भावार्थस्त्वयं-इह यत्पर्व्व कस्मिन्मण्डले समाप्तमिति ज्ञातुमिष्यते तत्सङ्ख्या ध्रियते, धृत्वा च पञ्चदशभिर्गुण्यते गुणयित्वा च रूपाधिका क्रियते। ततः सम्भव(न्)तोऽवमरात्राः पात्यन्ते। ततो यदि त्र्यशीत्यधिकेन शतेन भागः पतति, तर्हि भागे हृते यल्लब्धं तान्ययनानि ज्ञातव्यानि केवलं या पश्चाद्दिवससङ्ख्याऽवतिष्ठते तदन्तिमे मण्डले विवक्षितं पर्व परिसमाप्तमित्यवसेयं[2], उत्तरायणे च वर्त्तमाने बाह्यमण्डलमादि

१. ...धार्येति - T। २. समाप्त... - G, K।

कर्त्तव्यं दाक्षिणायने च सर्वाभ्यन्तरमिति। सम्प्रति भावना क्रियते। तत्र कोऽपि पृच्छति-[त](क)स्मिन्मण्डले स्थितः सूर्यो युगे प्रथमं (पर्व) परिसमापयतीति ? इह प्रथमं पर्व पृष्टमित्येकको[१] ध्रियते, (स पञ्चदशभिर्गुण्यते) जाताः पञ्चदश। अत्रैकोऽप्यवमरात्रो न सम्भवतीति न किमपि पात्यते। ते च पञ्चदश रूपाधिकाः क्रियन्ते, जाताः षोडश, युगादौ च प्रथमं पर्व दक्षिणायने। तत आगतं सर्वाभ्यन्तरं मण्डलमादि कृत्वा षोडशे मण्डले प्रथमं पर्व परिसमाप्तमिति। तथा अपरः पृच्छति-चतुर्थं पर्व कस्मिन् मण्डले समाप्नोतीति ? तत्र चतुष्को ध्रियते, धृत्वा च पञ्चदशभिर्गुण्यते, जाता षष्टिः। अत्रैकोऽवमरात्रः सम्भवतीत्येकः पात्यते, जाता एकोनषष्टिः ५९। सा भूयोऽप्येकरूपयुक्ता[२] क्रियते, जाता षष्टिः। आगतं सर्वाभ्यन्तरमण्डलमादि कृत्वा षष्टितमे मण्डले चतुर्थं पर्व समाप्तमिति। तथा पञ्चविंशतितमपर्वजिज्ञासायां पञ्चविंशतिः स्थाप्यते। सा पञ्चदशभिर्गुण्यते, जातानि त्रीणि शतानि पञ्चसप्तत्यधिकानि ३७५। अत्र षडवमरात्राः जाता इति षट् शोध्यन्ते, जातानि त्रीणि शतानि एकोनसप्तत्यधिकानि ३६९। तेषां त्र्यशीत्यधिकेन शतेन भागो ह्रियते, लब्धौ द्वौ, पश्चात्तिष्ठन्ति त्रीणि। [श]तानि रूपयुक्तानि[३] क्रियन्ते, जातानि चत्वारि। [यो] (यौ च द्वौ) लब्धौ ताभ्यां द्वे अयने दक्षिणायनोत्तरायणरूपे शुद्धे। तत आगतं तृतीये अयने दक्षिणायनरूपे सर्वाभ्यन्तरं मण्डलमादि कृत्वा चतुर्थे मण्डले पञ्चविंशतितमं पर्व समाप्तमिति। चतुर्विंशत्यधिकशततमपर्वजिज्ञासायां चतुर्विंशत्यधिकं शतं स्थाप्यते। तत्पञ्चदशभिर्गुण्यते, जातान्यष्टादश शतानि षष्ट्यधिकानि १,८६०। चतुर्विंशत्यधिकपर्वशते च त्रिंशदवमरात्रा भूता इति त्रिंशत् पात्यते, जातानि पञ्चाशदष्टादश शतानि त्रिंशदधिकानि १,८३०। तानि रूपयुतानि क्रियन्ते, जातान्यष्टादश शतानि एकत्रिंशदधिकानि १,८३१। तेषां त्र्यशीत्यधिकेन शतेन भागे हृते लब्धानि दशायनानि पञ्चाशदवतिष्ठते एकः, दशमं च अयनं युगपर्यन्ते

१. ....त्येको - T। २. ...युता - T। ३. ....युतानि - G, N।

उत्तरायणम्। तत आगतमुत्तरायणपर्यन्ते सर्वाभ्यन्तरे मण्डले चतुर्विंशत्यधिकं[१] शततमं पर्व समाप्तमिति। सम्प्रति किं पर्व कस्मिन् सूर्यनक्षत्रे समाप्तिमधिगच्छतीति एतन्निरूपणार्थं यत्पूर्व्वाचार्यैः करणमुक्तं तदुपदर्श्यते- **'चउवीससयं काऊण पमाणं पज्जवा य पंच फलं। इच्छापव्वेहिं गुणं काऊणं प[व्व](ज्ज)या लद्धा॥३६८॥ अट्ठारसहिं सएहिं तीसेहिं सेसगम्मि गुणियम्मि। सत्तावीससएसु अट्ठावीसेसु पुस्संमि॥३६९॥ सत्तट्ठिबिसट्ठीणं सव्वग्गेणं तओ य जं सेसं। तं रिक्खं सूरस्स उ [अ](ज)त्थ समत्तं हवइ पव्वं॥३७०॥' (जो.प.)** एतासां तिसृणां गाथानां क्रमेण व्याख्या- त्रैराशिकविधौ **चतुर्विंशत्यधिकं शतं प्रमाणं**- प्रमाणराशिं **कृत्वा पञ्च पर्यायान् फलं** कुर्यात्, कृत्वा **ईप्सितैः पर्वभिः गुणं** गुणकारं विदध्यात्, विधाय चाऽऽद्येन राशिना चतुर्विंशत्यधिकशतरूपेण भागो हर्त्तव्यो, भागे च हृते यल्लब्धं ते **पर्यायाः** शुद्धा ज्ञातव्याः॥३६८॥ यत्पुनः शेषमवतिष्ठते तत् **अष्टादशभिः शतैः त्रिंशदधिकै**र्गुण्यते, **गुणिते**[२] च तस्मिन् **सप्तविंशतिशतेष्वष्टाविंशत्यधिकेषु** शुद्धेषु पुष्यः शुध्यति॥३६९॥ तस्मिन्शुद्धे सप्तषष्टिसङ्ख्या या द्वाषष्टयस्तासां **सर्वाग्रेण** यद्भवति, किमुक्तं भवति ? सप्तषष्ट्या द्वाषष्टौ गुणितायां यद्भवति तेन भागे हृते यत् लब्धं तावन्ति नक्षत्राणि शुद्धानि द्रष्टव्यानि, **यत्पुनस्ततो**ऽपि भागहरणादपि **शेषमवतिष्ठते तत् ऋक्षं सूर्यस्य** सम्बन्धि द्रष्टव्यं **यत्र** विवक्षितं **पर्व समाप्तमिति**॥३७०॥ एष करणगाथात्रयाक्षरार्थः। भावना त्वियं - यदि चतुर्विंशत्यधिकेन पर्वशतेन पञ्च सूर्यनक्षत्रपर्याया लभ्यन्ते तत एकेन पर्वणा किं लभामहे ? राशित्रयस्थापना १२४।५।१। अत्रान्त्येन राशिना मध्यराशिर्गुण्यते, जातस्तावानेव[३] पञ्चरूपः। तस्याद्येन राशिना चतुर्विंशत्यधिकेन शतेन भागहरणम्। स च स्तोकत्वाद्भागं न प्रय[४]च्छति। ततो नक्षत्राऽऽनय-

---

१. ....त्यधिकशततमं - E, G। २. गुणिते तस्मिन् - A, गुणिते चास्मिन् - T। ३. पञ्चकरूपः - E। ४. यच्छति - D।

नार्थमष्टादशभिः शतैस्त्रिंशदधिकैः सप्तषष्टिभागैर्गुणयिष्याम इति गुणकारच्छेद-राश्योरर्द्धेनाऽपवर्त्तना, जातो गुणकारराशिर्नवशतानि पञ्चदशोत्तराणि ९१५, च्छेदराशिः द्वाषष्टिः ६२। तत्र पञ्च नवभिः शतैः पञ्चदशोत्तरैर्गुण्यन्ते, जातानि पञ्च-चत्वारिंशत्शतानि पञ्चसप्तत्यधिकानि ४,५७५। पुष्यस्य चतुश्चत्वारिंशद्भागा द्वाषष्ट्या गुण्यन्ते, जातानि सप्तविंशतिशतानि अष्टाविंशत्यधिकानि २,७२८। एतानि पूर्वराशेः शोध्यन्ते, स्थितानि पञ्चादष्टादशशतानि सप्तचत्वारिंशदधिकानि १,८४७। तत्र च्छेदराशिर्द्वाषष्टिरूपः सप्तषष्ट्या गुण्यते, जातान्येकचत्वारिंशत् शतानि चतुष्पञ्चाशदधिकानि ४,१५४। तैर्भागो ह्रियते। तत्र राशेः स्तोकत्वाद्भागो न लभ्यते। ततो दिवसा आनेतव्याः। तत्र च्छेदराशिः द्वाषष्टिरूपः, परिपूर्णनक्षत्रा-नयनार्थं हि द्वाषष्टिः सप्तषष्ट्या गुणिता, परिपूर्णं च नक्षत्रमिदानीं (ना)या[नि](ति)। ततो मौल एव द्वाषष्टिरूपच्छेदराशिः, केवलं पञ्चभिः सप्तषष्टिभागैरहोरात्रो भवति, ततो दिवसानयनाय द्वाषष्टिः पञ्चभिर्गुण्यते, जातानि त्रीणि शतानि दशोत्तराणि ३१०। तैर्भागो ह्रियते, लब्धाः पञ्च दिवसाः, शेषं तिष्ठ[न्ति](तो) द्वे शते सप्तनवत्यधिके २९७। ते मुहूर्त्तानयनार्थं त्रिंशता गुण्येते। तत गुणकारच्छेदराश्योः शून्येनाऽपवर्त्तना, जातो गुणकारराशिस्त्रिकरूपश्च्छेदराशिरेकत्रिंशत्। तत्र त्रिकेनोपरितनो राशिर्गुण्यते जातान्यष्टौ शतानि एकनवत्यधिकानि ८९१। तेषामेकत्रिंशता भागो ह्रियते, लब्धा अष्टाविंशतिमुहूर्त्ताः २८, एकस्य च मुहूर्त्तस्य त्रयोविंशतिरेकत्रिंशद्भागाः २३/३१। आगतं प्रथमपर्व अश्लेषानक्षत्रस्य पञ्च दिवसानेकस्य च दिवसस्याष्टाविंशतिं मुहूर्त्तानेकस्य च मुहूर्त्तस्य त्रयोविंशतिमेकत्रिंशद्भागान् भुक्त्वा समाप्तम्। अथवा पुष्ये शुद्धे यानि स्थितानि पञ्चादष्टादशशतानि सप्तचत्वारिंशदधिकानि १,८४७ तानि सूर्यमुहूर्त्ताऽऽनयना[नित]य त्रिंशता गुण्यन्ते, जातानि पञ्चपञ्चाशत्सहस्राणि चत्वारि शतानि दशोत्तराणि ५५,४१०। तेषां प्रागुक्तेन च्छेदराशिना ४,१५४ भागो ह्रियते, लब्धास्त्रयोदशमुहूर्त्ताः १३, शेषाणि तिष्ठन्ति चतुर्दशशतानि अष्टोत्तराणि १,४०८।

ततोऽमूनि द्वाषष्टिभागानयनार्थं द्वाषष्ट्या गुणयितव्यानि इति गुणकारच्छेद-राश्योर्द्वाषष्ट्याऽपवर्त्तना, तत्र गुणकारराशिर्जात एककरूपकश्छेदराशिः सप्तषष्टिरूपः। तत्र एकेन गुणितो राशिस्तावानेव जातः १,४०८, तस्य सप्तषष्ट्या भागो ह्रियते, लब्धा एकविंशतिः २१ द्वाषष्टिभागा मुहूर्त्तस्य एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभागः। तत आगतं युगस्यादौ प्रथमं पर्व अमावास्यालक्षणमश्लेषानक्षत्रस्य त्रयोदशमुहूर्त्तानेकस्य च मुहूर्त्तस्य एकविंशतिं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य एकं सप्तषष्टिभागं भुक्त्वा सूर्यः समापयति। तथा च वक्ष्यति- **'ता एएसिं णं पंचण्हं संवच्छराणं पढमं अमावासं चंदे केण नक्खत्तेणं जोएइ ? ता असिलेसाहिं, अ[श्ले](सिले)साणं [पव्वेतेरस] (एग)मुहुत्ते चत्तालीसं बावट्ठीभागा मुहुत्तस्स बावट्ठीभागं च सत्तट्ठिहा छित्ता छावट्ठी चुण्णिया सेसा, तं समयं च णं सूरे केणं नक्खत्तेणं जोएइ ? [जोइत्ता] (ता) असिलेसाहिं चेव, असिलेसाणं एक्को मुहुत्तो चत्तालीसं बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा च्छेत्ता च्छावट्ठी चुन्निया सेसा।'** (पृ.४०५) इति। [य](त)था यदि चतुर्विंशत्यधिकेन पर्वशतेन पञ्च सूर्यनक्षत्रपर्याया लभ्यन्ते, ततो द्वाभ्यां पर्वाभ्यां किं लभामहे ? राशित्रयस्थापना १२४।५।२। अत्रान्त्येन राशिना द्विकलक्षणेन मध्यराशिः [१]पञ्चरूपो गुण्यते, जाता(दश)१०। तेषामाद्येन राशिना भागहरणं, ते च स्तोकत्वाद्भागं न प्रयच्छन्ति। ततो नक्षत्रानयनार्थमष्टादशभिः शतैस्त्रिंशदधिकैर्गुणयितव्या इति, गुणकारच्छेदराश्योरर्द्धेनापवर्त्तनाज्जातो गुणकार-राशिर्नवशतानि पञ्चदशोत्तराणि ९१५, च्छेदराशिः द्वाषष्टिः ६२। तत्र नवभिः शतैः पञ्चदशोत्तरैर्दश गुण्यन्ते, जातान्येकनवतिशतानि पञ्चाशदधिकानि ९,१५०। तेभ्यः सप्तविंशतिशतान्यष्टाविंशत्यधिकानि पुष्यसत्कानि शोध्यन्ते, स्थितानि पञ्चाच्चतुः-षष्टिशतानि द्वाविंशत्यधिकानि ६,४२२। च्छेदराशिर्द्वाषष्टिरूपः सप्तषष्ट्या गुण्यते,

१. पञ्चकरूपो - J, T।

जातानि एकचत्वारिंशच्छतानि चतुष्पञ्चाशदधिकानि ४,१५४। तैर्भागो ह्रियते, लब्धमेकं नक्षत्रं, तच्चाश्लेषारूपमश्लेषानक्षत्रं चार्द्धक्षेत्रम्। अत एतद्गताः पञ्चदश सूर्यमुहूर्त्ता अधिका वेदितव्याः, शेषाणि तिष्ठन्ति द्वाविंशतिः शतान्यष्टषष्ट्यधिकानि २,२६८। ततो मुहूर्त्तानयनार्थमेतानि त्रिंशता गुण्यन्ते, जातान्यष्टषष्टिः सहस्राणि चत्वारिंशदधिकानि ६८,०४०। तेषां छेदराशिना ४,१५४ भागो ह्रियते, लब्धा षोडश सूर्यमुहूर्त्ताः १६, शेषाण्यवतिष्ठन्ते पञ्चदशशतानि षट्सप्तत्यधिकानि १,५७६। तानि द्वाषष्टिभागानयनार्थं द्वाषष्ट्या गुणयितव्यानीति गुणकारच्छेदराश्योर्द्वाषष्ट्याऽपवर्तनात् जातो गुणकारराशिरेककरूपश्छेदराशिः सप्तषष्टिः ६७। तत्रोपरितनो राशिरेकगुणितस्तावानेव जातः। तस्य सप्तषष्ट्या भागे हृते लब्धास्त्रयोविंशतिद्वाषष्टिभागाः २३ एकस्य च द्वाषष्टिभागस्य पञ्चत्रिंशत् सप्तषष्टिभागाः ३५। तत्र ये लब्धाः षोडशमुहूर्त्ता ये चोद्धरिताः पाश्चात्याः पञ्चदशमुहूर्त्तास्ते एकत्र मील्यन्ते, जाता एकत्रिंशत् ३१। तत्र त्रिंशता मघाः शुद्धाः पश्चादुद्धरत्येकः सूर्यमुहूर्त्तः। तत आगतं द्वितीयं पर्व श्रावणमासभाविपौर्णमासीरूपं पूर्वफाल्गुनीनक्षत्रस्यैकं मुहूर्त्तमेकस्य च मुहूर्त्तस्य त्रयोविंशतिं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य पञ्चत्रिंशतं सप्तषष्टिभागान् भुक्त्वा सूर्यः परिसमापयतीति। तथा च वक्ष्यति- '**(ता) एएसि णं पंचण्हं संवच्छराणं पढमं पुण्णमासिं चंदे केणं नक्खत्तेणं जोएइ ? ता धणिट्ठाहिं, धणिट्ठाणं तिण्णि मुहुत्ता एगूणवीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा च्छेत्ता पन्नट्ठी चुन्निया भागा सेसा, तं समयं च णं सूरे केणं नक्खत्तेणं जोएइ ? ता पुव्वाहिं फग्गुणीहिं, पुव्वाणं फग्गुणीणं अट्ठावीसं मुहुत्ता अट्ठ[ावी](ती)सं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा च्छेत्ता बत्तीसं चुण्णिया भागा सेसा।**' (पृ.३९५) इति। [य](त)था यदि चतुर्विंशत्यधिकेन पर्वशतेन पञ्च सूर्यनक्षत्रपर्याया लभ्यन्ते ततस्त्रिभिः पर्वभिः किं लभामहे ? राशित्रयस्थापना

१२४।५।३। अत्रान्त्येन राशिना त्रिकलक्षणेन मध्यो राशिः पञ्चकरूपो गुण्यते, जाताः पञ्चदश १५। तेषामाद्येन राशिना भागहरणम्। तत्र राशेः स्तोकत्वात् भागो न लभ्यते। ततो नक्षत्रानयनार्थमष्टादशभिः शतैस्त्रिंशदधिकैः सप्तषष्टिभागैर्गुणयिष्याम इति गुणकारच्छेदराश्योरर्द्धेनाऽपवर्त्तनात् जातो गुणकारराशिर्नवशतानि पञ्चदशोत्तराणि ९१५ छेदराशिर्द्वाषष्टिः ६२। [सप्त] तत्र नवभिः शतैः पञ्चदशोत्तरैः पञ्चदश गुण्यन्ते, जातानि त्रयोदशसहस्राणि सप्तशतानि पञ्चविंशत्यधिकानि १३,७२५। तेभ्यः सप्तविंशतिशतानि अष्टाविंशत्यधिकानि पुष्यसत्कानि शोध्यन्ते, स्थितानि (पश्चाद्) दशसहस्राणि नव शतानि सप्तनवत्यधिकानि १०,९९७। छेदराशिर्द्वाषष्टिरूपः सप्तषष्ट्या गुणितो जातान्येकचत्वारिंशच्छतानि चतुष्पञ्चाशदधिकानि ४,१५४। तैर्भागो ह्रियते। लब्धे द्वे नक्षत्रे ते चाश्लेषामघारूपे, अश्लेषानक्षत्रं चार्द्धक्षेत्रमित्येतद्गताः[1] पञ्चदशसूर्यमुहूर्त्ता उद्धरिता वेदितव्याः, शेषाणि तिष्ठन्ति षड्विंशतिशतानि नवाशीत्यधिकानि २,६८९। एतानि मुहूर्त्ताऽऽनयनार्थं त्रिंशता गुण्यन्ते, जातान्यशीतिसहस्राणि षट्शतानि सप्तत्यधिकानि ८०,६७०। तेषां च्छेदराशिना ४,१५४ भागो ह्रियते, लब्धा एकोनविंशतिमुहूर्त्ताः १९ शेषाण्यवतिष्ठन्ते सप्तदशशतानि चतुश्चत्वारिंशदधिकानि १,७४४। एतानि द्वाषष्टिभागानयनार्थं द्वाषष्ट्या गुणयितव्यानि इति गुणकारच्छेदराश्योर्द्वाष्ट्यापवर्त्तनाज्जातो गुणकारराशिरेकरूपः १ च्छेदराशिः सप्तषष्टिः ६७। तत्रोपरितनो राशिरेकेन गुणितस्तावानेव जातः १,७४४। (तस्य) सप्तषष्ट्या भागे हृते लब्धा षड्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य द्वौ सप्तषष्टिभागौ २६/६२ २/६७। तत्र ये लब्धा एकोनविंशतिमुहूर्त्ता ये चोद्धरिताः पाश्चात्याः पञ्चदशमुहूर्त्तास्ते एकत्र मील्यन्ते, जाताश्चतुस्त्रिंशन्मुहूर्त्ताः। तत्र त्रिंशता पूर्वफाल्गुनी शुद्धा, शेषास्तिष्ठन्ति चत्वारो मुहूर्त्ताः। तत आगतं तृतीयं पर्व भाद्रपदगतममावास्यारूपमुत्तरफाल्गुनीनक्षत्रस्य चतुरो मुहूर्त्तानेकस्य च मुहूर्त्तस्य

१. पञ्चदशमुहूर्त्ता - K।

षड्विंशतिं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य द्वौ सप्तषष्टिभागौ भुक्त्वा सूर्यः परिसमापयति। तथा च वक्ष्यति- **'ता एएसि णं पंचण्हं संवच्छराणं दोच्चं अमावासं चंदे केणं नक्खत्तेणं जोए[त्ता](इ ? ता) उत्तराहिं (फग्गुणीहिं) उत्तराणं फग्गुणीणं चत्तालीसं मुहुत्ता पणतीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा च्छेत्ता पन्नट्ठी चुन्निया भागा सेसा, तं समयं च णं सूरे केणं नक्खत्तेणं जोए[त्ता](इ ? ता) उत्तराहिं चेव फग्गुणीहिं उत्तराणं फग्गुणीणं चत्तालीसं मुहुत्ता पणतीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता पन्नट्ठी चुण्णिया भागा सेसा'** (पृ.४०५) इति। एवं शेषपर्वसत्कान्यपि सूर्यनक्षत्राण्यानेतव्यानि। अथ[चे](वे)दं पर्वसु सूर्यनक्षत्रपरिज्ञानार्थं [१]पूर्वाचार्योपदर्शितं करणं **'तेत्तीसं च मुहुत्ता बिसट्ठिभागा य दो मुहुत्तस्स। चोत्तीसं चुन्निया भागा [पु](प)व्वीकयरिक्खधूवरासी॥१॥ इच्छापव्वगुणाओ धुवरासीओ य सोहणं कुणसु। पूसाईणं कमसो जहदिट्ठमणंतनाणीहिं॥२॥ [२]उगुणवीसं च मुहुत्ता तेयालीसं बिसट्ठीभागा य। तेत्तीसं चुन्नियाओ पूसस्स य सोहणं एयं॥३॥ [३]उगुयाल[सं](सयं) उत्तरफग्गुणीयंता गुणट्ठ दो विसाहासु। चत्तारि नवुत्तर उत्तराणसाढाण सोज्झाणि॥४॥ सव्वत्थ** (ग्रन्थाग्रं ५,०००) **[पोस](पु)स्स[णं](सेसं) सोज्झं अभिइस्स चउर उगुवीसा। बावट्ठी छ[ब्भं](ब्भा)गा बत्तीसं चुन्निया भागा॥५॥ उगूणउत्तरपंचसया उत्तरभद्दवय सत्त उगुवीसा। रोहिणी अट्ठनवोत्तर पुणव्वसंतंमि सोज्झाणि॥६॥ अट्ठ सया उगुवीसा बिसट्ठिभागा य होंति चउवीसं। छावट्ठी सत्तट्ठीभागा पुस्सस्स सोहणगं॥७॥'** एतासां क्रमेण व्याख्या-**त्रयस्त्रिंशन्मुहूर्त्ता** एकस्य च **मुहूर्त्तस्य द्वौ द्वाषष्टिभागा**वेकस्य च द्वाषष्टिभागस्य **चतुस्त्रिंशत् चूर्णिकाभागाः** ३३।२।३४, एष सर्व्वेष्वपि पर्वसु **पर्व्वीकृतः** एकेन पर्वणा निष्पादित

१. पूर्वाचार्यैरुपदर्शितं - T। २. इगुवीसं - G, उगुवीसं - B। ३. इगुयाल - A, C, D, E, F, G, H।

ऋक्षध्रुवराशिः सूर्यनक्षत्रविषयो ध्रुवराशिः। कथमेतस्योत्पत्तिरिति चेत् ? उच्यते, त्रैराशिकात्, तच्चेदं त्रैराशिकं-यदि चतुर्विंशत्यधिकेन पर्वशतेन पञ्च सूर्यनक्षत्रपर्याया लभ्यन्ते, तत एकेन पर्वणा किं लभामहे ? राशित्रयस्थापना १२४।५।१। अत्रान्त्येन राशिना मध्यराशिर्गुण्यते[१], जातः स तावानेव, एकेन गुणितं तदेव भवतीति वचनात्। ततश्चतुर्विंशत्यधिकेन पर्वशतेन भागो ह्रियते। तत्रोपरितनराशेः स्तोकत्वात् भागो न लभ्यते, लब्धा एकस्य सूर्यनक्षत्रपर्यायस्य (पञ्च) चतुर्विंशत्यधिकशतभागाः। तत्र नक्षत्राणि कुर्म्म इत्यष्टादशभिः शतैस्त्रिंशदधिकैः सप्तषष्टिभागैः पञ्च गुणयिष्याम इति गुण(कारच्छेद)राश्योरर्द्धेनापवर्त्तनाज्जातो गुणकारराशिर्नवशतानि पञ्चदशोत्तराणि ९१५, छेदराशिर्द्वाषष्टिः ६२। तत्र नवभिः शतैः पञ्चदशोत्तरैः पञ्च गुण्यन्ते, जातानि पञ्चचत्वारिंशच्छतानि पञ्चसप्तत्यधिकानि ४,५७५। एतानि मुहूर्त्तानयनार्थं त्रिंशता गुण्यन्ते, जातमेकं लक्षं सप्तत्रिंशत्सहस्राणि द्वे[२] शते पञ्चाशदधिके १,३७,२५०, च्छेदराशिश्च द्वाषष्टिरूपः सप्तषष्ट्या गुण्यते, जातान्येकचत्वारिंशच्छतानि चतुष्पञ्चाशदधिकानि ४,१५४। तैर्भागो ह्रियते, लब्धास्त्रयस्त्रिंशन्मुहूर्त्ताः ३३ शेषं तिष्ठत्यष्टषष्ट्यधिकं शतं १६८। एतत् द्वाषष्टिभागानयनार्थं द्वाषष्ट्या गुणयितव्यमिति गुणकारच्छेदराश्योर्द्वाषष्ट्याऽपवर्त्तना[३]ज्जातो गुणकारराशिरेकरूपश्छेदराशिः सप्तषष्टिरूपः, एकेन च गुणितं तदेव भवति, ततोऽष्टषष्ट्यधिकमेव शतं जातम्, तस्य सप्तषष्ट्या भागो ह्रियते लब्धौ द्वौ द्वाषष्टिभागावेकस्य[४] च द्वाषष्टिभागस्य चतु[र्विं](स्त्रिं)श(त्) सप्तषष्टिभागा इति॥१॥ **'इच्छापव्वे'**त्यादि। इच्छाविषयं यत् पर्व-पर्वसङ्ख्या[नां च](नं त)दिच्छापर्व तद्गुणो-गुणकारो यस्य ध्रुवरा[शि](शे)स्तस्मात्, किमुक्तं भवति ? ईप्सितं यत् पर्व्व तत्सङ्ख्यया गुणितात् **ध्रुवराशेः पुष्यादीनां** नक्षत्राणां **क्रमशः** क्रमेण **शोधनं कुर्यात् यथादिष्टं**-यथाकथितमनन्तज्ञानिभिः॥२॥ कथं कथितमित्याह – **'उगु(ण)वीसं चे'**त्यादि गाथा।

१. मध्यो राशि... - N। २. द्विशते - H, I। ३. ...र्त्तना जातो - T। ४. ...कस्य द्वाषष्टि...- T।

एकोनविंशतिमुहूर्त्ता एकस्य मुहूर्त्तस्य **त्रिचत्वारिंशत् द्वाषष्टिभागा** एकस्य द्वाषष्टिभागस्य[१] **त्रयस्त्रिंशत् चूर्णिकाभागाः** - सप्तषष्टिभागाः १९।४३।३३, **एतत्** – एतावत्प्रमाणं **पुष्यस्य शोधनकम्**, कथमेतावतः पुष्यशोधनकस्योत्पत्तिरिति चेत् ? उच्यते, इह पाश्चात्ययुगपरिसमाप्तौ पुष्यस्य त्रयोविंशतिः सप्तषष्टिभागाः गताश्चतुश्चत्वारिंशदवतिष्ठन्ते। ततस्ते मुहूर्त्ताऽऽनयनार्थं त्रिंशता गुण्यन्ते, जातानि त्रयोदशशतानि विंशत्यधिकानि १,३२०। तेषां सप्तषष्ट्या भागो ह्रियते, लब्धा एकोनविंशतिमुहूर्त्ताः १९, शेषा तिष्ठति सप्तचत्वारिंशत् ४७। सा द्वाषष्टिभागानयनार्थं द्वाषष्ट्या गुण्यते, जातान्येकोनत्रिंशत् शतानि चतुर्दशोत्तराणि २,९१४। तत एतेषां सप्तषष्ट्या भागो ह्रियते, लब्धास्त्रिचत्वारिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशत् सप्तषष्टिभागा इति॥३॥ **'उगुयालसय'**मित्यादि। **एकोनचत्वारिंशं** एकोनचत्वारिंशदधिकं मुहूर्त्त[ग](**श**)त[उ](**मु**)त्तरफाल्गुनीना**मुत्तरफाल्गुनीपर्यन्तानां** नक्षत्राणां शोध्यम् १३९, **द्वे शते एकोनषष्ट्यधिके विशाखासु**-विशाखापर्यन्तेषु शोध्ये २५९, **चत्वारि** मुहूर्त्तशतानि **नवोत्तराणि उत्तराषाढानां** उत्तराषाढापर्यन्तानां नक्षत्राणां **शोध्यानि** ४०९॥४॥ **'सव्वत्थे'**त्यादि। एतेषु **सर्व्वेष्व**पि शोधनकेषु यत्**पुष्यस्य** मुहूर्त्तेभ्यः **शेषं**-त्रिचत्वारिंशत् मुहूर्त्तस्य द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशत् सप्तषष्टिभागा इति तत्प्रत्येकं **शोधनीयम्**, तथा **अभिजितश्चत्वारि** मुहूर्त्तशतानि **एकोनविं[शत्ये](शानि)**-एकोनविंशत्यधिकानि **षड् द्वाषष्टिभागा** मुहूर्त्तस्य एकस्य च द्वाषष्टिभागस्य **द्वात्रिंशत् चूर्णिकाभागाः** - सप्तषष्टिभागा इति शोध्यं, एतावता पुष्यादीन्यभिजिदन्तानि नक्षत्राणि शुध्यन्तीति भावार्थः॥५॥ तथा **'उगूणत्तरे'**त्यादि। **एकोनसप्ततानि** - एकोनसप्तत्यधिकानि **पञ्च** मुहूर्त्तशतानि उत्तरभद्रपदानां **उत्तरभद्रपदान्तानां** शोध्यानि ५६९, **सप्तशतान्येकोनविंशान्ये**कोनविंशत्यधिकानि **रोहिणी**पर्यन्तानां शोध्यानि ७१९, **पुनर्वस्वन्ते**-

१. द्विषष्टि-... H, K।

पुनर्वसुपर्यन्ते **अष्टौ** शतानि **नवोत्तराणि शोध्यानि** ८०९॥६॥ **'अट्ठ सए'**त्यादि। **अष्टौ शतान्येकोनविंश[त]ानि**-एकोनविंशत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य **चतुर्विंशतिद्वाषष्टिभागा** एकस्य च द्वाषष्टिभागस्य **षट्षष्टिः सप्तषष्टिभागा** इति **पुष्यस्य शोधनक**मेतावता परिपूर्ण एको नक्षत्रपर्यायः शुध्यतीति तात्पर्यार्थः॥७॥ एष करणगाथाऽक्षरार्थः। सम्प्रति करणभावना क्रियते- तत्र कोऽपि पृच्छति प्रथमं पर्व कस्मिन् सूर्यनक्ष[त्र](त्रे) परिसमाप्तिमुपैति ? तत्र ध्रुवराशिस्त्रयस्त्रिंशन्मुहूर्त्ता एकस्य च मुहूर्त्तस्य द्वौ द्वाषष्टिभागावेकस्य (च द्वाषष्टिभागस्य) चतुस्त्रिंशत् सप्तषष्टिभागा इत्येवंरूपो ध्रियते ३३।२।३४, धृत्वा [१]चैकेन गुण्य[न्]ते, एकेन गुणितं तदेव भवति। ततः पुष्यशोधनकमेकोनविंशतिमुहूर्त्ता एकस्य च मुहूर्त्तस्य त्रिचत्वारिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशत् सप्तषष्टिभागा इत्येवम्प्रमाणं शोध्यते। ततः स्थितास्त्रयोदश मुहूर्त्ता एकस्य च मुहूर्त्तस्य एकविंशतिद्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्यैकः सप्तषष्टिभा[गाः](गः) १३।२१।१। तत आगतमेतावदश्लेषानक्षत्रस्य सूर्यो भुक्त्वा प्रथमं पर्व श्रावणमासभाव्यमावास्यालक्षणं परिसमापयति इति। द्वितीय-पर्वचिन्तायां स एव ध्रुवराशिः ३३।२।३४ द्वाभ्यां गुण्यते, जाता षट्षष्टिमुहूर्त्ता एकस्य च मुहूर्त्तस्य पञ्च द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभागः ६६।५।१। एतस्मात् यथोदितप्रमाणं १९।४३।३३ पुष्यशोधनकं शोध्यते। स्थिताः पश्चात् षट्चत्वारिंशन्मुहूर्त्ताः त्रयोविंशतिद्वाषष्टिभागा मुहूर्त्तस्य एकस्य च द्वाषष्टिभागस्य पञ्चत्रिंशत् सप्तषष्टिभागाः ४६।२३।३५। ततः पञ्चदशभिर्मुहूर्त्तैरश्लेषा शुद्धा त्रिंशता मघाः, स्थितः पश्चादेको मुहूर्त्तः। तत आगतं द्वितीयं पर्व पूर्वफाल्गुनीनक्षत्र[श्चै](स्यै)कं मुहूर्त्तमेकस्य च मुहूर्त्तस्य त्रयोवशितिं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य पञ्चत्रिंशतं सप्तषष्टिभागान् भुक्त्वा सूर्यः समाप्तिं नयति। तृतीयपर्वचिन्तायां स एव ध्रुवराशिः ३३।२।३४ त्रिभिर्गुण्यते, जाता नवनवतिमुहूर्त्ता

१. एककेन - T।

एकस्य च मुहूर्त्तस्य सप्त द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य पञ्चत्रिंशत् सप्तषष्टिभागाः ९९।७।३५। एतस्मात् पुष्यशोधनकं १९।४३।३३ शोध्यते। स्थिताः पश्चादेको[नसप्तति](नाशीति)मुहूर्त्ता एकस्य च मुहूर्त्तस्य षड्विंशतिद्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य द्वौ सप्तषष्टिभागौ ७९।२६।२। ततः पञ्चदशभिर्मुहूर्त्तैरश्लेषा त्रिंशता मघा त्रिंशता पूर्वफाल्गुनी, स्थिताः पश्चात् चत्वारो मुहूर्ताः। आगतं तृतीयं [पू](प)र्व भाद्रपदामावास्यारूपमुत्तरफाल्गुनीनक्षत्रस्य चतुरो मुहूर्त्तानेकस्य च मुहूर्त्तस्य षड्विंशतिं द्वाषष्टिभागानेकस्य[1] च द्वाषष्टिभागस्य द्वौ सप्तषष्टिभागौ भुक्त्वा सूर्यः परिसमापयति। एवं शेषपर्वस्वपि सूर्यनक्षत्राणि वेदितव्यानीति। तत्र युगपूर्वार्द्धभाविद्वाषष्टिपर्वगत-सूर्यनक्षत्रसू[च](चि)का इमाः पूर्वाचार्योपदर्शिता गाथाः- **'सप्प१ भग२ अज्जमदुगं-३-४ हत्थो५ चित्ता६ विसाह७ मित्तो८ य। जेट्ठाइगं च च्छक्कं९-१४ अजा१५ऽभिवु[षज्जी]ट्ठी दु१६-१७ पूसा१८ऽऽसा१९॥३७७॥ छक्कं च कत्तियाई२०-२५ पीइ२६ भग२७ अज्जमदुगं२८-२९ च चित्ता३० य। वाउ३१ विसाह३२ अणुराह३३ जेट्ठ३४ आउं३५ च वीसदुगं३६-३७॥३७८॥ सवण३८ धणिट्ठा३९[जे](ऽज)देव४० अभिवड्ढिदु४१-४२यस्स४३ यम४४ बहुला४५। रोहिणी४६ सोम४७दिइदुगं४८-४९ पुस्सो५० पिइ५१ भग५२ऽ(ज)जमा५३ हत्थो५४ ॥३७९॥ चित्ताइ जेट्ठवज्जा अभिइअंताणि अ[क्ख](ट्ठ)रिक्खाणि-५५-६२। एए जुगपुव्वद्धे बिसट्ठि[स](प)व्वेसु रिक्खाणि॥३८०॥'** **(जो.प.)** एतासां व्याख्या- प्रथमस्य पर्वणः समाप्तौ सूर्यनक्षत्रं **सर्प्पः** सर्पदेवतोपलक्षिता अश्लेषा १, द्वितीये **भगो**-भगदेवतोपलक्षिताः पूर्वफाल्गुन्यः २, ततोऽ[य](र्य)**मद्विक**[मपि](मिति) तृतीयस्य पर्वणो अर्यमा-अर्यमदेवतोपलक्षिता उत्तरफाल्गुन्यः ३, चतुर्थस्याप्युत्तरफाल्गुन्यः ४, पञ्चमस्य **हस्तः** ५, षष्ठस्य **चित्रा** ६, सप्तमस्य **विशाखा** ७, अष्टमस्य **मित्रो**-मित्रदेवतोपलक्षिता अनुराधा ८, ततो

१. ...कस्य द्वाषष्टि.. - F।

ज्येष्ठादिकषट्कं क्रमेण वक्तव्यं, तद्यथा नवमस्य ज्येष्ठा ९, दशमस्य मूलं १०, एकादशस्य पूर्वाषाढा ११, द्वादशस्योत्तराषाढा १२, त्रयोदशस्य श्रवणः १३, चतुर्दशस्य धनिष्ठा १४, पञ्चदशस्**याजो**ऽजदेवतोपलक्षिता पूर्वभद्रपदा १५, षोड[शा](शस्या**भिवृद्धिः**-अ)भिवृद्धिदेवतोपलक्षिता उत्तरभद्रपदा १६, सप्तद[शो](शस्यो)त्तरभद्रपदा १७, अष्टादशस्य **पुष्यः**-पुष्यदेवतोपलक्षिता रेवती १८, एकोनविंशतितमस्**याश्वो**-अश्वदेवतोपलक्षिता अश्विनी १९ ॥३७७॥ **षट्कञ्च कृत्तिकादिकमि**ति, विंशतितमस्य कृत्तिकाः २०, एकविंशतितमस्य रोहिणी २१, द्वाविंशतितमस्य मृगशिरः २२, त्रयोविंशतितमस्यार्द्रा २३, चतुर्विंशतितमस्य पुनर्वसुः २४, पञ्चविंशतितमस्य पुष्यः २५, षड्विंशतितमस्य **पितरः**पितृदेवतोपलक्षिता मघाः २६, सप्तविंशतितमस्य **भगो**-भगदेवतोपलक्षिताः पूर्वफाल्गुन्यः २७, अष्टाविंशतितमस्**यार्यमा**-अर्य[मा](म)दे[वतो](वाः-) उत्तरफाल्गुन्यः २८, एकोनत्रिंशत्तमस्याप्युत्तरफाल्गुन्यः २९, त्रिंशत्तमस्य **चित्रा** ३०, एकत्रिंशत्तमस्य **वायुः**-वायुदेवतोपलक्षिता स्वातिः ३१, द्वात्रिंशत्तमस्य **विशाखा** ३२, त्रयस्त्रिंशत्तमस्या**नुराधा** ३३, चतुस्त्रिंशत्तमस्य **ज्येष्ठा** ३४, पञ्चत्रिंशत्तमस्**यायुः**-आयुर्देवतोपलक्षिता पूर्वाषाढाः ३५, षट्त्रिंशत्तमस्य **विष्वग्**देवा उत्तराषाढाः ३६, (सप्तत्रिंशत्तमस्याप्युत्तराषाढाः ३७)॥३७८॥ अष्टात्रिंशत्तमस्य **श्रवणः** ३८, एकोनचत्वारिंशत्तमस्य **धनिष्ठा** ३९, चत्वारिंशत्तमस्**याजो**(-अज)देवतोपलक्षिताः पूर्वभद्रपदाः ४०, एकचत्वारिंशत्तमस्या**भि**(**वृद्धिः**अ)[र]भिवृद्धि[र्दे](दे)वा उत्तरभद्रपदाः ४१, द्वाचत्वारिंशत्तमस्याप्युत्तरभद्रपदाः ४२, त्रिचत्वारिंशत्तमस्**याश्वो**ऽश्वदेवा अश्विनी ४३, चतुश्चत्वारिंशत्तमस्य **यमो** यमदेवता भरणी ४४ पञ्चचत्वारिंशत्तमस्य **बहुलाः**-कृत्तिकाः ४५, षट्चत्वारिंशत्तमस्य **रोहिणी** ४६, सप्तचत्वारिंशत्तमस्य **सोमः** सोमदेवतोपलक्षितं मृगशिरः ४७, **अदितिद्विक**मिति अष्टचत्वारिंशत्तमस्यादितिरदितिदेवतोपलक्षितं पुनर्वसुनक्षत्रं ४८, एकोनपञ्चाशत्तमस्यापि पुनर्वसुनक्षत्रं

४९, पञ्चाशत्तमस्य **पुष्यः** ५०, एकपञ्चाशत्तमस्य **पिता**-पितृदेवता मघाः ५१, द्वापञ्चाशत्तमस्य **भगो** भगदेवतोपलक्षिताः पूर्वफाल्गुन्यः ५२, त्रिपञ्चाशत्तमस्यार्यमा-अर्यमदेवतोपलक्षिता उत्तरफाल्गुन्यः ५३, चतुष्पञ्चाशत्तमस्य **हस्तः**[1] ५४ ॥३७९॥ अत ऊर्द्ध्वं **चित्रादीनि अभिजित्पर्यन्तानि ज्येष्ठावर्ज्जान्यष्टौ नक्षत्राणि** क्रमेण वक्तव्यानि तद्यथा पञ्चपञ्चाशत्तमस्य चित्रा ५५, षट्पञ्चाशत्तमस्य स्वातिः ५६, सप्तपञ्चाशत्तमस्य विशाखा ५७, अष्टापञ्चाशत्तमस्यानुराधाः ५८, एकोनषष्टितमस्य मूलः ५९, षष्टितमस्य पूर्वाषाढाः ६०, एकषष्टितमस्योत्तराषाढाः ६१, द्वाषष्टितमस्याभिजिदिति ६२। **एतानि नक्षत्राणि युगस्य पूर्वार्द्धे द्वाषष्टिसङ्ख्येषु पर्वसु** यथाक्रममुक्तानि॥३८०॥ एवं करणवशेन युगस्योत्तरार्द्धेऽपि द्वाषष्टिसङ्ख्येषु पर्वसु ज्ञातव्यानि। सम्प्रति किं पर्व चरमदिवसे कियन्मुहूर्त्तेषु गतेषु समाप्तमित्येतद्विषयं यत्करणमभिहितं पूर्वाचार्यैस्तदभिधीयते - **'चउहिं भइयम्मि पव्वे एक्के सेसम्मि होइ कलियोगो। बेसु य दावरजुम्मो तिसु तेया चउसु कडजुम्मो॥३८१॥ कलिओगे तेणऊई पक्खेवो दावरम्मि बावट्ठी। तेउए एक्कतीसा कडजुम्मे नत्थि पक्खेवो॥३८२॥ सेसद्धे तीसगुणे बावट्ठीभाइयंमि जं लद्धं। जाण तइसु मुहुत्तेसु अहोरत्तस्स [सं] (तं) पव्वं॥३८३॥' (जो.प.)** एतासां क्रमेण व्याख्या- **पर्वणि** पर्वराशौ **चतुर्भिर्भक्ते** सति यद्येकः **शेषो भवति** तदा स राशिः **कल्योजो** भण्यते, **द्वयोः** शेषयोः **द्वापरयुग्मस्त्रिषु** शेषेषु **त्रे[तो](तौ)जश्चतुर्षु** शेषेषु **कृतयुग्मः**॥३८१॥ **'[किल](कलि)ओज'** इत्यादि, तत्र **कल्यो[यो]जोरूपे** राशौ **त्रिनवतिः प्रक्षेपः**-प्रक्षेपणी[या](यो) राशिः, **द्वापरयुग्मे द्वाषष्टिः, त्रे[तो](तौ)जसि एकत्रिंशत्, कृतयुग्मे नास्ति प्रक्षेपः॥३८२॥** एवं प्रक्षिप्तप्रक्षेपाणां पर्वराशीनां सतां चतुर्विंशत्यधिकेन पर्वशतेन भागो ह्रियते, ह्रते च भागे यत् शेषमवतिष्ठते तस्यायं

---

१. ... पुनर्वसुः - T।

विधिः-'**सेसद्धे**' इत्यादि, शेषस्य-चतुर्विंशत्यधिकेन शतेन भागे हृते अवशिष्टस्यार्द्धं क्रियते, कृत्वा च त्रिंशता गुण्यते, गुणयित्वा च द्वाषष्ट्या भज्यते, भक्ते सति **यल्लब्धं** तान् मुहूर्त्तान् **जानीहि,** लब्धशेषं तु मुहूर्त्तभागान्। तत एवं स्वशिष्येभ्यः प्ररूपय त[ः](द्)विवक्षितं **पर्व** चरमेऽ**होरात्रे** सूर्योदयात्तावत्(सु) **मुहूर्त्तेषु** तावत्सु च मुहूर्त्तभागेषु अतिक्रान्तेषु परिसमाप्तमिति॥३८३॥ एष कर[णा](णगाथा)क्षरार्थः। भावना त्वियं – प्रथमं पर्व चरमेऽहोरात्रे कति मुहूर्त्तानतिक्रम्य समाप्तम् ? इति जिज्ञासायामेको ध्रियते। अयं किल कल्योजो राशिरित्यत्र त्रिनवतिः प्रक्षिप्यते जाता चतुर्नवतिः। अस्य चतुर्विंशत्यधिकेन शतेन भागो हर्त्तव्यः। स च भागो न लभ्यते राशेः स्तोकत्वात्। त[योर्य](तो य)थासम्भवं करणलक्षणं कर्त्तव्यम्। तत्र चतुर्नवतेरर्द्धं क्रियते, जाता सप्तचत्वारिंशत् ४७। सा त्रिंशता गुण्यते, जातानि चतुर्दशशतानि दशोत्तराणि १,४१०। तेषां द्वाषष्ट्या भागो ह्रियते, लब्धा द्वाविंशतिमुहूर्त्ताः २२, शेषास्तिष्ठन्ति षट्चत्वारिंशत् ४६। ततश्छेद्यछेदकराश्यो-रर्द्धेनाऽपवर्त्तना लब्धास्त्रयोविंशतिरेकत्रिंशद्भागाः ३१। आगतं [१]प्रथमं पर्व चरमेऽहोरात्रे द्वाविंशतिमुहूर्त्तान् एकस्य च (मुहूर्त्तस्य) त्रयोविंशतिमेकत्रिंशद्भागानतिक्रम्य समाप्तिं गतमिति। द्वितीयपर्वजिज्ञासायां द्विको ध्रियते। स किल द्वापरयुग्मराशिरिति तत्र द्वाषष्टिः प्रक्षिप्यते। जाता चतुःषष्टिः। सा चतुर्विंशत्यधिकस्य शतस्य भागं न प्रयच्छति, ततस्तस्या अर्द्धं क्रियते, जाता द्वात्रिंशत्। सा त्रिंशता गुण्यते, जातानि नव शतानि षष्ट्यधिकानि ९६०। तेषां द्वाषष्ट्या भागो ह्रियते, लब्धाः पञ्चदशमुहूर्त्ताः १५, पञ्चादवतिष्ठते त्रिंशत्। ततश्छेद्यछेदकराश्योरर्द्धेनापव[२]र्त्तना, लब्धाः पञ्चदश एकत्रिंशद्भागाः १५/३१। आगतं द्वितीयं पर्व चरमेऽहोरात्रे पञ्चदशमुहूर्त्तानेकस्य च मुहूर्त्तस्य पञ्चदश एकत्रिंशद्भागानतिक्रम्य [द्वितीयं पर्व] समाप्तमिति। तृतीयपर्वजिज्ञा[सया](सायां) त्रिको ध्रियते। स किल

१. प्रथमपर्व - A, B, C, E, F, G, H, I, J, K। २. .....वर्त्तनात् - D।

त्रे[तो](तौ)जोराशिरिति तत्रैकत्रिंशत् प्रक्षिप्यते, जाता चतुस्त्रिंशत् ३४। सा चतुर्विंशत्यधिकस्य शतस्य भागं न प्रयच्छति। ततस्तस्यार्द्धं क्रियते, जाताः सप्तदश। ते त्रिंशता गुण्यन्ते, जातानि पञ्च शतानि दशोत्तराणि ५१०। तेषां द्वाषष्ट्या भागो ह्रियते लब्धा अष्टौ ८ शेषास्तिष्ठन्ति चतुर्दश १४। ततश्छेद्यच्छेदकराश्योरर्द्धेनापवर्त्तना, लब्धाः सप्त एकत्रिंशद्भागाः ७/३१। आगतं तृतीयं[१] पर्व चरमेऽहोरात्रे अष्टौ मुहूर्त्तानेकस्य च मुहूर्त्तस्य (सप्त) एकत्रिंशद्भागानतिक्रम्य समाप्तिं गतमिति। चतुर्थपर्वजिज्ञासायां चतुष्को ध्रियते। स किल कृतयुग्मराशिरिति न किमपि प्रक्षिप्यते। चत्वारः चतुर्विंशत्यधिकस्य शतस्य भागं न प्रयच्छन्ति। ततस्ते अर्द्धीक्रियन्ते, जातौ द्वौ। तौ त्रिंशता गुण्येते, जाता षष्टिः ६०। तस्य द्वाषष्ट्या भागो ह्रियते, (भागश्च न लभ्यते इति छेद्यच्छेदकराश्योरर्द्धेनापवर्त्तना, जाता-स्त्रिंशदेकत्रिंशद्भागाः ३०/३१। आगतं चतुर्थं पर्व चरमेऽहोरात्रे मुहूर्त्तस्य त्रिंशत-मेकत्रिंशद्भागानतिक्रम्य समाप्तिं गच्छतीति एवं शेषेष्वपि पर्वसु भावनीयम्। चतुर्विंशत्यधिकशततमपर्वजिज्ञासायां चतुर्विंशत्यधिकं शतं ध्रियते। तस्य किल चतुर्भिर्भागे हृते) न किमपि शेषमवतिष्ठते इति कृतयुग्मोऽयं राशिः, ततोऽत्र न किमपि प्रक्षिप्यते। ततश्चतुर्विंशत्यधिकेन शतेन भागो ह्रियते, जातो राशिर्निर्लेपः। आगतं परिपूर्णं चरममहोरात्रं भुक्त्वा चतुर्विंशतितमं पर्व समाप्तिं गतमिति। तदेवं यथा पूर्वाचार्यैरिदमेव पर्वसूत्रमवलम्ब्य पर्वविषयव्याख्यानं कृतं तथा मया विनेयजनानुग्रहाय स्वमत्यनुसारेणोपदर्शितम्[२]। सम्प्रति प्रस्तुतमनुस्रियते। तत्र युगसंवत्सरोऽभिहितः।

सम्प्रति प्रमाणसंवत्सरमाह– **'पमाणे'**त्यादि, **प्रमाणसंवत्सरः पञ्चविधः प्रज्ञप्तस्तद्यथा** नक्षत्रसंवत्सरः, चन्द्रसंवत्सरः, ऋतुसंवत्सरः, आदित्यसंवत्सरो अभिवर्द्धितसंवत्सरश्च। तत्र नक्षत्रचन्द्राभिवर्द्धितसंवत्सराणां स्वरूपं प्रागेवोक्तम्।

---

१. तृतीयपर्व - A, B, C, E, F, G, H, I, J। २. स्वमतानु.... - J।

साम्प्रतं ऋतुसंवत्सरादित्यसंवत्सरयोः स्वरूपमुच्यते। तत्र द्वे घटिके एको मुहूर्त्तस्त्रिंशन्मुहूर्त्ता अहोरात्रः, पञ्चदश परिपूर्णा अहोरात्राः पक्षः, पक्षौ द्वौ मासः, द्वादशमासा संवत्सरः, अस्मिंश्च संवत्सरे त्रीणि शतानि षष्ट्यधिकानि परिपूर्णान्यहोरात्राणां भवन्ति, एष ऋतुसंवत्सरः। ऋतवो लोकप्रसिद्धा वसन्तादयः। तत्प्रधानः संवत्सरः ऋतुसंवत्सरः। अस्य चापरमपि नामद्वयमस्ति तद्यथा- कर्म्मसंवत्सरः [से](स)वनसंवत्सरः। तत्र कर्म्म लौकिको व्यवहारस्तत्प्रधानः संवत्सरः (कर्म्मसंवत्सरः), लोको हि प्रायः सर्वोप्यनेनैव संवत्सरेण व्यवहरति। तथा च [१]तद्गतं मासमधिकृत्यान्यत्रोक्तं – **'कम्मो निरंसयाए मासो ववहारकारगो लोए। [२]सेसा उ संसयाए ववहारे दुक्करा घेत्तुं॥१०६॥'** **(जो.प.)** तथा सवनंकर्म्मसु प्रेरणं **'षू प्रेरणे'** **(पाणिनीयधातुपाठः, तुदादि १२८)** इति वचनात्, तत्प्रधानः संवत्सरः सवनसंवत्सरः *लोकव्यवहारानुपातितया ह्येष कर्मसु प्रेरयतीव प्रतिभासते। ततः सवनसंवत्सर* इत्यप्यस्य नाम। तथा चोक्तं – **'बे [ता](ना)-लिया मुहुत्तो [से](स)ट्ठी उण नालिया अहोरत्तो। पन्नरस अहोरत्ता पक्खो तीसं दि[णं](णा) मासो॥३६॥ संवच्छरो उ बारसमासा पक्खा य ते उ चउव्वीसं। तिन्नेव सया सट्ठा हवंति राइंदि[ए](या)णं तु॥३७॥ एसो उ क[म्म](मो) भणिओ नियमा संवच्छरस्स कम्मस्स। कम्मोत्ति सावणो त्ति य उउ त्ति य तस्स नामाणि॥३८॥'** **(जो.प.)** तथा यावता कालेन षडपि प्रावृडादयः ऋतवः [३]आपूर्णा आवृत्ता भवन्ति तावत्कालविशेष आदित्यसंवत्सरः, उक्तश्च **'छप्पि उऊ परियट्टा एसो संवच्छरो उ आइच्चो।'** **(जो.प.४१)** तत्र यद्यपि लोके षष्ट्यहोरात्रप्रमाणः प्रावृडादिक ऋतुः प्रसिद्धः तथापि परमार्थतः स एकषष्ट्यहोरात्रप्रमाणो वेदितव्यः, तथैवोत्तरकालमव्यभिचारदर्शनात्। अत एवास्मिन्

---

१. एतद्गतं - A, B, T। २. मुद्रितज्योतिष्करण्डकप्रकीर्णके त्वयं पाठ इत्थं दृश्यते- 'एवं सेसा मासा ववहारे दुक्करा घेत्तुं।' *....* चिह्नान्तर्गतः पाठो मुद्रितसूर्यप्रज्ञप्तिवृत्तौ नास्ति। ३. परिपूर्णाः प्रावृत्ता - S।

संवत्सरे त्रीणि शतानि षट्षष्ट्यधिकानि रात्रिन्दिवानां भवन्ति, तथा चान्यत्रापि पञ्चस्वपि संवत्सरेषु यथोक्तमेव रात्रिन्दिवानां परिमाणमुक्तं - **'तिन्नि अहोरत्तसया छावट्ठा भक्खरो हवइ वासो। तिन्नि सया पुण सट्ठा कम्मो संवच्छरो होइ॥४४॥ तिन्नि अहोरत्तसया चउप्पन्ना नियमसो हवइ चंदो। भागा य बारसेव य बावट्ठिकएण छेएण॥४५॥ तिन्नि अहोरत्तसया सत्तावीसा य होंति नक्खत्ते। एकावन्नं भागा सत्तट्ठिकएण छेएण॥४६॥ तिन्नि अहोरत्तसया तेसीई चेव होइ अभिवड्ढे, चोयालीसं भागा बावट्ठिकएण च्छेएण॥४७॥' (जो.प.)**

एताश्चतस्रो गाथाः सुगमाः। इदं च प्रतिसंवत्सरं रात्रिन्दिवपरिमाणमुक्तं, तत्स्वयमेवाऽग्रे वक्ष्यति परमिह प्रस्तावादुक्तम्। [भव](सम्प्र)ति विनेयजनानुग्रहाय संवत्सरसङ्ख्यया माससङ्ख्या प्रदर्श्यते। तत्र सूर्यसंवत्सरस्य परिमाणं त्रीणि शतानि षट्षष्ट्यधिकानि रात्रिन्दिवानां द्वादशभिश्च मासैः संवत्सरस्ततस्त्रयाणां शतानां षट्षष्ट्यधिकानां द्वादशभिर्भागो ह्रियते, लब्धा त्रिंशत् ३०, शेषास्तिष्ठन्ति षट्, (ते) अर्द्धीक्रियन्ते, जाता द्वादश, ततो लब्धमेकं दिवसस्यार्द्धं, एतावत्परिमाणः सूर्यमासः। तथा [१]कर्म्मसंवत्सरपरिमाणं त्रीणि शतानि षष्ट्यधिकानि रात्रिन्दिवानां, तेषां द्वादशभिर्भागो ह्रियते, लब्धास्त्रिंशदहोरात्राः, एतावत्कर्म्ममासपरिमाणम्। तथा चन्द्रसंवत्सरस्य परिमाणं त्रीण्यहोरात्रशतानि चतुष्पञ्चाशदधिकानि द्वादश च द्वाषष्टिभागा अहोरात्रस्य। तत्र त्रयाणां शतानां चतुष्पञ्चाशदधिकानां द्वादशभिर्भागो ह्रियते, लब्धा एकोनत्रिंशदहोरात्राः, शेषास्तिष्ठन्ति षडहोरात्रास्ते द्वाषष्टिभागकरणार्थं द्वाषष्ट्या गुण्यन्ते, जातानि त्रीणि शतानि द्विसप्तत्यधिकानि ३७२, [२]येऽपि च द्वादश द्वाषष्टिभागा उपरितनास्तेऽपि तत्र प्रक्षिप्यन्ते, जातानि त्रीणि शतानि चतुरशीत्यधिकानि ३८४, तेषां द्वादशभिर्भागे हृते [तथा] (लब्धा द्वा)त्रिंशत् द्वाषष्टिभागाः, एतावच्चन्द्रमासपरिमाणम्। तथा नक्षत्रसंवत्सरस्य परिमाणं त्रीणि

१. कर्म्मसंवत्सरस्य परिमाणं - B, T। २. येऽपि द्वादश - T।

शतानि सप्तविंशत्यधिकानि रात्रिन्दिवानां एकस्य च रात्रिन्दिवस्य एकपञ्चाशत्सप्तषष्टिभागाः। तत्र त्रयाणां शतानां सप्तविंशत्यधिकानां द्वादशभिर्भागो ह्रियते, लब्धाः सप्तविंशतिरहोरात्राः शेषास्त्रयस्तिष्ठन्ति, ततस्तेऽपि सप्तषष्टिभागकरणार्थं सप्तषष्ट्या गुण्यन्ते, जाते द्वे शते एकोत्तरे २०१, येऽपि च उपरि एकपञ्चाशत् सप्तषष्टिभागास्तेऽपि तत्र प्रक्षिप्यन्ते, जाते द्वे शते द्विपञ्चाशदधिके २५२, तेषां द्वादशभिर्भागो ह्रियते, लब्धा एकविंशतिः सप्तषष्टिभागाः, एतावन्नक्षत्रमासपरिमाणम्। तथाऽभिवर्द्धितसंवत्सरस्य परिमाणं त्रीणि रात्रिन्दिवशतानि त्र्यशीत्यधिकानि चतुश्चत्वारिंशच्च द्वाषष्टिभागा रात्रिन्दिव[सा](स्य)। तत्र त्रयाणां शतानां त्र्यशीत्यधिकानां द्वादशभिर्भागो ह्रियते, लब्धा एकत्रिंशदहोरात्राः, शेषास्तिष्ठन्त्यहोरात्रा एकादश ते चतुर्विंशत्युत्तरशतभागकरणार्थं चतुर्विंशत्युत्तरेण शतेन गुण्यन्ते, जातानि त्रयोदश शतानि चतुःषष्ट्यधिकानि १,३६४, येऽपि चोपरितनाश्चतुश्चत्वारिंशत् द्वाषष्टिभागास्तेऽपि चतुर्विंशत्युत्तरशतभागकरणार्थं द्वाभ्यां गुण्यन्ते, जाता अष्टाशीतिः, सा अनन्तरराशौ प्रक्षिप्यते, जातानि चतुर्दशशतानि द्विपञ्चाशदधिकानि १,४५२, तेषां द्वादशभिर्भागे हृते लब्धमेकविंशत्युत्तरं शतं चतुर्विंशत्युत्तरशतभागानामेतावदभिवर्द्धितमासपरिमाणम्। (तथा चोक्तम्-) **'आइच्चो खलु मासो तीसं अद्धं च सावणो ती[सा](सं)। चंदो एगुणतीसं बावट्ठिभागा य बत्तीसं॥६२॥ नक्खत्तो खलु मासो सत्तावीसं भवे अहोरत्ता। अंसा य एक्कवीसा सत्तट्ठिकएण छेएण॥६३॥ अभिवड्ढिओ य मासो एक्कतीसं भवे अहोरत्ता। भागसयमेगवीसं चउवीससएण छेएण॥६४॥'** **(जो.प.)**

सम्प्रत्येतैरेव पञ्चभिः संवत्सरैः प्रागुक्तस्वरूपं पञ्चसंवत्सरात्मकं युगं मासानधिकृत्य प्रमीयते। तत्र युगं प्रागुदितस्वरूपं यदि सूर्यमासैर्विभज्यते तदा षष्टिः सूर्यमासा युगे भवन्ति, तथाहि सूर्यमासे सार्द्धा(स्र)त्रिंशदहोरात्रा युगे चाहोरात्राणामष्टादशशतानि त्रिंशदधिकानि भवन्ति। कथमेतदवसीयते इति चेत् ? उच्यते, इह युगे त्रयश्चन्द्र-

संवत्सरा द्वौ चाभिवर्द्धितसंवत्सरौ, एकैकस्मिंश्च चान्द्रे संवत्सरे अहोरात्राणां त्रीणि शतानि चतुष्पञ्चाशदधिकानि रात्रिन्दिवानां भवन्ति द्वादश च द्वाषष्टिभागा रात्रिन्दिवसस्य ३५४ १२/६२। एतत् त्रिभिर्गुण्यते, जातान्यहोरात्राणां दश शतानि द्वाषष्ट्यधिकानि १,०६२ षट्त्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य ३६/६२। अभिवर्द्धितसंवत्सरे च एकैकस्मिन् त्रीणि शतानि त्र्यशीत्यधिकानि चतुश्चत्वारिंशद्द्वाषष्टिभागा अहोरात्रस्य ३८३ ४४/६२। एतत् द्वाभ्यां गुण्यते, जातानि सप्तशतानि षट्षष्ट्यधिकानि ७६६ अष्टाशीतिश्च द्वाषष्टिभागा अहोरात्रस्य ८८, प्राक्तानाश्च षट्त्रिंशत् द्वाषष्टिभागाः ३६ अष्टाशीतौ प्रक्षिप्यन्ते, जातं चतुर्विंशत्यधिकं शतं १२४, तस्य द्वाषष्ट्या भागे हृते लब्धौ द्वावहोरात्रौ, तौ पूर्वेष्वहोरात्रेषु प्रक्षिप्येते। ततः सर्वसङ्कलनया जातानि अहोरात्राणामष्टादशशतानि त्रिंशदधिकानि १,८३०। तत्र एतेषामष्टादशशतानां त्रिंशदधिकानां सार्द्धत्रिंशदहोरात्रैर्भागो हर्त्तव्यः। तत्र च्छेदराशिना सांशत्वाद्भागः पातयितुं (न) शक्यते। ततो मासद्वयकरणार्थं सार्द्धाः त्रिंशदहोरात्रा द्वाभ्यां गुण्यन्ते, जाता एकषष्टिः। तया भागो ह्रियते लब्धानि त्रिंशन्मासद्वयानि ३०। तेषां द्वाभ्यां गुणने लब्धा षष्टिर्मासाः। तथा तदेव युगं यदि कर्म्ममासैर्विभज्यते ततः एकषष्टिकर्म्ममासा भवन्ति, तथाहि- ऋतुमासस्त्रिंशदहोरात्रप्रमाणस्ततोऽष्टादशानां शतानां त्रिंशदधिकानां त्रिंशता भागे हृते एकषष्टिर्लभ्यते इति। तथा यदि चन्द्रमासैस्तदेव युगं विभज्यते तदा द्वाषष्टिचन्द्रमासा भवन्ति, तथाहि — चन्द्रमासपरिमाणमेकोनत्रिंशदहोरात्रा द्वात्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य। तत्रैकोनत्रिंशदहोरात्रा द्वाषष्टिभागकरणार्थं द्वाषष्ट्या गुण्यन्ते, जातानि सप्तदशशतान्यष्टानवत्यधिकानि १,७९८। ततो द्वात्रिंशदुपरितना द्वाषष्टिभागास्तत्र प्रक्षिप्यन्ते, जातान्यष्टादशशतानि त्रिंशदधिकानि १,८३०। येऽपि च युगाहोरात्रा अष्टादशशतानि त्रिंशदधिकानि तेऽपि द्वाषष्ट्या गुण्यन्ते, जाता एको लक्षस्त्रयोदश-

सहस्राणि चत्वारि शतानि षष्ट्यधिकानि १,१३,४६०। एतेषामष्टादशशतैस्त्रिंश-दधिकैश्चन्द्रमाससत्कद्वाषष्टिभागरूपैर्भागो ह्रियते, लब्धा द्वाषष्टिश्चन्द्रमासाः। तथा यदि तदेव युगं नक्षत्रमासैः परिगण्यते तदा तस्मिन्युगे सप्तषष्टिनक्षत्रमासा भवन्ति, तथाहि-नक्षत्रमासपरिमाणं सप्तविंशतिरहोरात्रा एकविंशतिः सप्तषष्टिभागा अहोरात्रस्य। तत्र सप्तविंशतिरहोरात्राः सप्तषष्टिभागकरणार्थं सप्तषष्ट्या गुण्यन्ते, जातान्यष्टादशशतानि नवोत्तराणि १,८०९, तत उपरितना एकविंशतिः सप्तषष्टिभागाः प्रक्षिप्यन्ते, जातान्यष्टादशशतानि त्रिंशदधिकानि १,८३०। [१]युगस्यापि च सम्बन्धिनस्त्रिंश-दधिकाष्टादशशतप्रमाणा अहोरात्राः सप्तषष्ट्या गुण्यन्ते, जात [२]एको लक्षो द्वाविंशतिसहस्राणि षट्शतानि दशोत्तराणि १,२२,६१०। एतेषामष्टादशभिस्त्रिंशदधिकैः (शतै)र्नक्षत्रमाससत्कसप्तषष्टिभागरूपैर्भागो ह्रियते, लब्धाः सप्तषष्टि[र्भागाः](र्मासाः) ६७। तथा यदि युगमभिवर्द्धितमासैः परिगण्यते तदाऽभिवर्द्धितमासा युगे भवन्ति सप्तपञ्चाशत् सप्त रात्रिन्दिवानि एकादशमुहूर्त्ता एकस्य च मुहूर्त्तस्य द्वाषष्टि-भागास्त्रयोविंशतिः, तथाहि - अभिवर्द्धितमासपरिमाणमेकत्रिंशदहोरात्रा एकविंशत्युत्तरं च शतं (चतुर्विंशत्युत्तरशत)भागानामहोरात्रस्य। तत एकत्रिंशदहोरात्राश्चतुर्विंशत्युत्तर-शतभागकरणार्थं चतुर्विंशत्युत्तरेण शतेन गुण्यन्ते, जातान्यष्टा[विं](त्रिं)श[ति](त्) शतानि चतुश्चत्वारिंशदधिकानि ३,८४४। तत उपरितनमेकविंशत्युत्तरं शतं भागानां तत्र प्रक्षिप्यते, जातान्येकोनचत्वारिंशच्छतानि पञ्चषष्ट्यधिकानि ३,९६५। [३]यानि च युगे अहोरात्राणामष्टादशशतानि त्रिंशदधिकानि तानि चतुर्विंशत्युत्तरेण शतेन गुण्यन्ते, जाते द्वे लक्षे षड्विंशतिसहस्राणि नव शतानि विंशत्यधिकानि २,२६,९२०। तत एतेषामेकोनचत्वारिंशच्छतैः पञ्चषष्ट्यधिकैरभिवर्द्धितमाससत्कचतुर्विंशत्युत्तर-शतभागरूपैर्भागो ह्रियते, लब्धाः सप्तपञ्चाशन्मासाः, शेषाणि तिष्ठन्ति नव शतानि पञ्चदशोत्तराणि ९१५। तेषामहोरात्रानयनाय चतुर्विंशत्यधिकेन शतेन भागो ह्रियते,

१. युगस्यापि सम्बन्धि.... - I। २. एकलक्षो - H, I, K। ३. यानि युगे - N ।

लब्धानि सप्त रात्रिन्दिवानि, शेषास्तिष्ठन्ति चतुर्विंशत्युत्तरशतभागाः सप्तचत्वारिंशत्, तत्र चतुर्भिर्भागैरेकस्य च भागस्य चतुर्भिस्त्रिंशद्भागैर्मुहूर्त्तो भवति, तथा(हि) एकस्मिन्नहोरात्रे त्रिंशन्मुहूर्त्ताः, अहोरात्रे च चतुर्विंशत्युत्तरं शतं भागानां कल्पितमास्ते, ततस्तस्य चतुर्विंशत्युत्तरस्य शतस्य त्रिंशता भागो ह्रियते, लब्धाश्चत्वारो भागा एकस्य च भागस्य सत्काश्चत्वारस्त्रिंशद्भागाः। तत्र पञ्चचत्वारिंशद्भागैरेकस्य च भागस्य सत्कैश्चतुर्दशभिस्त्रिंशद्भागैरेकादशमुहूर्त्ता लब्धाः, शेषस्तिष्ठत्येको भाग एकस्य च भागस्य सत्काः षोडश त्रिंशद्भागाः। किमुक्तं भवति ? षट्चत्वारिंशद्भागा एकस्य च भागस्य सत्काः शेषास्तिष्ठन्ति। ते च किल मुहूर्त्तस्य चतुर्विंशत्युत्तर-शतभागरूपास्ततः षट्चत्वारिंशतः चतुर्विंशत्युत्तरस्य शतस्य च द्विकेनाऽपवर्त्तना क्रियते, लब्धा मुहूर्त्तस्य द्वाषष्टिभागास्त्रयोविंशतिः, उक्तश्च एतदन्यत्रापि **'तत्थ पडिमिज्जमाणे पंचहिं माणेहिं पुव्वगणिएहिं। मासेहिं विभज्जंता जइ मासा होंति ते वोच्छं ॥६१॥'** **(जो.प.)** अत्र **'तत्थे'**ति **तत्र** युगे **'पंचहि माणेहिं'** ति **पञ्चभिर्मानै**र्मानसंवत्सरैःप्रमाणसंवत्सरैरादित्यचन्द्रादिभिरित्यर्थः **पूर्वगणितै**ः-प्राक्प्रतिसङ्ख्यातस्वरूपैः **प्रतिमीयमाने** प्रतिगण्यमाने **मासै**ः सूर्यादिमासैः शेषं सुगमम्। **'आइच्चेण उ सट्ठीमासा उऊणो उ हुंति एगट्ठी। चंदेण उ बावट्ठी सत्तट्ठी हुंति नक्खत्ते॥६५॥ सत्तावन्नं मासा सत्त य राइंदिया[वि](इं) अभिवड्ढे। एक्कारस य मुहुत्ता बिसट्ठिभागा य तेवीसं॥६६॥'** **(जो.प.)**

सम्प्रति लक्षणसंवत्सरमाह – **'लक्खणे संवच्छरे'**त्यादि। लक्षणसंवत्सरः पञ्चविधः प्रज्ञप्तस्तच्च पञ्चविधत्वं प्रागुक्तमेव द्रष्टव्यं, तद्यथा-नक्षत्रसंवत्सरः चन्द्रसंवत्सरः ऋतुसंवत्सरः आदित्यसंवत्सरोऽभिवर्द्धितसंवत्सरश्च। किमुक्तं भवति ? न केवलमेते नक्षत्रादिसंवत्सरा यथोदितरात्रिन्दिवपरिमाणा भवन्ति किन्तु तेभ्यः पृथग्भूता अन्येऽपि वक्ष्यमाणलक्षणोपेता यथोदितनामानो भवन्ति, (ततो लक्षणोपपन्नः संवत्सरः पृथक् पञ्चविधो भवति) इति। तत्र प्रथमतो

नक्षत्रसंवत्सरलक्षणमाह– **'ता नक्खत्ते'**त्यादि। **'ता'** इति तत्र नक्षत्रसंवत्सरो लक्षणमधिकृत्य **पञ्चविधः प्रज्ञप्तः**। किमुक्तं भवति ? नक्षत्रसंवत्सरस्य पञ्चविधं लक्षणं प्रज्ञप्तमिति। तदेवाह - **'समगं नक्खत्ता जोगं जोएंति, समगं उऊ परिणमंति। न(च्)चुन्[न](ह) नातिसीओ बहूदओ होइ नक्खत्तो॥१॥'** (पृ.३३२) यस्मिन्संवत्सरे **समकं** समकमेव एककालमेव ऋतुभिः सहेति गम्यते **नक्षत्राणि** उत्तराषाढाप्रभृतीनि **योगं युञ्जन्ति**[१] - चन्द्रेण सह योगं युञ्जन्ति सन्ति तां पौर्णमासीं[२] परिसमापयन्ति, तथा समकमेव एककालमेव तया तया परिसमाप्य[त](मान)या पौर्णमास्या सह ऋतवो निदाघाद्याः **परिणमन्ति** परिसमाप्तिमुपयन्ति, इयमत्र भावना - यस्मिन्संवत्सरे नक्षत्रैर्मासिसदृशनामकैस्तस्य तस्य ऋतोः पर्यन्तवर्त्तीमासः परिसमाप्यते तेषु च तां तां पूर्णमासीं परिसमापयत्सु तया तया पौर्णमास्या सह ऋतवोऽपि निदाघादिकाः परिसमाप्तिमुपयान्ति[३], यथा उत्तराषाढानक्ष[त्रे](त्रं) आषाढीं पौर्णमासीं[४] परिसमापयति, तथा आषाढ्या पौर्णमास्या सह निदाघोऽपि ऋतुः परिसमाप्तिमुपैति स नक्षत्रसंवत्सरः, नक्षत्रानुरोधेन तथापरिणममानत्वात्, एतेन च लक्षणद्वयमभिहितं द्रष्टव्यं, तथा न विद्यते अतिशयेन उष्णः - उष्णरूपः परितापो यस्मिन्स **नात्युष्णः**, तथा न विद्यते अतिशयेन शीतं यत्र स **नातिशीतः**, बहु उदकं यस्मिन् स **बहूदकः**, एवंरूपैः [सप्त](पञ्च)भिः समग्रैर्लक्षणैरुपेतो **भवति नक्षत्रसंवत्सरः**। सम्प्रति चन्द्रसंवत्सरस्य लक्षणमाह- **'ससिसमगपुन्नमासिं जोएंति विसमचारिनक्ख[त्ते](त्ता)। कडुओ बहुउदगो [या](य) तमाहु, संवच्छरं चंदं॥२॥'** (पृ.३३२) यस्मिन्संवत्सरे **नक्षत्राणि विषमचारीणि** मासविसदृशनामानीत्यर्थः शशिना समकं योगमुपगतानि तां तां **पौर्णमासीं**[५] **युञ्जन्ति** परिसमापयन्ति **यश्च कटुकः** शीतात[पादि]परोगादिदोष[६]-

---

१. युञ्जन्ति सन्ति तां पौर्णमासीं - G, K। २. पूर्णमासीं - T। ३. .... मुपयन्ति - A, G, K। ४. पूर्णमासीं - T। ५. पूर्णमासीं - A। ६. .....बहुलदोषतया - K।

बहुलतया परिणामदारुणो **बहूदकश्च तमाहुः** महर्षयः **संवत्सरं चान्द्रं** चन्द्रसम्बन्धिनं चन्द्रानुरोधतस्त[त](त्र) मासानां परिसमाप्ति[भ](भा)वात् (न) सदृशनामक-नक्षत्रानुरोधतः। सम्प्रति कर्मसंवत्सरलक्षणमाह – **'विसमं पवालिणो परिणमंति अणुऊसु देंति पुप्फफलं। वासं न सम्म वासइ तमाहु संव[त्स](च्छ)रं कम्मं॥३॥'** (पृ.३३२) यस्मिन्संवत्सरे वनस्पतयो **विषमं**-विषमकालं **प्रवालिनः परिणमन्ति** - प्रवालः - पल्लवाङ्कुरस्तद्युक्ततया परिणमन्ति, तथा **अनृतुष्वपि** [च](स्व)स्व[रूप](ऋ)त्वभावे(ऽपि) पुष्पं च फलं च **ददति**-प्रयच्छन्ति, तथा **वर्षं** पानीयं (**न**) **सम्यग्**यस्मिन्संवत्सरे मेघो **वर्षति तमाहुः** महर्षयः **संवत्सरं कर्म्म** [१२] - (कर्म्म)संवत्सरमित्यर्थः। अधुना सूर्यसंवत्सरलक्षणमाह- **'पुढविदगाणं च रसं पुप्फफलाणं च देइ आइच्चो। अप्पेण वि वासेणं सम्मं निप्फज्जए सस्सं[1]॥४॥'** (पृ.३३२) पृथिव्या उदकस्य तथा पुष्पाणां फलानां च **रसमादित्यसंवत्सरो ददाति** तथा **अल्पेनापि वर्षेण** वृष्ट्या **सस्यं निष्पद्यते** अन्तर्भूतण्यर्थत्वात् सस्यं निष्पादयति, किमुक्तं भवति ? यस्मिन्संवत्सरे पृथिवी तथाविधोदकसम्पर्कादतीव सरसा भवति उदकमपि परिणामसुंदररसोपेतं परिणमते पुष्पा(णां) च मधूदकादिसम्बन्धिनां फलानां च चूतफलादीनां रसः प्रचूरः सम्भवति स्तोकेनाऽपि वर्षेण धान्यं सर्वत्र सम्यग् सम्पद्यते तमादित्यसंवत्सरं महर्षय उपदिशन्ति। अभिवर्द्धितसंवत्सरलक्षणमाह - **'आइच्चतेयतविया खणलवदिवसा उऊ परिणमंति। पूरेइ निन्नथलए तमाहु अभिवड्ढिअं जाण॥५॥'** (पृ.३३२) यस्मिन्संवत्सरे **क्षणलवदिवसा ऋतव** आदित्य[स्]तेजसा अतीव तप्ताः सन्तप्ताः **परिणमन्ति** यश्च सर्वाण्यपि निम्नस्थानानि स्थलानि च **जलेन पूरयति तं** संवत्सरं **जानीहि** यथा तं संवत्सरम**भिवर्द्धितमा**हुः पूर्वर्षय इति। तदेवं लक्षणसंवत्सर उक्तः।

सम्प्रति शनैश्चरसंवत्सरमाह - **'ता सणिच्छरे'**त्यादि। **तत्र** शनैश्चरसंवत्सरोऽ-**ष्टाविंशतिविधः प्रज्ञप्तः, तद्यथा- अभिजित्**-अभिजित्शनैश्चरसंवत्सरः, एवं

१. सासं - मूले।

यावदुत्तराषाढा-उत्तराषाढाशनैश्चरसंवत्सरः। तत्र यस्मिन्संवत्सरे अभिजिता नक्षत्रेण सह शनैश्चरो योगमुपादत्ते सोऽभिजित्शनैश्चरसंवत्सरः, श्रवणेन सह यस्मिन्संवत्सरे योगमुपादत्ते स श्रवणशनैश्चरसंवत्सरः, एवं सर्वत्र भावनीयम्। **'जं वे'**त्यादि। **'वा'**शब्दः पक्षान्तरताद्योतने यत्सर्वं समस्तं नक्षत्रमण्डलं शनैश्चरो महाग्रहस्त्रिंशता संवत्सरैः समापयति एतावान् कालविशेषस्त्रिंशद्वर्षप्रमाणः शनैश्चरसंवत्सरः।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य विंशतितमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

जइ जिणमयं पवज्जह, ता मा ववहारनिच्छए मुयह।
ववहारनओच्छेए, तित्थुच्छेओ जओ भणिओ।।

जे जत्तिआ य हेऊ, भवस्स ते चेव तत्तिआ मुक्खे।
गणणाईया लोगा, दुण्हवि पुन्ना भवे तुल्ला।।

किं मंडणेहि कज्जं, जइ सीलेण अलंकिओ देहो।
किं मंडणेहिं कज्जं, जइ सीले हुज्ज संदेहो।।

न वि अत्थि माणुसाणं, तं सुक्खं न वि य सव्वदेवाणं।
जं सिद्धाणं सुक्खं, अव्वाबाहं उवगयाणं।।

एकविंशतितमं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य विंशतितमं प्राभृतप्राभृतम्। साम्प्रतमेकविंशतितममारभ्यते। तस्य चायमर्थाधिकारो यथा नक्षत्रचक्रस्य द्वाराणि वक्तव्यानि। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते जोतिसस्स दारा आहितत्ति वदेज्जा?

टी० 'ता कहं ते जोइसस्स दारा' इत्यादि। **'ता'** इति पूर्ववत्, **कथं** केन प्रकारेण केन क्रमेणेत्यर्थः **(त्वया) ज्योतिषो** नक्षत्रचक्रस्य **द्वाराणि आख्यातानि इति वदेत्**?

एवमुक्ते भगवानेतद्विषये यावन्त्यः परतीर्थिकानां प्रतिपत्तयस्तावतीरुपदर्शयति –

मू० तत्थ खलु इमातो पंच पडिवत्तीतो पण्णत्तातो- तत्थेगे एवमाहंसु ता कत्तियादिया णं सत्त णक्खत्ता पुव्वदारिया पण्णत्ता (एगे०)। एगे पुण० ता महादिता णं सत्त णक्खत्ता पुव्वदारिया पण्णत्ता। एगे०। एगे पुण० धणिट्ठादिया णं सत्त णक्खत्ता पुव्वदारिया (प०)। एगे०। एगे पुण० अस्सिणीआदिता णं सत्त णक्खत्ता पुव्वदारिया पण्णत्ता। एगे०। एगे पुण० भरणीआदिता णं सत्त णक्खत्ता पुव्वदारिया पण्णत्ता। (एगे०।) तत्थ जे ते एवमाहंसु ता कत्तियादिया णं सत्त णक्खत्ता पुव्वदारिया पण्णत्ता ते णं एवमाहंसु तं० कत्तिया रोहिणी जाव अस्सिलेसा, ता महादिता णं सत्त णक्खत्ता दाहिणदारिया पन्नत्ता, तं जहा महा जाव विसाहा, अणुराहादिया णं सत्त णक्खत्ता अवरदारिया पन्नत्ता, तं जहा अणुराहा जाव सवणो, ता धणिट्ठाआदिया णं सत्त णक्खत्ता उत्तरदारिया पण्णत्ता, तं जहा धणिट्ठा जाव भरणी। तत्थ जे ते एवमाहंसु ता महादिया णं सत्त णक्खत्ता पुव्वदारिया पण्णत्ता ते णं एवमाहंसु

तं० महा जाव विसाहा, ता अणुराहादिया णं सत्त णक्खत्ता दाहिणदारिया पण्णत्ता, तं जहा अणुराहा जाव सवणो, ता धणिट्ठादिआ णं सत्त नक्खत्ता अवरदारिया पण्णत्ता, तं जहा धणिट्ठा जाव भरणी, कत्तियादिया णं सत्त नक्खत्ता उत्तरदारिया पण्णत्ता तं जहा कत्तिया जाव असलेसा[१]। तत्थ जे ते एवमाहंसु ता धणिट्ठादिया णं सत्त णक्खत्ता पुव्वदारिया पण्णत्ता ते णं एवमाहंसु तं जहा धणिट्ठा जाव भरणी, ता कत्तियादिया णं सत्त णक्खत्ता दाहिणदारिया पण्णत्ता, (तं जहा) कत्तिया जाव अस्सेसा, महादिया णं सत्त णक्खत्ता अवरदारिया पण्णत्ता, तं जहा महा जाव विसाहा, ता अणुराहादिया णं सत्त णक्खत्ता उत्तरदारिया पण्णत्ता, तं जहा अणुराहा जाव सवणो। तत्थ जे ते एवमाहंसु - ता अस्सिणीआदिया णं सत्त णक्खत्ता पुव्वदारिया पण्णत्ता ते णं एवमाहंसु तं० अस्सिणी जाव पुणव्वसू, ता पूसादिया णं सत्त णक्खत्ता दाहिणदारिया पण्णत्ता, तं जहा पूसो जाव चित्ता, ता सातीआदिया णं सत्त णक्खत्ता अवरदारिया पण्णत्ता, तं० साती जाव उत्तरासाढा, ता अभिइआदिया णं सत्त णक्खत्ता उत्तरदारिया पण्णत्ता, तं जहा अभिती जाव रेवती। तत्थ जे ते एवमाहंसु ता भरणीआदिता णं सत्त णक्खत्ता पुव्वदारिया पण्णत्ता ते णं एवमाहंसु तं० भरणी जाव पुसो, ता अस्सेसातिया णं सत्त णक्खत्ता दाहिणदारिया पण्णत्ता, तं जहा अस्सेसा जाव साती, ता विसाहादिया णं सत्त णक्खत्ता अपरदारिया[२] पण्णत्ता, तं जहा विसाहा जाव अभिई, ता सवणादिया

---

१. अस्सेसा - Q, V। २. अवर - V।

णं सत्त णक्खत्ता उत्तरदारिया पन्नत्ता, तं० सवणो जाव अस्सिणी। एते एवमाहंसु।

टी० '**तत्थे**'त्यादि। **तत्र** द्वारविचारविषये **खल्विमा** वक्ष्यमाणस्वरूपाः **पञ्च** परतीर्थिकानां **प्रतिपत्तयः प्रज्ञप्तास्ता** एव क्रमेणाह - '**तत्थेगे**'त्यादि। **तत्र** तेषां पञ्चानां परतीर्थिकानां मध्ये **एके एवमाहुः कृत्तिकादीनि सप्त नक्षत्राणि पूर्वद्वारकाणि**[१] **प्रज्ञप्तानि**। इह येषु नक्षत्रेषु पूर्वस्यां दिशि गच्छतः प्रायः शुभमुपजायते तानि पूर्वद्वारकाणि[२]। एवं दक्षिणद्वारकादीन्यपि वक्ष्यमाणानि भावनीयानि। अत्रैव चोपसंहारमाह - '**एगे एवमाहंसु १**'। **एके पुन(रेवमाहु)-रनुराधादीनि**[३] **सप्त नक्षत्राणि पूर्वद्वाराणि प्रज्ञप्तानि**। अत्राप्युपसंहारमाह - '**एगे एवमाहंसु २**'। एवं शेषाण्यपि उपसंहारवाक्यानि योजनीयानि। **एके पुनरेवमाहुः धनिष्ठादीनि सप्त नक्षत्राणि पूर्वद्वारकाणि** ३। **एके पुनरेवमाहुरश्विन्यादीनि सप्त नक्षत्राणि पूर्वद्वारकाणि प्रज्ञप्तानि** ४। **एके पुनरेवमाहुर्भरण्यादीनि सप्त नक्षत्राणि पूर्वद्वारकाणि प्रज्ञप्तानि** ५। सम्प्रत्येतेषामेव पञ्चानामपि मतानां भावनिकामाह- '**तत्थे जे ते**' इत्यादि सुगमम्।

भगवान् स्वमतमाह –

मू० वयं पुण एवं वदामो- ता अभिइआदिया णं सत्त णक्खत्ता पुव्वदारिया पण्णत्ता तं जहा अभिई जाव रेवई, ता अस्सिणीआदिया णं सत्त णक्खत्ता दाहिणदारिया पण्णत्ता (तं०) अस्सिणी जाव पुणव्वसू, ता पुस्सातिता णं सत्त णक्खत्ता अवरदारिया पण्णत्ता, (तं०) पुस्सो जाव चित्ता, ता सातितादिया णं सत्त णक्खत्ता उत्तरदारिया पण्णत्ता, तं जहा साती जाव उत्तरासाढा।

---

१. पूर्वद्वारिकाणि - B, M, T। २. पूर्वद्वारिकाणि - T। ३. मूलानुसारेणाऽत्र 'महादीनि' इति पाठः समीचीनो भाति।

दसमे एक्कवीसतिमं २१।

टी० 'वयं पुण' इत्यादि, पाठसिद्धम्।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य एकविंशतितमं प्राभृतप्राभृतं समाप्तम्।

* * * * *

कयपावो वि मणुस्सो, आलोइय निंदिय गुरुसगासे।
होइ अइरेगलहुओ, ओहरियभरु व्व भारवहो।।

सुचिरं पि तवं तवियं, चिन्नं चरणं सुयं च बहुपढियं।
अंते विराहइत्ता, अणंतसंसारिणो भणिया।।

धीरेण वि मरियव्वं, काउरिसेण वि अवस्स मरियव्वं।
ता निच्छियम्मि मरणे, वरं खु धीरत्तणे मरिउं।।

ज्ञानदर्शनचारित्रै-रात्मैक्यं लभते यदा।
कर्माणि कुपितानीव, भवन्त्याशु तदा पृथक्।।

किं स्तुमः समतां साधो-र्या स्वार्थं प्रगुणीकृता।
वैराणि नित्यवैराणा-मपि हन्त्युपतस्थुषाम्।।

द्वाविंशतितमं प्राभृतप्राभृतम्

तदेवमुक्तं दशमस्य प्राभृतस्य एकविंशतितमं प्राभृतप्राभृतम्। सम्प्रति द्वाविंशतितममारभ्यते। तस्य चायमर्थाधिकारो यथा नक्षत्राणां विचयो वक्तव्यः। ततस्तद्विषयं प्रश्नसूत्रमाह –

मू० ता कहं ते णक्खत्तविजते आहिते ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्व्ववत्, **कथं** - केन प्रकारेण (त्वया) **'नक्खत्तविजय'**त्ति विपूर्वश्चित् स्वभावात् स्वरूपनिर्णये वर्त्तते, तथा चोक्तमन्यत्र **''आप्तवचनं ज्ञात्वा वि[षय](चयस्)तदर्थनिर्ण[यं](यनम्)।''** ( ) तत्र विचयनं-विचयो नक्षत्राणां विचयो-**नक्षत्रविचयः** नक्षत्राणां स्वरूपनिर्णय **आख्यात इति वदेत्**?

भगवानाह –

मू० ता अयण्णं जंबुद्दीवे २ जाव परिक्खेवेणं। ता जंबुद्दीवे णं दीवे दो चंदा पभासिंसु पभासेंति पभासिस्संति, दो सूरिया तवइंसु तवयंति तवतिस्संति, छप्पण्णं णक्खत्ता जोगं जोगेंसु जोऐंति [१]जोगेस्संति तं जहा दो अभिती दो समणे जाव दो उत्तरातो आसाढातो। ता एतेसि णं छप्पण्णाए णक्खत्ताणं अत्थि णक्खत्ता जे णं णक्खत्ता णव मुहुत्ते सत्तावीसं च सत्तट्ठिभागे मुहुत्तस्स चंदेण सद्धिं जोगं जोगेंति। एवं पण्णरसमुहुत्ते तीसं मुहुत्ता। अत्थि णक्खत्ता जे णं णक्खत्ता पणयालीसं मुहुत्ते चंदेण सद्धिं जोगं जोएंति। ता एतेसि णं छप्पण्णाए णक्खत्ताणं कयरे णक्खत्ता जे णं णक्खत्ता णव मुहुत्ते सत्तावीसं च स(त्त)ट्ठिभागे मुहुत्तस्स चंदेण सद्धिं जोगं जोएंति जाव कयरे णक्खत्ता जे णं णक्खत्ता पणयालीसं मुहुत्ता

१. जोतिस्संति वा - V।

चंदेण सद्धिं जोगं जोएंति? ता एतेसि णं छप्पण्णाए णक्खत्ताणं तत्थ जे ते ण० जे णं णव मुहुत्ते सत्तावीसं च सत्तट्ठिभागे मुहुत्तस्स चंदेण सद्धिं जोगं जोगेंति ते णं दुवे अभिती। तत्थ णं जे ते ण० जे णं ण० पण्णरसमुहुत्ते जाव जोगं जोगेंति [1]एए णं दुवालस, तं० दो सतभिसता दो भरणीतो जाव दो जेट्ठातो। तत्थ णं जे ते णक्खत्ता जे णं ण० तीसं मुहुत्ते जाव जोगं जोगेंति ते णं तीसं, तं जहा दो समणा जाव दो पुव्वासाढातो। तत्थ णं [के](जे) ते णक्खत्ता जे णं ण० पणतालीसं मुहुत्ता जाव जोगं जोएंति ते णं दुवालस, तं० दो उत्तरातो भद्दवतातो जाव दो उत्तरातो आसाढातो। ता एएसि णं छप्पण्णाए णक्खत्ताणं अत्थि ण० जे णं चत्तारि अहोरत्ते (छच्च मुहुत्ते) सूरेण सद्धिं जोगं जोगेंति, अत्थि णक्खत्ता जे णं ण० छ अहोरत्ते एक्कवीसं च मुहुत्ते जाव जोगं जोगेंति, अत्थि णक्खत्ता जे णं णक्खत्ता तेरस अहोरत्ते दुवालस य मुहुत्ते जाव जोगं जोइंति, अत्थि णक्खत्ता जे णं णक्खत्ता वीसं अहोरत्ते तिण्णि य [2]मुहुत्ते सूरेण सद्धिं जोगं जोगेंति। एएसि णं छप्पण्णाए णक्खत्ताणं कयरे णक्खत्ता जे णं तं चेव उच्चारेयव्वं। ता एएसि णं छप्पण्णाए णक्खत्ताणं तत्थ णं जे ते णक्खत्ता जे णं ण० चत्तारि अहोरत्ते छच्च मुहुत्ते जाव जोगं जोइंति ते णं दुवे अभिती तहेव जाव तत्थ णं जे ते ण० जे णं ण० वीसं अहोरत्ते तिण्णि य मुहुत्ते जाव जोगं जोगेंति ते णं दुवालस तं० दो उत्तरातो भद्दवतातो जाव दो उत्तरातो आसाढातो।

टी० 'ता अयण्ण'मित्यादि। इदं जम्बूद्वीपवाक्यं पूर्ववत् परिपूर्णं स्वयं कृत्वा

१. ते णं - U। २. मुहुत्ते जाव जोगं - H।

परिभावनीयम्। **'ता जंबुद्दीवे ण'**मित्यादि। **तत्र जम्बूद्वीपे 'ण'**मिति वाक्यालङ्कारे **द्वीपे द्वौ चन्द्रौ प्रतिभासितवन्तौ प्रतिभा[स](से)ते प्रतिभासि-[ष्य](ष्ये)ते, द्वौ सूर्यौ तापितवन्तौ तापयतस्तापयिष्यतः, षट्पञ्चाशन्नक्षत्राणि** चन्द्रादिभिः सह **योगमयुञ्जन् युञ्जन्ति योक्ष्यन्ति**। तत्र तान्येव षट्पञ्चाशन्नक्षत्राणि दर्शयति- **'तं जहे'**त्यादि सुगमम्। इह भरतक्षेत्रे प्रतिदिवसमष्टाविंशतिरेव नक्षत्राणि चारं चरन्ति। ततः पूर्वं दशमस्य प्राभृतस्य द्वितीये प्राभृतप्राभृते अष्टाविंशतिनक्षत्राणां चन्द्रमसा सूर्येण च सह योगमधिकृत्य मुहूर्त्तपरिमाणं चिन्तितम्। सम्प्रति पुनः सकलमेव जम्बूद्वीपमधिकृत्य नक्षत्राणि चिन्त्यमानानि वर्त्तन्ते, तानि च सर्वसङ्ख्यया षट्पञ्चाशत्, ततस्ते(षां सर्वे)षामपि चन्द्रसूर्याभ्यां सह योगमधिकृत्य मुहूर्त्तपरिमाणं चिचिन्तयिषुरिदमाह - **'ता एएसि ण'**मित्यादि। एतच्च प्रागुक्तद्वितीयप्राभृत-(प्राभृत)वत्परिभावनीयम्।

तदेवं कालमधिकृत्य चन्द्रमसा सूर्येण च सह योगपरिमाणं चिन्तितम्। सम्प्रति क्षेत्रमधिकृत्य तच्चि(चि)न्तयिषुः प्रथमतः सीमाविष्कम्भविषयं प्रश्नसूत्रमाह –

मू० ता कहं ते सीमाविक्खंभे आहिते ति वदेज्जा?

टी० 'ता कहं ते' इत्यादि। **'ता'** इति पूर्ववत्, **कथं** केन प्रकारेण कियत्या भागसङ्ख्यया इत्यर्थः भगवन्! त्वया [स] सीमाविष्कम्भ आख्यात इति वदेत्?

भगवानाह –

मू० ता एतेसिं णं छप्पण्णाए णक्खत्ताणं अत्थि णक्खत्ता जेसि णं णक्खत्ताणं छ सता तीसा सत्तट्ठिभागतिसतिभागाणं सीम-विक्खंभो, अत्थि णक्खत्ता जेसि णं णक्खत्ताणं सहस्सं पंचुत्तरं सत्तट्ठीभागतीसतिभागाणं सीमविक्खंभो, अत्थि णक्खत्ता जेसि णं णक्खत्ताणं दो सहस्सा दसुत्तरा सत्तट्ठिभागतीसतिभागाणं सीम-विक्खंभो, अत्थि णक्खत्ता जेसि णं णक्खत्ताणं तिण्णि सहस्सा

पण्णरसुत्तरा सत्तट्ठिभागतीसतिभागाणं सीमविक्खंभो। ता एएसि णं छप्पण्णाए णक्खत्ताणं कतरे णक्खत्ता जेसि णं णक्खत्ताणं छ सता तीसा सत्तट्ठिभागतीसतिभागाणं सीमविक्खंभो जाव कतरे णक्खत्ता जेसि णं णक्खत्ताणं तिण्णि सहस्सा पण्णरसुत्तरा सत्तट्ठिभागतीसई जाव सीमविक्खंभो? ता एएसि णं छप्पण्णाए णक्खत्ताणं तत्थ जे ते णक्खत्ता जेसि णं णक्खत्ताणं छ सता तीसा सत्तट्ठि-भागतिसतिभागाणं सीमविक्खंभो ते णं दुवे अभीती, तत्थ णं जे ते णक्खत्ता जेसि णं णक्खत्ताणं सहस्सं पंचुत्तरं सत्तट्ठिभागा जाव सीमविक्खंभो ते णं दुवालस, तं जहा दो सतभिसतातो जाव दो जेट्ठातो, तत्थ णं जे ते णक्खत्ता जेसि णं णक्खत्ताणं दोण्णि सहस्सा दसुत्तरा सत्तट्ठिभाग० जाव सीमविक्खंभो ते णं तीसं तं जहा दो सवणा जाव दो पुव्वातो आसाढातो, [1]तत्थ णं जे ते णक्खत्ता जेसि णं ण० तिण्णि सहस्सा पण्णरसुत्तरा सत्तट्ठिभाग० जाव सीमविक्खंभो ते णं दुवालस तं० दो उत्तरातो भद्दवतातो जाव दो उत्तरातो आसाढातो। ता एएसि णं छप्पण्णाए णक्खत्ताणं किं सता पादो चंदेण सद्धिं जोगं जोगेति, किं सता [2]सायं चंदेण सद्धिं जोगं जोगेति, किं सता दुहतो पविसित्ता चंदेणं सद्धिं जोगं जोगेति? ता एए णं छप्पण्णं णक्खत्ता णो सता पाओ चंदेण सद्धिं जोगं जोगेंति णो सता सागं चंदेण सद्धिं जोगं जोगेंति णो सता दुहतो पविसित्ता चंदेण सद्धिं जोगं जोगेंति, णण्णत्थ वा दोहिं अभीतीहिं, ता एए णं दो अभीती [आअंविता] (पायं चिय) चोत्तालीसतिमं२ अ(मावा)सं जोएंति णो चेव णं पोण्णमासी[णं](णीं)। तत्थ खलु

१. ता एतेसिं णं छप्पण्णाए णक्खत्ताणं तत्थ - U। २. सागं - U।

इमातो बावट्ठिपुण्णिमातो बावट्ठिअमावासातो पण्णत्ताओ।

टी० 'ता एएसि ण'मित्यादि। इहाष्टाविंशत्या नक्षत्रैः स्वगत्या स्वस्वकाल-परिमाणेन क्रमशो यावत् क्षेत्रं व्याप्यमानं बुद्ध्या सम्भाव्यते तावदे[व](क)-मर्द्धमण्डलमुपकल्प्यते, एतावत्प्रमाणमेव द्वितीयमर्द्धमण्डल[द्वि](मि)त्येवम्प्रमाणं बुद्धिपरिकल्पितमेकं पूरिपूर्णमण्डलम्। [तस्य मण्डलस्य] (तन्मण्डलं) **'मंडलं (सय)सहस्सेण अट्ठाणउए सएहिं छेत्ता इच्चेस नक्खत्तखेत्तपरिभागे नक्खत्तविजये पाहुडे आहिए त्ति बेमि'** (पृ.४१८) इति वक्ष्यमाणवचनात् अष्टानवतिशताधिकशतसहस्रभागैर्विभज्यते। किमेवंसङ्ख्यानां भागानां कल्पने निबन्धनमिति चेत् ? उच्यते, इह विविधानि नक्षत्राणि, तद्यथा समक्षेत्राणि अर्द्धक्षेत्राणि द्व्यर्द्धक्षेत्राणि च। तत्र यावत्प्रमाणं क्षेत्रमहोरात्रेण गम्यते नक्षत्रैस्तावत्-क्षेत्रप्रमाणं चन्द्रेण सह योगं या[न्ति](नि) गच्छ(न्)ति तानि समक्षेत्राणि, [१]तानि च पञ्चदश, तद्यथाश्रवणो धनिष्ठा पूर्वभद्रपदा रेवती अश्विनी कृत्तिका मृगशिरः पुष्यो मघा पूर्वफाल्गुनी हस्तश्चित्रा अनुराधा मूलः पूर्वाषाढा इति। तथा यानि अहोरात्रप्रमितस्य क्षेत्रस्य (अर्द्धं) चन्द्रेण सह योगमश्नुवते तान्यर्द्धक्षेत्राणि, तानि च षट्, तद्यथा शतभिषक् भरणी आर्द्रा अश्लेषा स्वातिः ज्येष्ठेति। तथा द्वितीयमर्द्धं यस्य तत् द्व्यर्द्धं सार्द्धमित्यर्थः द्व्यर्द्धमर्द्धेनाधिकं क्षेत्रमहोरात्रप्र[तिमं](मितं) चन्द्र(योग)योग्यं येषां तानि द्व्यर्द्धक्षेत्राणि, तान्यपि षट्, तद्यथा उत्तरभद्रपदा उत्तरफाल्गुनी उत्तराषाढा रोहीणी पुनर्वसु विशाखा चेति। तत्र सीमापरिमाण-चिन्तायामहोरात्राः सप्तषष्टिभागीक्रिय(न्)ते इति समक्षेत्राणां क्षेत्रं प्रत्येकं सप्तषष्टिभागाः परिकल्प्यन्ते, अर्द्धक्षेत्राणां त्रयस्त्रिंशत् अर्द्धं च, द्व्यर्द्धक्षेत्राणां शतमेकमर्द्धं च, अभिजिन्नक्षत्रस्य एकविंशतिः सप्तषष्टिभागाः, समक्षेत्राणि च नक्षत्राणि पञ्चदशेति सप्तषष्टिः पञ्चदशभिर्गुण्यते, जातं सहस्रं पञ्चोत्तरं १,००५, अर्द्धक्षेत्राणि षट्, ततः

१. तानि पञ्चदश - D, E, G, K, T।

सार्द्धा त्रयस्त्रिंशत् षड्भिर्गुण्य[न्]ते, जाते द्वे शते एकोत्तरे २०१, द्व्यर्द्धक्षेत्राण्यपि षट्, ततः शतमेकमर्द्धं च षड्भिस्ताड्यते, जातानि षट् शतानि त्र्युत्तराणि ६०३, अभिजिन्नक्षत्रस्य एकविंशतिः २१, सर्वसङ्ख्यया जातानि अष्टादशशतानि त्रिंशदधिकानि १,८३०। एतावद्भागपरिमाणमेकमर्द्धं[1] मण्डलमेतावद्भागमेव द्वितीयमिति त्रिंशदधिकान्यष्टादशशतानि द्वाभ्यां गुण्यन्ते, जातानि षट्त्रिंशच्छतानि षष्ट्यधिकानि ३,६६०। एकैकस्मिन्नहोरात्रे किल त्रिंशन्मुहूर्त्ता इति प्रत्येकमेतेषु षष्ट्यधिकषट्त्रिंशत्शतसङ्ख्येषु भागेषु त्रिंशद्भागकल्पनायां त्रिंशता गुण्यन्ते[2], जातमेकं शतसहस्रमष्टानवतिशतानि १,०९,८००। [ए]त[त्](त) इत्थं मण्डलस्य भागान्परिकल्प्य भगवान्प्रतिवचनं ददाति **'ता'** इत्यादि। **'ता'** इति **तत्र एतेषां षट्पञ्चाशतो नक्षत्राणां** मध्ये अस्तीति निपात[नार्थ](त्वादार्ष)त्वा[त्](द्वा) **(स्तस्)**ते **नक्षत्रे** [यो यः] **(ययोः)** प्रत्येकं **षट्शतानि त्रिंशदधिकानि सप्तषष्टि-(भागत्रिंशद्)भागानां सीमाविष्कम्भः** सीमापरिमाणं, तथाऽस्तीति **सन्ति** तानि **नक्षत्राणि येषां** प्रत्येकं **पञ्चोत्तरं सहस्रं सप्तषष्टि(भाग)त्रिंशद्भागानां सीमाविष्कम्भः, सन्ति** तानि **नक्षत्राणि येषां** प्रत्येकं **द्वे सहस्रे दशोत्तरे सप्तषष्टि(भाग)त्रिंशद्भागानां सीमाविष्कम्भः, सन्ति** तानि **नक्षत्राणि येषां** प्रत्येकं **त्रीणि सहस्राणि** (**पञ्चदशोत्तराणि**) **सप्तषष्टि(भागत्रिंशद्)भागानां सीमाविष्कम्भः** सीमापरिमाणम्। एवं भगवता सामान्येनोक्ते भगवान् गौतमो विशेषावगमनिमित्तं भूयः प्रश्नयति **'ता एएसि ण'**मित्यादि। **तत्र एतेषां षट्पञ्चाशन्नक्षत्राणां** मध्ये **कतराणि** तानि **नक्षत्राणि येषां षट्शतानि त्रिंशानि सप्तषष्टित्रिंशद्भागानां सीमाविष्कम्भः 'जावे'**त्यादि **यावच्छब्दादिदं** सूत्रद्वयमपान्तराले द्रष्टव्यं **'कयरे नक्खत्ता जेसिं सहस्सं पंचोत्तरं सत्तट्ठि-भागतीसइभागाणं सीमाविक्खंभो, कयरे नक्खत्ता जेसिं दो सहस्सा दसुत्तरा**

१. ... मर्द्धमण्डल.. E, G, K। २. गुणनं - D, E, G, K।

सत्तट्ठिभागतीसइभागाणं सीमाविक्खंभो' इति, चरमं तु सूत्रं साक्षादाह – '**कयरे नक्खत्ता**' इत्यादि। एतानि त्रीण्यपि सूत्राणि सुगमानि। भगवानाह – '**ता एएसि ण**'मित्यादि। **तत्र एतेषां षट्पञ्चाशतो नक्षत्राणां** मध्ये **यानि तानि नक्षत्राणि** [शेषानि](**येषां**) **षट्शतानि त्रिंशानि सप्तषष्टिभागत्रिंशद्भागानां सीमाविष्कम्भः ते द्वे अभिजिन्नक्षत्रे**। कथमेतदवसीयते इति चेत् ? उच्यते, इह एकैकस्याभिजितो नक्षत्रस्य सप्तषष्टिखण्डीकृतस्याहोरात्रगम्यस्य क्षेत्रस्य सत्का एकविंशतिर्भागाश्चन्द्रयोगयोग्याः एकैकस्मिंश्च भागे त्रिंशद्भागपरिकल्पनादेकविंशतिः त्रिंशता गुण्य[न्]ते, जातानि षट्शतानि त्रिंशदधिकानि ६३०। तथा **तत्र** तेषां षट्पञ्चाशतो नक्षत्राणां मध्ये **यानि तानि नक्षत्रा[णां](णि) येषां** प्रत्येकं **पञ्चोत्तरं सहस्रं सप्तषष्टित्रिंशद्भागानां सीमाविष्कम्भः तानि द्वादश, तद्यथा- द्वे शतभिष[जो](जौ) 'जाव दो जेट्ठाओ**'त्ति **यावत्**शब्दकरणादेवं द्रष्टव्यं - '**दो भरणीओ (दो अद्दाओ) दो अस्सेसाओ (दो साईओ) दो जेट्ठाओ त्ति**', तथाह्येतेषां द्वादशानामपि नक्षत्राणां प्रत्येकं सप्तषष्टिखण्डीकृतस्याहोरात्रगम्यस्य क्षेत्रस्य सत्काः सार्द्धास्त्रयस्त्रिंशद्भागाश्चन्द्रयोगयोग्याः, ततस्त्रयस्त्रिंशत् त्रिंशता गुण्यते, जातानि नव शतानि नवत्यधिकानि ९९०, अर्द्धस्यापि च त्रिंशता गुणयित्वा द्वाभ्यां भागे हृते लब्धाः पञ्चदश १५, सर्वसङ्ख्यया जातं पञ्चोत्तरं सहस्रं १,००५। तथा **तत्र** तेषां षट्पञ्चाशतो नक्षत्राणां मध्ये **यानि तानि नक्षत्राणि येषां द्वे सहस्रे दशोत्तरे सप्तषष्टिभागत्रिंशद्भागानां सीमाविष्कम्भस्तानि त्रिंशत् तद्यथा द्वौ श्रवणौ 'जाव दो पुव्वाओ आसाढाओ**' त्ति यावत् शब्दादेवं पाठो द्रष्टव्यः - '**दो धणिट्ठाओ दो पुव्वभद्दवयाओ दो रेवईओ दो अस्सीणीओ दो कत्तियाओ दो मिगसिरा दो पुस्सा दो मघाओ दो पुव्वफग्गुणीओ दो हत्था दो चित्ता दो अणुराहाओ दो मूलाओ दो पुव्वाओ आसाढाओ**' इति। तथाह्येतानि नक्षत्राणि समक्षेत्राणि, तत एतेषां सप्तषष्टिखण्डी-

कृतस्याहोरात्रगम्यस्य (क्षेत्रस्य) सत्काः परिपूर्णाः सप्तषष्टिभागाः प्रत्येकं चन्द्रयोग-गम्याः, तेन सप्तषष्टिः त्रिंशता गुण्यते, जाते द्वे सहस्रे दशोत्तरे इति। तथा **तत्र** तेषां षट्पञ्चाशतो नक्षत्राणां मध्ये **यानि तानि नक्षत्राणि येषां** प्रत्येकं **त्रीणि सहस्राणि पञ्चदशोत्तराणि सप्तषष्टि(भाग)त्रिंशद्भागानां सीमाविष्कम्भः तानि द्वादश, तद्यथा- द्वे उत्तरभद्रपदे 'जाव उ दो उत्तराओ आसाढाओ'** इति। अत्र यावच्छब्दकरणादेवं द्रष्टव्यं - **'दो रोहिणीओ दो पुणव्वसू दो उत्तरफग्गुणी दो विसाहाओ दो उत्तराओ आसाढाओ'** इति। (ए)तानि हि नक्षत्राणि द्व्यर्द्धक्षेत्राणि। ततः सप्तषष्टिखण्डीकृतस्याहोरात्रगम्यस्य क्षेत्रस्य सत्काश्चन्द्रयोगयोग्या भागाः शतमेकमर्द्धं च प्रत्येकमवगन्तव्याः। तत्र (शतं) त्रिंशता गुण्यते, जातानि त्रीणि सहस्राणि अर्द्धमपि त्रिंशता गुणयित्वा द्वाभ्यां विभज्यते, लब्धाः पञ्चदश इति। **'ता एएसि ण'**मित्यादि। **'ता'** इति **तत्र एतेषां षट्पञ्चाशतो नक्षत्राणां** मध्ये **किं** नक्षत्रं यत्**सदा प्रात**रेव **चन्द्रेण सार्द्धं योगं युनक्ति, किं** नक्षत्रं यत्**सदा सायं** दिवसावसानसमये **चन्द्रेण सार्द्धं योगं युनक्ति, किं** तन्नक्षत्रं यत्**सदा द्विधातः** प्रातः सायं च समये **प्रविश्य चन्द्रेण सार्द्धं योगं युनक्ति** ? भगवानाह- [१]**'ता एएसि ण'**मित्यादि। **तत्र एतेषां षट्पञ्चाशतो नक्षत्राणां** मध्ये **न किमपि तन्नक्षत्रमस्ति यत्सदा प्रात**रेव **चन्द्रेण सार्द्धं योगं युनक्ति, नापि** तन्नक्षत्रमस्ति यत्**सदा सायं** च समये **चन्द्रेण सार्द्धं योगं युनक्ति, नापि** तदस्ति नक्षत्रं यत्**सदा द्विधातः** प्रातः सायं च समये **प्रविश्य चन्द्रेण सह योगं युनक्ति**। किं सर्वथा नेत्याह - **'नन्नत्थे'**त्यादि। **नेति** प्रतिषेधोऽन्यत्र **द्वाभ्यामभिजिद्भ्याम**वसे[यं](यः)। कस्मादित्याह - **'ता एए[सि] ण'**मित्यादि। **'ता'** इति **तत्र** तेषां षट्पञ्चाशतो नक्षत्राणां मध्ये **एते** अनन्तरोदिते **द्वे अभिजि[तो](तौ)** अभिजिन्न(क्षत्रे) युगे युगे **प्रातरेव चतुश्चत्वारिंशत्तमां चतुश्चत्वारिंशत्तमाममावास्यां** चन्द्रेण सह

१. अत्र मूलानुसारेण टीका नास्ति।

योगमागत्यागत्य **संयु(ङ्)क्तः** परिसमापयतः [ता चे]**(नो चै)व पौर्ण्णमासीम्।** अथ कथमेतदवसीयते यथा युगे युगे चतुश्चत्वारिंशत्तमाममावास्यां सदैव प्रातः समये अभिजिन्नक्षत्रं चन्द्रेण सार्द्धं योगमुपगम्य परिसमापयति इति ? उच्यते, पूर्वाचार्योपदर्शितकरणवशात्तथाहि- तिथ्यानयनार्थं तावत्करणमिदं - **'तिहिरासि[मिवचवेवि भयइ](मेव बावट्ठिभाइया) सेसमेगसट्ठिगुणं। बावट्ठीए विभत्ते सेसा अंसा तिहिसम्मत्ती॥११७॥'** **(जो.प.)** अस्या अक्षरगमनिका - ये युगमध्ये चन्द्रमासा अतिक्रान्तास्ते तिथिरा[श्योरा](श्या)नयनार्थं त्रिंशता गुण्यन्ते, गुणयित्वा च तस्य राशेर्भागोपि [चतुः](द्वि)षष्ट्या ह्रियते, हृते च भागे यदवतिष्ठते तस्मिन्नेकषष्ट्या गुणयित्वा द्वाषष्ट्या विभक्ते येंऽशा उद्धरन्ति सा विवक्षिते (दिने विवक्षित) तिथिपरिसमाप्तिः। ततश्चतुश्चत्वारिंशत्तमाया ममावास्यायां चिन्त्यमानायां त्रिचत्वारिंशच्चन्द्रमासा एकं च चन्द्रमासस्य पर्व्व प्राप्यते, ततस्त्रिचत्वारिंशत् त्रिंशता गुण्यते, जातानि द्वादश शतानि नवत्यधिकानि १,२९०। तत उपरितना पर्वगताः पञ्चदश प्रक्षिप्यन्ते, जातानि त्रयोदशशतानि पञ्चोत्तराणि १,३०५। तेषां द्वाषष्ट्या भागो ह्रियते, लब्धा एकविंशतिः। सा त्यज्यते। शेषास्तिष्ठन्ति त्रयः। ते एकषष्ट्या गुण्यन्ते, जातं त्र्यशीत्यधिकं शतं १८३। तस्य द्वाषष्ट्या भागो ह्रियते, लब्धौ द्वौ, तौ त्यक्तौ, शेषा तिष्ठत्येकोनषष्टिः ५९। आगतमेकोनषष्टिर्द्वाषष्टिभागास्तस्मिन्दिने अमावास्या। अमावास्यापौर्ण्णमासीषु च नक्षत्रानयनार्थं प्रागुक्तमेव करणम्। तत्र ध्रुवराशिः षट्षष्टिर्मुहूर्त्ता एकस्य च मुहूर्त्तस्य पञ्च (द्वा)षष्टिभागा एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभाग इति ६६ ५/६२ १/६७। तत्र चतुश्चत्वारिंशत्तमाऽमावास्या चिन्तयितुमारब्धा। ततश्चतुश्चत्वारिंशता गुण्यते, जातानि मुहूर्तानामेकोनत्रिंशच्छतानि चतुरुत्तराणि २,९०४ एकस्य च मुहूर्त्तस्य द्वाषष्टिभागानां द्वे शते विंशत्यधिके २२० एकस्य च द्वाषष्टिभागस्य चतुश्चत्वारिंशत् सप्तषष्टिभागाः ४४। तत्र पुनर्वसुप्रभृतिकमुत्तराषाढापर्यन्तं चत्वा[रिंशत्](रि) शतानि द्विचत्वारिंश-

दधिकानि मुहूर्त्तानामेकस्य मुहूर्त्तस्य षट्चत्वारिंशत् द्वाषष्टिभागा ४[०]४२ ४६/६२ इत्येवम्प्रमाणं शोध्यते, जातानि मुहूर्त्तानां चतुर्विंशतिशतानि द्वाषष्ट्यभ्यधिकानि २,४६२ एकस्य च मुहूर्त्तस्य चतुःसप्तत्यधिकं शतं द्वाषष्टिभागानां १७४, ततोऽभिजिदादिसकलनक्षत्रमण्डलशोधनकं अष्टौ शतानि एकोनविंशत्यधिकानि मुहूर्त्तानां एकस्य च मुहूर्त्तस्य चतुर्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागाः ८१९।२४।६६ इत्येवम्प्रमाणं यावत्सम्भवं शोधनीयम्। तत्र त्रिगुणमपि शुद्धिमासादयतीति त्रिगुणं कृत्वा शोध्यते, स्थिताः पश्चात् षण्मुहूर्त्ता एकस्य च मुहूर्त्तस्य सप्तत्रिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशत् सप्तषष्टिभागाः ६।३७।४७। आगतं चतुश्चत्वारिंशत्तममामावास्यामभिजिन्नक्षत्रं षण्मुहूर्त्तेष्वेकस्य[1] च मुहूर्त्तस्य सप्तत्रिंशत् द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशति सप्तषष्टिभागेषु गतेषु परिसमापयति। तत इत्थं करणवशात्प्रागुक्तमवसीयते इति। सम्प्रत्यमावास्यापौर्णमासीप्रक्रमादेव तत्प्ररूपणां चिकीर्षुरिदमाह – **'तत्थ खलु'** इत्यादि। **तत्र** युगे **खल्विमा** वक्षमाणस्वरूपा **द्वाषष्टिः पौर्णमास्यो द्वाषष्टिरमावास्याः प्रज्ञप्ताः**।

एवमुक्ते भगवान् गौतमः पृच्छति –

मू० ता एएसि णं पंचण्हं संवच्छराणं पढमं पुण्णिमासिणिं चंदे कंसि देसंसि जोतेति ? ता जंसि णं देसंसि चंदे चरमबावट्ठिं पुण्णिमासिणीं जोएति, तातो पोण्णिमासिणीठाणाओ मंडलं चउव्वीसेणं सतेणं छेत्ता दुवत्तीसं भागे उवाइणावेत्ता एत्थ णं से चंदे पढमं पोण्णिमासिणिं जोएति। ता एतेसि णं पंचण्हं संवच्छराणं दोच्चं पुण्णिमासिणिं चंदे कंसि देसंसि जोएति ? ता जंसि णं देसंसि चंदे पढमं पोण्णिमासिणिं जोएति, ताओ पोण्णिमासिणिट्ठाणातो

१. षट्सु मुहूर्त्ते.... - C।

मंडलं चउव्वीसेणं सतेणं छेत्ता दोवत्तीसं भा[गा](गे) [१]उवचिणावेत्ता [२]एत्थ णं से चंदे दुच्चं पोण्णिमासिणिं जोएति। ता एएसि णं पंचण्हं संवच्छराणं तच्चं पुण पुच्छा। ता जंसि णं देसंसि चंदे दोच्चं पुण्णिमासिणिं जोएति तातो पुण्णिमासिणीठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता दुवत्तीसं भागे उवाइणावेत्ता एत्थ णं तच्चं चंदे पुण्णिमासिणिं जोएति। ता एएसि णं पंचण्हं संवच्छराणं दुवालसमं पोण्णिमासिणिं चंदे कंसि देसंसि जोतेति? ता जंसि णं देसंसि चंदे तच्चं पोण्णिमासिणिं जोएति ताओ पुण्णिमा-सिणिट्ठाणाओ मंडलं चउव्वीसेणं सतेणं छेत्ता दोण्णि अट्ठासीते भागसते [३]उवचिणावेत्ता एत्थ णं से चंदे दुवालसमं पोण्णिमासिणिं जोएति। एवं खलु एतेणं उवाएणं ताते २ पुण्णिमासिणिठाणाते मंडलं चउव्वीसेणं सतेणं छेत्ता दुवत्तीसं दुवत्तीसं भागे [४]उवचिणावेत्ता तंसि तंसि देसंसि चंदे तं तं पुण्णमासिणिं जोएति। ता एएसि णं पंचण्हं संवच्छराणं [५]चरिमं बावट्ठिं पोण्णिमासिणिं चंदे कंसि देसंसि जोतेति? ता जंबुद्दीवस्स २ (णं) पातीणपडिणाय-तउदीणदाहिणमायताते जीवाते मंडलं चउव्वीसेणं सतेणं छेत्ता दाहिणंसि चउभागमंडलंसि सत्तावीसं (चउ)भागे [६]उवचिणावेत्ता अट्ठावीसतिमं भागं वीसहा छेत्ता अट्ठारसभागे [७]उवचिणावेत्ता तिहिं भागेहिं दोहिं कलाहिं [८]पच्चच्छिमं चउभागमंडलमसंपत्ते एत्थ णं से चंदे [९]चरिमं बावट्ठिं पुण्णिमासिणिं जोएति।

---

१. उवाइणावेत्ता - H, R। २. इत्थ - R। ३. उवाइणावेत्ता - Q, R। ४. उवाइणावेत्ता - Q, R। ५. चरिमबावट्ठिं - R। ६. उवाइणावेत्ता - Q, R, U। ७. उवाइणावेत्ता - Q। ८. पच्चत्थिमं - R। ९. चरिमबावट्ठिपुण्णिमासिणिं - R।

टि० '**ता**' इत्यादि। **तत्र** युगे **एतेषा**मनन्तरोदितानां चन्द्रादिनां (**पञ्चानां**) **संवत्सराणां** मध्ये **प्रथमां पौर्णमासीं चन्द्रः कस्मिन्देशे युनक्ति** परिसमापयति ? भगवानाह - '**ता जंसि ण**'मित्यादि। **तत्र यस्मिन्देशे चन्द्रश्चरमां** पाश्चात्यां युगपर्यन्तवर्त्तिनीं **द्वाषष्टितमां पौर्णमासीं युनक्ति** परिसमापयति **तस्मात् पौर्णमासीस्थानात्** चरमद्वाषष्टितमपौर्णमासिपरिसमाप्तिस्थानात् परतो **मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा** विभज्य तद्गतान् **द्वात्रिंशतं भागानुपादाय** गृहीत्वा **अत्र** द्वात्रिंशद्भागपर्यन्तक्षेत्रदेशे **चन्द्रः** [१]**प्रथमां पौर्णमासीं युनक्ति** परिसमापयति। भूयः प्रश्नं करोति - '**ता एएसि ण**'मित्यादि। '**ता**' इति **तत्र** युगे **एतेषा**मनन्तरोदितानां (**पञ्चानां**) **संवत्सराणां** मध्ये या द्वितीया पौर्णमासी तां **चन्द्रः कस्मिन्देशे** (**युनक्ति**) परिसमापयति ? भगवानाह- '**ता** [२]**जस्सि ण**'मित्यादि। '**ता**' इति **तत्र यस्मिन्देशे चन्द्रः प्रथमां पौर्णमासीं (युनक्ति)** परिसमापयति **तस्मात् पौर्णमासीस्थानात्** प्रथमपौर्णमासीपरिसमाप्ति-स्थानात् परतो **मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा** तद्गतान् **द्वात्रिंशतं भागानुपादाय [य](अ)त्र** प्रदेशे स **चन्द्रो द्वितीयां पौर्णमासीं** परिसमापयति। एवं तृतीयपौर्णमासीविषयमपि सूत्रं व्याख्येयम्। (एवं) द्वादशपौर्णमासीविषयमपि, नवरं '**दोण्णि अट्ठासीए भगसए**'त्ति तृतीयस्याः पौर्णमास्याः परतो द्वादशी किल [३]पौर्णमासी नवमी भवति, ततो नवभिर्द्वात्रिंशद्गुणने अष्टाशीत्यधिके द्वे शते भवतः २८८। सम्प्रति अतिदेशमाह - '**एवं खलु**' इत्यादि। **एव**मुक्तेन प्रकारेण **खलु** निश्चितमे**तेना**नन्तरोदिते**नोपायेन** यां यां पौर्णमासीं यत्र (यत्र) देशे परिसमापयति तस्यास्तस्याः पौर्णमास्याः **तां** तामनन्तरां **पौर्णमासीं तस्मात्** २ पाश्चात्य-पाश्चात्य**पौर्णमासीपरिसमाप्तिस्थानात् मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा** परतस्तद्गतान् **द्वात्रिंशतं** २ **भागान् उपादाय तस्मिन्तस्मिन्देशे चन्द्रः**

---

१. प्रथमपौर्णमासीं - C, G, L। २. मूले तु 'जंसि' इति पाठः। ३. पूर्णमासी - H, I, K।

परिसमापयति, स चैवं परिसमापयन् तावद्वेदितव्यो यावद्भूयोऽपि चरमां द्वाषष्टीं पौर्णमासीं तस्मिन्देशे परिसमापयति [त](य)स्मिन्देशे पाश्चात्ययुगे चरमां द्वाषष्टिं पौर्णमासीं परिसमापितवान्। कथमेतदवसीयते इति चेत् ? उच्यते, ग[णना]-(णित)क्रमवशात्, तथाहि- पाश्चात्ययुगे चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिस्थानात् परतो मण्डलस्य चतुर्विंशत्यधिकशतप्रविभक्तस्य सत्कानां द्वात्रिंशतो भागानामतिक्रमे तस्यास्तस्याः पौर्णमास्याः परिसमाप्तिः द्वाषष्टिश्च सर्वसङ्ख्यया युगे पौर्णमास्यस्ततो द्वात्रिंशत् द्वाषष्ट्या गुण्यते, जातान्येकोनविंशतिशतानि चतुरशीत्यधिकानि १,९८४। तेषां चतुर्विंशत्यधिकेन शतेन भागो ह्रियते, लब्धाः षोडश सकलमण्डलपरिव-[र्त्या](र्त्ताः) समस्तस्यापि च राशेर्निर्लेपीभवनादागतं यस्मिन्देशे पाश्चात्ययुगसम्बन्धि-चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिः तस्मिन्नेव देशे विवक्षितस्यापि युगस्य चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिः। सम्प्रति चरमद्वाषष्टितमपौर्णमासीपरिसमाप्तिदेशं पृच्छति – **'ता एएसि ण'**मित्यादि। **'ता'** इति **तत्र** युगे **एतेषा**मनन्तरोदितानां **पञ्चानां संवत्सराणां** मध्ये **चरमां द्वाषष्टितमां पौर्णमासीं चन्द्रः कस्मिन्देशे युनक्ति** परिसमापयति ? भगवानाह – **'ता जंबुद्दीवस्स[1] ण'**मित्यादि। **'ता'** इति पूर्ववत् **जम्बूद्वीपस्य 'ण'**मिति वाक्यालङ्कारे **द्वीपस्यो**परि **प्राचीनापाचीनाय-तया**, इह प्राचीनग्रहणेनोत्तरपूर्वा गृह्यते अपाचीनग्रहणेन दक्षिणापरा, ततोऽयमर्थः पूर्वोत्तरदक्षिणापरायतया, एव**मुदीच्यदक्षिणायतया** पूर्वदक्षिणोत्तरापरायतया **जीवया** प्रत्यञ्चया [याव] दवरिकया इत्यर्थः **मण्डलं (चतुर्विंशेन)** चतुर्विंशत्यधिकेन **शतेन च्छित्त्वा** विभज्य भूयश्चतुर्भिर्विभज्य ततो **दाक्षिणा[त्या](त्ये) चतुर्भागमण्डले** एकत्रिंशद्भागप्रमाणे **सप्तविंशतिभागानुपादायाष्टाविंशतितमं** च **भागं** च **विंशतिधा च्छित्त्वा** तद्गता**नष्टादश भागानुपादाय** शेषै**स्त्रिभिर्भागै**श्चतुर्थस्य च भागस्य **द्वाभ्या कलाभ्यां पाश्चात्यं चतुर्भागमण्डल[समं](मसम्)प्राप्तः, अस्मिन्** प्रदेशे **चन्द्रो द्वाषष्टितमां चरमां पौर्णमासीं** परिसमापयति।

---

१. जंबुद्दीवस्स २ - मूले।

तदेवं चन्द्रस्य पौर्णमासीपरिसमाप्तिदेश उक्तः। सम्प्रति सूर्यस्य पौर्णमासीपरिसमाप्तिदेशं प्रतिपिपादयिषुस्तद्विषयं प्रश्नसूत्रमाह-

मू० ता एतेसि णं पंचण्हं संवच्छराणं पढमं पुण्णिमासिणिं सूरे कंसि देसंसि जोएति? ता जंसि णं देसंसि सूरे चरिमं बावट्ठिं पुण्णिमासिणिं जोएति ताओ पुण्णिमासिणिठाणाओ मंडलं चउव्वीसेणं सतेणं छेत्ता चउणउतिं भागे उंवचिणावेत्ता[1] एत्थ णं सूरे पढमं पुण्णिमासिणिं जोएति। ता एतेसि णं पंचण्हं संवच्छराणं दोच्चं पुण पुच्छा। ता जंसि णं देसंसि सूरे पढमं पुण्णिमासिणिं जोएति ताओ पुण्णिमासिणिठाणातो मंडलं चउव्वीसेणं सएण छेत्ता चउणवतिं भागे उवचिणावेत्ता एत्थ णं से सूरे दोच्चं पोण्णिमासिणिं जोएति, एवं तच्चंपि, णवरं दोच्चातो। ता एएसि णं पंचण्हं संवच्छराणं दुवालसमं पुण्णिमासिं पुच्छा। ता जंसि णं देसंसि सूरे तच्चं पोण्णिमासिणिं जोएति ताओ पुण्णिमासिणिठाणाओ मंडलं चउव्वीसेणं सएणं छेत्ता अट्ठछातालेभागसते उवचिणावेत्ता एत्थ णं से सूरे दुवालसमं पुण्णिमासिणिं जोएति। एवं खलु एएणं उवाएणं ताओ २ पुण्णिमासिणिठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता चउणवतिं च० २ भागे उवचिणावेत्ता तंसि तंसि देसंसि तं तं पुण्णिमासिणिं सूरो जोएति। ता एतेसि णं पंचण्हं संवच्छराणं चरिमबावट्ठिं पुन्निमासिणिं सूरे कंसि देसंसि जोएति ? ता जंबुद्दीवस्स २ (णं) पाईणपडिणाततताते उदीणदाहिणमायताए जीवाए मंडलं चउव्वीसेणं सतेणं छेत्ता पुरच्छिमंसि चउभागमंडलंसि सत्तावीसं भागे उवचिणावेत्ता अट्ठावीसतिमं भागं वीसहा छेत्ता अट्ठारसभागे

१. उवाइणावेत्ता - R।

उवचिणावेत्ता तिहिं भागेहिं दोहिं य कलाहिं दाहिणं चउभाग-मंडलमसंपत्ते एत्थ णं सूरे चरिमबावट्ठिं पुण्णिमासिं जोएति।[१]

टी० '**ता एएसि ण**'मित्यादि। '**ता**' इति **तत्र** युगे **एतेषा**मनन्तरोदितानां **पञ्चानां संवत्सराणां** मध्ये **प्रथमां पौर्णमासीं सूर्यः कस्मिन्देशे** स्थितः सन् **युनक्ति** परिसमापयति ? भगवानाह- '**ता**[२] **जस्सि ण**'मित्यादि। **तत्र यस्मिन्** (**देशे**) स्थितः सन् **सूर्यश्चरमां**-पाश्चात्ययुगवर्त्तिनीं **द्वाषष्टितमां पौर्णमासीं युनक्ति**-परिसमापयति **तस्मात् पौर्णमासीस्थानात्**- चरमद्वाषष्टितमपौर्णमासीपरिसमाप्ति-निबन्धनात्स्थानात् परतो **मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा**-विभज्य तद्गतान् [३]**चतुर्नवतिं भागानुपादाय सूर्यः प्रथमां पौर्णमासीं** परिसमापयति। किमत्र कारणमिति चेत् ? उच्यते, इह परिपूर्णेषु [४]त्रिंशत्यहोरात्रेषु परिसमाप्तेषु सत्सु स एव सूर्यस्तस्मिन्नेव देशे वर्त्तमानः प्राप्यते न कतिपयभागेषु न्यूनेषु, पौर्णमासी च चन्द्रमासपर्यन्ते परिसमाप्तिमुपैति, चन्द्रमासस्य च परिमाणं एकोन-त्रिंशदहोरात्रा एकस्य चाहोरात्रस्य द्वात्रिंशद् द्वाषष्टिभागास्ततस्त्रिंशत्तमेऽहोरात्रे द्वात्रिं-शति द्वाषष्टिभागेषु गतेषु सूर्यश्चरमद्वाषष्टितमपोर्णमासीपरिसमाप्तिनिबन्धनात्स्थानात् चतुर्नवतौ चतुर्विंशत्यधिकशतभागेष्वतिक्रान्तेषु प्रथमां पौर्णमासीं परिसमापय[ति]-(न्)नवाप्यते। किमुक्तं भवति ? त्रिंशता भागैस्तमेव देशं [सम्](अ)प्राप्तः सन्नवाप्यते इति, त्रिंशतो (द्वाषष्टि)भागानामहोरात्रसत्कानामद्यापि स्थितत्वात्। भूयः प्रश्नयति '**ता एएसि ण**'मित्यादि। '**ता**' इति **तत्र** युगे (**एतेषां**) **पञ्चानां संवत्सराणां** मध्ये [५]**द्वितीयां पौर्णमा[स्यां](सीं) सूर्यः कस्मिन्देशे** स्थितः सन् **युनक्ति**-

---

१. अत्र H, Q प्रत्योरयमधिकः पाठो दृश्यते- ता एएसि णं पंचण्हं संवच्छराणं पढमं अमावासं चंदे कंसि देसंसि जोएति ? ता जंसिं देसंसि चंदे चरिमं बावट्ठिं अमावासं जोएति तातो अमावसठाणातो मंडलं चउव्वीसेणं सतेणं छेत्ता दुबत्तीसं भागे उवचिणावेत्ता एत्थ णं से चंदे पढमं अमावसं जोएति। २. मूले तु 'जंसि' इति पाठः। ३. चतुर्नवतिभागा .... - H। ४. त्रिंशदहोरात्रेषु - S। ५. दोच्चं पुण पुच्छा - मूले।

परिसमापयति ? भगवानाह- '**ता [१]जस्सि ण**'मित्यादि। '**ता**' इति **तत्र यस्मिन्देशे** स्थितः सन्**सूर्यः प्रथमां पौर्णमासीं** परिसमापयति **तस्मात्पौर्णमासीस्थाना**-त्प्रथमपौर्णमासीपरिसमाप्तिनिबन्धनात् स्थानात् परतो **मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा** तद्गतान् **[२]चतुर्नवतिं भागान् आदाय** [य](अ)**त्र** देशे स्थितः सन् **सूर्यो द्वितीयां पौर्णमासीं** परिसमापयति। **एवं** तृतीयपौर्णमासीविषयमपि सूत्रं व्यक्तम्। एवं द्वादशपौर्णमासीविषयमपि, नवरं '**अट्ठ[च](छा)ताले भाग-सए**'त्ति[३] तृतीयस्याः पौर्णमास्याः परतो द्वादशी किल पौर्णमासी नवमी, ततश्चतुर्नवति(र्नव)भिर्गुण्यते, जातान्यष्टौ शतानि षट्चत्वारिंशदधिकानि ८४६। सम्प्रति शेषपौर्णमासीविषयमतिदेशमाह- '**एवं खलु**' इत्यादि। **एव**मुक्तेन प्रकारेण **खलु** निश्चित**मेतेना**नन्तरोदितेनो**पायेन** यां यां पूर्णमासीं यत्र यत्र देशे परिसमापयति तस्यास्तस्याः पौर्णमास्यास्**तां ता**मनन्तरां **पौर्णमासीं तस्मात्तस्मा**त्पाश्चात्य-पाश्चात्यपौर्णमासीपरिसमाप्तिनिबन्धनात्स्थानात् **मण्डलं चतुर्विंशत्यधिकशतेन छित्त्वा** परतस्तद्गतान् **चतुर्नवतिं (चतुर्नवतिं) भागानुपादाय तस्मिन्(तस्मिन्) देशे** स्थितः सन् **सूर्यः** परिसमापयति। स चैवं परिसमापयन् तावद्वेदितव्यो यावद्भूयोऽपि चरमां द्वाषष्टितमां पौर्णमासीं तस्मिन्देशे परिसमापयति [त](य)-स्मिन्देशे पाश्चात्ययुगसम्बन्धिनीं चरमां द्वाषष्टितमां पौर्णमासीं परिसमापितवान् एतावच्चावसीयते गणितक्रमवशात्, तथाहि- पाश्चात्ययुगचरमद्वाषष्टितमपौर्णमासी-परिसमाप्तिनिबन्धनात्स्थानात्परतो मण्डलस्य चतुर्विंशत्यधिकशतप्रविभक्तस्य सत्कानां चतुर्नवति(चतुर्नवति)भागानतिक्रम्य तस्याः (तस्याः) पौर्णमास्याः परिसमाप्तिः। ततश्चतुर्नवतिर्द्वाषष्ट्या गुण्यते, जातान्यष्टपञ्चाशच्छतान्यष्टाविंशत्यधिकानि ५,८२८। तेषां चतुर्विंशत्यधिकेन शतेन भागो ह्रियते, लब्धाः सप्तचत्वारिंशत् सकलमण्डल-परावर्त्ताः, न च तैः प्रयोजनं, केवलं राशेर्निर्लेपीभवनादागतं यस्मिन्देशे स्थितः

१. मूले तु 'जंसि' इति पाठः। २. चतुर्नवतिभागान् - H। ३. इति - M।

सन् पाश्चात्ययु[गे](ग)सबन्धिचरमद्वाषष्टितमपौर्णमासीपरिसमापक(स्)तस्मिन्नेव देशे विवक्षितस्य युगस्य चरमां द्वाषष्टितमां पौर्णमासीं परिसमापयति। सम्प्रति चरम-द्वाषष्टितमपौर्णमासीपरिसमाप्तिनिबन्धनं देशं पृच्छति- **'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह - **'ता [१]जंबुद्दीवस्स ण'**मित्यादि। **'ता'** इति पूर्ववत् **[२]जम्बू-द्वीपस्य प्राचीनापाचीनायतया,** अत्रापि प्राचीनग्रहणेनोत्तरपूर्वा दिक् गृह्यते, अपाचीनग्रहणेन दक्षिणापरा, ततोऽयमर्थः उत्तरपूर्वापरदक्षिणायतया, एव**मुदीच्य-दक्षिणायतया**-उत्तरापरदक्षिणपूर्वायतया **जीवया**-दवरिकया **मण्डलं चतुर्वि-शत्यधिकेन शतेन छित्त्वा** विभज्य भूयश्चतुर्भिर्भक्त्वा **'[३]पुरच्छिमिल्लंसि'**त्ति **पूर्वदिग्वर्त्तिनि चतुर्भागमण्डले** एकत्रिंशद्भागप्रमाणे **सप्तविंशतिभागानुपादा-याष्टाविंशतितमं** च **भागं विंशतिधा छित्त्वा** तद्गतान् **अष्टादशभागानुपादाय** शेषै**स्त्रिभिर्भागै**श्चतुर्थस्य च भागस्य **द्वाभ्यां कलाभ्यां** विंशतितमाभ्यां भागा-भ्यामित्यर्थः **दाक्षिणात्यं चतुर्भागमण्ड[लं](लम)सम्प्राप्तः** सन् **अत्र** प्रदेशे **सूर्यश्चरमां द्वाषष्टितमां पौर्णमासीं** परिसमापयति। तदेवं सूर्यचन्द्रमसोः पौर्णमासीपरिसमाप्तिदेश उक्तः।

सम्प्रति तयोरमावास्यापरिसमाप्तिदेशं प्रतिपिपादयिषुः प्रथमतश्चन्द्रविषयमति-देशमाह -

मू० एवं [४]जेणेव अभिलावेणं चंदस्स पुण्णिमासिणीओ भाणितातो तेणं चेव अभिलावेणं अमावासातो वि भाणितव्वातो, तं० पढमा बितिता तइया दुवालसमा। एवं एएणं उवाएणं ताओ ताओ अमावसठाणाओ मंडलं चउव्वीसेणं सएणं छेत्ता दुवत्तीसं २ भागे उवचिणावेत्ता तंसि तंसि देसंसि तं तं अमावसं चंदे जोएति।

---

१. जंबुद्दीवस्स २ - मूले। २. जम्बूद्वीपस्य द्वीपस्य - I, J । ३. पुरत्थिमिल्लंसि - T । ४. जेणं - H।

ता एतेसिं णं पंचण्हं संवच्छराणं चरिमबावट्ठिं अमावसं[१] चंदे कंसि देसंसि जोएति ? ता जंसि णं देसंसि चंदे चरिमबावट्ठिं पुण्णिमासिणिं जोएति ताते पुण्णिमासिणिठाणाए मंडलं चउव्वीसेणं सतेणं छेत्ता सोलसमभागे ओसक्कतित्ता एत्थ णं से चंदे चरिमबावट्ठिं अमावसं जोएति।

टी० 'एव'मित्यादि। **एवं येनाऽभिलापेन चन्द्रस्य पौर्णमास्य** उक्तास्ते-**नैवाभिलापेनामावास्या अपि** वक्तव्यास्तद्यथा **प्रथमा, द्वितीया, तृतीया, द्वादशी।** ताश्चैवं - **'ता एएसि णं** [इत्यादि] **पंचण्हं संवच्छराणं पढमं अमावासं चंदे कंसि देसंसि जोएइ ? [जोएत्ता] ता जस्सिं णं देसंसि चंदे चरमबावट्ठिं[२] अमावासं जोएइ ताओ अमावासाठाणाओ मंडलं चउवीसेणं सएणं छित्ता दुवत्तीसं भागे उवायणावित्ता[३] एत्थ णं से चंदे पढमं अमावासं जोएइ। ता एएसि णं पंचण्हं संवच्छराणं दोच्चं अमावासं चंदे कंसि देसंसि जोएइ ? ता जस्सि णं देसंसि (चंदे) पढमं अमावासं जोएइ, ताओ णं अमावा-सट्ठाणाओ मंडलं चउवीसेणं सएणं छेत्ता दुवत्तीसं भागे उवायणित्ता एत्थ णं[४] से चंदे दोच्चं अमावासं जोएइ। ता एएसि णं पंचण्हं संवच्छराणं तच्चं अमावासं चंदे कंसि देसंसि (जोएइ ? ता जंसि णं देसंसि) चंदे दोच्चं अमावासं जोएइ एयाओ अमावासाठाणाओ मंडलं चउवीसएणं सएणं छित्ता दुवत्तीसं भागे उवायणित्ता एत्थ णं चंदे तच्चं अमावासं जोएइ। ता एएसि णं पंचण्हं संवच्छराणं दुवालसमं अमावासं चंदे कंसि देसंसि (जोएइ ? ता जंसि णं देसंसि) चंदे तच्चं अमावासं जोएइ ताओ णं अमावासाठाणाओ मंडलं चउवीसेणं सएणं छेत्ता दुन्नि अट्ठावीसए भागसए उवायणित्ता एत्थ**

---

१. अमावसं पुच्छा। ता - H। २. चरमं बावट्ठिं - G। ३. उवायणित्ता - G, I, K। ४. णं चंदे - K।

णं से चंदे दुवालसमं अमावासं जोएइ।' एतानि चत्वार्यपि सूत्राणि सुगमानि। सम्प्रति शेषास्वमावास्यास्वतिदेशमाह - **'एवं खलु'**इत्यादि। एतत्प्राग्वत् व्याख्येयम्। सम्प्रति चरमद्वाषष्टितमामावास्यापरिसमाप्तिनिबन्धनदेशं[१] पृच्छति - **'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह - **'ता जंसि ण'**मित्यादि। **तत्र यस्मिन्देशे** स्थितः सन् **चन्द्रो द्वाषष्टितमां पौर्णमासीं युनक्ति**-परिसमापयति **तस्मात्पौर्णमासीस्थानात्**पौर्णमासीपरिसमाप्तिस्थानात्**मण्डलं चतुर्विंशत्यधिकेन शतेन** विभज्य पूर्वं **षोडशभागानवष्वष्क्य,** चरमा हि द्वाषष्टितमा अमावास्या चरमद्वाषष्टितमपौर्णमास्याः पक्षेण, पाश्चा[त्या](त्य)पक्षेण च विवक्षितप्रदेशात् चन्द्रः षोडशभिश्चतुर्विंशत्यधिकशतभागैः परतः प्राप्यते, मासेन द्वात्रिंशद्भागैः परतो वर्त्तमानस्य लभ्यमानत्वात्, ततः षोडशभागान्पू[र्वा](र्वम)वष्वष्क्येत्युक्तं, **अत्र** - अस्मिन्प्रदेशे स्थितः सन् **चन्द्रश्चरमां द्वाषष्टितमाममावास्यां** परिसमापयति।

सम्प्रति सूर्यस्यामावास्यापरिसमाप्तिदेशं पिपृच्छिषुराह-

मू० ता एएसि णं पंचण्हं संवच्छराणं पढमं अमावसं सूरे कंसि देसंसि जोएति ? ता जंसि णं देसंसि सूरे चरिमबावट्ठिं अमावसं जोएइ ताते अमावसठाणाए मंडलं चउवीसेणं सएणं छेत्ता चउणउतिभागे उवाइणावेत्ता एत्थ णं से सूरे पढमं अमावसं जोएति। एवं जेणं चेव सूरस्स अभिलावेणं पुण्णिमासिणीतो भणितातो तेणं चेव अमावसातो वि भाणितव्वातो। तं० बितिया ततिया दुवालसमा। एवं खलु एएणं उवाएणं ताए ताए अमावसठाणाते मंडलं चउ० चउणउतिं २ भागे उवादिणावेत्ता तंसि तंसि (देसंसि तं तं) अमावसं[२] सूरे जोतेति। ता (ए)तेसि णं पंचण्हं संवच्छराणं चरिमबावट्ठिं अमावासं सूरे कंसि देसंसि जोएइ ? ता जंसि णं देसंसि सूरे चरिमबावट्ठिं पुण्णिमासिणिं

१. ....निबन्धनं देशं - K, G। २. अमावसं पुच्छा। ता - H।

जोतेति ताते पुण्णिमासिणिठाणाते मंडलं चउव्वीसेणं सतेणं छेत्ता सीतालीसं भागे उसक्कावतित्ता एत्थ णं से सूरे चरिमबावट्ठिं अमावसं जोएति।

टी० 'ता एएसि ण'मित्यादि। एतत्प्रश्नसूत्रं निर्वचनसूत्रं च प्राग्वत् व्याख्येयम्। **'एव'**मित्यादि। **एव**मुक्तेन प्रकारेण **येनैवाभिलापेन सूर्यस्य पौर्णमास्य** उक्तास्ते-**नैवा**भिलापेना**मावास्या अपि** वक्तव्याः, **तद्यथा द्वितीया तृतीया द्वादशी** च। ताश्चैवं - **'ता एएसिं णं पंचण्हं संवच्छराणं दोच्चं अमावासं सूरे कंसि देसंसि जोएइ ? ता जंसि णं देसंसि सूरे पढमं अमावासं जोएइ ताओ अमावा-साठाणाओ मंडलं चउव्वीसेणं सएणं [१]छित्ता चउणउइ भागे उवायणित्ता एत्थ णं से सूरे दोच्चं अमावासं जोएइ। ता एएसि णं पंचण्हं संवच्छराणं तच्चं अमावासं सूरे कंसि देसंसि जोएइ ? [जोएत्ता](ता) जंसि णं देसंसि (सूरे) दोच्चं अमावासं जोएइ ताओ अमावासाट्ठाणाओ मंडलं चउवीसेणं सएणं छेत्ता चउणउइ भागे उवायणित्ता (एत्थ णं से सूरे) तच्चं अमावासं जोएइ। ता एएसि णं पंचण्हं संवच्छराणं दुवालसं अमावासं सूरे कंसि देसंसि जोएइ ? ता जंसि णं देसंसि सूरे तच्चं अमावासं जोएइ ताओ अमावासठाणाओ मंडलं चउवीसएणं सएणं छेत्ता अट्ठछायालभागसए उवायणित्ता एत्थ णं से सूरे दुवालसमं अमावासं जोएइ।'** सम्प्रति शेषास्वमावास्यास्वतिदेशमाह- **'एवं खल्वि'**त्यादि। एतत्प्राग्वद्व्याख्येयम्। सम्प्रति चरमद्वाषष्टितमामावास्यापरिसमाप्तिदेशं पृच्छति- **'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह - **'ता [२]जस्सि ण'**मित्यादि। **यस्मिन्देशे** स्थितः सन् **सूर्यश्चरमां द्वाषष्टितमां पौर्णमासीं** परिसमापयति **तस्मात्**पौर्णमासीपरिसमाप्तिनिबन्धनात्स्था-नात्**मण्डलं चतुर्विंशत्यधिकेन शतेन छित्त्वा** विभज्यार्वाक् **सप्तचत्वारिंशतं**

१. छेत्ता - G,C। २. मूले तु 'जंसि' इति पाठः।

भागानवष्वक्य। *किमत्र कारणमिति चेत् ? उच्यते, इह चरमा द्वाषष्टितमा अमावास्या चरमाया द्वाषष्टितमायाः पौर्णमास्याः पश्चात्पक्षेण, पक्षश्च पञ्चदशतिथ्यात्मकोऽहोरात्रापेक्षया चतुर्दशाहोरात्रा एकस्य चाहोरात्रस्य सप्तचत्वारिंशत् द्वाषष्टिभागाः, सूर्यश्च द्वाभ्यामहोरात्राभ्यां तस्मिन्नेव प्रदेशे भूयः समागच्छति, एतच्च मण्डलभ्रमिमात्रमपेक्ष्योच्यते न पुनस्तमेव मण्डलं तमेव च प्रदेशं, तस्मिन्नेव प्रदेशे भूयः संवत्सरेण सूर्यस्य समागमनात्। ततश्चतुर्दशाहोरात्रपर्यन्ते किल सूर्यस्तत्रैव प्रदेशे समागतः, पञ्चदशे त्वहोरात्रे ततो विवक्षितात्प्रदेशात्परतः सप्तचत्वारिंशतं भागान्गच्छति, एकैकाहोरा[त्रा](त्रेण) द्वाषष्टिभागान् एकैकस्य चतुर्विंशत्यधिकशतभाग-(मण्डल)स्य गमनात्। ततश्चरमाया द्वाषष्टितमाया अमावास्यायाश्चरमद्वाषष्टितम-पौर्णमास्यपेक्षया पश्चाद्विवक्षितत्वात् सप्तचत्वारिंशतं भागानवष्वष्क्येत्युक्तम्।* (**अत्र**) प्रदेशे स्थितः **सन्सूर्यश्चरमां द्वाषष्टितमाममावास्यां युनक्ति** परिसमापयति।

अथ कां पौर्णमासीं केन नक्षत्रेण युक्तश्चन्द्रः सूर्यो वा परिसमापयति इति प्रष्टुकाम आह-

मू० ता एएसि णं पंचण्हं संवच्छराणं पढमं पुण्णिमासिणिं चंदे केणं णक्खत्तेणं जोएति ? ता धणिट्ठाहिं, धणिट्ठाणं तिण्णि मुहूत्ता अगुणवीसं च बावट्ठीभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता पण्णट्ठिं चुण्णिया भागा सेसा, तं समतं च णं सूरे केणं णक्खत्तेणं जोएति ? (ता) पुव्वाहिं फग्गुणीहिं, पुव्वाणं फग्गुणीणं अट्ठावीसं मुहुत्ता अट्ठ[ावी](ती)सं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता बत्तीसं चुण्णिया भागा सेसा। ता एएसि णं पंचण्हं संवच्छराणं दोच्चं पोण्णिमासिणिं चंदे केणं णक्खत्तेणं जोएति ? ता उत्तराहिं पोट्ठवताहिं, उत्तराणं पोट्ठवताणं सत्तावीसं मुहुत्ता चोद्दस

.... चिह्नान्तर्गतः पाठो मुद्रितसूर्यप्रज्ञप्तिवृत्तौ नास्ति।

त बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता [१]चोअट्ठी चुण्णिया भागा सेसा, तं समतं च णं सूरे केणं णक्खत्तेणं जोएति ? ता उत्तराहिं फग्गुणीहिं, उत्तराणं फग्गुणीणं सत्त मुहुत्ता तेत्तीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं सत्तट्ठिहा छेत्ता एक्कतीसं चुण्णिया भागा सेसा। ता एतेसि णं पंचण्हं संवच्छराणं तच्चं पुण्णिमासिणिं चंदे केणं णक्खत्तेणं जोतेति ? ता अस्सिणीहिं, अस्सिणीणं एक्कवीसं मुहुत्ता णव बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता तेवट्ठिं चुण्णिया भागा सेसा, तं समतं च णं सूरे केणं णक्खत्तेणं जोगं जोगेति ? ता चित्ताहिं, चित्ताणं एक्को मुहुत्तो अट्ठावीसं च बावट्ठिभागा मुहुत्तस्स बावाट्ठिभागं च सत्त(ट्ठिधा छेत्ता) तीसं चुण्णिया भागा सेसा। ता एतेसि णं पंचण्हं संवच्छराणं दुवालसमं पुण्णिमासिणिं पुच्छा, ता उत्तराहिं आसाढाहिं, उत्तराणं (आसाढाणं) छव्वीसं मुहुत्ता छव्वीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता चउप्पण्णं चुण्णिया भागा सेसा, तं समतं च णं सूरे के० पुच्छा, ता पुणव्वसुणा, पुणव्वसुस्स णं सोलसमुहुत्ता अट्ठ य बावट्ठिभागा (मुहुत्तस्स) बावट्ठिभागं च सत्तट्ठिधा छेत्ता वीसं चुण्णिया भागा सेसा। ता एतेसि णं पंचण्हं संवच्छराणं चरिमबावट्ठिं पुण्णमासिणिं चंदे केणं णक्खत्तेणं जोएइ ? ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं चरिमसमते, तं समतं च णं सूरे केणं णक्खत्तेणं जोएति ? ता पूसेणं, पूसस्स णं एक्कोणवीसं मुहुत्ता तेत्तालीसं च बावट्ठिभागा (मुहुत्तस्स) बावट्ठिभागं च सत्तट्ठिधा छेत्ता तेत्तीसं चुण्णीया भागा सेसा।

१. 'बावट्ठि' इति मुद्रितसूर्यप्रज्ञप्तौ पाठः, स तु न समीचीनः।

टी० **'ता एएसि ण'**मित्यादि। **'ता'** इति **तत्र** युगे **एतेषा**मनन्तरोदितानां **पञ्चानां संवत्सराणां** मध्ये [१]**प्रथमां पौर्णमासीं चन्द्र** उपलक्षणमेतत्सूर्यो वा **केन नक्षत्रेण** सह योगमुपागतः सन् **युनक्ति** परिसमापयति ? भगवानाह **'ता धणिट्ठाहिं'** इत्यादि। **'ता'** इति **तत्र** तेषां पञ्चानां संवत्सराणां मध्ये प्रथमां पौर्णमासीं चन्द्रः परिसमापयति **धनिष्ठाभिः**, धनिष्ठानक्षत्रस्य पञ्चतारत्वात्तदपेक्षया बहुवचनं, अन्यथा [२]त्वेकवचनं द्रष्टव्यं, तासां च **धनिष्ठानां त्रयो मुहूर्त्ता** एकस्य य **मुहूर्त्तस्य एकोनविंशतिर्द्वाषष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा पञ्चषष्टिश्च चूर्णिकाभागाः शेषाः**, तथाहि- पौर्णमासीविषयस्य चन्द्रनक्षत्रयोगस्य परिज्ञानार्थं करणं प्रागेवोक्तम्। तत्र षट्षष्टिमुहूर्त्ता एकस्य च मुहूर्त्तस्य पञ्च द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभागः ६६।५।१ इत्येवंरूपो ध्रुवराशिः ध्रियते, धृत्वा च प्रथमायां पौर्णमास्यां चन्द्रनक्षत्रयोगो ज्ञातुमिष्ट इति एकेन गुण्यते, एकेन गुणितं तदेव भवतीति तावानेव जातः। ततस्तस्मादभिजितो नव मुहूर्त्ता एकस्य (मुहूर्त्तस्य) चतुर्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागा इत्येवम्प्रमाणं शोधनकं शोध्यते। तत्र षट्षष्टेर्नव मुहूर्त्ताः शुद्धाः, स्थिताः पञ्चात्सप्त-पञ्चाशत्तेभ्यः [३]एकमुहूर्त्तो गृहीत्वा द्वाषष्टिभागाः कृतास्ते द्वाषष्टिभागराशौ पञ्चकरूपे प्रक्षिप्यन्ते, जाताः सप्तषष्टिभागास्तेभ्यश्चतुर्विंशतिः (शुद्धाः स्थिताः) पञ्चात्त्रिचत्वारिं-शत्तेभ्य एकं रूपमादाय सप्तषष्टिभागाः क्रियन्ते, ते च सप्तषष्टिभागाः सप्तषष्टि-भागैकमध्ये प्रक्षिप्यन्ते, जाता अष्टषष्टिः सप्तषष्टिभागाः, तेभ्यः षट्षष्टिः शुद्धाः स्थितौ द्वौ पञ्चात् सप्तषष्टिभागौ। ततस्त्रिंशता मुहूर्त्तैः श्रवणशुद्धिः, स्थिताः पञ्चान्-मुहूर्त्ताः ष[ट्त्रिं](ड्त्रिं)शतिः। तत इदमागतं धनिष्ठानक्षत्रस्य त्रिषु मुहूर्त्तेष्वेक[४]स्य च मुहूर्त्तस्य एकोनविंशतिसङ्ख्येषु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य पञ्चषष्टि-सङ्ख्येषु सप्तषष्टिभागेषु शेषेषु प्रथमा पौर्णमासी परिसमाप्तिमुपयाति। सम्प्रति

१. प्रथमपौर्णमासीं - T। २. चैकवचनं - A। ३. एको मुहूर्त्तो - S, T। ४. ....कस्य मुहूर्त्तस्य - H, I।

सूर्यनक्षत्रयोगं पृच्छन्नाह- **'तं समयं च ण'**मित्यादि। **'तं समय'**मित्यत्र **'कालाध्वनोर्व्याप्ता'**विति वचनात् अधिकरणत्वेऽपि द्वितीया, ततोऽयमर्थः - **तस्मिन्समये** (यस्मिन्समये) धनिष्ठानक्षत्रं चन्द्रेण युक्तं यथोक्त[वि]शेषं (पौर्णमासीं) परिसमापयति तस्मिन्क्षणे इत्यर्थः **सूर्यः केन नक्षत्रेण** युक्तः सन् पौर्णमासीं परिसमापयति। भगवानाह - **'ता पुव्वाहिं'** इत्यादि। **'ता'** इति तदा **पूर्वाभ्यां फाल्गुनीभ्यां,** पूर्वफाल्गुनीनक्षत्रस्य द्वितारत्वात् तदपेक्षया द्विवचनं, द्विवचने च प्राप्ते प्राकृते बहुवचनमिति बहुवचनं, तयोश्च **पूर्वफाल्गुन्यो**स्तदानी**मष्टाविंशतिमुहूर्त्ता अष्टात्रिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्का **द्वात्रिंशत् चूर्णिकाभागाः शेषाः**, तथाहि - [त](स) एव षट्षष्टिमुहूर्त्ता एकस्य च मुहूर्त्तस्य पञ्च द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभाग इत्येवम्प्रमाणो ध्रुवराशिः ६६।५।१ ध्रियते, धृत्वा च एकेन गुण्यते, एकेन गुणितं तदेव भवतीति तावानेव जातः। तस्मात्पुष्यशोधनकमेकोनविंशतिर्मुहूर्त्ता एकस्य[1] मुहूर्त्तस्य त्रिचत्वारिंशद्द्वाषष्टिभागाः एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशत्सप्तषष्टिभागाः १९।४३।३३ इत्येवम्प्रमाणं शोध्यते। अथैतावत्प्रमाणस्य पुष्यशोधनकस्य कथमुत्पत्तिरिति चेत्? उच्यते, इह पूर्वयुगसमाप्तिवेलायां पुष्यस्य त्रयोविंशतिः सप्तषष्टिभागाः परिसमाप्ता२(चतु२)चत्वारिंशदवतिष्ठन्ते। ततस्ते चतुश्चत्वारिंशत्सप्तषष्टिभागा मुहूर्त्तकरणार्थं त्रिंशता गुण्यन्ते, जातानि त्रयोदश शतानि विंशत्यधिकानि १,३२०, तेषां सप्तषष्ट्या भागो ह्रियते, लब्धा एकोनविंशतिर्मुहूर्त्ताः, शेषास्तिष्ठन्ति सप्तचत्वारिंशत् ४७। ते द्वाषष्टिभागानयनार्थं द्वाषष्ट्या गुण्यन्ते, जातानि चतुर्दशोत्तराणि[2] एकोनत्रिंशच्छतानि २,९१४। तेषां सप्तषष्ट्या भागे[3] हृते लब्धास्त्रिचत्वारिंशत् द्वाषष्टिभागा ४३ एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशत् सप्तषष्टिभागाः ३३। एतत् ध्रुवराशेः शोध्यते, तद्यथा षट्षष्टिमुहूर्त्तेभ्यः[4] एकोनविंशतिमुहूर्त्ताः शुद्धाः, स्थिताः

१. एकमुहुर्त्तस्य - N। २. एकोनत्रिंशच्छतानि चतुर्दशोत्तराणि-T। ३. भागो ह्रियते -T। ४. षट्षष्टेर्मुहूर्त्तेभ्यः -T।

पश्चात्सप्तचत्वारिंशत्तेभ्य एको मुहूर्त्तो गृह्यते, स्थिताः षट्चत्वारिंशत्, गृहीतस्य च मुहूर्त्तस्य द्वाषष्टिभागाः कृत्वा द्वाषष्टिभागराशौ पञ्चकरूपे प्रक्षिप्यन्ते, जाता द्वाषष्टिभागाः सप्तषष्टिस्तेभ्यस्त्रिचत्वारिंशत् शोध्यन्ते, स्थिताः पश्चाच्चतुर्विंशतिः, तेभ्यः एकं रूपमुपादीयते, जातास्त्रयोविंशतिः, गृहीतस्य च रूपस्य सप्तषष्टिभागाः क्रियन्ते कृत्वा च सप्तषष्टिभागैकमध्ये प्रक्षिप्यन्ते, जाता अष्टषष्टिभागास्तेभ्यस्त्रयस्त्रिंशत्शुद्धाः स्थिताः पञ्चत्रिंशत्, ततः पञ्चदशभिर्मुहूर्त्तैरश्लेषा, त्रिंशता च मुहूर्त्तैर्मघाः शुद्धाः, स्थितः पश्चादेको मुहूर्त्त एकस्य च मुहूर्त्तस्य त्रयोविंशतिर्द्वाषष्टिभागा[१] एकस्य द्वाषष्टिभागस्य पञ्चत्रिंशत्सप्तषष्टिभागाः १।२३।३५। तत आगतं पूर्वफाल्गुनीनक्षत्रस्याष्टाविंशति[२]मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टत्रिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य द्वात्रिंशति सप्तषष्टिभागेषु शेषेषु सूर्यः प्रथमां पौर्णमासीं परिसमापयति। एते च सूर्यमुहूर्त्ता एवम्भूतैश्च त्रिंशता[३] मुहूर्त्तैस्त्रयोदश रात्रिन्दिवानि एकस्य च रात्रिन्दिवस्य द्वादश व्यावहारिका मुहूर्त्ता भवन्ति। तत एतदनुसारेण गतैकदिवसभागगणना शेषस्थितदिवसगणना च पूर्वफाल्गुनीनक्षत्रस्य स्वयं कर्त्तव्या। एवमुत्तरसूत्रेष्वपि सूर्यनक्षत्रयोगे परिभावनीयम्। **'ता एएसि ण'**मित्यादि प्रश्नसूत्रं सुगमम्। भगवानाह - **'ता उत्तराहिं'** इत्यादि। **'ता'** इति पूर्ववत् **उत्तराभ्यां प्रोष्ठपदाभ्या**-मत्रापि द्विवचनमुत्तरप्रोष्ठपदानक्षत्रस्य द्वितारकत्वात् बहुवचनं च सूत्रे प्राकृतत्वात्, तयोश्च **प्रोष्ठपदयोः सप्तविंशतिर्मुहूर्त्ताश्चतुर्दश च द्वाषष्टिभागा मुहूर्त्तस्य** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्काश्चतुःषष्टिश्चूर्णिकाभागाः **शेषाः**, तथाहि - स एव ध्रुवराशिः ६६।५।१ द्वितीयपौर्णमासीचिन्तायां द्वाभ्यां गुण्य[४]ते, जा[५]तं मुहूर्त्तानां द्वात्रिंशं शतं १३२, एकस्य च मुहूर्त्तस्य द्वाषष्टिभागाः १० एकस्य च द्वाषष्टिभागस्य द्वौ सप्त(षष्टि)भागौ २। ततः पूर्वरीत्या अभिजितो नव मुहूर्त्ता

---

१. एकस्य च द्वाषष्टि...-T। २. ...विंशतौ मुहूर्त्ते...-T। ३. सूर्यमुहूत्तैस्त्रिंशता त्रयोदश -T। ४. गुणने -K। ५. मुहूर्त्तानां जातं -T।

एकस्य च मुहूर्तस्य चतुर्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य सत्काः षट्षष्टिः सप्तषष्टिभागाः शोध्यन्ते, जातं द्वाविंशं शतं मुहूर्त्तानामेकस्य च मुहूर्त्तस्य सप्तचत्वारिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयः सप्तषष्टिभागाः १२२।४७।३। ततस्त्रिंशता मुहूर्त्तैः श्रवणस्त्रिंशता मुहूर्त्तैर्धनिष्ठा पञ्चदशभिः शतभिषक् त्रिंशता पूर्वभद्रपदाः शुद्धाः, स्थिताः पञ्चात्सप्तदशमुहूर्त्ताः, शेषं तथैव १७।४७।३। तत आगतं उत्तरभद्रपदानक्षत्रस्य सप्तविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चतुर्दशसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य चतुःषष्टौ सप्तषष्टिभागेषु शेषेषु द्वितीया पौर्णमासी परिसमाप्तिमुपैति। सम्प्रत्यस्यामेव पौर्णमास्यां सूर्यनक्षत्रयो[गे](गं) पृच्छति **'तं समयं च ण'**मित्यादि सुगमम्। भगवानाह - **'ता उत्तराहिं'** इत्यादि। **(ता)** इति पूर्ववत् **उत्तराभ्यां फाल्गुनीभ्यां,** तयोश्च **उत्तरयोः फाल्गुन्यो**स्तदानीं द्वितीयपौर्णमासीसमाप्तिवेलायां **सप्तमुहूर्त्तास्त्रयस्त्रिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य द्वाषष्टिभागं च** एकं **सप्तषष्टिधा छित्त्वा** तस्य सत्का **एकत्रिंशत् चूर्णिका भागाः शेषाः**, तथाहि- स एव ध्रुवराशिः ६६।५।१ ध्रियते, धृत्वा च द्वितीयस्याः पौर्णमास्याः सम्प्रति चिन्तेति द्वाभ्यां गुण्यते, जातं द्वात्रिंशं शतं मुहूर्त्तानामेकस्य च मुहूर्त्तस्य दश द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य द्वौ सप्तषष्टिभागौ १३२। १०।२। तत एतस्मात् पुष्यशोधनकमेकोनविंशतिमुहूर्त्ता एकस्य च मुहूर्त्तस्य त्रिचत्वारिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशत्सप्तषष्टिभागाः १९।४३।३३ इत्येवम्प्रमाणं पूर्वरीत्या शोध्यते, स्थितं पश्चात् द्वादशोत्तरं मुहूर्त्तशतं एकस्य च मुहूर्त्तस्याष्टाविंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्त्रिंशत्सप्तषष्टिभागाः ११२।२८।३६। ततः पञ्चदशभिर्मुहूर्त्तैरश्लेषा त्रिंशता मघा त्रिंशता (पूर्व)फाल्गुनी शुद्धा, स्थिताः पश्चात्मुहूर्त्ताः सप्तत्रिंशत् शेषं तथैव। तत आगतं सूर्येण युक्तमुत्तरफाल्गुनीनक्षत्रं सप्तमुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रयस्त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य एकत्रिंशति सप्तषष्टिभागेषु (शेषेषु) द्वितीयां पौर्णमासीं

परिसमापयति। अधुना तृतीयपौर्णमासीविषयं चन्द्रनक्षत्रयोगं पृच्छति- **'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह - **'ता अस्सिणीहिं'** इत्यादि। अश्विनीनक्षत्रं त्रितारमिति तदपेक्षया[1] बहुवचनं, तदानीं च तृतीयपौर्णमासीपरिसमाप्तिवेलाया- **मश्विनीनक्षत्रस्य एकविंशतिमुहूर्त्ता** एकस्य च **मुहूर्त्तस्य नव द्वाषष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्का**स्त्रिषष्टि(श्लूर्ण्णिका)भागाः शेषाः**, तथाहि- स एव ध्रुवराशिः ६६।५।१ तृतीयपौर्णमासी चिन्त्यमाना वर्त्तते इति त्रिभिर्गुण्यते जातमष्टानवत्यधिकं शतं मुहूर्त्तानामेकस्य च मुहूर्त्तस्य पञ्चदश द्वाषष्टि-भागा एकस्य च द्वाषष्टिभागस्य त्रयः सप्तषष्टिभागाः १९८।१५।३। तत **'उगुणट्ठं पोट्ठवया'** इति वचनादेकोनषष्ट्यधिकेन मुहूर्त्तशतेन चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीन्युत्तरभद्रपदापर्यन्तानि षट्-नक्षत्राणि शुद्धानि, पञ्चादवतिष्ठन्ते अष्टात्रिंशत् मुहूर्त्ता एकस्य च मुहूर्त्तस्य द्विपञ्चाशत् (द्वा)षष्टिभागाः एकस्य च द्वाषष्टिभागस्य चत्वारः सप्तषष्टिभागाः ३८।५२।४। ततस्त्रिंशता मुहूर्त्तै रेवती शुद्धा [स्]तिष्ठन्ति पञ्चादष्टौ मुहूर्त्ताः। तत आगतं चन्द्रयुक्त-मश्विनीनक्षत्रमेकविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य नवसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रिषष्टौ सप्तषष्टिभागेषु (शेषेषु तृतीयां पौर्णमासीं) परिसमापयति। सम्प्रत्यस्यामेव पौर्णमास्यां सूर्यनक्षत्रयोगं पृच्छति **'तं समयं च ण'**मित्यादि सुगमम्। भगवानाह - **'ता चित्ताहिं'** इत्यादि। **चित्रया** युक्तः सूर्यः परिसमापयति, तदानीं च तृतीय[ा]पौर्णमासीपरिसमाप्तिवेलायां **चित्राया एको मुहूर्त्त** एकस्य च **मुहूर्त्तस्याष्टाविंशतिर्द्वाषष्टिभा[गस्य](गा)** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्का**स्त्रिंशत्चूर्ण्णिकाभागाः शेषाः**, तथाहि- स एव ध्रुवराशिः ६६।५।१ सम्प्रति तृतीया पौर्णमासी चिन्त्यते (इति) त्रिभिर्गुण्यते, जातमष्टानवत्यधिकं शतं मुहूर्त्तानामेकस्य च मुहूर्त्तस्य पञ्चदश द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयः

१. तदपेक्षया च बहुवचनं - T।

सप्तषष्टिभागाः १९८।१५।३। तत एतस्मात् पुष्यशोधनकं १९।४३।३३ पूर्वोक्त-प्रकारेण शोध्यते, स्थितं पञ्चादष्टसप्तत्यधिकं मुहूर्त्तानां शतमेकस्य च मुहूर्त्तस्य त्रयस्त्रिंशत् द्वाषष्टिभागाः एकस्य च द्वाषष्टिभागस्य सप्तत्रिंशत् सप्तषष्टिभागाः १७८।-३३।३७। ततः पञ्चाशदधिकेन मुहूर्त्तशतेनाश्लेषादीनि हस्तपर्यन्तानि पञ्च नक्षत्राणि शुध्यन्ति शेषास्तिष्ठन्त्यष्टाविंशतिमुहूर्त्ताः शेषं तथैव २८।३३।३७। तत आगतं सूर्येण सम्प्रयुक्तं चित्रानक्षत्रमेकस्मिन्मुहूर्त्ते एकस्य च मुहूर्त्तस्याष्टाविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रिंशति सप्तषष्टिभागेषु शेषेषु तृतीयां पौर्णमासीं परिसमापयति। सम्प्रति द्वादश्यां पौर्णमास्यां चन्द्रनक्षत्रयोगं पृच्छति - **'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह - **'ता उत्तराहिं'** इत्यादि। **'ता'** इति पूर्ववत्, **उत्तराभ्यामाषाढाभ्यां** द्वादशीं (पौर्णमासीं) चन्द्रः परिसमापयति, तदानीं च तयोरुत्तरयोराषाढयोः **षड्विंशतिर्मुहूर्त्ता** एकस्य (च **मुहूर्त्तस्य**) [द्वात्रिंशत्](**षड्विंशतिः**) **द्वाषष्टिभागा** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्काश्चतुष्पञ्चाशत् **चूर्णिका भागाः शेषाः**, तथाहि- स एव ध्रुवराशिः ६६।५।१ द्वादशी किल पौर्णमासी चिन्त्यते इति द्वादशभिर्गुण्यते, जातानि सप्तशतानि द्विनवत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य षष्टिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य द्वादश सप्तषष्टिभागाः ७९२।६०।१२। तत एतस्मात् **'मूले सत्तेव चोयाला'** इत्यादिवचनात् सप्त[षष्टि](भिश्चतु)श्चत्वारिंशदधिकैर्मुहूर्त्तानां शतैरेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि मूलपर्यन्तानि नक्षत्राणि शुद्धानि। ततस्त्रिंशता मुहूर्त्तैः पूर्वाषाढाः शुद्धाः, शेषं तिष्ठन्त्यष्टादश मुहूर्त्ता एकस्य च मुहूर्त्तस्य पञ्चत्रिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयोदश सप्तषष्टिभागाः १८।३५।१३। तत आगतं चन्द्रेण युक्तमुत्तराषाढा नक्षत्रं द्वादशीं पौर्णमासीं षड्विंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षड्विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुष्पञ्चाशति सप्तषष्टिभागेषु शेषेषु परिसमापयति। सम्प्रत्यस्यामेव

द्वादश्यां (पौर्ण्णमास्यां) सूर्यनक्षत्रं पृच्छति- **'तं समयं च ण'**मित्यादि सुगमम्। भगवानाह - **'ता पुणव्वसुणा'**[मि](इ)त्यादि। **'ता'** इति पूर्ववत् पुनर्वसुना युक्तः सूर्यः परिसमापयति, तदानीं च द्वादशपौर्ण्णमासीपरिसमाप्तिवेलायां **पुनर्वसुनक्षत्रस्य षोडश मुहुर्त्ता अष्टौ द्वाषष्टिभागा** मुहूर्त्तस्य ए[कस्य](कं) च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्का **विंशतिश्चूर्ण्णिका भागाः शेषास्**तथाहि स एव ध्रुवराशिः ६६।५।१ द्वादशभिर्गुण्यते, जातानि सप्तशतानि द्विनवत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य षष्टिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य द्वादश सप्तषष्टिभागाः ७९२।६०।१२। तत एतस्मात्पुष्यशोधनकं १९।४३।३३ पूर्वोक्तप्रकारेण शोध्यते, स्थितानि पश्चात्सप्तशतानि त्रिसप्तत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य षोडश द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्चत्वारिंशत् सप्तषष्टिभागाः ७७३।१६।४६। तत एतस्मात्सप्तभिः शतैश्चतुश्चत्वारिंशदधिकैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरश्लेषादीनि आर्द्रापर्यन्तानि नक्षत्राणि शुद्धानि, पश्चादवतिष्ठते अष्टाविंशतिर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य त्रिपञ्चाशद्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशत्सप्तषष्टिभागाः २८।५३।४७। तत आगतं पुनर्वसुनक्षत्रं सूर्येण सह योगमुपागतं षोडशमुहूर्त्तेषु शेषेषु एकस्य च मुहूर्त्तस्याष्टसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य विंशतौ सप्तषष्टिभागेषु शेषेषु द्वादशीं पौर्ण्णमासीं परिसमापयति। (सम्प्रति द्वाषष्टितमायां पोर्ण्णमास्यां चन्द्रनक्षत्रयोगं पृच्छति-) **'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह- **'ता उत्तराहिं'** इत्यादि। (**'ता'** इति प्राग्वत्,) **उत्तराभ्यामाषाढाभ्यां** युक्तश्चन्द्रश्चरमां द्वाषष्टितमां पौर्ण्णमासीं परिसमापयति, तदानीं[1] च चरमद्वाषष्टितमपौर्ण्णमासीपरिसमाप्तिवेलाया-**मुत्तरयोराषाढयोश्चरमसमयः**, तथाहि- स एव ध्रुवराशिः ६६।५।१ चरमद्वाषष्टितमा पौर्ण्णमासी सम्प्रति चिन्त्यमाना वर्त्तते इति द्वाषष्ट्या गुण्य[न्]ते, जातानि मुहूर्त्तानां

१. तदानीं चरमद्वाष्टि.... - D, L, T।

चत्वारिंशच्छतानि द्विनवत्यधिकानि एकस्य च मुहूर्त्तस्य द्वाषष्टिभागानां त्रीणि शतानि दशोत्तराणि एकस्य द्वाषष्टिभागस्य द्वाषष्टिः सप्तषष्टिभागाः ४,०९२।३१०।६२। तत एतस्मात् '**अट्ठसय उगुणवीसा सोहणगं उत्तरा[ष](सा)ढाणं चउव्वीसं खलु भागा छावट्ठी चुण्णियाओ य**' इत्येवम्प्रमाणं सकलनक्षत्रपर्यायशोधनकं पञ्चभिर्गुणयित्वा शोध्यते। त[तः]च्च पूर्वोक्तेन प्रकारेण शोध्यमानं परिपूर्णशुद्धि-मासादयतीति न किञ्चित्पश्चादवतिष्ठते। तत आगतमुत्तराषाढानक्षत्रं चन्द्रेण युक्तं चरमसमये द्वाषष्टितमां (पौर्णमासीं परिसमापयति। सम्प्रत्यस्यामेव द्वाषष्टितमायां) पौर्णमास्यां सूर्यनक्षत्रयोगं पृच्छति- '**तं समयं च ण**'मित्यादि सुगमम्। भगवा-नाह - '**ता पुस्सेण**'मित्यादि। **पुष्येण** युक्तः सूर्यश्चरमां द्वाषष्टितमां पोर्णमासीं परिसमापयति। तदानीं द्वाषष्टितमपौर्णमासीपरिसमाप्तिवेलाया**मेकोनविंशतिमुहूर्त्ता-स्त्रिचत्वारिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य द्वाषष्टिभागं च सप्तषष्टिधा छित्त्वा** तस्य सत्का**स्त्रयस्त्रिंशत् चूर्णिकाभागाः पुष्यस्य शेषाः**, तथाहि- स एव ध्रुवराशिः ६६।५।१ द्वाषष्ट्या गुण्यते, जातानि मुहूर्त्तानां चत्वारिंशच्छतानि द्विनवत्यधिकानि एकस्य च मुहूर्त्तस्य द्वाषष्टिभागानां त्रीणि शतानि दशोत्तराणि एकस्य च द्वाषष्टिभागस्य द्वाषष्टिः सप्तषष्टिभागाः ४०९२।३१०।६२। इह पुष्यस्य दशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टा[विंशेषु](दशसु) द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुस्त्रिंशति सप्तषष्टिभागेष्वतिक्रान्तेषु पाश्चात्यं युगं (परिसमाप्तिमुपैति, तदनन्तरमन्यत् युगं) प्रवर्त्तते पुष्यस्यापि च तावन्मात्रादतिक्रान्तात्परतो यावद्भूयोऽपि तावन्मात्रस्य पुष्यस्यातिक्रम[ात्त] (एताव)त्प्रमाण एकः परिपूर्णो नक्षत्रपर्यायः। तस्य प्रमाणमष्टौ शतान्येकोनविंशत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागाः ८१९।२४।६६। तत एतत्पञ्च-भिर्गुणयित्वा प्रागुक्तात् ध्रुवराशेर्द्वाषष्टिगुणितात्शोध्यते। तच्च परिपूर्णं शुध्यति पश्चाच्च राशिर्निर्लेपो जायते। तत आगतं पुष्य(स्य) सूर्येण युक्तस्य (दशसु) मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टादशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुस्त्रिंशति

सप्तषष्टिभागेष्वतिक्रान्तेष्वेकोनविंशतौ च मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य त्रिचत्वारिंशति द्वाषष्टिभागेष्वेकस्य[१] द्वाषष्टिभागस्य त्रयस्त्रिंशति सप्तषष्टिभागेषु शेषेषु चरमा द्वाषष्टितमा पौर्णमासी परिसमाप्तिमगमदिति।

तदेवं पौर्णमासीविषयश्चन्द्रनक्षत्रयोगः सूर्यनक्षत्रयोगश्चोक्तः। सम्प्रत्यमावास्याविषयं (सूर्यनक्षत्रयोगं) चन्द्रनक्षत्रयोगञ्च प्रतिपिपादयिषुः प्रथमाऽमावास्याविषयं प्रश्नसूत्रमाह —

मू० ता एतेसि णं पंचण्हं संवच्छराणं पढमं अमावसं चंदे केणं णक्खत्तेणं जोएति ? (ता) अस्सेसाहिं, अस्सेसाणं एक्को मुहुत्तो चत्तालीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता छावट्ठिं[२] चुण्णिया भागा सेसा, तं समतं च णं सूरे केणं णक्खत्तेणं जोएति ? ता असिलेसाहिं चेव, असिलेसाणं एक्को मुहुत्तो चत्तालीसं बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता छावट्ठिं[३] चुण्णिया भागा सेसा। ता एतेसि णं पंचण्हं संवच्छराणं दोच्चं अमावसं चंदे[४] केणं णक्खत्तेणं जोएति ? (ता) उत्तराहिं फग्गुणीहिं, उत्तराणं फग्गुणीणं चत्तालीसं मुहुत्ता पण[ताली](ती)सं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता पण्णट्ठिं चुण्णिया भागा सेसा, तं समतं च णं सूरे केणं णक्खत्ते० पुच्छा ? ता उत्तराहिं चेव फग्गुणीहिं, उत्तराणं फग्गुणीणं चत्तालीसं मुहुत्ता तं चेव जाव पण्णट्ठिं चुण्णिया भागा सेसा। ता एतेसि णं पंचण्हं संवच्छराणं तच्चं अमावसं चंदे पुच्छा ? ता हत्थेणं, हत्थस्स णं चत्तारि मुहुत्ता तीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा

---

१. ...कस्य च द्वाषष्टि... - A, F, N, T। २-३. अत्र 'बावट्ठिं' इति मुद्रितसूर्यप्रज्ञप्तौ पाठः, स तु न समीचीनः। ४. चंदे पुच्छा, उत्तराहिं - H।

(छेत्ता) चोवट्ठिं चुण्णिया भागा सेसा, तं समतं च णं सूरे केणं ण० पुच्छा ? ता हत्थेणं चेव, हत्थस्स णं जं चेव चंदस्स। ता एतेसि णं पंचण्हं संवच्छराणं दुवालसमं अमावसं चंदे केण ण० पुच्छा, ता अद्दाहिं, अद्दाणं चत्तारि मुहुत्ता दस त बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता चउप्पण्णं चुण्णिया भागा सेसा, तं समतं च णं सूरे केणं ण० पुच्छा ? ता अद्दाहिं चेव, अद्दाणं चत्तारि जं चेव चंदस्स०। ता (ए)तेसि णं पंचण्हं संवच्छराणं चरिमबावट्ठिं अमावसं चंदे केणं पुच्छा ? ता पुणव्वसुणा, पुणव्वसुस्स णं बावीसं मुहुत्ता छत्तालीसं[१] च बावट्ठिभागा[२] मुहुत्तस्स सेसा, तं समतं च णं सूरे केणं ण० पुच्छा ? (ता) पुणव्वसुणा चेव, पुणव्वसुस्स णं बावीसं मुहुत्ता छत्तालीसं च बावट्ठिभागा मुहुत्तस्स सेसा।

टी० 'ता एएसि ण'मित्यादि सुगमम्। भगवानाह - **'ता असिलेसाहिं'**[३] इत्यादि। **'ता'** इति पूर्ववत्, **अश्लेषाभिः** सह संयुक्तश्चन्द्रः प्रथमामावास्यां परिसमापयति अश्लेषानक्षत्रस्य च षट्तारत्वात्तदपेक्षया बहुवचनम्, तदानीञ्च प्रथमामावास्यापरिसमाप्तिवेलायाम**श्लेषानक्षत्रस्य एको मुहूर्त्तश्चत्वारिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य द्वाषष्टिभागं च सप्तषष्टिधा छित्त्वा षट्षष्टिश्चूर्णिकाभागाः शेषाः**, तथाहि- स एव ध्रुवराशिः ६६।५।१ प्रथमामावास्या किल सम्प्रति चिन्त्यमाना वर्त्तते इत्येकेन गुण्यते, एकेन च गुणितं तदेव भवतीति तावानेव जातः। तत एतस्मात् **'बावीसं च मुहुत्ता छायालीसं बिसट्ठिभागा य एयं पुणव्वसुस्स य सोहेयव्वं हवइ पुण्णमि'**ति वचनात् द्वाविंशतिमुहूर्त्ता एकस्य च मुहूर्त्तस्य

१. 'बायालीसं' इति मुद्रितसूर्यप्रज्ञप्तौ पाठः, स तु न समीचीनः। २. बासट्ठिभागे - R। ३. 'अस्सेसाहिं' - मूले।

षट्चत्वारिंश[ति](त्) द्वाषष्टिभागा इत्येवम्प्रमाणं (पुनर्वसु)शोधनकं शोध्यते। तत्र षट्षष्टिमुहूर्त्तेभ्यो द्वाविंशतिमुहूर्त्ताः शुद्धाः स्थिताः पश्चात् चतुश्चत्वारिंशत् ४४। तेभ्य एकं मुहूर्त्तमपकृ[त](ष्)य तस्य द्वाषष्टिभागाः कृताः, ते द्वाषष्टिभागराशिमध्ये प्रक्षिप्यन्ते, जाता सप्तषष्टिः। तेभ्यः षट्चत्वारिंशत् शुद्धाः, शेषास्तिष्ठन्त्येकविंशतिः। त्रिचत्वारिंशतो मुहूर्त्तेभ्यस्त्रिंशता पुष्यः शुद्धः, स्थिताः पश्चात्त्रयोदशमुहूर्त्ता अश्लेषानक्षत्रं चार्द्धक्षेत्रमिति पञ्चदशमुहूर्त्तप्रमाणम्। तत इदमागतमश्लेषानक्षत्रस्य एकस्मिन्मुहूर्त्ते चत्वारिंश[त](ति) मुहूर्त्तस्य द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य षट्षष्टिभागेषु शेषेषु प्रथमामावास्या परिसमाप्तिमुपगच्छति। सम्प्रत्यस्यामेव प्रथमायाममावास्यायां सूर्यनक्षत्रं पृच्छति **'तं समयं च ण'**मित्यादि सुगमम्। भगवानाह - **'ता असिलेसाहिं चेव'** इत्यादि। इह य एवामावास्यासु चन्द्रनक्षत्रयोगविषये ध्रुवराशिर्यदेव च शोधनकं स एव सूर्यनक्षत्रयोगविषयेऽपि ध्रुवराशिस्तदेव च शोधनकमिति तदेव सूर्यनक्षत्रयोगेऽपि नक्षत्रं तावदेव च तस्य नक्षत्रशेषमिति तदेवाह - **अश्लेषाभिर्युक्तः** सूर्यः प्रथमामावास्यां परिसमापयति तस्याश्च परिसमाप्तिवेलायां **अश्लेषाणामेको मुहूर्त्त** एकस्य च **मुहूर्त्तस्य चत्वारिंशत् द्वाषष्टिभागा** एकस्य च द्वाषष्टिभागस्य **षट्षष्टिः** सप्तषष्टिभागाः **शेषाः**। द्वितीयामावास्याविषयं प्रश्नसूत्रमाह- **'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह- **'ता उत्तराहिं'** इत्यादि। **उत्तराभ्यां फाल्गुनीभ्यां** युक्तश्चन्द्रो द्वितीयाममावास्यां परिसमापयति, [1]तदानीं च द्वितीयामावास्यापरिसमाप्तिवेलाया**मुत्तरयोः फाल्गुन्योश्चत्वारिंशन्मुहूर्त्ताः पञ्चत्रिंशत् द्वाषष्टिभागा मुहूर्त्तस्य द्वाषष्टिभागं च सप्तषष्टिधा छित्त्वा** तस्य सत्काः **पञ्चषष्टिश्चूर्णिकाभागाः शेषाः**, त[दा](था)हि- स एव ध्रुवराशिः ६६।५।१ द्वाभ्यां गुण्यते, जातं द्वात्रिंशदधिकं मुहूर्त्तानां शतमेकस्य मुहूर्त्तस्य द्वाषष्टिभागा दश एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य द्वौ चूर्णिकाभागौ १३२।१०।२। तत्र प्रथमतः

१. तदानीं द्वितीया.... - G।

पुनर्वसुशोधनकं शोध्यते द्वात्रिंशदधिकमुहूर्त्तशतात् द्वा[त्रिं](विं)शतिमुहूर्त्ताः शुद्धाः स्थितं पश्चाद्दशोत्तरं शतं, तेभ्योऽप्येको मुहूर्त्तो गृहीत्वा द्वाषष्टिभागीक्रियते कृत्वा च ते द्वाषष्टिभागा द्वाषष्टिभागराशौ प्रक्षिप्यन्ते, जाता द्विसप्ततिर्द्वाषष्टिभागास्तेभ्यः षट्चत्वारिंशत् शुद्धा, स्थिता पश्चात् ष[ट्त्रिं]त्रिं(ड्विं)शतिः। नवोत्तराच्च मुहूर्त्तशतात् त्रिंशता पुष्यः शुद्धः, स्थिता पश्चादेकोनाशीतिः। ततोऽपि पञ्चदशभिर्मुहूर्त्तैरश्लेषाः शुद्धाः, स्थिता पश्चाच्चतुःषष्टिः। ततोऽपि त्रिंशता मघाः शुद्धाः, स्थिता चतुस्त्रिंशत्। ततोऽपि त्रिंशता पुर्वफाल्गुनी शुद्धा, स्थिताः पश्चाच्चत्वारः, उत्तरफाल्गुनीनक्षत्रं च द्व्यर्द्धक्षेत्रमिति पञ्चचत्वारिंशन्मुहूर्त्तप्रमाणम्। तत इदमागतमुत्तरफाल्गुनीनक्षत्रस्य चन्द्रयोगमुपागतस्य चत्वारिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पञ्चत्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य पञ्चषष्टौ चूर्ण्णिकाभागेषु शेषेषु द्वितीयामावास्या समाप्तिं याति। सम्प्रत्यस्याममावास्यायां सूर्यनक्षत्रं पृच्छति- **'तं समयं च ण'**-मित्यादि सुगमम्। भगवानाह- **'ता उत्तराहिं'** इत्यादि। (**'ता'**) इति पूर्ववत् **उत्तराभ्यामेव फाल्गुनीभ्यां** युक्तः सूर्यो द्वितीयाममावास्यां परिसमापयति, तदानीं च द्वितीयामावास्यापरिसमाप्तिवेलाया**मुत्तरयोः फाल्गुन्योश्चत्वारिंशन्मुहूर्त्ताः** - **'तं चेव जाव'** त्ति वचनादेकस्य मुहूर्त्तस्य पञ्चत्रिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य **'पन्नट्ठिं चुण्णिया' (पञ्चषष्टिश्चूर्ण्णिका)भागाः** - सप्तषष्टिभागाः **शेषाः**, एतच्चोभयोरपि चन्द्रसूर्ययोर्नक्षत्रयोगपरिज्ञानहेतोः करणस्य समानत्वादवसेयम्। तृतीयामावास्याविषयं प्रश्नसूत्रमाह- **'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह - **'ता हत्थेण'**मित्यादि। **हस्तेन** युक्तश्चन्द्रस्तृतीयाममावास्यां परिसमापयति, तदानीं च **हस्तनक्षत्रस्य चत्वारो मुहूर्त्तास्त्रिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य द्वाषष्टिभागमेकं सप्तषष्टिधा छित्त्वा** तस्य सत्काश्चतुःषष्टिः **चूर्ण्णिकाभागाः शेषाः**, तथाहि - स एव ध्रुवराशिः ६६।५।१ तृतीयस्या अमावास्यायाः सम्प्रति चिन्तेति त्रिभिर्गुण्यते, जातमष्टानवत्यधिकं मुहूर्त्तानां शतं एकस्य च मुहूर्त्तस्य पञ्चदश द्वाषष्टिभागा एकस्य

च द्वाषष्टिभागस्य त्रयः सप्तषष्टिभागाः १९८।१५।३। तत एतस्मात् द्विसप्तत्यधिकेन मुहूर्त्तशतेन षट्चत्वारिंशता च मुहूर्त्तस्य द्वाषष्टिभागैः पुनर्वस्वादीन्युत्तरफाल्गुनी-पर्यन्तानि नक्षत्राणि शुद्धानि, पञ्चादवतिष्ठन्ति पञ्चविंशतिः मुहूर्त्ता एकस्य च मुहूर्त्तस्य एकत्रिंशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयः सप्तषष्टिभागाः २५।३१।३। तत आगतं हस्तनक्षत्रस्य चन्द्रेण सह योगमुपागतस्य चतु[र्थे](र्षु) मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुःषष्टौ सप्तषष्टिभागेषु शेषेषु तृतीया[म]मावास्[यां](या) परिसमा[पय](प्पि या)ति। अत्रैव सूर्यविषयं प्रश्नमाह - **'तं समयं च ण'**मित्यादि सुगमम्। भगवानाह- **'ता हत्थेणं चेव'**त्ति। **हस्तेनैव** नक्षत्रेण युक्तः सूर्योऽपि तृतीयाममावास्यां परिसमापयति, एतच्चोभयोरपि करणस्य समानत्वादवसेयम्। एवमुत्तरसूत्रयोरपि द्रष्टव्यम्। शेषविषयेऽतिदेशमाह- **'हत्थस्स जं चेव (चंदस्स)'** चन्द्रस्य विषये (यत्) शेषमुक्तं तदेव सूर्यस्यापि विष[यं](ये) वक्तव्यम्। तच्चैवं **'हत्थस्स चत्तारि मुहुत्ता तीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता [बा](चो)वट्ठिं चुण्णिया भागा सेसा'** इति। सम्प्रति द्वादशामावास्याविषयं प्रश्नमाह **'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह- **'ता अद्दाहिं'** इत्यादि। **आर्द्रया** युक्तश्चन्द्रो द्वादशीममावास्यां परिसमापयति, तदानीं **चार्द्रायाश्चत्वारो मुहूर्त्ता दश च मुहूर्त्तस्य द्वाषष्टिभागा द्वाषष्टिभागं च सप्तषष्टिधा छित्त्वा चतुष्पञ्चाशत् चूर्ण्णिकाभागाः शेषाः**, तथाहि- स एव ध्रुवराशिः ६६।५।१ द्वादश्यामावास्या चिन्त्यमाना वर्त्तते इति द्वादशभिर्गुण्यते, जातानि सप्त शतानि द्विनवत्यधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य षष्टिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य द्वादश सप्तषष्टिभागाः ७९२।६०।१२। [१]एतस्माच्चतुर्भिः शतैः द्विचत्वारिंशदधिकैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य षट्चत्वारिंशता द्वाषष्टिभागैः पुनर्वस्वादीन्युत्तराषाढापर्यन्तानि नक्षत्राणि शुद्धानि, स्थितानि पश्चात्

१. तस्माच्च ... - T।

त्रीणि शतानि पञ्चाशदधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्दश द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य द्वादश सप्तषष्टिभागाः (३५०।१४।१२। ततस्त्रिभिः शतैर्नवोत्तरैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि रोहिणीपर्यन्तानि शुद्धानि, स्थिताः पञ्चाच्चत्वारिंशन्मुहूर्त्ताः एकस्य च मुहूर्त्तस्य एकपञ्चाशत् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयोदश सप्तषष्टिभागाः) ४०।५१।१३। ततस्त्रिंशता मुहूर्त्तैर्मृगशिरः शुद्धम्, स्थिताः पञ्चादश मुहूर्त्ताः, शेषं तथैव १०।५१।१३। तत आगतमार्द्रानक्षत्रस्य चन्द्रेण सह संयुक्तस्य चतुर्षु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य दशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुष्पञ्चाशति सप्तषष्टिभागेषु शेषेषु द्वादशी अमावस्या परिसमाप्तिमियर्त्ति। सम्प्रति सूर्यविषयं प्रश्नमाह- **'तं समयं च ण'**मित्यादि सुगमम्। भगवानाह- **'ता अद्दाए[1] चेव' आर्द्रयैव** युक्तः सूर्योऽपि द्वादशीममावास्यां परिसमापयति, शेषपाठविषयेऽतिदेशमाह- **'अद्दाए[2] जं चेव चंदस्स य तं चेव'** चन्द्रस्य विषये आर्द्राया (यत्) शेषमुक्तं तदेव सूर्यविषयेऽपि वक्तव्यम्, (तच्चैवं) **'अद्दाए चत्तारि मुहुत्ता दस य बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता चउप्पन्नं चुण्णिया भागा सेसा'** इति। चरमद्वाषष्टितमामावास्याविषयं प्रश्नसूत्रमाह- **'ता एएसि ण'**मित्यादि सुगमम्। भगवानाह- **'ता पुणव्वसुणा'** इत्यादि। **'ता'** इति पूर्ववत्, **पुनर्वसुना** युक्तश्चन्द्रः चरमां (द्वाषष्टितमाममावास्यां परिसमापयति, तदानीञ्च चरमद्वाषष्टितमामावास्यापरिसमाप्तिवेलायां **पुनर्वसुनक्षत्रस्य द्वाविंशतिमुहूर्त्ताः षट्चत्वारिंशच्च द्वाषष्टिभागा मुहूर्त्तस्य शेषाः**, तथाहि- स एव ध्रुवराशिः ६६।५।१ द्वाषष्ट्या गुण्यते, जातानि मुहूर्त्तानां चत्वारिंशच्छतानि द्विनवत्यधिकानि एकस्य च मुहूर्त्तस्य) द्वाषष्टिभागानां त्रीणि शतानि दशोत्तराणि एकस्य च द्वाषष्टिभागस्य द्वाषष्टिः सप्तषष्टिभागाः ४,०९२।३१०।६२। तत एत-

१. मूले 'अद्दाहिं' इति पाठः। २. मूले 'अद्दाणं चत्तारि जं चेव चंदस्स' इति पाठः।

स्माच्चतुर्भिः शतैर्द्वाचत्वारिंशदधिकैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य षट्चत्वारिंशता द्वाषष्टिभागैः प्रथमं शोधनकं शुद्धम्, जातानि षट्त्रिंशत् शतानि पञ्चाशदधिकानि मुहूर्त्तानामेकस्य च मुहूर्त्तस्य द्वे शते चतुःषष्ट्यधिके द्वाषष्टिभागानामेकस्य च द्वाषष्टिभागस्य द्वाषष्टिः सप्तषष्टिभागाः ३,६५०।२६४।६२। ततोऽभिजिदाद्युत्तराषाढापर्यन्तसकलनक्षत्रपर्यायविषयं शोधनकमष्टौ शतानि एकोनविंशत्यधिकानि मुहूर्त्तानामेकस्य (च मुहूर्त्तस्य) चतुर्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागाः ८१९।२४।६६ इत्येवम्प्रमाणं चतुर्भिर्गुणयित्वा शोध्यते, स्थितानि पश्चात्त्रीणि शतानि चतुःसप्तत्यधिकानि मुहूर्त्तानामेकस्य[1] च मुहूर्त्तस्य चतुःषष्ट्यधिकं शतं द्वाषष्टिभागानामेकस्य च द्वाषष्टिभागस्य षट्षष्टिभागाः ३७४।१६४।६६। ततो भूयस्त्रिभिः शतैः मुहूर्त्तानां नवोत्तरैरेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैः ३०९।२४।६६ अभिजिदादीनि रोहिणीपर्यन्तानि शुद्धानि, स्थितानि पश्चात् सप्तषष्टिर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य षोडश द्वाषष्टिभागाः ६७।१६। ततस्त्रिंशता मुहूर्त्तैर्मृगशिरः पञ्चदशभिरार्द्राः शुद्धाः, स्थिताः पश्चात्शेषा द्वाविंशतिर्मुहूर्त्ताः एकस्य च मुहूर्त्तस्य षोडश द्वाषष्टिभागाः २२।१६। तत आगतं चन्द्रेण सह संयुक्तं पुनर्वसुनक्षत्रं द्वाविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्चत्वारिंशति द्वाषष्टिभागेषु शेषेषु चरमां द्वाषष्टितमामावास्यां परिसमापयति। सूर्यविषयं प्रश्नमाह- **'तं समयं च ण'**मित्यादि सुगमम्। भगवानाह - **'ता पुणव्वसुणा चेव'**। सूर्योऽपि पुनर्व्वसुना [चे](ए)व सह योगमुपागतश्चरमां द्वाषष्टितमामावास्यां परिणम(य)ति, शेषमेव पुनर्वसोराह **'पुणव्वसुस्स णं बावीसं मुहुत्ता'** इत्यादि, एतच्च प्राग्वद्भावनीयं, चन्द्रमसः सूर्यस्य चामावास्याविषये नक्षत्रयोगपरिज्ञानहेतोः करणस्य समानत्वात्।

सम्प्रति यन्नक्षत्रं तादृशनाम[क](कं त)देव [ता] वा तस्मिन्नेव देशेऽन्यस्मिन्वा

---

१. ... कस्य मुहूर्त्तस्य - T।

यावता कालेन भूयश्चन्द्रमसा सह योगमुपागच्छति तावन्तं कालं निर्दिदिक्षुराह-

मू० ता जेणज्ज णक्खत्तेण चंदे जोगं जोएति जंसि देसंसि से णं इमाइं अट्ठ एकूणवीसाइं मुहुत्तसताइं चउव्वीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता [बा](छा)वट्ठिं चुण्णिया भागा सेसा उवाइणावेत्ता पुणरवि से चंदे अण्णेण तारिसतेणं चेव णक्खत्तेणं जोगं जोगेति अण्णंसि देसंसि। ता जेणज्ज णक्खत्तेणं चंदे जोगं जोगेति जंसि देसंसि से णं इमाइं सोलस अट्ठतीसाइं मुहुत्तसताइं अगुणपण्णं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिधा छेत्ता पण्णट्ठिं चुण्णिया भागे उवाइणावेत्ता पुणरवि से चंदे तेणं णक्खत्तेणं जोगं जोगेति अण्णंसि देसंसि। ता जेणज्ज णक्खत्तेण चंदे जोगं जोगेति जंसि देसंसि से णं इमाइं चउप्पण्ण-मुहुत्तसहस्साइं णव य मुहुत्तसयाइं उवाइणावेत्ता पुणरवि से चंदे अण्णेण तारिसतेणं चेव णक्खत्तेणं जोगं जोएति तंसि देसंसि। ता जेणज्ज णक्खत्तेणं चंदे जोगं जोगेति जंसि देसंसि से णं इमं एगं मुहुत्तसयसहस्सं अट्ठाणउतिं च मुहुत्तसते उवाइणावेत्ता पुणरवि से चंदे तेणं चेव नक्खत्तेणं जोगं जोएति तंसि देसंसि। ता जेणज्ज णक्खत्तेणं सूरिए जोगं जोएति जंसि देसंसि से णं इमाइं तिण्णि छावट्ठाइं रातिंदियसताइं उवाइणावेत्ता पुणरवि से सूरे अण्णेणं तारिसतेणं चेव णक्खत्तेणं जोगं जोएति तंसि देसंसि। ता जेणज्ज नक्खत्तेणं सूरे जोगं जोएइ जंसि देसंसि से णं इमाइं सत्त दुवत्तीसाइं रातिंदियसताइं उवाइणावेत्ता पुणरवि से सूरे तेणं चेव णक्खत्तेणं

१. योगमुपगच्छति - H, K, T। २. सरिसतेणं - U। ३. उवचिणावेत्ता - O, P। ४. उवचिणावेत्ता - P। ५. तारिसेणं - U। ६. उवचिणावेत्ता - O, P, R, V। ७. उवचिणावेत्ता - O। ८. 'दुवीसं' इति मुद्रितसूर्यप्रज्ञप्तौ पाठः, स तु न समीचीनः। ९. उवचिणावेत्ता - O, P।

जोगं जोएति तंसि देसंसि। ता जेणज्ज णक्खत्तेणं सूरे जोगं जोएति जंसि देसंसि से णं इमाइं अट्ठारसतीसातिं[१] रातिंदियसताइं उवाइणा-वेत्ता[२] पुणरवि से सूरे अण्णेणं तारिसतेणं[३] चेव णक्खत्तेणं जोगं जोएति तंसि देसंसि। ता जेणज्ज णक्खत्तेणं सूरे जोगं जोएति जंसि देसंसि से णं इमाइं छत्तीसं सट्ठाइं रातिंदियसताइं उवाइणावेत्ता पुणरवि से सूरे तेणं चेव णक्खत्तेणं जोगं जोएति तंसि देसंसि।

टी० 'ता जेणं[४] अज्ज णक्खत्तेण'मित्यादि। 'ता' इति पूर्ववत्, **येन नक्षत्रेण** सह **चन्द्रो अ[न्यो](द्य)** विवक्षिते दिने **योगं युनक्ति** - करोति **यस्मिन्देशे स** च[न्द्रे](न्द्रो) **'ण'**मिति वाक्यालङ्कारे, **इमानि** वक्ष्यमाणसङ्ख्याकानि तान्येवाह- **अष्टौ मुहूर्त्तशतानि एकोनविंशानि**-एकोनविंशत्यधिकानि एकस्य च **मुहूर्त्तस्य चतुर्विंशतिं द्वाषष्टिभागान्** एकस्य च **द्वाषष्टिभागस्य षट्ष[ष्टिभागस्य](ष्टिं)** [षट्](सप्त)षष्टिभागा**नुपादाय** गृहीत्वाऽतिक्रम्य इत्यर्थः **पुनरपि स**[ह] **चन्द्रो अन्येन** द्वितीयेन सदृशनाम्ना **नक्षत्रेण योगं युनक्ति अन्यस्मिन्** (**देशे**)। इयमत्र भावना- इह चन्द्रसूर्यनक्षत्राणां मध्ये नक्षत्राणि सर्वशीघ्राणि, तेभ्यो मन्दगतयश्चन्द्रमसः, एतच्चाग्रे स्वयमेव प्रपञ्चयिष्यति, षट्पञ्चाशच्च नक्षत्राणि प्रतिनियतापान्तरालदेशानि चक्रवालमण्डलतया व्यवस्थितानि सदैव एकरूपतया परिभ्रमन्ति[५]। तत्र किल युगस्यादावभिजिता नक्षत्रेण सह (पुरतो) योगमधिगच्छति चन्द्र[मसः](माः) स च तथायोगमुपागतः सन् शनैः २ पश्चादवष्वष्कते, तस्य नक्षत्रेभ्योऽतीव मन्दगतित्वात्। ततो नवानां मुहूर्त्तानामेकस्य च (मुहूर्त्तस्य चतुर्विंशतेर्द्वाषष्टिभागानामेकस्य च) द्वाषष्टिभागस्य षट्षष्टेः सप्तषष्टिभागानामतिक्रमे पुरतः श्रवणेन सह योगमायाति। तत[श्चन्द्रो](स्ततो)ऽपि शनैः २ पश्चादवष्वष्कमानस्त्रिंशता मुहूर्त्तैः श्रवणेन सह योगं

---

१. '....वीसाइं' इति मुद्रितसूर्यप्रज्ञप्तौ पाठः, स तु न समीचीनः। २. उवचिणावेत्ता - P, V ३. तारिसेणं - H । ४. जेणज्ज - मूले। ५. भ्रमन्ति - N।

समाप्य पुरतो धनिष्ठया सह योगमधिगच्छति। एवं स्वं स्वं कालमपेक्ष्य सर्वैरपि नक्षत्रैः सह योगस्तावद्वक्तव्यो यावदुत्तराषाढानक्षत्रयोगपर्यन्तः। [१]एतावता च कालेना-[सौ](ष्टौ) मुहूर्त्तशतान्ये[कस्य](कोनविंशत्यधिकान्येकस्य) च मुहूर्त्तस्य चतुर्विंश-तिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागा अभवन्, तथाहि - षड् नक्षत्राणि पञ्चचत्वारिंशन्मुहूर्त्तानीति षट् पञ्चचत्वारिंशता गुण्यन्ते, जाते द्वे शते सप्तत्यधिके २७०, षड् नक्षत्राणि पञ्चदशमुहूर्त्तानि, ततो भूयः षण्णां पञ्चदश-भिर्गुणनात् जाता नवतिः ९०, पञ्चदश [भिस्]त्रिंशन्मुहूर्त्तानीति पञ्चदश त्रिंशता गुण्यन्ते, जातानि चत्वारि शतानि पञ्चाशदधिकानि ४५०, अभिजितो नव मुहूर्त्ता एकस्य च मुहूर्त्तस्य चतुर्विंशतिर्द्वाषष्टिभागा [२]एकस्य द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टि-भागा इति भवति सर्वेषामे[वा](क)त्र मीलने यथोक्ता मुहूर्त्तसङ्ख्या। एतावान्नक्षत्र-मासः। ततस्तदनन्तरं यदभिजिन्नक्षत्रमतिक्रान्तं तदपरेण द्वितीयेनाभिजिता नक्षत्रेण सह नवमुहूर्त्तादिकालं योगमुपागच्छति। ततः परमपरेण द्वितीयाष्टाविंशतिसम्बन्धिना श्रवणेन सह [३]योगमश्नु[व]ते। एवं पूर्ववत् वाच्यं यावदुत्तराषाढा। तदनन्तरं भूयः प्रथमेनैवाभिजिता नक्षत्रेण सह योगं याति। ततः प्रागुक्तक्रमेण श्रवणादिभिः। एवं सकलकालमपि। ततो विवक्षिते दिने यस्मिन्देशे येन नक्षत्रेण सह योगमगमच्चन्द्रमाः स यथोक्तमुहूर्त्तसङ्ख्यातिक्रमे भूयस्तादृशेनैवापरेण नक्षत्रेण सहान्यस्मिन्नेव देशे योगमादत्ते न तेनैव [म](नाऽ)पि तस्मिन्नेव देशे (इ)ति। तथा (**ता**) [ये](**जे**[४])**ण**'-मित्यादि। **अद्यविवक्षिते दिने येन नक्षत्रेण** सह **योगं युनक्ति (यस्मिन्देशे) चन्द्रमाः स इमानि** वक्ष्यमाणसङ्ख्याकानि, तान्येवाह **षोडश मुहूर्त्तशतानि अष्टात्रिंशदधिकानि एकोनपञ्चाशतं द्वाषष्टिभागान् मुहूर्त्तस्य** एकं च **द्वाषष्टिभागं सप्तषष्टिधा छित्त्वा** तस्य सत्कान् **पञ्चषष्टिं चूर्णिकाभागानुपादाय**-अतिक्रम्य **पुनरपि स चन्द्रस्तेनैव नक्षत्रेण** सह **योगं युनक्ति,** परमन्यस्मिन्देशे, (न तु)

१. एतावता कालेना... - M । २. एकस्य च द्वाषष्टि.... N। ३. योगमुपगतो - T। ४. जेणज्ज - मूले।

तस्मिन्नेव देशे। कुत इति चेत् ? उच्यते, इह (भूयस्)तस्मिन्नेव देशे तेनैव नक्षत्रेण सह योगो युगद्वयकालातिक्रमे तथा केवलवेदसा ज्योतिश्चक्रगतेरुपलब्[धे](धः)। जम्बूद्वीपे च षट्पञ्चाशदेव नक्षत्राणि, ततो विवक्षितनक्षत्रयोगे स[ही]ति तत आरभ्य षट्पञ्चाशन्नक्षत्राण्यतिक्रम्य तेन नक्षत्रेण सह योगमादत्ते, षट्पञ्चाशन्नक्षत्रा-[णि](ति)क्रमश्च प्रागुक्ताष्टाविंशतिनक्षत्रमुहूर्त्त(सङ्ख्याद्विगुण)सङ्ख्यया, तत उक्तं **'सोलस अट्ठत्तीस मुहुत्तसया'** इत्यादि। तदेवं तादृशेन तेन वा नक्षत्रेण सहान्यस्मिन् देशे यावता कालेन भूयोऽपि योग[मु] (उ)पजायते तावान् कालविशेष उक्तः। सम्प्रति तस्मिन्नेव देशे तादृशेन तेन वा नक्षत्रेण सह भूयोऽपि योगो यावता कालेन भवति तावन्तं कालविशेषमाह **'ता [१]जेणं अज्ज नक्खत्तेण'**मित्यादि। **अद्य** विवक्षिते दिने **येन नक्षत्रेण** सह **योगं चन्द्रो युनक्ति यस्मिन्देशे स** चन्द्रमा **इमानि** वक्ष्यमाणसङ्ख्याकानि तान्येव (आह) **चतुष्पञ्चाशन्मुहूर्त्तसहस्राणि नवमुहूर्त्तशतानि उपादाय**-अतिक्रम्य **पुनरपि स चन्द्रोऽन्येन तादृशेनैव नक्षत्रेण** सह **योगं युनक्ति तस्मिन्नेव देशे**। इयमत्र भावना-विवक्षिते युगे विवक्षिता-नामष्टाविंशतिनक्षत्राणां मध्ये येन नक्षत्रेण सह यस्मिन्देशे यदा चन्द्रमसो योगो जातो भूयस्तस्मिन्नेव देशे तदैव दिने तेनैव नक्षत्रेण सह योगो विवक्षितयुगादारभ्य तृतीये युगे न तु द्वितीये। कुत इति चेत् ? उच्यते, इह युगादित आरभ्य प्रथमे नक्षत्रमासे यान्येकान्यष्टाविंशतिः नक्षत्राणि समतिक्रामन्ति द्वितीयेन नक्षत्रमासेन तेभ्योऽपराणि द्वितीयानि, ततो भूयस्तृतीयेन नक्षत्रमासेन तान्येव प्रथमान्यष्टाविंशति-नक्षत्राणि, चतुर्थेन भूयस्तान्येव द्वितीयानि, एवं सकलकालं, युगे च नक्षत्रमासाः सप्तषष्टिः, सा च सप्तषष्टिसङ्ख्या विष[ये](मेति) विवक्षितयुगपरिसमाप्तौ सत्या-मन्यस्य युगस्य प्रारम्भे यानि विवक्षितयुगस्यादौ भुक्तानि नक्षत्राणि तेभ्योऽपराण्येव द्वितीयानि भोगमायान्ति न तु तान्येव, युगद्वये च चतुस्त्रिंशन्नक्षत्रमासशतं भवति,

१. जेणज्ज - मूले।

सा च चतुस्त्रिंशन्नक्षत्रमासशतसङ्ख्या समेति द्विती[ये](य)युगपरिसमाप्तौ षट्पञ्चाशदपि नक्षत्राणि समाप्तिमुपयान्ति[१]। ततो विवक्षितयुगादारभ्य तृतीये युगे तेनैव नक्षत्रेण तस्मिन्नेव देशे तदा चन्द्रमसो योगः, युगे चाऽहोरात्राणामष्टादशशतानि त्रिंशदधिकानि, एकैकस्मिंश्चाहोरात्रे मुहूर्त्तास्त्रिंशत्, ततोऽष्टादशानां[२] शतानां त्रिंशदधिकानां त्रिंशता गुणने भवति यथोक्ता (मुहूर्त्तसङ्ख्या, यथोक्त)मुहूर्त्तसङ्ख्यातिक्रमे[३] च तादृशेनैव नक्षत्रेण सह योगः चन्द्रमसः तस्मिन्नेव देशे न तु तेनैव[४] नक्षत्रेणान्यस्मिन्वादेशे इति। **'ता जेण[५]'**मित्यादि। इदं सूत्रमक्षरार्थमधिकृत्य सुगमम्। भावना तु प्रागेव कृता, नवरं युगद्वयकालः षट्त्रिंशच्छतानि षष्ट्यधिकानि रात्रिन्दिवानामेकैकस्मिंश्चाहोरात्रे त्रिंशत् मुहूर्त्ता इति षट्त्रिंशच्छतानां षष्ट्यधिकानां त्रिंशता गुणने यथोक्ता मुहूर्त्तसङ्ख्या भवति। त[मे](दे)वं तादृशेन तेन वा नक्षत्रेण सह अन्यस्मिन् तस्मिन्वा देशे चन्द्रमसो योगे कालप्रमा[णे](णं) उक्तम्। साम्प्रति सूर्यविषये तदाह - **'ता जे[सि]ण[६]'**मित्यादि। **'ता'** इति पूर्ववत्, **अद्य** विवक्षिते दिने **येन नक्षत्रेण** सह **सूर्यो यस्मिन्देशे योगं युनक्ति स इमानि त्रीणि षट्षष्ट्यधिकानि रात्रिन्दिवशतानि उपादाय** - अतिक्रम्य **पुनरपि स सूर्यस्तस्मिन्नेव देशे तादृशेनैवाऽन्येन नक्षत्रेण योगं युनक्ति** न तु तेनैव। कुत इति चेत् ? उच्यते, इह चन्द्रो नक्षत्रमासेनैकेनाष्टाविंशतिनक्षत्राणि भुङ्क्ते, सूर्यस्तु त्रिभिरहोरात्रशतैः (षट्षष्ट्यधिकैः, त्रीणि चाहोरात्रशतानि) षट्षष्ट्यधिकानि एकः सूर्यसंवत्सरः, ततोऽन्यैस्त्रिभिरहोरात्रशतैः षट्षष्ट्यधिकैरन्यानि द्वितीयानि अष्टाविंशतिनक्षत्राणि परिभुङ्क्ते, तदनन्तरं भूयस्तान्येव प्रथमान्यष्टाविंशतिनक्षत्राणि तावत्याहोरात्रसङ्ख[या](य)या क्रमेण युनक्ति। ततः षट्षष्ट्यधिकरात्रिन्दिवशतत्रयातिक्रमेण सूर्यस्(य) तस्मिन्नेव देशे तादृशेनैवाऽपरेण द्वितीयेन नक्षत्रेण सदृशनाम्ना योगो न तु तेनैव। **'ता**

---

१. .....मुपयन्ति - G, J, T। २. ....ष्टादशशतानां - T। ३. ....क्रमे तादृशेनैव - G, T। ४. तेन - J। ५,६. जेणञ्ज - मूले।

[1]**जेण**'मित्यादि। इदं सूत्रमक्षरार्थमधिकृत्य सुगमम्, भावना तु प्रागेव कृता। **'ता** [2]**जेण**'मित्यादि। **'ता'** इति पूर्ववत् **अद्य**-विवक्षिते दिने **येन नक्षत्रेण** सह **सूर्यो यस्मिन्देशे योगं युनक्ति स इमानि अष्टादशरात्रिन्दिवशतानि त्रिंशदधिकानि उपादाय** - अतिक्रम्य **पुनरपि तस्मिन्नेव देशेऽन्येनैव तादृशेन नक्षत्रेण** सह **योगं युनक्ति,** न तु तेनैव। कस्मादिति चेत् ? (उच्यते,) इह रात्रिन्दिवानामष्टादशशतानि त्रिंशदधिकानि युगे भवन्ति। तत्र सूर्यो विवक्षितदिनादारभ्य तस्मिन्नेव देशे तदैव दिने तेनैव नक्षत्रेण सह योगमागच्छति तृतीये संवत्सरे, युगे च सूर्यवर्षाणि पञ्च, ततस्तृतीये पञ्चमे (वा) सूर्यसंवत्सरे सूर्यस्[य]तेनैव नक्षत्रेण तस्मिन्नेव काले योगमादत्ते न तु युगातिक्रमे षष्ठे वर्षे इति। **'ता** [3]**जेण**'मित्यादि सुगमम्, नवरं षट्त्रिंशद् रात्रिन्दिवशतानि षष्ट्यधिकानि युगद्वये भवन्ति, युगद्वये च दश सूर्यवर्षा(ग्रन्थाग्रं ६०००)णि, ततो युगद्वयातिक्रमे एकादशे वर्षे सूर्यस्य तेनैव नक्षत्रेण सह तस्मिन्नेव देशे योग उपपद्यते इति [चेत्]।

इह जम्बूद्वीपे द्वौ चन्द्रमसौ द्वौ सूर्यौ, एकैकस्य च चन्द्रमसो भिन्नो ग्रहादिकः परिवार इति श्रुत्वा कश्चिदेवमपि मन्यते यथा भिन्नकालं मण्डलेषु चन्द्रादीनां गतिर्भिन्नकालं च तेषां नक्षत्रादिभिः सह योग इति। ततस्तदाशङ्कापनोदार्थमाह –

मू० ता जता णं इमे चंदे गतिसमावण्णे भवति तता णं इतरेवि चंदे गतिसमावण्णे भवति, जता णं इतरे वि चंदे गतिसमावण्णे भवति तता णं इमे वि चंदे गतिसमावण्णे भवति। ता जया णं इमे सूरिए गइसमावन्ने भवइ तता णं इतरे वि सूरिए गतिसमावन्ने भवइ, जया णं इअरे सूरिए गइसमावन्ने भवइ तया णं इमे वि सूरिए गइसमावन्ने भवइ। एवं गहेवि। एवं णक्खत्तेवि। ता जता णं इमे चंदे जुत्ते जोएणं भवति तता णं इतरे वि चंदे जुत्ते जोगेणं

१,२,३. जेणज्ज - मूले।

भवति, जया णं इअरे चंदे जुत्ते जोगेणं भवइ तया णं इमे वि चंदे जुत्ते जोगेणं भवइ। जहा चंदे एवं सूरे वि गहे णक्खत्ते भाणितव्वे। सता वि णं चंदा जुत्ता जोएणं, सता वि णं सूरा जुत्ता जोएणं, सता वि गहा जुत्ता जोएणं, सता वि णं णक्खत्ता जुत्ता जोएणं, दुहतो वि णं चंदा जुत्ता जोगेहिं, दुहतो[१] वि णं सूरा जुत्ता जोगेहिं, दुहतो वि णं गहा जुत्ता जोगेहिं, दुहतोवि णं णक्खत्ता जुत्ता जोगेहिं। मंडलं सतसहस्सेणं अट्ठाणउतिसतेहिं छेत्ता इच्चेसे णक्खत्तखेत्तप-विभागे णक्खत्तविजए णामं पाहुडे आहिए त्ति बेमि।

दसमस्स बावीसतिमं। दसमं पाहुडं सम्मत्तं १०।

टी० **'ता जया ण'**मित्यादि। **'ता'** इति पूर्ववत्, **यदा** यस्मिन् काले **अयं** प्रत्यक्षत उपलभ्यमानो भरतक्षेत्रं प्रकाशयन् विवक्षितश्चन्द्रो विवक्षिते मण्डले इति गम्यते **गतिसमापन्नो**-गतियुक्तो **भवति तदा**-तस्मिन्काले **इतरोऽपि**- ऐरवतं क्षेत्रं प्रकाशयन् (**चन्द्रः**) तस्मिन्नेव विवक्षिते मण्डले **गतिसमापन्नो भवति**, एवं शेषाण्यपि सूत्राणि भावनीयानि, नवर**'मेवं गहे वि एवं नक्खत्ते वि'** त्ति **एवमुक्तेन** प्रकारेण **ग्रहेऽपि** द्वावालापकौ वक्तव्यौ **नक्षत्रेऽपि** च, तद्यथा **'(ता) जया णं इमे गहे गतिसमावन्ने भवति तया णं इयरे वि गहे गइसमावन्ने भवइ, ता जया णं इयरे गहे गइसमावन्ने भवइ तया णं इमे वि गहे गइसमावन्ने भवइ।'** एवं नक्षत्रेऽपि वाच्यम्। **'ता जया णं इमे चंदे जुत्ते जो[ग](गेण)'**-मित्यादि सुगमम्। नवरं **'दुहतोवि'** त्ति उभयतोऽपि दक्षिणोत्तरयोः पूर्वपश्चिमयोर्वा। **'मण्डलं सयसहस्सेण'**मित्यादि। अस्मिन्नक्षत्रविचये **नक्षत्रविचयनाम्नि द्वाविंश-तितमे प्राभृतप्राभृते इत्येष[२] नक्षत्र(क्षेत्र)[३]परिभाग आख्यातो** मण्डलं स्वेन स्वेन

१. एवं सूरा२ गहा३ णक्खत्ता४ जोतेणं णेयव्वा - U। २. इत्येवं - E। ३. नक्खत्तखेत्तपविभागे - मूले।

कालेन षट्पञ्चाशता नक्षत्रैर्यावन्मात्रं क्षेत्रं व्याप्यमानं सम्भाव्यते तावन्मात्रं बुद्धिपरिकल्पितं **शतसहस्रेणाष्टानवत्या च शतैश्छित्त्वा**-विभज्य आख्यातः। एतच्च प्रागेव [भवन्ति] (भावितं), **'त्ति बेमि' इति** एतत् अनन्तरोक्तं भगवदुपदेशेन **ब्रवीमी**ति ग्रन्थकारवचनमेतत्, यद्वा भगवद्वचनमेतत् शिष्याणां प्रत्ययदाढ्योत्पादनार्थ**मिति** एतत् अनन्तरोक्तमहं **ब्रवीमि**, ततः सर्वं सत्यमिति प्रत्येतव्यमिति।

इति श्रीमलयगिरिविरचितायां चन्द्रप्रज्ञप्टिीकायां दशमस्य प्राभृतस्य द्वाविंशतितमं प्राभृतप्राभृतं समाप्तम्, दशमं प्राभृतं समाप्तम्।

* * * * *

यथेह लवणाम्भोभिः, पूरितो लवणोदधिः।
शारीरमानसैर्दुःखै-रसङ्ख्येयैस्तथा भवः॥

यथाऽमृतरसास्वादी, नान्यत्र रमते जनः।
तथा मुक्तिसुखाभिज्ञो, रज्यते न सुखान्तरे॥

गुर्वायत्ता यस्मा-च्छास्त्रारम्भा भवन्ति सर्वेऽपि।
तस्माद्गुर्वाराधन-परेण हितकाङ्क्षिणा भाव्यम्॥

सुखमास्से सुखं शेषे, भुङ्क्षे पिबसि खेलसि।
न जाने त्वग्रतः पुण्यै-र्विना ते किं भविष्यति॥



इति

पुव्वायरियविरइयं

चंदपण्णत्तिसुत्तं

(चन्द्रप्रज्ञप्तिसूत्रम्)

आचार्यप्रवरश्रीमलयगिरिसूरिविरचितवृत्तिविभूषितम्

प्रथमो भागः

सम्पूर्णः

